२२ । अथ लघुद्वयरूपस्य गणस्य नामान्याह ॥ णिअपीति ॥ निजप्रियः परमः सुप्रियो द्विलघोरिति समासगतः कथितानि । अथ चतुष्कलस्य गणस्य प्रतिसंज्ञं नामान्याह ॥ अह ॥ अथ चतुर्मात्रस्य नामानि फणिराजः प्रतिगणं भणति ॥ २२ ॥ (G).

२१-२२ । १ अह दुकलानां नामाइ । (B). २ परम (F). ३ सुपिर (A, B & C). ४ विलङ्क (B, C & F). ५ तिणामं (B & C), त्ति (F). ६ समासु (B & C). ७ कउदिट्ठं (B), कहिअं (F). ८ फणिराअ (F). ९ पठइ (A). १० सुरअलअं (A & D), सुरअलआ (F). ११ रसलग्गं (D & F). १२ लहलहिअं (D), लहलहिअउ (F). १३ तास (B & D), तासु (C).

अह अंतगुरु णामाइँ ।[१]
कर पाणि कमल[२] हत्थं[३]
बाहू[४] भुअदंड[५] पहरण असणिअं[६] ।
गअभरण रअण णाणा[७]
भुअभरणं होइ[८] सुपसिद्धं[९] ॥ २४ ॥ गाहा ।

२३ । सुरतनयो गुरुयुगल * * * रसिकः रसनाग्रं । मनोहरणं सुमतिलम्बितः लघुरहितः तस्य वर्णेन ॥ करवलयमिति क्वचिद्गुरुद्वयस्य कर्णेति नाम पूर्व्वोक्तमेतान्यपि तत्समानेन तत्समानार्थकतया ज्ञातव्यानीति शेषः, तस्य वर्णेन चिह्नेन तत्समानार्थकशब्दान्तरेणाप्युच्यत इत्यर्थः । तत्सवर्णेनेति पाठे तत्पर्यायेण । (C).

२३ । सुरेति । सुरतलता गुरुयुगलं कर्णसमानेन रसितं रसलग्नं, मनोहरणं सुमतिलंवितं लहलहिअउ — उत्पन्नप्रायाणां नाम्नेत्यर्थः, अवर्णेन शब्देन कथितमित्यनुसंगच्छ[तद्]ति व्याचख्युः । कर्णेति कर्णपर्यायः श्रुत्यादिरपि, तन्नामोक्तमित्यर्थः । द्विगुरोस्तुष्कलस्यैतानि नामानि ॥ २३ ॥ (G).

२४ । अन्तगुरुनामानि । करः पाणिः कमलं हस्तो बाहो भुजदण्डः प्रहरणम् अशनिः । गजाभरणं रत्नमाला भुजाभरणं

२४ । १ अंतगुरो । (D). २ कमलं (A). ३ हत्थं (A).
४ बाहा (A, B & C), बाहो (D). ५ भुअदण्ड (B & D), भुअदन्न (C).
६ असणीअं (A). ७ माला (C). ८ होत्ति (A, B & D), होन्ति (C).
९ सुपसिद्धाइँ (B).

अह मज्झगुरु णामाइँ ।[1]

भुअवइ अस[2] णर[3] गअवइ[4]

बसुहाहिव[5] रज्जु गोआलो[6] ।

उणाअक[7] चक्कवई[8]

पअहर[9] पवणं[10] णरेंदाइँ[11] ॥ २५ ॥ गाह्रू ।

भवन्ति सुप्रसिद्धानि ॥ वाहोऽश्वः । बाऊरिति कश्चित् । मालेत्यत्र णाणेति पाठान्तरम् । (C).

२४ । अथांतगुरोश्चतुष्कलस्य नामान्याह ॥ कर ॥ करः पाणिः कमलं हस्तो बाहुर्भुजदंडः प्रहरणमशनिः । गजाभरणे रत्नं नाना भुजाभरणं भवति सुप्रसिद्धं ॥ नानेति केयूरादीनि सुप्रसिद्धानि भवंतीत्यर्थः ॥ २४ ॥ (G).

२५ । मध्यगुरोर्नामानि । भुजपतिरश्वनरगजपतिवसुधाधिपा राजा गोपालः । उन्नायकश्चक्रपतिः पयोधरपवननरेन्द्राः ॥ अत्र पति-शब्दस्य प्रत्येकमन्वयादश्वपतिर्नरपतिर्गजपतिरिति सम्प्रदायः । (C).

२५ । मध्यगुरोर्नामान्याह ॥ भूपतिरश्वपतिर्गजपतिर्वसुधाधिपो रज्जुः गोपालः । उन्नायकश्चक्रवर्त्ती पयोधरस्तननरेंद्राः ॥ इति नामानीत्यर्थः ॥ २५ ॥ (G).

---

२५ । १ मध्यगुरो । (D). २ असव (B), अस्स (D). ३ णरा (D), णइ (F). ४ गजवइ (B). ५ वसुहारिव (B). ६ गोवालो (D), गोवलो (F). ७ उणा-यक (B), उणअक (F). ८ चक्कवइ (A, B, C & D). ९ पओहर (B, C & F), पहर (D). १० पणाम (D), थण (F). ११ णरेंदाइ (A), णरेन्दाइ (B), णरेआइ (C), णरिंदाइं (D).

अह आइगुरु णामाइँ ।[१]

पअ पाअ चरणजुअलं
अवरु[२] पआसेइ[३] गंड[४] बलहद्दं[५] ।
ताअ[६] पिआमह दहणं[७]
णेउर[८] रइ जंघजुअलेण[९] ॥ २६ ॥ [गाहा]

अह सव्वलहुअस्स [। । । ।] णामाइँ ।[१०]

पढमं एरिसि[११] विप्पो
बीए सर पंच[१२] जाइ[१३] सिहरेहिं[१४] ।
दिअवर[१५] परमोपाए
होइ चउक्केण लहुएण ॥ २७ ॥ गाहा ।

२६ । आदिगुरुनामानि । पदं पादश्चरणयुगलम् अपरं प्रकाशयति गण्डं बलभद्रं । तातं पितामहं दहनं नूपुरं पतिं जङ्घायुगलेन ॥ प्रकाशयति वदति अर्थात् पिङ्गलः, जङ्घायुगलेन सह । णेउररइ इति पाटे नूपुररुचीत्यर्थः । (C).

२६ । आदिगुरोर्नामान्याह ॥ पअइति ॥ पदं पादश्चरणयुगम् अन्यत् प्रकाशयति गंडो बलभद्रः । तातः पितामहो दहनो नूपुरं रतिर्जंघायुगलेन, सहेति शेषः, तदपि नामेत्यर्थः ॥ २६ ॥ (G).

२६–२७ । १ आदिगुरु णामाइँ । (C). २ अवर (A), अपर (C). ३ पाअदि (D). ४ गण (C). ५ बलहमं (C). ६ ताअ (B), ताहा (C). ७ दगणं (B). ८ उवरइ (C), णेउर (F). ९ जुअलेहि (D). १० सर्व्वलहुअस्सनामाइ ॥ (C), सर्व्वलघो । (D). ११ एरिस (A). १२ पञ्चसर (B & C), सरिपंच (F). १३ जाहि (C). १४ सिहरोहिं (C). १५ पिअवर (B).

अह पंचकलाणं आइलहुअस्स णामाइँ।[१]

सुणरिंद[२] अहिअ[३] कुंजरु[४]

गअवरु[५] दंताइ दंति[६] अह मेहो[७] ।

एरावइ[८] ताराबइ

गअणं झंपं[९] तलंपेण[१०] ॥ २८ ॥ गाहा ।

२७। अथ सर्व्वलघुनामानि ॥ प्रथमम् ईदृशो विप्रः, द्वितीये पञ्चशरः जातिशिखराभ्यां सहेत्यर्थः। द्विजवरः परमोपायो भवति चतुष्केण लघुकेन ॥ ईदृश इति विप्र इति यथा प्रथम-नाम तथा द्वितीये पञ्चशर इत्यर्थः। (C).

२७। चतुर्लघोर्नामान्याह ॥ पढ ॥ प्रथमं विप्र एतादृशो द्वितीयः पंचशरो जातिः शिखरैः। द्विजवरः परम उपायो भवति चतुष्केण लघुकेन ॥ २७। (G).

२८। सुनरेन्द्रः अहितः कुञ्जरगज[वर]दन्तौ दन्ती अथ मेघः। ऐरावतस्तारापतिर्गगनं झम्पस्तुडम्पेन॥ कुञ्जरगज[वर]दन्तावित्यनेन कुञ्जरदन्तो गजवरदन्तश्चेत्युक्तं भवति। तुडम्पेन तुडम्पशब्देन सह, तुडम्पशब्दो झम्पपर्यायः। (C)

२८। १ प्रत्येकं पंचकलानां नामानि। (A), पंचकलानां प्रत्येकं नामानि (D), पंचकलाणं आइलहुअस्स णामाइँ (C). २ सुणरेंद (A, B & C). ३ सरह (B). ४ कुंजर (A, B & C). ५ गअवर (A, B & C). ६ दंता दन्ति (A), दिसाइ दन्ति (B), दिसाइ दन्ति (C), दन्ताइ दंति (D), दंताइ दती (F), ७ अमेहो (F). ८ एरावअ (F). ९ जफं (F). १० तलंपेहि (A), तुलम्पेण (B & C), तलेपेण (F).

अह मज्झलहुअस्स।[१]

पक्खि बिराड[२] मइंदह[३]
बीणा[४] अहि जक्ख अमिअ[५] जोहलअं।
सुप्पस[६] पसगासण[७]
गरुड[८] विआणेहु[९] मज्झ[१०] लहुएण ॥ २९ ॥ उग्गाहा।

२८। अथ पंचकलस्याष्टौ भेदास्तत्र प्रथमभेदस्यादिलघुद्विगुरु-रूपस्य नामान्याह ॥ सुण ॥ सुनरेंद्रोऽधिक-कुंजर-गजवरदंता इति दंतौ च मेघः। ऐराव[त]स्तारापतिर्गगनं उफम् एतत्प्रकारेण ॥ (G).

२९। पक्षिविडालमृगेन्द्रहरिणा अहियचः अमृतं योहल[य]कः। सुपर्णः पन्नगासनो गरुडो विजानीहि मध्यलघुकेन ॥ अहियच-इति नामद्वयम् इति कश्चित्। योऽस्यशब्दोऽप्यत्र वर्त्तत इति बोध्यं। मध्यलघुकेन प्रयुक्तस्य पञ्चकलस्यैतानि नामानीत्यर्थः। अत्र च सुपर्णेति पवनाशनेति केचित्पठन्ति। तत्र विषमे जगणेऽपि मगण-भङ्गः [?] समाधेयो भवति। (C).

२९। मध्यलघोः पंचकलस्य नामान्याह ॥ पक्खि ॥ पक्षी

२९। १ अथ मध्य गुरुकस्य [?] (B), मध्यलघोर्नामानि (D). २ विराल (B & C). ३ मइन्न (C), मद (D), मइंदो (F). ४ चरीणा (B & C), वणा (D). ५ आमिष (B), अमिय (C), अमल (F). ६ सुपस (B, C & D), सुप्पसु (F). ७ पसगासणं (A), पसआसणं (B & C), पसगासणु (F). ८ गुरुअ (B), गरुत (C), गरुडो (F). ९ विआणेह (C), विजाणेह (F). १० मज्झ (D).

बहु विविह पहरणेहिं[1]
पंचकलओ[2] गणो होइ ।
गअ रह तुरंग पाइक्क[3]
एहु[4] णामेण जाण[5] चउमत्ता[6] ॥ ३० ॥ विग्गाहा[7] ।

विराड् मृगेंद्रो वीणा अहिर्यचः अमलं जोहलं । सुपर्णः पन्नगाशनो गरुडो विजानीत मध्यलघुकेन ॥ २९ ॥ (G).

३० । अथ सामान्यतः पञ्चचतुष्कलयोर्नामानि बहुविविहे-त्यादि । बहुविधप्रहरणैः पञ्चकलो गणो भवति । गज-रथ-तुरङ्ग-पादाता एतन्नाम्ना भवति [जानीहि] चतुर्मात्रिकं ॥ बहूनि यानि प्रहरणानि विविधानि अवान्तरभेदयुक्तानि तैस्तद्वाचकशब्दैः पञ्चकलो गणो भवति ॥ (C).

३० । * * * अथ चतुष्कलस्य सामान्यानि नामान्याह, गअ रहेति । गजः रथः तुरगः पद[ा]तिः, एतैर्नामभिः जानीहि चतुर्मात्रिकान् ॥ (E).

३० । पंचकलस्य सामान्यनामान्याहार्धेन ॥ बहु ॥ बहुविविध-प्रहरणैः पंचकलो गणो भवति । अथ सिंहावलोकितन्यायेन

---

३० । पहरणेहिँ (A & B), पहरणे (D). २ पंचकलओ (D), पंचअकलओ (F). ३ पाइक्क (D), पाअक्क (F). ४ एह (D, E & F). ५ होइ (A), जाणु (D), जाणे (F). ६ चउमत्तो (F). Here follows in MS. (C) the following: जह पक्कं सअलपथा[श्व]अला ना[णा]म एदं पूर्व्व[र्व्व]द्धेन [ण] । सअल चतुष्कलाश्चं ना[णा]म एदं परद्धेण ॥ ७ अन्यविपुलोद्गीतिः । Vide Ghosha's Compendium, pp. 7-11.—Ed.

तालंक[1] हार णेउर
केउरओ होंति[2] गुरुभेआ ।
सर मेरु दंड काहल
लहुभेआ होंति[3] एत्ताइ[4] ॥ ३१ ॥ गाहू[5] ।

चतुष्कलनामान्याह अर्धेन । गजो रथस्तुरंगः पावक एभिर्नामभिर्ज्ञेयश्चतुर्मात्रः ॥ ३० । (G).

३१ । गुरुलघुनामान्याह द्वाभ्यां [श्लोकार्द्धाभ्यां] । ताड़ङ्को हारो नूपुरः केयूरकं भवन्ति गुरुभेदाः । सरो मेरुर्दण्डः काहलो लघुभेदा भवन्ति एते ॥ (C).

३१ । अथैकगुरोर्नामान्याह तालंकेति । ताटंका हारा नूपुरं केयूरम् एतानि गुरुभेदाः गुरोर्नामानीति यावत्, होंति— भवंति । अथैकलघोर्नामान्याह, सरेति । सरः मेरुः दंडः काहलः, एत्ताइ—एतानि, लहुभेआ—लघुभेदा लघोर्नामानि, होंति— भवंति । (E).

३१ । गुरुनामान्याह । ताटंकं हारो नूपुरं केयूरं भवंति गुरुभेदाः । लघुनामान्याह सार्धेन ॥ सर ॥ शरुर्मेरुदंडः काहलं लघुभेदा भवंत्येतावंतः ॥ ३१ ॥ (G).

---

३१ । १ ताडंक (F). २ होंति (A & D), होन्ति (B), हन्ति (C). ३ होंति (A & D), होन्ति (B & C). ४ एत्ताई (D & F). ५ Here follows in (C) पूर्व्व[व्व]ार्द्धे गुरुकस्स ना[णा]म एदं । परद्धवुत्तेण लहुअस्स ना[णा]मं ॥

संखं[1] फुल्लं[2] काहल[3]

रवं असेसेहिँ[4] होंति[5] कलअलअं[6] ।

रूअं णाणा कुसुमं

रस गंधं[7] सद्द[8] परसाणं[9] ॥ ३२ ॥ गाहा ।

---

३२ । शंखः काहलः अशेषरववाचकाः कलकलादयः, रूपं नानाकुसुमं रस-गंध-शब्द-स्पर्शाः एतेऽपि लघुसंज्ञाः । (A).

३२ । शङ्खः स्फुटकाहलः रवोऽशेषैर्भवन्ति कलकलकः । रूपं नाना कुसुमं रसो गन्धः शब्दप्रमाणं ॥ एते शब्दा गुरु[?]भेदा गुरु[?]वाचकाः, एवमग्रेऽपि, रवशब्दोऽशेषैर्नामभिः सह भवन्ति लघुवाचकाः शङ्खादयः शब्दाः । कलअलओ इत्यत्र सुपसिद्ध इति क्वचित्पाठः प्रमाणमेतत् ॥ (C).

३२ । शंखः पुष्पं काहलं रवः कनकं लता रूपं नाना कुसुमं पुष्पजातीनां यावंति नामानि तानि सर्वाणीत्यर्थः । रसः गंधः शब्दः एतैः अशेषा लघुभेदा भवंतीत्यनुकर्षः इति प्रमाणं निश्चयः । (E).

३२ । शंखः पुष्पकुलं काहलं रवः अशेषैर्भवति कलकलः । रूपं नाना कुसुमं रसो गंधः शब्दः स्पर्शः ॥ ३२ । (G).

---

३२ । १ शङ्ख (B), संख (C), संक (F). २ फुल (A), फुल्ल (B, C & F). ३ कहारं (A), काहालं (B & C), काहलं (E). ४ असेहि (A), असेसेहिँ (B), असेसेहिं (C), असेसेंहि (D & E). ५ होइ (A), होंति (B), होन्ति (C). ६ कलअलअ (A), करअलअं (D), कणअ लआ (E), कणअलअं (F). ७ गंध (A & E). ८ सद्ध (C), सद्दं (F). ९ परसेण (A), परमाणु (C), परमाणं (D), परिमाण (F).

अह वस्र गणा ।[1]

मो तिगुरू[2] णो तिलहू
लहुगुरुआई[3] जभा[4] ज मज्झगुरू[5] ।
मज्झलहू[6] रो सो उण
अंतगुरू[7] तो वि अंतलहुएण[8] ॥ ३३ ॥ उग्गाहा ।

---

३३ । मस्त्रिगुरुः ऽऽऽ, नस्त्रिलघुः ।।।, लघुगुर्व्वादी यभौ ।ऽऽ, ऽ॥, जो मध्यगुरुः ।ऽ।, मध्यलघू रः ऽ।ऽ, स पुनरन्तगुरुः ।।ऽ, तोऽपि अन्तलघुकेन ऽऽ।, एवमेकगुरुर्ग ए[क]लघुर्ल इत्यपि बोध्यम् । (C).

३३ । अथ वर्णवृत्तोपयोगिनो मगणादीनष्टौ गणानामलक्षणाभ्यामुद्दिशति मोति इति । तिगुरु — त्रिगुरुः गुरुत्रयस्वरूपो यो मगणः ऽऽऽ, तिलहु — त्रिलघुः लघुत्रयस्वरूप इति यावत् णो — नगणः ।।।, आदिलघुगुरू यभौ, तेन आदौ यस्य लघुः स यगणः आदौ यस्य गुरुः स भगणः इत्यर्थः । मध्यगुरुः — यस्य मध्ये गुरुः स जगणः । मध्यलघुः — यस्य मध्ये लघुः ऽ।ऽ स रो — रगणः । अंतगुरुः — यस्य अंते गुरुः स पुनः सो — सगणः । अंतलघुना उपलक्षितः तो — तगणः, यस्यांते लघुः स तगण इत्यर्थः । (E).

---

३३ । १ अथ वर्णगणाः । (A & F). अथ वर्णवृत्तानां गणाः ॥ (D). २ तिगुरु (C, D & E). ३ लहुगुरुआइँ (B), लहुगुरुआई (C), लहुगुरुआइं (D), लहुगुरुआइ (E). ४ यभो (C & E), जभउ (D), यभो (F). ५ मभगुरु (D), मभ्भगुरू (E). ६ मभ्भलहू (E). ७ अन्तगुरू (A), अन्तगुरु (D), dropt in (C). ८ अलहुएण (B), अन्तलहुएण (C), अन्तलहुएण (D).

अह गणदेवता ।

पुहवी जल[१] सिहि[२] पवणं[३]
गअणं सूरो अ चंदमा[४] णाओ ।
गण अट्ठ इट्ठ[५] देओ[६]
जहसंखं[७] पिंगले कहिओ[८] ॥ ३४ ॥ गाहा ।

३३। अथ मादिगणस्वरूपमाऽर्थयाह। मो तीति । मस्त्रिगुरुन-स्त्रिलघुर्लघुगुर्वादी यभौ जो मध्यगुरुः। मध्यलघू रः स पुनरंतगुरु-स्तोऽप्यंतलघुः ॥ ३३ ॥ (G).

३४ । अथ गणानां देवतामाह । पृथिवी जलं शिखी वातो गगनं सूरश्चन्द्रमा नागः । गणानामिष्टदेवा यथासंख्यं पिङ्गलेन कथिताः ॥ वक्ष्यमाणफलदातृत्वं देवतानामेव, अतो देवताकथनम् । (C).

३४ । मनुष्यकविते कविनायकयोर्दैवताकविते देवतानां दुष्प्र-धर्षत्वात्कवेरेव कवित्वस्यादौ दुष्टगणपाते अनिष्टफलप्राप्तिस्त्वात्यर्थं शुभगणपाते शुभफलवृद्धये च तत्त[द्]गणदेवताः पूज्या इति मग-णाद्यष्टगणानां क्रमेण ता आह, पुहवीति । पुहवी — पृथिवी मगणस्य त्रिगुरोः १, जल — जलं नगणस्य त्रिलघोः २, सिहि — शिखी अग्निः यगणस्यादिलघोः ३, कालो भगणस्यादिगुरोः ४, गगनं मध्यगुरोर्जगणस्य ५, सूर्यश्च अंत[मध्य]लघोः रगणस्य ६, चंद्रमा मध्यलघोः [अंतगुरोः] सगणस्य ७, नागा अंतगुरोः[लघोः] तगणस्य ८,

---

३४। १ जलं (C). २ सिहि (B), सिही (C). ३ वाओ (B & C), काओ (D), कालो (E), पवणो (F). ४ चन्द (A, B & C). ५ वइ (A), इच्छइ (E). ६ देव (E & F). ७ संखं (B). ८ कहिओ (B).

मगण णगण दुइ[1] मित्त हो[2]
भगण[3] अगण[4] हो[5] भिच्च ।
उआसीण[6] ज त दुअउ[7] गण
अवसिट्ठउ अरि णिच्च[8] ॥ ३५ ॥ दोहा ।

एते गणाष्टकेऽष्ट देवाः यथासंख्यं पूर्वोद्दिष्टक्रमेण पिंगलेन कथिताः । (E).

२४ । पृथिवी जलं शिखी पवनो गगनं सूरश्चंद्रमा नागः । गणाष्टकस्येष्टदेवता यथासंख्यं पिंगलेन कथिताः ॥ आर्य्या । (G).

३५ । अथ गणेषु मित्रादिकमाह । मगण-नगणौ मित्रे भवतः, यगण-भगणौ भृत्यौ । उदासीनौ ज-तौ द्वौ गणौ, अवशिष्टौ वैरिणौ नित्यम् ॥ अवशिष्टौ सगण-रगणौ । (C).

३५ । वक्ष्यमाणशुभाशुभफलोपोद्घातेन गणानां परस्परस्य मित्रादिभावं कथयति । मगण-नगणौ द्वौ गणौ ऽऽऽ, ।।। मित्रे मित्रसंज्ञाविति यावत् भवतः, भगण-यगणौ द्वौ गणौ ऽ।।, ।ऽऽ भृत्यौ भृत्यसंज्ञौ भवतः, ज-तौ जगण-तगणौ द्वौ उदासीनौ उदासीनसंज्ञौ, अवशिष्टौ रगण-सगणौ अरी शत्रुसंज्ञौ नित्यं भवत इति क्रियापदं द्विवचनांते सर्वत्र योज्यम् । (E).

In MS. (G) the gloss is wanting.

---

३५ । १ दुक्क (B & C). २ होइँ (B), होइ (C & E). ३ जगण (A & B), यगण (C). ४ भगण (A, B & C), यगण (E & F). ५ होइ (B, E & F). ६ उदासीन (F). ७ उभउ (B). ८ णिइ (C).

अह गणफल ।

मगण रिद्धि[1] थिर कज्ज[2] अगण[3] सुह[4] संपअ[5] दिज्जइ
रगण मरण संपलइ[6] जगण खरकिरण[7] विसज्जइ[8] ।
तगण सुस फल कहइ सगण सहदेसु[9]व्वासइ[10]
भगण रचइ[11] मंगल अ[12]णोक[13] कइ[14] पिंगल भासइ[15] ।
जत[16] कव्व गाह दोहइ[17] मुणहु
णगण होइ पढमक्खरइ[18] ।
तसु[19] रिद्धि[20] बुद्धि[21] सव्वउ[22] फुरइ
रण राउल दुत्तर तरइ ॥ ३६ ॥ छप्पअ ।

---

३६ । गणानां फलमाह । मगण ऋद्धिं स्थिरकन्दं स्थैर्यं ददातीत्यर्थः । यगणः सुखसम्पदं ददाति । रगणो मरणं सम्पादयति । जगणः खरकिरणं विसर्ज्जयति, खरकिरणशब्देन उद्वेगा-

---

३६ । १ ऋद्धि (B, C, E & F). २ कव्व (A), कन्द (B), left out in (C) from थिर to रिद्धि in the seventh line. ३ जगण (A & B), यगण (E & F). ४ सह (B). ५ संपइं (A). ६ संपनइ (E). ७ किरणि (D). ८ विसेसइ (F). ९ देशउ (B), देसुउ (D), वासं (F). १० विसज्जइ (F). ११ चवइ (A & D), रचइ (E), कुणइ (F). १२ मंगलचं (A & F). १३ णोण (A), णेग (E), सु (F). १४ इच (B), कवि (D). १५ परिभासइ (F). In MSS. (E) and (F) there is a transposition in the second and third lines.—Ed. १६ जइ (A). १७ कव्वदोहगाहउ (A), कव्वगाहदोहा (D), कव्वगाहादोहइ (E), कव्वहदोहइ (F). १८ पढमक्खरहि (A & B), पढमक्खरइ (D). १९ तसि (F). २० ऋद्धि (B & E). २१ सिद्धि (A). २२ सव्वइ (A), सव्वऊ (C), सयइ (D), सव्व (E).

दिर्लक्ष्यते। तगणः शून्यफलं कथयति। सगणः स्वदेशादुद्वासयति। भगणो रचयति मङ्गलं, जानीहि कविपिङ्गलो भाषते। यावत् काव्यं गाहादोहादिकं जानीहि नगणः प्रथमाक्षरे तस्य ऋद्धिः बुद्धिः सर्व्वत्र स्फुरति, रणे राजकुले दुस्तरं तरति॥ वर्णवृत्तेषु गणप्रतिनियमात् गाहादोहादावित्युक्तं, तत्र प्रथमो नगणश्चेद्भवेत् तदा ऋद्ध्यादिकं स्यादित्यर्थः। सर्व्वश्लोके तथाभावासम्भवे हि प्रथमश्लोकेऽवश्यं कार्य्यम्। (C).

३६। अथ मगणाद्यष्टगणानां काव्यादौ पतने प्रत्येकं फलमाह मगणेति। कविलस्यादौ यदि मगणः पतति, तदा ऋद्धिः कार्यं स्थिरं ददातीत्याकर्षः। यदि यगणः पतति * * * तदा मरणं प्रयच्छति। यदि सगणः पतति, तदा सहवासान्निजदेशादुद्वासयति। यदि तगणः पतति, तदा शून्यं फलं कथयति। यदि जगणः पतति, तदा खरकिरणं संतापं विसर्जयति। भगणः अनेकानि-मंगलानि कथयति। यावत्काव्यगाथादोहास्तत्र प्रथमाक्षरे प्रथमगणो यदि नगणो भवति, तदा तत्र ऋद्धिबुद्धयः सर्वाः स्फुरंति, रणे राजकुले दुस्तरं तरति इति गुणज्ञ जानीत इति कविपिंगलो भाषते। (E).

३६। मगण ऋद्धिं स्थिरकार्यं यगणः सुखं संपत्तिं ददाति, रगणे मरणं संपतति, सगणः सहवासं विसर्जयति, स्वदेशः सहवासः। तगणः शून्यफलं कथयति। जगणः खरकिरणं विशेषयति। भगणः करोति मंगलमनेकं सुकविः पिंगलः परिभाषते। यत्र काव्ये दोहादौ जानीत नगणो भवति प्रथमाक्षरे। तस्य ऋद्धिः बुद्धिः सर्वं स्फुरति, [रणं] राजकुलं दुस्तरं तरति॥ (G).

अह दुगण बिआरो ।[१]

मित्त मित्त दे[२] रिद्धि बुद्धि अरु मंगल दिज्जइ[३]
मित्त भिच्च थिर[४] कंध[५] जुज्झ[६] णिब्भअ[७] जअ[८] किज्जइ[९] ।
मित्त उआसे कज्ज बंध णहि[१०] पुणु[११] पुणु[१२] छिज्जइ[१३]
मित्त होइ जइ[१४] सत्तु गोत्त बंधव[१५] पीडिज्जइ[१६] ।
अरु भिच्च मित्त[१७] सव[१८] कज्ज[१९] हो[२०]
भिच्च भिच्च[२१] आअत्ति[२२] चल[२३] ।
सव[२४] भिच्च उआसे[२५] धणु[२६] णसइ[२७]
भिच्च वइरि[२८] हाकंद[२९] पल[३०] ॥ ३७ ॥ छप्पअ ।

---

३७ । अथ मित्रादियोगात्फलमाह । मित्रान्मित्रमृद्धिं बुद्धिम् अपरं मङ्गलं ददाति, मित्राद्भृत्यः स्थिरकन्दं युद्धे निर्भयं जयं

---

३७ । १ अथ द्विगणविचार। (A & D). २ देइ (A & D). ३ किज्जइ (A). ४ थिर (C). ५ कव्व (A & F), कन्ध (B & C), कळ्ळ (D). ६ जुज्झ (C). ७ णिब्भअ (B & C). ८ जसु (A), ज (D). ९ दिज्जइ (A, B & C). १० बन्ध नहि (B), वध णहि (C), बंध णहिं (D), बंध णाऊ (E), णहि बंध (F). ११ पुण (B, D & E). १२ पुण (D & E). १३ किज्जइ (A, B, C & E). १४ जह (A), dropt in (C). १५ बंध (C). १६ पीडिज्जइ (B & C). १७ मित्ते (B, C & D). १८ सम (E), सबु (F). १९ कज्जा (C). २० होइ (D, E & F). २१ भिच्चे (D). २२ भिच्चाअत्ति (A), आअति (E), आइति (F). २३ बढ (E). २४ सव्व (B & C), सब (D), सबु (F). २५ उवे (A). 24 & 25 transposed in (F). २६ धण (C), धन (D & F). २७ नहि (C). २८ वेरि (B & D), वैरि (C & E), वेरी (F). २९ हाकन्द (B), हाकन्थ (C). ३० पलइ (B), बफल (C).

ददाति, मित्रादुदासीनः कार्य्यबन्धं नहि पुनः [पुनः] करोति, मित्राद्भवति यदि शत्रुः गोत्रबान्धवान् पीड़यति । अपरं भृत्यान्मित्रेण सर्वं कार्यं भवति, भृत्याद्भृत्येऽप्यायतिश्चलति, भृत्यादुदासीनः [सर्व्वं] धनं नाशयति, भृत्याद्वैरिणाक्रन्दः फलति । (C).

३७ । अत्र मनुष्यकृविले तदुक्तं फलं, पर्व्वतादिवर्णने कविगतं, देवतावर्णने न क्वापि । तदुक्तमभियुक्तैः,—वर्ण्यते मनुजो यत्र फलं तद्गतमादिशेत् । अन्यथा तु कृते काव्ये कवेर्दोषावहं फलं ॥ देवता वर्ण्यते यत्र काव्ये क्वापि कवीश्वरैः । मित्राऽमित्रविचारो वा न तत्र फलकल्पनेति ॥ उपर्य्युक्तगणगुणानपवदन् द्विगणविचारमाह, मित्त मित्तेति । मित्रात् मित्रं यदि पतति तदेति शेषः सर्वत्र यथायथं योजनीयः, ऋद्धिं बुद्धिम् अपरं मंगलं ददाति, मित्राद्भृत्यो यदि पतति तदा युद्धे स्कन्धस्थैर्यं निर्भयं जयं करोति, मित्रादुदासीनो यदि पतति तदा कार्यबंधं कार्यप्रतिबंधं खलु पुनः पुनः करोति, मित्रात् यदि शत्रुः भवति तदा गोत्रबान्धवान् पीड़यति, अपरं भृत्यात् मित्रं यदि पतति तदा सर्वाणि कार्याणि भवंति, भृत्यात् भृत्यो यदि पतति तदा आयतिरुत्तरकालो वर्द्धते, भृत्यात् उदासीनो यदि पतति तदा धनं नश्यति, भृत्यात् वैरी यदि पतति तदा हाक्रंदः हाहाकारः पतति । (E).

३७ । अथ द्विगणफलमाह ॥ मित्त ॥ मित्रगणान्मित्रगणश्चेत् ऋद्धिं बुद्धिमन्यन्मंगलं ददाति । मित्रात् भृत्यः स्थिरं कार्य्यं युद्धे निर्भयं जयं करोति । कज्जेति पाठे कार्यं । मित्रादुदासीने कार्यस्य नास्ति बंधः पुनः क्षीयते । मित्राद्भवति यदि शत्रुर्मित्र-

उआसीण[1] जइ मित्त कज्ज[2] किछु[3] ण[4] देखावइ
उआसीण जइ भिच्च सब्ब आअत्ति[5] चलावइ[6] ।
उआसीण उआसे मंदभल[7] किछुअ[8] ण[9] देक्खिअ[10]
उआसीण[11] जइ सत्तु गोत्त वइरिउ[12] कइ[13] लेक्खिअ[14] ।
जइ सत्तु मित्त हो[15] सुक्ख[16] फल[17]
सत्तु भिच्च हो[15] घरणि[18] णस[19] ।
पुणु[20] सत्तु उआसे धण[21] णसइ
सत्तु सत्तु णाअक्क[22] खस[23] ॥ ३८ ॥ छप्पअ ।

[गोत्र]बांधवान् पीड़यति । अन्यत् भृत्यान्मित्रे सर्वं कार्यं भवति । भृत्याद्भृत्ये आयतिः चला । भृत्यादुदासे सर्वं धनं नश्यति । भृत्यादैरिणि आक्रंदः पतति ॥ ३७ ॥ (G)

३८ । उदासीनाद्यदि मित्रं किञ्चित्कार्य्यबन्धं दर्शयति । उदासीनाद्यदि भृत्यः सर्व्वामायतिमानयति । उदासीनादुदासीने भद्रं

३८ । १ उआसिण (E). २ कज्जु (F). ३ किच्छ (C), कुछ (F). ४ बंध (A, B & D), मंद (E & F). ५ आअत्त (C). ६ आनावइ B), अणावइ (C), चलावेइ (F). ७ मंदफल (B & D), मन्दभ (C), मंदभलु (F). ८ किछु (B), किच्छ (C), किछुइ (E). ९ पहि (E & F). १० जाणिआ (D). ११ उआसो (D). १२ वहिरिअ (B), वइरिअ (C), वैरीअ (E & F). १३ कहि (B), क (D). १४ माणिअ (D). १५ होइ (E). १६ सुण (A). १७ फला (C). १८ धरिणि (A & B). १९ णसइ (E). २० पुणि (D), पुण (E). २१ धण (B & C), धणु (E). २२ णायक्क (C). २३ खस (B & C), खुस (E), ख (F).

फलं किमपि न दृश्यते। उदासीनाद्यदि शत्रुर्गोत्रवैरिकृत्यं लिख्यते। यदि शत्रुतो मित्रं भवति शून्यफलं। शत्रुतो भृत्यो गृहिणीं नाशयति। पुनः शत्रुत उदासीनो धनं नाशयति। शत्रुतः शत्रुर्नायकं खण्डयति। अयञ्च मित्रादियोगः श्लोकादिस्थस्तत्तत्फलं जनयति, तत्र यथोचितयोगो मात्राहत्तेषु सम्भवति, तत्र च प्रतिश्लोकं तदसम्भवेऽपि प्रथमश्लोके यथोचितयोगः कार्यः, यथा पाके ग्रन्थे पुलकितमित्यादौ समुचितयोगात् नैव छन्दसा ग्रन्थदेवस्तवादौ गुरुराजादिसमचञ्च प्रथ[म]श्लोकः पाद्यः, यथा कश्चित्कान्तेत्यादौ मित्राद्भृत्यगणः, यथा वा शिवः शक्त्येत्यादौ भृत्यान्मित्रगणः।

३८। उदासीनात् यदि मित्रं पतति तदा कार्यं किमपि अनिष्टं दर्शयति, उदासीनात् यदि भृत्यः पतति तदा सर्व्वामायतिं चालयति, उदासीनात् यदि उदासीनः पतति तदा असत्फलं किमपि न दृश्यते, उदासीनात् यदि शत्रुः पतति तदा गोत्रमपि वैरिकृतं ज्ञेयम्, यदि शत्रोर्मित्रं भवति तदा शून्यं फलं भवति किमपि फलं न भवतीत्यर्थः। यदि शत्रोर्भृत्यो भवति तदा गृहिणी नश्यति, पुनः शत्रोरनुदासीनो यदि पतति तदा धनं नश्यति, यदि शत्रोः शत्रुः पतति तदा नायकः स्खलति नश्यतीत्यर्थः॥ (E).

३८। उदासीनाद्यदि मित्रं किंचिन्मंदं दर्शयति। उदासीनाद्यदि भृत्यः सर्वा आ[य]तीश्चालयति शंस[य]मायतिमानयति। उदासीनादुदासीने अशुभं किंचिन्नहि दृश्यते। उदासीनाद्यदि शत्रुर्गोत्रं वैरिवलत्यते। यदि शत्रोर्मित्रं भवति शून्यफलं। शत्रो-

अह मत्ताणं उद्दिट्ठं।[१]

पुब्ब[२] जुअल सरि अंका दिज्जसु
गुरु सिर अंके[३] सेस[४] मिटिज्जसु[५]।
उबरल अंके[६] लेखिख कहावहु[७]
ते परि[८] धुअ उद्दिट्ठा जाणहु[९]॥ ३९॥ [अडिल्ला]

भृत्यो [यदि] भवति गृहिणी नश्यति। पुनः शत्रोरुदासीनः धनं नश्यति। शत्रोः शत्रौ नायकः क्षयति॥ इदमन्यत्रोक्तम्—

वर्ण्यते नायको यत्र फलं तद्गतमादिशेत्।
अन्यथा तु कृते काव्ये कवेर्दोषावहं फलम्॥
देवता वर्ण्यते यत्र काव्यं क्वापि कवीश्वरैः।
मित्रामित्रविचारो वा न तत्र फलकल्पना॥
देवतावाचकाः शब्दा ये च भद्रादिवाचकाः।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा॥ ३८। (G).

३९। अथ मात्राणामुद्दिष्टं। पूर्व्वयुगलसदृशानङ्कान् देहि, गुरुशिरोऽङ्कैः शेषं शोधय। उद्वृत्तमङ्कं लिखित्वानय, तेन पुनर्ध्रुवमुद्दिष्टं जानीहि॥ एतादृशो गणोऽमुकप्रस्तारस्य कुत्र वर्त्तते इति प्रश्ने तत्कथनायोद्दिष्टमुच्यते। तत्र चायं प्रकारः — षट्कलप्रस्तारस्य

१९। अथ मात्राणामुद्दिष्टं (A), अह मत्तानामुद्दिट्ठं (B), अथ मात्राया उद्दिष्टं (D). २ पूर्व्वे (B), पूब्ब (C), पुव (D), पूब्बं (F). ३ अंक (A), अङ्क (B & C), अंकन्ह (E). ४ सेस (A). ५ मेटिज्जसु (A), मिटज्जसु (B & C). ६ अंक (A, B, C, D & E). ७ कऊआण (A, B & C), कर आवर्इ (D), कर आणऊ (E). ८ तहि पर (E). ९ जाण (A), जाणहँ (D).

त्रिगुरुः कुत्र वर्त्तते इति प्रश्ने, गुरुत्रयं ऽऽऽ लिखित्वा तत्र पूर्व्व-युगलसदृशाङ्को देयः । तत्र च पूर्व्वाभावे कथं पूर्व्वयुगलसदृशत्वम्, अतः प्रथमतः कश्चिदङ्को देयः, स च प्रथमोपस्थितत्वादेकाङ्क एव,

१
ऽ
२

तस्य च बुद्ध्याकर्षणाद्युगलत्वं सम्पाद्य द्वयाङ्को लेख्यः, तत्र च गुरोर्द्विमात्रत्वादुपर्य्यधश्चाङ्को देयः, लघोरेकमात्रत्वादुपर्य्येव,

१	३
ऽ	ऽ
२	५

तेन च [?] ततश्च एको द्वाविति मिलित्वा त्रयं द्वितीय-गुरो[रु]परि देयं, द्वयं त्रयमिति मिलित्वा पञ्चाङ्कस्तदधो देयः, तेन १, २, ३, ५, ततः पञ्च त्रयमिति मिलित्वा-ष्टाङ्कस्तृतीयगुरोरुपरि देयः, १, २, ३, ५, ८, पञ्चा-ष्टाविति मिलित्वा त्रयोदशाङ्कस्तदधो देयः । तथाच १, २, ३, ५, ८, १३ पूर्व्वयुगले सदृशाङ्कदानवृत्तं, ततश्च गुरुशिरःस्थिताङ्कानेकीकृत्य शेषाङ्कास्तेऽङ्का दूरीकरणीया भवन्ति । अ[त्र] गुरुशिरोऽङ्का एक-स्त्रयमष्टाविति मिलित्वा द्वादश, शेषाङ्कश्च त्रयोदश, इत्थं त्रयो-दशे द्वादशदूरीकरणे एकस्यावशिष्टत्वात् प्रथमत एव त्रिगुरुर्गण इति लभ्यते । इदञ्च बोध्यम् — अन्तिमो योऽङ्कः तावत्संख्यः प्रस्तारो भवति, तेन षट्कलस्य त्रयोदशभेदः प्रस्तार इति बोध्यम् । एवं सुख-बोधाय स्थलान्तरमपि दर्श्यते — षट्कलप्रस्तारे आदावन्ते च गुरुर्मध्ये लघुद्वयमेवं कुत्र वर्त्तते इति प्रश्ने, पूर्ववद्गुरोरुपरि एकाङ्कः १, द्वयाङ्कः २ अधः, तेन १, २, ततः प्रथम-लघोरुपरि त्रयाङ्कः ३, द्वितीयलघोरुपरि पञ्चाङ्कः ५, ततो गुरो-रुपरि अष्टाङ्कः ८, तदधस्त्रयोदशाङ्कः [१३], तथाच लिपिक्रमः १, २, ३, ५, ८, १३ । प्रथमगुरोरुपरि एकाङ्कः चरमगुरोरुपरि अष्टाङ्कः

१	३	८
ऽ	ऽ	ऽ
२	५	१३

१	३	५	८
ऽ	।	।	ऽ
२			१३

मिलित्वा नव, शेषभूते त्रयोदशाङ्के नवाङ्क उने कृते चतुरङ्कस्तिष्ठति, तेन एतादृशचतुर्थस्थानमिति वक्तव्यम्। यदि तु षट्कलप्रस्तारे लघु-षट्कं कुत्रास्तीति प्रश्नस्तत्र पूर्ववदेकादित्रयोदशान्ता

१	२	३	५	८	१३
।	।	।	।	।	।

अङ्का देयाः, तत्र च गुरोरभावात् गुरूपर्यंकाभावः, तेन शेषाङ्के किमपि कर्त्तनीयं नास्ति, ततः शेषाङ्क एवावशिष्यते। तथाच षट्कलप्रस्तारस्य त्रयोदशस्थाने लघुषट्कं पततीति वाच्यम्। (C)।

३९। निर्दिष्टप्रस्तारक्रमस्थितिनिर्द्धारितसंख्याकगुरुलघुयुक्तरूपनिर्णीतस्वरूपे भेदे प्रथमत्वद्वितीयत्वादिधर्मनिर्द्धारणमुद्दिष्टं। तद्विविधं मात्रावर्णभेदात्। तत्र केनचित्कौतुकादवर्णोद्दिष्टे[?] पृष्टे तत्प्रकारमाह। पुव्व जुअलेति। पुव्व जुअल सरि अंका—पूर्व-युगलसदृशांकान्, अत्र पूर्वपदस्य पूर्वांकपरत्वात् पूर्वयुगलेत्यस्य पूर्वांकयुगलेत्यर्थः। एवं च पूर्वं यदंकयुगलं तत्सदृशं तत्तुल्यं तदैक्य-क्रियया यत्संपद्यते इति यावत् तमंकमित्यर्थः। दिज्जसु—दद्स्व, अनिर्द्धारितप्रथमत्वद्वितीयत्वादिधर्मकभेदस्वरूपं लिखित्वा तदक्षरो-परि पूर्वांकयुगलसदृशांकं यथाप्रस्तारसंख्यं क्रमेणोत्तरोत्तरं स्थापये-त्यर्थः। अत्र यतः पूर्वांक एव नास्ति त[तः] प्रथमातिक्रमे कारणा-भावात् प्रथमोऽंकः स्थाप्यः, यतस्य पूर्वम् अंकयुगलं नास्ति तत्र यएव पूर्वांको भवति तद्विगुणितांकः स्थाप्य इति गुरूपदेशोऽनु-संधेयः। ततः गुरु सिर अंकन्ह—गुरुशिरोऽंकान् गुरोः शिरसि ये अंकास्तान्, सेस—शेषे सर्वांतिमे अंके, मिटिज्जसु—लोपय, गुरुशिरोऽंकबोधितसंख्यां सर्वांतिकांकबोधितसंख्यायामूनीकुरु इति भावः। एवं सति उवरल अंक—उर्वरितमंकं गुरुशिरोऽंक-

बोधितसंलोपे सति सर्वांतिमांकमध्ये उर्वरितो योऽंकस्तमित्यर्थः, सर्वांतिमांकबोधितसंख्यामध्योर्वरितसंख्याबोधकमंकमिति यावत् । लेक्खिकह — वप्रसंख्याः [?] परिधार्य्येति यावत्, आणह — आनयस्व जानीहि इति यावत्, तहि पर — तदुपरि तेनेति यावत् मात्राणामिति शेषः, उद्दिट्ठा — उद्दिष्टम्, अनिर्द्धारितप्रथमत्वद्वितीयत्वादिधर्मे भेदे प्रथमत्वद्वितीयत्वादिधर्मनिर्द्धारणं, धुअ — ध्रुवं निश्चितं, जाणह — जानीहि । अत्र गुरुशिर इति शिरःपदोपादानात् गुरोरुपर्येवस्थांको देय इति सूच्यते, अन्यथा वर्णोद्दिष्टे लघूपरीतिवद्यापि गुरोरुपरि इत्येव ब्रूयात् । लघोस्तु उपर्य्येवेति नियमो गुरूपदिष्टोऽनुसंधेयः । अयमर्थः — अनिर्द्धारितप्रथमत्वद्वितीयत्वादिधर्मभेदस्वरूपं विन्यस्य प्रथमाचरोपरि एकत्वसंख्याबोधकोऽंकः स्थाप्यः, द्वितीयाचरोपरि च पूर्वांकद्वयाभावात् पूर्वस्थैकांकद्वैगुण्यकल्पनानिःपन्नो द्वितीयोऽंकः स्थाप्यः, तृतीयस्थाने च तत्पूर्वद्वितीयैकेत्यंकद्वयैक्यक्रियानिःपन्नः तृतीयोऽंकः स्थाप्यश्चतुर्थस्थाने च तत्पूर्वतृतीयद्वितीयेत्यंकद्वयैक्यक्रियानिःपन्नः पंचमोऽंकः स्थाप्यः, पंचमस्थाने च तत्पूर्वपंचमतृतीयेत्यंकद्वयैक्यक्रियानिःपन्नोऽष्टमोऽंकः स्थाप्यः, षष्ठस्थाने च तत्पूर्वाष्टमपंचमेत्यंकद्वयैक्यक्रियानिःपन्नस्त्रयोदशोऽंकः स्थाप्यः । एवं षट्सु स्थानेषु षड़ंकाः यथाप्रस्तारसंख्यं षट्कलगणोद्दिष्टे स्थाप्याः । एवं पंचकलादावपि यथाप्रस्तारसंख्यमंकाः स्थाप्याः ।

१	३	८
ऽ	ऽ	ऽ
२	५	१३

एवं च त्रिगुरुः षट्कलस्य कतमो भेद इति पृष्टे, गुरुत्रयं लिखित्वा तत्र एकद्वित्रिपंचाष्टत्रयोदशेति

षड़ंकान् क्रमेण गुरूणामुपर्यधश्च संस्थाप्य गुरुशिरस्थैकतृतीयाष्टमेत्यंकत्रयबोधितद्वादशसंख्यायाः शेषांकत्रयोदशबोधितसंख्यामध्यलोपे उर्वरिता एकत्वसंख्या, एवं च त्रिगुरुः षट्कलस्य प्रथमो भेद इति

१	२	३	८
।	।	ऽ	ऽ
		५	१३

वाच्यम् । एवं यत्र लघुद्वयोत्तरं गुरुद्वयं पतति एतादृशः षट्कलस्य कतमो भेद इति पृष्टे, पूर्वोक्तरीत्या यथास्थानं षड़ंकान् संस्थाप्य गुरुशिरःस्थतृतीयाष्टमेत्यंकद्वयैक्यक्रियानिःपन्नैकादशांकबोधितसंख्यायास्त्रयोदशसंख्यामध्ये लोपे उर्वरिता द्वित्वसंख्या, तथाचायं द्वितीयो भेद इति वाच्यम् । एवं यत्रादौ

१	२	५	८
।	ऽ	।	ऽ
	३		१३

लघुगुरू ततोऽपि लघुगुरू एवंभूतः षट्कलस्य कतमो भेद इति पृष्टे, उक्तरीत्या उक्तस्थानेषु तत्षड़ंकस्थापने गुरुशिरःस्थद्वितीयाष्टमेत्यंकद्वयैक्यक्रियानिःपन्नदशांकबोधितसंख्यायास्त्रयोदशसंख्यामध्ये लोपे अवशिष्टा त्रित्वसंख्या, तथाचायं तृतीयो भेद इति वाच्यम् । एवमग्रेऽपि गुरुशिरोऽंकसंख्यायां त्रयोदशसंख्यामध्ये लुप्तोर्वरितसंख्या तत्तद्भेदे वाच्या । षड्लघुरूपे

१	२	३	५	८	१३
।	।	।	।	।	।

गुरुशिरोऽंकाभावादाद्यंषमाजषिद्धत्वादृशस्त्रयोदशो भेदो बोध्यः ।

एवं पंचकलप्रस्तारेऽपि अनिर्द्धारितप्रथमलद्वितीयत्वादिधर्मभेदं लिखित्वा तद्वर्णोपरि एकद्वित्रिपंचाष्टेत्यंकपंचकं यथाप्रस्तारसंख्यं यथाक्रममुत्तरोत्तरं स्थाप्यम् । एवं च यत्रादौ लघुस्ततो गुरुद्वयमीदृशः पंचकलस्य कतमो भेद इति पृष्टे, एकद्वित्रिपंचाष्टेत्यंकपंचके

१	२	५
।	ऽ	ऽ
	३	८

तयोक्तस्थाने यथाक्रममुत्तरोत्तरं संस्थापिते गुरुशिरःस्थद्वितीयपंचमेत्यंकद्वयैक्यक्रियानिःपन्नसप्तमांक-

बोधितसंख्यायाः सर्वांतिमाष्टमांकबोधितसंख्यामध्यलोपे उर्वरिता एकलसंख्या, एवं चायं प्रथमो भेद इति वाच्यम् । एवं यत्र प्रथमं गुरुलघू ततो गुरुरीदृशो भेदः पंचकलस्य कतम इति पृष्टे, एक-

१	२	५
ऽ	।	ऽ
१		८

द्वित्रिपंचाष्टेत्यंकपंचके यथास्थानं यथाक्रममुत्तरोत्तरं स्थापिते गुरुशिरःस्थैकपंचमेत्यंकद्वयमेव लब्धं, लब्ध-षष्ठसंख्याया अष्टमसंख्यामध्यलोपे उर्वरिता द्विलसंख्या, तथाचायं द्वितीयो भेद इति वाच्यम्। एवं यत्र लघुत्रयांते गुरुरीदृशो

१	२	३	५
।	।	।	ऽ
			८

भेदः कतम इति पृष्टे, पूर्वोक्तेऽकपंचके तथैव स्थापिते गुरुशिरःस्थपंचमांकबोधितसंख्यायाः सर्वां-तिमाष्टमांकबोधिताष्टमसंख्यामध्यलोपे उर्वरिता त्रिलसंख्या, तथा-चायं तृतीयो भेद इति वाच्यम् । एवमग्रेऽपि गुरुशिरोऽकसंख्या-यामष्टमसंख्याया लुप्तोर्वरितसंख्या तत्तद्भेदे वाच्या ।

एवं चतुःकले द्विगुरुः कतमो भेद इति पृष्टे, एकद्वित्रि-

१	२
ऽ	ऽ
३	५

पंचेत्यंकचतुष्टये यथोक्तस्थाने यथाक्रममुत्तरोत्तरं स्थापिते गुरुशिरःस्थैकतृतीयेत्यंकद्वयबोधितचतुर्थसंख्यायाः सर्वां-तिमपंचांकबोधितसंख्यामध्यलोपे उर्वरिता एकलसंख्या, तथाचायं प्रथमो भेद इति वाच्यम्। एवं चतुष्कले आदौ लघुद्वयं ततो

१	२	३
।	।	ऽ
		५

गुरुः ईदृशः कतमो भेद इति पृष्टे, उक्तरीत्योक्तांके स्थापिते गुरुशिरःस्थतृतीयांकबोधितत्रिलसंख्यायाः सर्वांतिमपंचमांकबोधितसंख्यामध्यलोपे उर्वरिता द्विलसंख्या, तथा-चायं द्वितीयो भेद इति वाच्यम्। एवं त्रिकले एकद्वित्रीति अंकत्रयं, द्विकले एकद्वीत्यंकद्वयं संस्थाप्य वाच्यम् । (E).

Here four entire leaves are missing in M.S. (E).—Ed.

३९। अथ मात्रोद्दिष्टमाह पादाकुलकेन [?] पुब्बेति। पूर्वयुगलसदृशानंकान्देहि, गुरुशिरोऽंकं शेषे लोपय, उर्वरितांकं लिखिला कथय, एवंप्रकारेणोद्दिष्टं जानीत। उक्तार्थसमस्येयमेव। पूर्वं पूर्वांकयुगलं सर्वमात्रोपरि न्यसेत्। द्विमात्रस्य गुरोरूर्द्धं पूर्वं पश्चादधो लिखेत्। गुरूर्द्धांकसमाहारादुद्दिष्टं ज्ञायते ध्रुवं॥ इदं षट्कले दशमभेदे योज्यते। तत्र तावत् ॥ऽ॥ अयं भेदः कतिथ इति प्रश्नः। तत्र प्रथममात्रायाः पूर्वमंकाभावात्तच्छिरसोऽंको द्वितीयमात्रोपरि द्वयं २, तृतीयमात्रायां पूर्वांकद्वये एकद्विरूपं त्रयं लिखेत्। तृतीयस्थाने द्विमात्रस्य गुरोः सत्त्वाद् द्वितीयोऽंकः पूर्वांकद्वयरूपः पंचात्मकोऽधस्ताल्लेख्यः, पंचममात्रोपरि अष्टौ षष्ठोपरि त्रयोदशेति क्रमेण लिखेदेवं सर्वत्र। अत्र गुरुशिरःस्थोऽंकस्त्रयमंतिमत्रयोदशांके लोपयेत्। एवं कृते शिष्टा दश, तत्संख्योऽयं भेदइति। एवमुदाहरणांतरेऽपि योज्यं। तद्यथा—

१	२	३	८	१३
।	।	ऽ	।	।
		५		

अथास्मात्कवित्वात्किं फलं भविष्यतीत्युद्दिश्य मात्रोद्दिष्टमाह ॥ पुब्बेति ॥ अत्रेदमवधेयं,

मात्राभेदं समुत्पाद्य स्थानसंख्यालितं[?] चरेत् ।
यथा तत्राल्पं भवति मंदेदाष्टयुतौ फलम् ॥
आदिशून्ये भवेद्धानिरंत्यशून्ये महद्भयम् ।
मध्यशून्ये भवेन्मृत्युः सर्वांके विजयो भवेत् ॥
तद्दृश्यतेऽष्टद्वितये न कार्यं सप्ताग्नितुल्यैर्भवतीह चर्चा ।
रसैः समुद्रैर्न च कार्यसिद्धिर्नैकपंचलरितं ब्रुवंति ॥

इति केचिदाहुः ॥ (G).

आसां णट्ठं ।[१]

णट्ठे सव्व[२]कला कारिज्जसु[३]
पुव्व[४]जुअल सरि अंका[५] दिज्जसु ।
पुच्छल[६] अंकं[७] मिटावहु[८] सेख[९]
अवरउ[१०] अंका[११] लुंपि[१२] कहु लेख[१३] ॥
जत्थ[१४] जत्थ[१४] पाविज्जइ[१५] भाग
एहु[१६] कहइ[१७] फुर[१८] पिंगल णाग ।
परमत्ता लेइ[१९] गुरुता[२०] जाइ
जत लेक्खहु[२१] तत लेक्खहु[२२] आइ ॥ ४०[२३] ॥

---

४० । अथ मात्रानष्टमाह णट्ठेत्यादि । नष्टे सर्व्वाः कलाः

---

४० । १ अथासां नष्टं (A), अथ मात्रायां नष्टं (D). २ सव्वे (B), सव (D). ३ करिज्जसु (B, C & D). ४ पूव्व (B), dropt in (C) ५ सिर अंका (D). ६ पूछल (A), पुछल (D). ७ अंक (A & D), अङ्क (B & C). ८ मेटावहु (A), मेटावहि (B), मेटावइ (C), मेटावऊ (D), मिट्टावहि (F). ९ सेस (A), सेक्ख (B & C), सेस्सा (D). १० उवरल (A, D & F). ११ अंक (A, B, C & D). १२ लुम्पि (B & C), लोप्पि (D), लोपि (F). १३ लेक्ख (B & C). १४ जच्छ (A). १५ पविज्जइ (B), पाइज्जइ (D). १६ एह (A). १७ भणइ (B & C). १८ फुल (B), फुह (F). The quadrant runs thus in (C) and (D) — एऊ भणइ पुन पिङ्गल नाग (C), कहइ फणइ पुणि पिंगल णाग (D). १९ लइ (B & C), ले (F). २० गरुया (B), गुरुया (C). २१ लेक्खसि (B), लेक्खऊ (D & F). २२ Dropt in (C). २३ The name of the metre is not mentioned in any of the commentaries; neither does it agree with the definition of any metre described in the book.—Ed.

कुरुध्वं, पूर्व्वयुगलसदृशानङ्कान् देहि, प्रश्नाङ्केन शेषं लोपय, उद्दत्तमङ्कं लोपयित्वा लिख, यत्र यः प्राप्यते भाग एतद्भणति स्फुटं पिंगलनागः। परमात्रा गृहीत्वा गुरुता याति, यावल्लिख्यते तावल्लेखश्चायाति। अमुकप्रस्तारस्यामुकस्थाने कीदृशो गणस्तिष्ठतीति प्रश्ने, तत्कथनाय नष्टशिष्टमुच्यते। नष्टे ज्ञातव्ये इति। तथाचायं प्रकारः, षट्कलप्रस्तारस्य प्रथमस्थाने कीदृग्गणस्तिष्ठति इति प्रश्ने, सर्व्वाः कलाः कर्त्तव्या भवन्ति। सर्व्वकलाकरणे च षड्लघवः स्थापनीयाः, यथा ।।।।।।, तत्र च पूर्व्वयुगलसदृशाङ्कदानं पूर्व्ववर्त्तेन लिपिक्रमः १, २, ३, ५, ८, १३, अत्र च शेषाङ्के प्रश्नाङ्क[लो]पः कर्त्तव्यो भवति, शेषः त्रयोदशाङ्कः, तत्र प्रश्नाङ्कस्यैकस्य लोपात् द्वादशाङ्कोऽवशिष्टः, तल्लोपेन गुरुलघवो लेख्या भवन्ति। पुनः तल्लोपप्रका[र]श्चोच्यते द्वितीयश्लोकेन, तस्यायमर्थः प्रदर्श्यते। लोपावशिष्टो द्वादशाङ्कः तस्य भागः प्राप्यते यैर्यैरङ्कैः, सोऽङ्को निर्व्वहति, तेषां परमात्रया सह गुरुता कर्त्तव्या, तथाहि प्रकृते च प्रथमकलायामेकाङ्कस्तृतीयकलायां त्रयाङ्कः पञ्चकलायामष्टाङ्क इति मिलित्वा द्वादशाङ्क-निर्व्वाहस्तथाच एकाङ्कः प्रथमकलायां तिष्ठति, सापि परमात्रया सह गुरुतां गता, तथाच षट्कलप्रस्तारे त्रिगुरुगण इति लभ्यते। इदन्तु बोध्यं प्रकारद्वयेनापि यत्रोद्दत्ताङ्को निर्व्वहति, तत्र परमात्रया सह गुरुता न सम्भवति, स एवाङ्को नान्यः। तथा हि षट्क[ल]प्रस्तारे पञ्चमस्थाने कीदृशो गण इति प्रश्ने, सर्व्वलघुकरणं, पूर्व्वयुगलसदृशाङ्कदानञ्च पूर्व्ववर्त्तेन १, २, ३, ५, ८, १३। अत्र च त्रयोदशाङ्के पञ्चमलोपेऽवशिष्टो भवति अष्टाङ्कः, स च पंच-

लघोरुपरि तिष्ठति, एकद्वित्रिपञ्चभिर्मिलिताभिः सम्भवति, तत्र पञ्चमलघोरुपरि स्थिताङ्क एव गृह्यते, अन्यथा एकाङ्कस्य परमात्रया सह गुरुतापादने द्व्याङ्कस्याधःस्थाङ्क एव नास्तीति तस्य गुरुतापादकत्वाभावात् तस्योपादानमनर्थकमापद्येत, इत्यञ्च पञ्चमषष्ठकलाभ्यां मिलित्वा गुरुतापादने लघुचतुष्टयमेको गुरुश्च ।।।।S पञ्चमस्थाने प[त]तीति वक्तव्यम् । षट्कलप्रस्तारस्य त्रयोदशस्थाने कीदृग्गण इति प्रश्ने, त्रयोदशाङ्कस्य त्रयोदशाङ्कलोपे न किञ्चिदवशिष्यते, तेन गुरुकरणाभावः, तथाच सर्व्वलघुरेव शिष्यते ।।।।।। (C).

४० । एद्द । नष्टे सर्वाः कलाः कुरु, पूर्वयुगलसदृशानंकान् देहि । पृष्टमंकं लोपय शेषे उर्वरितमंकं लुप्त्वा कथय लेख्ये ॥ यत्र यत्र प्राप्यते भाग एवं कथयति स्फुरं पिंगलनागः । परमात्रां गृहीत्वा गुरुतां याति, यावल्लिख्यते तावल्लेख आयाति ॥ इदं षट्कले दशमो भेदः कीदृगिति प्रश्ने योज्यते । तत्र सर्वकलाः ।।।।।। पूर्ववदंकिताः, पृष्टांको दशमः शेषे त्रयोदशांके ऊनितः । शेषास्त्रयः । तत्रावशिष्टांकेषु मध्ये

१	२	३	५	८	१३
।	।	।	।	।	।

तृतीयः अंको लुप्तः । यत्रेति कृते तृतीया कला चतुर्थ्या सह गुरुतां याता ।।S।।, अयं दशमो भेदो वक्तव्यः । प्रथमद्वितीयरूपांकस्य लोपो न संभवति । प्रथममात्राया अग्रिममात्रया सह गुरुताया असंभवात्, द्विरूपस्यांकस्यापि भागस्याप्नोयत्वात् ॥ (G).

N.B. In MS. (D) the slokas here numbered ४५ to ४८ precede those numbered ४२ to ४४, and ५० precedes ४९ । —Ed.

अह वसाणं उद्दिट्ठं (C) ।[१]

अक्खर[२] उप्परि[३] दुसा
अंका दिज्जहु[४] मुण[णे]हु[५] उद्दिट्ठा[६] ।
लहु उप्परि[३] जो अंको
तं दइ[७] एक्केण जाणेहु ॥ ४१ ॥ [गाहा]

४१ । वर्णोद्दिष्टमाह । अक्षरोपरि द्विगुणानङ्कान् देहि उद्दिष्टं । लघोरुपरि योऽंकस्तं दत्त्वा एकेन जानीहि ॥ एकेन सह दत्त्वेत्यनेन तत्राङ्के एकेन सह मिश्रणं कार्यमित्यर्थः । चतुरक्षरप्रस्तारे सर्व्वगुरुः कुत्र वर्त्तते ऽऽऽऽ इति प्रश्ने, अक्षरोपरि द्विगुणा द्विगुणा अङ्का-देयाः, तथाच १ २ ४ ८ / ऽ ऽ ऽ ऽ अत्र लघोरभावात् लघूपरिस्थितां-कस्य एकेन मिश्रणं [न] सम्भवति, किन्तु एकाङ्क एवावशिष्यते, तेन चतुरक्षरप्रस्तारस्य गुरुचतुष्कं प्रथमत एव पततीति वक्तव्यम् । अपरं दर्शयति, चतुरक्षरप्रस्तारस्याद्यन्तयोर्लघुद्वयं मध्यस्थाने गुरुद्वयं [कुत्र] पततीति १ २ ४ ८ / । ऽ ऽ । प्रश्ने, उत्तरोत्तरं द्विगुणा अङ्का-देयास्तथाच तत्र लघूपरि एकाङ्कोऽष्टांकस्य इति मिलित्वा नव, तत्र चैकाङ्कयोजने कृते सति दशाङ्कः सम्भवति, तेन द[श]मस्थान-इति वक्तव्यम् । चतुरक्षरप्रस्तारे सर्व्वलघुः कुत्र वर्त्तते १ २ ४ ८ / । । । । इति प्रश्ने, द्विगुणा अङ्का देयाः, प्रथमलघोरुपरि एकाङ्कः, ततो

४१। १ अथ वर्णानामुद्दिष्टं (A), अह वर्णाणामुद्दिट्ठं (B), अथ वर्णानां उद्दिष्टं (D), अथ वर्णोद्दिष्टम् (F). २ अक्षर (B & C). ३ उप्पर (A & D). ४ दिज्जह (F). ५ मुणह (B), मुणइ (C), मुणहं (D), मगमुणऊ (F). ६ उद्दिट्ठ (A & F), उद्दिट्ठा (D). ७ देइ (A & D), दिज्जि (B). In (F), after अंको in the last half पेऊ सब करणं आवेऊ ।

अस्याः णट्टं ।[१]

णट्ठे अंके भाग[२] करिज्जसु
सम[३] भागहि[४] तहिं[५] लहुअ[६] मुणिज्जसु[७] ।
बिखम[८] एक्क दे[९] बंठण किज्जसु
पिंगल जंपइ गुरु आणिज्जसु ॥ ४२ ॥ [अलिल्ला]

इत्याङ्कः, ततश्चतुरङ्कः, ततोऽष्टाङ्कः, एकेन सर्व्वाणि मिलित्वा षोड़श, षोड़शस्थाने पततीति वक्तव्यम् । (C).

४१ । अथ वर्णोद्दिष्टमाह अक्खर ॥ अक्षरोपरि द्विगुणानंकान्देहि, पश्चाज्जानीतोद्दिष्टं । लघूपरि योऽंकः पतति सैकं कृत्वा तं जानीत ॥ उक्तं चान्यत्र । उद्दिष्टं द्विगुणानाद्यादुपर्यंकान् समालिखेत् । लघुस्था ये तु तत्रांकास्तैः सैकैर्मिश्रितैर्भवेत् ॥ इदं चतुरक्षरे योज्यते ॥ यथायं भेदः ।।ऽ। कतिथ इति प्रश्ने, द्विगुणांकदाने न्यासः १ २ ४ ८ / । । ऽ । अत्र लघुस्थांकाः एकद्व्यष्टरूपास्तेषां योगः ११ एकादश, सैकः १२ द्वादश, एतत्संख्योऽयं भेद इति स्पष्टम् ॥ (G).

N.B. There is a process different from this in the Sanskrit work of Pingala, and its commentary by Haláyudha. Vide Society's Edition by Vishwanátha Sástrí, pp. 233-234. The same result may be analytically arrived at: vide Ghosha's Chhandah-sára-sangraha, Introduction, p. xix. para 46.—Ed.

---

४२ । १ अथैषां नष्टं (A), अथ वर्णानां नष्टं (D). २ भाअ (E). ३ सरि (B, C & F). ४ भाअइ (B & C), भागे (D & F), भाअहँ (E). ५ तै (A & D), तइ (E). ६ लड (B, C, D, E & F). ७ आणिज्जसु (B & C), मुणिज्जसु (D & E). ८ विषम (D, E & F), विषम (C). ९ देइ (A, D & E), दइ (B & C).

४२ । वर्णं [नष्ट] माह । नष्टाङ्के भागं कुरुष्व सदृशभागे तस्मिन् लघुमानयस्व । विषमे एकं दत्त्वा वण्टनं कुरुष्व पिंगलो जल्पति गुरुमानयस्व ॥ नष्टे अदृष्टस्थाने प्रश्नेऽंकस्य भागः कर्त्तव्यः । यत्र प्रश्नाङ्कः समो भवति तत्र लघुः स्थाप्यः, तदर्द्धस्यापि समत्वे पुनरपि तदर्द्धं कृत्वा लघुः स्थाप्यः । एवमग्रेऽपि । विषमप्रश्नाङ्के वा [तु] गुरुः स्थाप्यः, तत्राङ्के चैकं दत्त्वा भागः कार्य्य इति क्रमः । उदाहरणं यथा, चतुरक्षरप्रस्तारे कीदृक् प्रथमो गण इति प्रश्ने, प्रश्नाङ्क एकस्तस्य विषमत्वाद्गुरुः स्थाप्यः ऽ, तत्र चैकाङ्के पुनरेकयोजने द्वयाङ्को जातस्तदर्द्धश्चैकः सोऽपि विषमः तेन पुनरपि गुरुर्लेख्यः, एवमग्रेऽपि गुरुरेवायातीति चतुर्गुरुः ऽऽऽऽ प्रथमप्रस्तार इति वाच्यम् । एवं चतुरक्षरजाते [प्रस्तारे] दशमस्थाने कीदृगिति प्रश्ने, दशाङ्कस्य समत्वादादौ लघुः स्थाप्यः, तदर्द्धे च कृते पञ्चाङ्कः प्राप्तस्तस्य विषमत्वाद्गुरुः स्थाप्यः, तत्र च एकदाने षड्को भवति, तदर्द्धकरणे च त्रयाङ्को भवति, स च विषमो भवति इति पुनरपि गुरुः स्थाप्यः, त्रयाङ्के चैकयोजने चतुरङ्कस्तस्य च समत्वाल्लघुः स्थाप्यः । ऽऽ।, इत्थं चतुरक्षरप्रस्तारे दशमस्थाने आद्यन्ते लघुः मध्ये गुरुद्वयमस्तीति वक्तव्यम् । (C).

४२ । अथ वर्णवृत्तभेदेषु नष्टप्रकारमाह णट्ठेति । अंके समे विषमे वेत्यर्थः, भाअ—भागं, अर्द्धांशमिति यावत् यथाप्रस्तारसंख्यमिति शेषः, करिज्जसु—कुरुष्व कल्पयेति यावत्, तत्र यः सम भाअहँ—सम भागः समस्य भागः अर्द्धांश इत्यर्थः, तह—ततः, लहु—लघुं मुणिज्जसु—जानीहि क[थ]येति यावत्,

बिसम—विषमस्यांकस्य एक्क—एकम् एकत्वसंख्याबोधकमंकमित्यर्थः, देइ—दत्त्वा संयोज्येति यावत्, बंठण—वंटनं भागमर्द्धांशमिति यावत्, किज्जसु—कुरुष्व कल्पयेति यावत्, वंटनमिति भागकल्पने देशी, ततः गुरु आणिज्जसु—गुरुमानय कल्पयेति यावत् । एवंप्रकारेण वर्णवृत्तभेदानामिति शेषः, णट्ठ—नष्टं नष्टप्रकारमिति यावत्, पिंगल जंपइ—पिंगलो जल्पति कथयति॥ समांकभागे कृते योऽंकः स लघुकल्पकः, विषमांकभागे योऽंकः स गुरुकल्पकः । विषमांकस्य भागस्तु विषमांकमेकेनांकेन संयोज्य कल्पनीय इति निर्गलितार्थः । अत्र यद्यपि एकांकेन योजितो विषमः समभावं प्राप्नोति तथापि तस्य भागः विषमांकभाग एवेति, ततो लघुकल्पनभ्रान्तिर्न कर्त्तव्येति ध्येयम् । अयमर्थः—

एकाक्षरवृत्तस्य प्रथमो भेदः कीदृश इति पृष्टे, एकांके विषमे एकांकयोजनेन कृतभागे एको गुरुः कल्प्यः । अनंतरं चाक्षराभावान्न कल्पना । एवं च एकाक्षरवृत्तस्य प्रथमो भेद एकगुरुरिति वाच्यम् । एवमेकाक्षरवृत्तस्य द्वितीयो भेदः कीदृश इति पृष्टे * * * कल्पनीयः, अनंतरं चाक्षराभावान्न कल्पना, एकलघुर्द्वितीयो भेद इति वाच्यम् ।

एवं द्व्यक्षरवृत्तस्य प्रथमो भेदः कीदृश इति पृष्टे, पृष्टस्य एकांकस्य विषमस्य एकांकयोजनेन भागे एको गुरुः कल्पनीयः, पुनरपि भागलब्धस्यैकांकस्य विषमस्य भा[गे] द्वितीयो गुरुः कल्प्यः । अनंतरं चाक्षराभावान्न कल्पना, एवं द्विगुरुर्द्व्यक्षरवृत्तस्य प्रथमो भेद इति वाच्यः । एवं द्वितीयो भेदः कीदृश इति पृष्टे, पृष्टस्य

द्वितीयांकस्य समस्य भागे एको लघुः कल्पनीयस्ततो भागलब्धस्यैकांकस्य विषमत्वादेकेन योजितस्य भागे एको गुरुः कल्प्यः, अनंतरं चाक्षराभावान्न कल्पना, एवं च प्रथममेको लघुस्तत एको गुरुरीदृशो द्व्यक्षरवृत्तस्य द्वितीयो भेदः । एवं द्व्यक्षरवृत्तस्य तृतीयो भेदः कीदृश इति पृष्टे, पृष्टांकस्य तृतीयस्य विषमत्वादेकांकयोजनेन भागे प्रथममेको गुरुः कल्पनीयस्ततो भागलब्धस्य द्वितीयांकस्य समत्वाद्भागे एको लघुः कल्प्यः, अनंतरं चाक्षराभावान्न कल्पना, एवं च यत्र क्रमेण गुरुलघू भवत ईदृशो द्व्यक्षरवृत्तस्य तृतीयो भेद इति वाच्यम् । एवं चतुर्थो भेदः कीदृश इति पृष्टे, पृष्टांकस्य चतुर्थस्य समत्वात्तद्भागे प्रथम एको लघुः कल्प्यः, ततोभागलब्धस्य द्वितीयांकस्यापि समत्वात्तद्भागेऽपि पुनरप्येको लघुः कल्प्यः, अनंतरं चाक्षराभावान्न कल्पना, एवं च यत्र लघुद्वयं स द्व्यक्षरवृत्तस्य चतुर्थो भेद इति वाच्यम् ।

एवं त्र्यक्षरस्य प्रथमो भेदः कीदृश इति पृष्टे, पृष्टांकस्य एकस्य विषमत्वादेकांकेन योजितस्य भागे एको गुरुः प्रथमः कल्प्यः, ततोभागलब्धस्यैकांकस्य विषमत्वादेकांकयोजनाद्वारद्वयं भागे गुरुद्वयकल्पनम्, अनंतरं चाक्षराभावान्न कल्पना, एवं च यत्र गुरुत्रयमीदृशस्त्र्यक्षरवृत्तस्य प्रथमो भेद इति वाच्यम् । एवं त्र्यक्षरस्य द्वितीयो भेदः कीदृश इति पृष्टे, पृष्टांकस्य द्वितीयस्य समत्वाद्भागे प्रथममेको लघुः कल्प्यस्ततो भागलब्धस्यैकांकस्य विषमत्वादेकांकयोजनाद्वारद्वयं भागे गुरुद्वयं कल्पनीयमनंतरं चाक्षराभावान्न कल्पना, एवं यत्र प्रथममेको लघुस्ततो गुरुद्वयमीदृशस्त्र्यक्षरस्य

द्वितीयो भेद इति वाच्यम् । एवं त्र्यक्षरस्य तृतीयो भेदः कीदृश इति [पृष्टे], पृष्टांकस्य तृतीयस्य विषमत्वादेकांकयोगेन भागकल्पने एकगुरुः कल्प्यस्ततो भागलब्धस्य द्वितीयांकस्य समत्वात्तद्भागे लघुः कल्प्यस्ततो भागलब्धस्य एकांकस्य विषमत्वादेकांकयोगेन तद्भागे गुरुः कल्प्यः, अनंतरं चाक्षराभावान्न कल्पना, एवं च यत्र प्रथममेको गुरुस्ततो लघुगुरू ईदृशस्त्र्यक्षरस्य तृतीयो भेद इति वाच्यम् । एवं त्र्यक्षरवृत्तस्य चतुर्थो भेदः कीदृश इति पृष्टे, पृष्टस्य चतुर्थांकस्य समत्वात्तद्भागे एको लघुः कल्प्यस्ततो भागलब्धस्य द्वितीयांकस्यापि समत्वात्तद्भागेऽपि लघुः कल्पनीयः, ततो भागलब्धस्यैकांकस्य विषमत्वादेकांकयोगेन तद्भागे गुरुः कल्पनीयस्ततश्चाक्षराभावान्न कल्पना, एवं च यत्र प्रथमं लघुद्वयं तत एको गुरुरीदृशस्त्र्यक्षरवृत्तस्य चतुर्थो भेदः इति वाच्यम् । एवमग्रेऽप्यूह्यम् ।

एवं चतुरक्षरस्य प्रथमो भेदः कीदृश इति पृष्टे, पृष्टांकस्यैकस्य विषमत्वादेकं दत्त्वा तद्भागे एको गुरुः कल्पनीयः, ततो भागलब्धस्यैकांकस्य वारत्रयमेकांकयोजनेन भागे गुरुत्रयं कल्पयित्वा चतुर्गुरुश्चतुरक्षर[स्य] प्रथमो भेद इति वाच्यम् । एवं चतुरक्षरस्य द्वितीयो भेदः कीदृश इति पृष्टे, पृष्टस्य द्वितीयांकस्य समत्वात्तद्भागे एको लघुः कल्पनीयस्ततो भागलब्धस्यैकस्य विषमत्वादेकांकं दत्त्वा वारत्रयं भागकल्पने गुरुकल्पने गुरुत्रयं कल्पनीयम्, एवं च यत्रादौ एको लघुस्ततो गुरुत्रयमीदृशश्चतुरक्षरस्य द्वितीयो भेद इति वाच्यम् । एवमग्रेऽप्यूह्यम् । (E).

४२ । षष्टे । नष्टेऽङ्के भागं कुरु, समे भागे [तं] लघुं जानीहि ।

अह वस्रमेरु (B) ।[१]

अक्खर[२] संखे[३] कोट्ठ करु
आइ अंत पढमंक[४] ।
सिर दुइ अंके अवरु[५] भरु
सूई[६] मेरु णिसंक[७] ॥ ४३ ॥ दोहा ।

विषमे एकं दत्त्वा भागं कुरु, पिंगलो जल्पति गुरुमानय ॥ नष्टस्यांके समे लघुर्विषमे गुरुरित्यर्थः । इदं चतुरचरे योज्यते । अत्र द्वादशो भेदः कीदृगिति प्रश्ने, द्वादशांकस्य समत्वादाद्यो-लघुः, तदर्द्धस्य षड़ंकस्यापि समत्वाद्द्वितीयोऽपि लघुः, तदर्द्धस्य त्र्यंकस्य विषमत्वाद्गुरुः, सैकस्य तदर्द्धस्य द्व्यंकस्य समत्वाल्लघुः, तद्यथा ।।ऽ।, अयं भेदो द्वादशसंख्य इत्यर्थः । एवं पंचाचरादावपि बोध्यम् ॥ ४२ ॥ (G).

४३ । अथ वर्णमेरुः । अचरसंख्यायाः कोष्ठं कुरु, आद्यन्तेषु प्रथमोऽङ्कः । शिरोद्वयाङ्केनापरं बिभृहि सूचीमेरौ निःशङ्कम् ॥ एकाचरमारभ्य यावदचरं छन्दसां चिकीर्षितं भवति तावती पंक्तिः कर्त्तव्या । तत्र चादावन्ते चैकांकदानं कार्यं, तेन प्रथमपंक्तौ कोष्ठ-द्वयमेव । सूचीमेरुरिति समाख्याबलादादौ सूक्ष्मता, उत्तरोत्तरं

---

४३ । १ अथ वर्णमेरुः (A & E). २ अक्षर (B), अक्खर (D). ३ संखु (B), संखे (C), संख (F). ४ पढमपंक (B & F), भरु after this (F). ५ अवर (D & E), आनऊ before सुई (F). ६ सुई (D & F). ७ णिसंका (E), णीसंक (F).

चाधिक्यमवगम्यते। तेन द्वितीयपंक्तौ कोष्ठत्रयमेवमेकैककोष्ठवृद्ध्या लेख्यम्। तत्र चायमङ्कदानप्रकारः,—सर्व्वत्रैव पंक्तौ आदावन्ते च

एकवर्णमेरुपंक्तिः	१	१									२
द्विवर्णमेरुपंक्तिः	१	२	१								४
त्रिवर्णमेरुपंक्तिः	१	३	३	१							८
चतुर्वर्ण ,,	१	४	६	४	१						१६
पंचवर्ण ,,	१	५	१०	१०	५	१					३२
षड्वर्ण ,,	१	६	१५	२०	१५	६	१				६४
सप्तवर्ण ,,	१	७	२१	३५	३५	२१	७	१			१२८
अष्टवर्ण ,,	१	८	२८	५६	७०	५६	२८	८	१		२५६
नववर्ण ,,	१	९	३६	८४	१२६	१२६	८४	३६	९	१	५१२

एकाङ्को देयः, रिक्तकोष्ठकानाञ्च उपरिस्थिताङ्कद्वयेन पूरणं कार्यं। तथाहि प्रथमकोष्ठे तावद्रिक्तकोष्ठाभावः। द्वितीयपंक्तौ मध्यगृहं रिक्तमस्ति, तच्च तदुपरिस्थिताङ्कद्वयेन पूरणीयमत्र च उपरि एकाङ्कद्वयसत्त्वात् मिलित्वा द्वयाङ्को निष्पद्यते, अतः स तत्र लेख्यः। तृतीयपंक्तौ रिक्तगृहद्वयं, तत्र च प्रथमगृहोपरि एकाङ्को द्वयाङ्कश्चेति मिलित्वा त्रयाङ्क इति स तत्र लेख्यः, द्वितीयस्योपरि [एकाङ्कः] द्वयाङ्कश्चेति मिलित्वा त्रयाङ्को जातः स तत्र लेख्यः, एवमग्रेऽपि।

अथ मेरोः प्रयोजनमुच्यते। प्रथमपंक्तावाद्यन्तयोरेकाङ्कसत्त्वाद्द्वयं निष्पन्नं, तेन एकाक्षरजातौ प्रस्तारद्वयमिति लभ्यते। तत्र प्रथममेकाङ्कसत्त्वात्सर्व्वगुरुरेकः, परतश्चैकाङ्कसत्त्वात्सर्व्वलघुरप्येकः। द्वितीयपंक्तौ च मिलित्वा चतुरङ्कसत्त्वाद् द्व्यक्षरजातौ प्रस्तारचतुष्टयम्, आदावेकाङ्कसत्त्वात्सर्व्वगुरुरेकः, द्विती[ये] द्वयाङ्कसत्त्वा-

देकगुरुद्वयम् अङ्के[न्ते] च एकसत्त्वात्सर्व्वलघुरेकः। एवं तृतीयपंक्तौ च मिलित्वा अष्टाङ्को निष्पन्नः, तेन त्र्यक्षरजातौ प्रस्ता[रा]ष्टकम्, एकः सर्व्वगुरुः, एकः सर्व्वलघुः, त्रिर्गुरुद्वयं, त्रिरेकगुरुः, एवमग्रेऽपि बोद्धव्यम् ॥ (C).

४२। अमुकवर्णवृत्तमात्रागणप्रस्तारयोरेतावद्गुरुलघुको भेदः कतिसंख्याक इति अनिर्दिष्टक्रमस्थितिनिर्द्धारितसंख्याकगुरुलघुयुक्तत्वरूपप्रस्तारनिर्णीतस्वरूपाऽनिर्द्धारितसंख्याकभेदनिष्ठायाः एको द्वावित्यादिपिंडीभूतैकत्वद्वित्वादिकायाः निखिलवर्णवृत्तमात्रागणभेदनिष्ठायाश्च पिंडीभूतद्विचतुरष्टषोड़शेत्यादिकायाः संख्यायानिर्द्धारककोष्ठस्थांकसमूहो वा मेरुः। अत्र निखिलभेदनिष्ठपिंडीभूतद्वित्वचतुष्ट्वादिसंख्यानिर्द्धारणं तत्तन्मेरुपंक्तिनिखिलकोष्ठवर्त्यंकयोजननिष्पन्नांकेन बोध्यमिति गुरूपदेशोऽनुसंधेयः। पूर्ववद्द्विविधे, तत्र वर्णमेरुप्रकारमाह। अक्खरसंखेति। अक्खर संखे—संख्याताक्षराणाम्। अत्राक्षरपदस्य चरणाक्षरपादत्वात्संख्यातचरणाक्षराणामित्यर्थः। संख्यातानि एकादिषड्विंशतिपर्यंतसंख्यायुक्तानि चरणाक्षराणि येषां तेषां वृत्तानामिति निर्गलितार्थः। कोट्ठ—कोष्ठानि गुरूपदेशादिति शेषः, कर—कुरु। एकाक्षरचरणवृत्तस्य कोष्ठद्वयं, द्व्यक्षरचरणवृत्तस्य कोष्ठत्रयं, त्र्यक्षरचरणवृत्तस्य कोष्ठ[चतुष्टयं], चतुरक्षरचरणवृत्तस्य कोष्ठपंचकमित्येवं गुरूपदेशादुत्तरोत्तरैकैकवृद्ध्या एकाक्षरमारभ्य षड्विंशत्यक्षरपर्यंतं कोष्ठानि कल्पयेति निर्गलितार्थः। तत्र आइ अंत—आद्यंतयोः कोष्ठयोः, पढ़मंक—प्रथममंकमेकत्वसंख्याबोधकमंकमिति यावत्, देहीति शेषः। अवर—अपरं आद्य-

तांतरालस्थितमिति यावत् कोष्ठकं, सिर दुइ अंके — शिरोऽंकद्वयेन, अत्रहट्टभाषायां पूर्व्वनिपातानियमात्, भरु—पूरय पूरणीयकोष्ठ-शिरःस्थांकद्वययोजननिष्पन्नांकेनाद्यंतांतरालस्थितं कोष्ठं पूरणीय-मित्यर्थः। एवम्प्रकारेणेति शेषः, मेरु—मेरुः, णिसंक—निःशंकं निश्चयेनेति यावत्, सूई—सूच्यते निर्मीयते इति योजना।

अथैतन्निर्माणप्रकारो लिख्यते। प्रथमं वामदक्षिणयोरेकांगुल-मायतमूर्द्धाधोरेखाद्वयं विनिर्माय तत्पार्श्वयोः ऋजुरेखया मेल-नीयमेवमेकं दीर्घं कोष्ठं विधाय तत्र उर्द्धरेखामध्यदेशमारभ्याधो-रेखामध्यदेशपर्यंतमेकामृजुरेखां दत्त्वा कोष्ठद्वयं कल्पनीयं, तत्र तत्र प्रत्येकमेकैकोऽंको देयः, तत्र प्रथममिदं मेरुस्वरूपं प्रथमकोष्ठस्यै-कांकेन एकवर्णवृत्त एकगुरुरेको भेदः, द्वितीयकोष्ठस्यैकांकेन च एक-लघुरेको भेदः इति निर्द्धारितैकलसंख्याकगुरुलघुयुक्तलरूपनिर्णीत-स्वरूपैकवर्णभेदनिष्ठैकलसंख्या प्रतीयते। कोष्ठद्वयस्थैकांकद्वयपरस्पर-योजननिःपन्नद्वितीयांकेन चैकवर्णवृत्तभेदस्य द्विलरूपा समस्ता संख्या प्रतीयते, इतीयं कोष्ठद्वयात्मिका प्रथमा एकवर्णमेरुपंक्तिः।

एवमेतत्पंक्त्यधोरेखां पार्श्वयोर्मनागवर्द्धयित्वा अंगुष्ठमात्रं मध्यदेशं त्यक्त्वा अधस्तादेका रेखा उपरितनरेखासमाना कार्या, पार्श्वयोश्च ऋजुरेखया मेलनं कार्यमेवमेकमायतं कोष्ठं विधाय तत्र उपरि-तनप्रथमकोष्ठस्याधोरेखामध्यदेशमारभ्याधस्तनरेखापर्यंतमेका ऋजु-रेखा देया, ततः द्वितीयकोष्ठाधोरेखामध्यमारभ्याधस्तनरेखापर्यंत-मेका ऋजुरेखा देया, एवं कोष्ठत्रयं संपाद्य प्रथमान्त्यकोष्ठयोः प्रत्येकमेकैकोऽंको देयः, अंतरालवर्त्ती च द्वितीयः कोष्ठः शिरः-

स्थैकांकद्वययोजननिःपन्नद्वितीयांकेन पूरणीयः, तत्र द्व्यक्षरवृत्त-भेदेषु द्विगुरुरेको भेद इति निर्द्धारितद्वित्वसंख्याकगुरुयुक्तद्व्यक्षर-वृत्तभेदनिष्ठैकत्वरूपसंख्या प्रथमकोष्ठस्थैकांकेन प्रतीयते। ततो-द्वितीयकोष्ठस्थद्वितीयांकेन द्व्यक्षरस्यैकगुर्वेकलघुयुक्तौ द्वौ भेदाविति निर्द्धारितैकत्वसंख्याकगुरुलघुयुक्तद्व्यक्षरभेदनिष्ठद्वित्वरूपसंख्या प्रतीयते। ततस्तृतीयकोष्ठस्थैकांकेन द्व्यक्षरस्य द्विलघुरेको भेद इति निर्द्धारितद्वित्वसंख्याकलघुयुक्तद्व्यक्षरभेदनिष्ठैकत्वरूपसंख्या प्रतीयते। कोष्ठत्रयस्थसमस्तांकयोजननिःपन्नचतुर्थांकेन च चतुष्टरूपा समस्त-भेदसंख्या निश्चीयते, सेयं कोष्ठत्रययुक्ता द्व्यक्षरमेरुपङ्क्तिर्द्वितीया।

एवमेतत्पङ्क्त्यधोरेखां पार्श्वयोर्मनागवर्द्धयित्वैकांगुलमात्रमध्यदेशं त्यक्त्वोपरितनरेखासमानाधस्ताद्रेखा कार्या, पार्श्वयोश्च ऋजुरेखया मेलनं कार्यमेवमेकं दीर्घं कोष्ठं निर्माय तत्र उपरितनप्रथम-कोष्ठाधोरेखामध्यदेशमारभ्याधोरेखापर्यंतमेका ऋजुरेखा देया, ततो द्वितीयकोष्ठाधोरेखामध्यमारभ्याधोरेखापर्यंतमेका ऋजुरेखा देया, ततस्तृतीयकोष्ठाधोरेखामध्यमारभ्याधोरेखापर्यंतमेका ऋजु-रेखा देया, एवं कोष्ठचतुष्टयं संपाद्य तत्राद्यंतकोष्ठयोः प्रत्येकमेकै-कोऽंको देयस्तदंतरालस्थद्वितीयकोष्ठस्य च तच्छिरःस्थैकद्वितीयेत्यंक-द्वययोजननिःपन्नतृतीयांकेन पूरणं कार्यं, तृतीयकोष्ठस्य च तच्छि-रःस्थद्वितीयैकेत्यंकद्वययोजननिःपन्नतृतीयांकेन पूरणं कार्यं, तत्र प्रथमकोष्ठस्थैकांकेन त्र्यक्षरस्य त्रिगुरुरेको भेद इति निर्द्धारित-त्रित्वसंख्याकगुरुयुक्तत्र्यक्षरवृत्तभेदनिष्ठैकत्वरूपसंख्या प्रतीयते। द्वि-तीयकोष्ठस्थतृतीयांकेन च त्र्यक्षरस्य द्विगुर्वेकलघुयुक्तं भेदत्रय-

मिति निर्द्धारितद्वित्वैकत्वसंख्याकगुरुलघुयुक्तत्र्यक्षरभेदनिष्ठत्रित्वरूप-संख्या निश्चीयते। एवं तृतीयकोष्ठस्थतृतीयांकेन [त्र्य]क्षरस्यैकगुरु-द्विलघुयुक्तं भेदत्रयमिति निर्द्धारितैकत्वद्वित्वसंख्याकगुरुलघुयुक्त-त्र्यक्षरभेदनिष्ठक[त्रित्व]रूपसंख्या निश्चीयते। एवं चतुर्थकोष्ठस्थैकां-केन त्र्यक्षरस्य त्रिलघुयुक्त एको भेद इति निर्द्धारितत्रित्वसंख्याक-लघुयुक्तत्र्यक्षरभेदनिष्ठैकत्वरूपसंख्या प्रतीयते। कोष्ठचतुष्टयस्थसर्वांक-योजननिष्पन्नाष्टमांकेन च त्र्यक्षरस्याष्टौ भेदा इति समस्ता त्र्यक्षर-वृत्तभेदसंख्या निश्चीयते, सेयं तृतीया कोष्ठचतुष्टययुक्ता तृती-याक्षरमेरुपंक्तिः।

एवं पूर्वोक्तरीत्यैकं दीर्घं कोष्ठं निर्माय तत्र कोष्ठपंचकं विधाय प्रथमांत्ययोः कोष्ठयोरेकैको देयः, अंतरालस्थस्य द्वितीयकोष्ठस्य शिरःस्थैकतृतीयेत्यंकद्वययोजननिःपन्नचतुर्थाङ्केन पूरणं विधेयं, तृती-यकोष्ठस्य च शिरःस्थतृतीयाङ्कद्वययोज[न]निःपन्नषष्ठांकेन पूरणं विधेयं, चतुर्थकोष्ठस्य च शिरःस्थतृतीयैकेत्यंकद्वययोजननिःपन्नचतु-र्थांकेन पूरणं विधेयं, तत्र प्रथमकोष्ठस्थैकांकेन चतुरक्ष[र]वृत्तस्य चतुर्गुरुरेको भेद इति निर्द्धारितचतुष्ट्वसंख्याकगुरुयुक्तचतुरक्षरवृत्त-भेदनिष्ठैकत्वसंख्या प्रतीयते। द्वितीयकोष्ठस्थचतुर्थांकेन च चतुरक्षरस्य त्रिगुर्वेकम[ल]घुयुक्तं भेदचतुष्टयमिति निर्द्धारितत्रित्वैकत्वसंख्याक-गुरुलघुयुक्तचतुरक्षरभेदनिष्ठचतुष्ट्वरूपसंख्या प्रतीयते। ततस्तृतीय-कोष्ठस्थषष्ठांकेन चतुरक्षरस्य द्विगुरुद्विलघुयुक्ताः षड्भेदा इति निर्द्धारितद्वित्वसंख्याकगुरुलघुयुक्तचतुरक्षरभेदनिष्ठषट्संख्या प्रती-यते। ततः चतुर्थकोष्ठस्थचतुर्थांकेनैकगुरुत्रिलघुयुक्तं चतुरक्षरस्य भेद-

चतुष्टयमिति निर्द्धारितैकलत्रिलसंख्याकगुरुलघुयुक्तचतुरचरभेद-निष्ठचतुष्टच[रू]पसंख्या निश्चीयते। ततः पंचमकोष्ठस्यैकांकेन चतु-र्लघुयुक्तश्चतुरचरस्यैको भेद इति निर्द्धारितचतुष्टसंख्याकलघुयुक्त-चतुरचरभेदनिष्ठैकलरूपसंख्या निश्चीयते। कोष्ठपंचकनिष्ठसर्वांक-योजननिःपन्नषोड़शांकेन च षोड़शरूपा समस्ता चतुरचरभेदसंख्या प्रतीयते, सेयं पंचकोष्ठयुक्ता चतुर्थी चतुरचरमेरुपङ्क्तिः।

एवं पूर्वोक्तरीत्या एकं दीर्घं कोष्ठं विधाय तत्र कोष्ठषट्कं निर्माय प्रथमांत्यकोष्ठयोरेकैकोऽंको देयः, अंतरालस्थद्वितीय-कोष्ठस्य शिरःस्थैकचतुर्थेत्यंकद्वययोजननिःपन्नपंचमांकेन पूरणं विधेयं। ततस्तृतीयकोष्ठस्य शिर[:]स्थचतुर्थषष्ठेत्यंकद्वययोजननिःपन्नदशमांकेन पूरणं विधेयं। ततश्चतुर्थकोष्ठस्य शिरःस्थषष्ठचतुर्थेत्यंकद्वययोजन-निःपन्नदशमांकेन पूरणं विधेयं। ततः पंचमकोष्ठस्य शिरःस्थ-चतुर्थैकेत्यंकद्वययोजननिःपन्नपंचमांकेन पूरणं विधेयं। तत्र प्रथम-कोष्ठस्यैकांकेन पंचाचरवृत्तस्य पंचगुरुरेको भेद इति निर्द्धा-रितपंचलसंख्याकगुरुयुक्तपंचाचरभेदनिष्ठैकलसंख्या निश्चीयते। ततः द्वितीयकोष्ठस्थपंचमांकेन च पंचाचरवृत्तस्य चतुर्गुर्वेकलघुयुक्तं भेद-पंचकमिति निर्द्धारितचतुष्टैकलसंख्याकगुरुलघुयुक्तपंचाचरभेदनिष्ठ-पंचलसंख्या निश्चीयते। ततस्तृतीयकोष्ठस्थदशमांकेन पंचाचर-वृत्तस्य त्रिगुरुद्विलघुयुक्तं भेददशकमिति निर्द्धारितत्रिलद्विल-संख्याकगुरुलघुयुक्तपंचाचरभेदनिष्ठदशलसंख्या नी[नि]श्चीयते। तत-श्चतुर्थकोष्ठस्थदशमांकेन पंचाचरवृत्तस्य द्विगुरुत्रिलघुयुक्तं भेद-दशकमिति निर्द्धारितद्विलत्रिलसंख्याकगुरुलघुयुक्तपंचाचरभेदनिष्ठ-

द्गलसंख्या निश्चीयते । ततः पंचमकोष्ठस्थपंचमांकेन पंचाचरवृत्तस्य एकगुरुचतुर्लघुयुक्तं भेदपंचकमिति निर्द्धारितैकलचतुष्टसंख्याकगुरु-लघुयुक्तपंचाचरभेदनिष्ठपंचत्वसंख्या निश्चीयते । ततः षष्ठकोष्ठ-स्थैकांकेन पंचाचरवृत्तस्य पंचलघुयुक्त एको भेद इति निर्द्धारित-पंचलसंख्याकलघुयुक्तभेदनिष्ठैकत्वसंख्या निश्चीयते । कोष्ठषट्कनिष्ठ-सर्वांकयोजननिःपन्नद्वात्रिंशत्तमांकेन च द्वात्रिंशद्रूपा समस्ता पंचा-चरवृत्तभेदसंख्या प्रतीयते । एवमग्रेऽपि सुधीभिः स्वयमूह्यं, ग्रन्थ-विस्तरभयान्न लिख्यते ॥ (E).

४२ । अथ कियंतः सर्वगुर्वेकगुरु-द्विगुरु-त्रिगुर्वादयः, एवं कियंतः सर्वलघ्वेकलघु-द्विलघ्वादय इति ज्ञानार्थं मेरुमाह, अक्खर । अचरसंख्यया कोष्ठान् कुरु, आद्यमंत्यं च प्रथमांकेन पूरय । शीर्षद्वयांकेनापरं भर, जानीत सूचीमेरुं निःशंकम् ॥ आद्यं कोष्ठमिति शेषः, तथाच सर्वत्र आद्यांत्यकोष्ठयोरेक एव लेख्यः, शीर्षकोष्ठद्वयरूपांकेन रिक्तकोष्ठं पूरयेत्यर्थः । तथाच एकाचरादौ दृष्टमेरुसंख्यया द्व्यादिकोष्ठानर्द्धान्तरितानेकैकवृद्ध्या लिखेत् । तत्र सर्वकोष्ठाद्यंतयोरेकं दत्त्वा पश्चादुपरितनं कोष्ठद्वयांकं शृंखला-बंधन्यायेनैकीकृत्यावशिष्टाः कोष्ठाः पूरणीयाः ॥ तत्र एकाचर-प्रस्तारे एकः सर्वगुरुः, एकः सर्वलघुरिति भेदद्वयमेव सिद्धं, तस्य द्विभेदत्वात् ।' द्व्यचरप्रस्तारे एकः सर्वगुरुः, द्वौ एकगुरू, एकः सर्व-लघुरिति ॥ एवं त्र्यचरप्रस्तारे एकः सर्वगुरुः, त्रय एकगुरवः, त्रयो द्विगुरवः, एकः सर्वलघुरिति ॥ एवं सर्वत्र प्रस्तारे एकः सर्वलघुः, त्रय एकलघवः, त्रयो द्विलघवः, एकः सर्वगुरुरित्यादि सर्वत्र

अह अस्स पताका ।[1]

उद्दिट्ठा[2] सरि अंका दिज्जसु
पुव्व[3] अंक पर भरण करिज्जसु[4] ।
पावल[5] अंक पढम[6] परिदिज्जसु[7]
पत्थर[8] संख[9] पताका किज्जसु[10] ॥ ४४[11] ॥ [अलिल्ला]

बोध्यम् । अत्रांकयोगेन संख्या भवति । यथा एकाक्षरे द्वौ २, द्व्यक्षरे चत्वारः ४, त्र्यक्षरेऽष्टौ ८, चतुरक्षरे षोडशेत्यादि । अत्रेदमवधेयम् । अपचयमाना गुरवः पद्ये मेरौ तु यस्य दृश्यंते । सर्वत्राद्याभंगो विपरीते वांछितं लभते ॥ अत्र प्रस्तारात्कियत्संख्योऽयं भेद इति ज्ञात्वा कियद्गुरुकोऽयमित्यवधार्य्य फलं वदेदिति ॥ ४४ ॥ (G).

४४ । अथ वर्णपताकामाह । उद्दिष्टसदृशानङ्कान् देहि, पूर्वाङ्केन परभरणं कुरु । प्राप्ताङ्कः प्रथमपरतो दीयते, प्रस्ता[र]संख्यया पताका क्रियते ॥ अयमर्थः,— वर्णोद्दिष्टे यथा अङ्का दत्तास्तथैवाङ्का देयाः, एतावान् विशेषः अ[त]त्रोद्दिष्टप्रस्तारे उत्तरोत्तरद्विगुणा अङ्का दीयन्ते, अत्र तूत्तरोत्तरद्विगुणाङ्कस्थापनमात्रं, तत्र चाङ्कस्य वामा गतिरिति न्यायेन चरमाङ्क एव पूर्वांकः प्रथमत एव स्थापनीयः, स एकगुरुकस्थानं, तेनाङ्केन सह तत्पराङ्कस्य भरणं — योजनं

---

४४ । १ अथ पताका (A), अथ वर्णपताका (D & E). २ उदिट्ठ (F). ३ पूर्व्वंके (B), पूर्व्व (C). ४ किज्जसु (F). ५ पाअल (B & C), पाउल (E). ६ पर (B & C). ७ तिज्जसु (D), तेज्जसु (E & F). ८ पच्छर (A), पत्थार (E & F). ९ संखे (A, B & C). १० करिज्जसु (B & C), लिज्जसु (F). ११ ४५ (F).

कार्यं, पूर्व्वाङ्क एवात्र पराङ्क उच्यते, अङ्कस्य वामा गतिरित्युक्तत्वात् । एवमपराङ्केण सह योजनं, ततस्तत्पराङ्केण प्राप्ताश्चाङ्का अधोऽधः स्थाप्याः, एवमेकगुरोर्द्वितीया पंक्तिः कार्य्या, तत्र च प्रथमलिखिताङ्कपृष्ठतो योऽङ्कः स उपरि लेख्यः, ततश्च उपरिस्थिताङ्केन सह योजयित्वाऽधो लेख्यः, पुनस्तत्पूर्व्वस्थिताङ्केन सह योजयित्वा । एवं द्विगुरुपंक्तिं समाप्य त्रिगु[रु]पंक्तिर्लेख्या, द्विगुरूपरिस्थिताङ्कपृष्ठस्याङ्क उपरि स्थाप्यस्तत्पृष्ठस्याङ्केन सह योजयित्वा तदधो लेख्यः, पुनः पराङ्केण योजयित्वा तदधो लेख्यः । एवमग्रेऽपि परतोदीयते इत्यस्याधो लिख्यत इत्यर्थः इति गुरूपदेशः । उत्तरोत्तरद्विगुणा अङ्काः कियद्दूरं देया इत्याकांचायामुक्तं प्रस्तारसंख्ययेत्यादि, तेन यावदक्षरस्य प्रस्तारस्तावत्पर्यन्तं द्विगुणाङ्कदानं, तावत्पंक्तिपताका भवतीति बोध्यम् । यत्तु यावती प्रस्तारसंख्या तावदङ्का देया इत्यर्थः इति तन्न, पताकाया यावदङ्कासम्भवात्, तत एकन्यूनाङ्कस्यैव सम्भवात् ।

अथोदाहरणेन स्पष्टीक्रियते। चतुरक्षरप्रस्तारे एकगुर्वादयः कुत्र पतन्तीति प्रश्ने, चतुर्षु स्थानेषु उत्तरोत्तरद्विगुणा अङ्काः स्थाप्याः यथा १,२,४,८, तत्र चैकगुरुपंक्तौ प्रथमतोऽष्टाङ्कः स्थाप्यः, अष्टाङ्कचतुरङ्कयोजनाद्द्वादशाङ्कः स तदधः स्थाप्यः १२, द्वादशाङ्कद्वयाङ्कयोजनाच्चतुर्द्दशाङ्कः स तदधो लेख्यः १४, चतुर्द्दशैकाङ्कयोजनात्पञ्चदशाङ्कः स तदधो लेख्यः १५, एवमेकगुरुकस्यैका पंक्तिः । अथ द्विगुरुकपंक्तौ अष्टाङ्कपृष्ठवर्त्ती

१	२	४	८	
१	२	४		१६
	३	६	१२	
	५	७	१४	
	९	१०	१५	
		११		
		१३		

चतुरङ्क उपरि लेख्यः, चतुरङ्के द्वयाङ्कयोजनात् षडङ्कः ६, स तदधो लेख्यः; षडङ्कैकाङ्कयोजनात् सप्ताङ्कः ७, स तदधो लेख्यः; ततः पूर्व्वाङ्केणापि सह योगं कृत्वा लेख्यं भवति, तत्र चतुरङ्कस्य पूर्व्वाङ्कोऽष्टाङ्कस्तेन चतुरङ्कयोगाद्द्वादशाङ्कः, स पूर्व्वलिखितत्वान्न लिख्यते, एवं चतुर्द्दशाङ्कपञ्चदशाङ्कावपि पूर्व्वलि[खि]तौ, तेनाष्टाङ्के द्वयाङ्कयोगाद्दशाङ्कः १०, स तदधो लेख्यः; ततो दशैकाङ्कयोगादेकादशाङ्कः [११], स तदधो लेख्यः; पुनश्चाष्टाङ्कचतुरङ्कैकाङ्कयोगात्त्रयोदशाङ्कः १३, स तदधो लेख्यः; इति द्विगुरुकपंक्तिः।

अथ द्वि[त्रिगु]रुकपंक्तिः, तत्र चतुरङ्कपृष्ठवर्त्ती द्वयाङ्क उपरि लेख्यः; द्वयाङ्कैकाङ्कयोगात्त्रयाङ्कः, स तदधो लेख्यः; ततश्चतुरङ्कद्वयाङ्कयोगात् षड्ङ्कः, स पूर्व्वलिखितः, तेन चतुरङ्कैकाङ्कयोगात्पञ्चाङ्कः ५, स तदधो लेख्यः; ततश्चाष्टाङ्कचतुरङ्कयोगात् यो द्वादशा[ङ्को] जातः स पूर्व्वलिखित एव, तेनाष्टाङ्कैकाङ्कयोगान्नवाङ्कः ९, स तदधो लेख्यः इति त्रिगुरुकपंक्तिः।

अथ चतुर्गुरुकपंक्तौ द्वयाङ्कपृष्ठवर्त्ती एकाङ्कोऽपि लेख्यः १, ततश्चांत्याङ्कयोगात् येऽङ्कास्ते पूर्व्वलि[खि]ता एव. तेन तदधोऽङ्कान्तरं न लिख्यते ।

तेन चतुरक्षरप्रस्तारस्याष्टमद्वादशचतुर्द्दशपञ्चदशेषु एकगुरुः, चतुर्थषष्ठसप्तमदशमैकादशत्रयोदशेषु द्विगुरुः। द्वितीय[तृ]तीयपञ्च[म]नवमेषु त्रिगुरुः। प्रथमतश्चतुर्गुरुरिति ज्ञेयम्। षोड्शाङ्कस्य लिखनात् तत्र गुरुर्नास्ति, किन्तु सर्व्वलघुरिति ज्ञायते॥ (८).

४४। असुकवर्णमात्राप्रस्तारयोरेतावद्गुरुलघुयुक्तो भेद एतावत्सं-

ख्यक इति मेरुपंक्तिवर्त्तितत्तत्कोष्ठस्थांकनिर्द्धारितस्वरूपसंख्याकानां भेदानां प्रथमद्वितीयादिप्रातिस्विकरूपस्य निर्द्धारणं तन्निर्द्धारकांकसमूहो वा पताका, सा द्विविधा वर्णपताका मात्रापताका चेति ।

वर्णपताकानिर्माणप्रकारमाह उद्दिट्ठा सरि अंकेति । उद्दिट्ठा सरि — उद्दिष्टसदृशान् उद्दिष्टपदस्योद्दिष्टांकपरत्वादुद्दिष्टांकसदृशानित्यर्थः, अंक — अंकान्, दिज्जसु — देहि, प[पू]र्वमेकमंकं दत्त्वा उत्तरोत्तरं द्विगुणितान् द्विचतुरष्टादिकानंकान् यथाप्रस्तारसंख्यं स्थापयेदित्यर्थः, ततः पुब्ब अंक — पूर्वांकस्य, पर — परस्मिन्नुत्तरवर्त्तिनीति यावत् अंके इति शेषः, पत्थरसंख — प्रस्तारसंख्यं प्रस्तारस्य संख्या यस्यां क्रियायां तद्यथा स्यात्तथेत्यर्थः, भरण — योजनं करिज्जसु — कुरु । यस्य पूर्वांकस्य यत्परांकयोजने प्रस्तारसंख्याकोऽंको निष्पद्यते, तस्य पूर्वांकस्य तत्र परांके योजनं न कार्यमित्येको नियम इत्यर्थः । एवं हते पाउल अंक पढम — अवहट्टभाषायां पूर्वनिपातानियमात् प्रथमप्राप्तमंकमित्यर्थः, परित्तिज्जसु — परित्यज । यस्य पूर्वांकस्य यत्परांकयोजने पूर्वप्राप्तोऽंको निष्पद्यते तस्य तत्र योजनं न कार्यमिति द्वितीयो नियम इत्यर्थः । एवं प्रकारेण वर्णानामिति शेषः, पताका किज्जसु — पताकां कुरु इति योजना ।

अत्र यः पूर्वांकः यत्र परांके प्रथमं योज्यते तद्यो[द्यो]जननिःपन्ना अंकाः तत्परांकादधोऽधः स्थाप्या इति नियमो गुरूपदेशादवधारणीयः । पूर्वांकस्य सर्वपरांकयोजने येऽंका निःपद्यंते तैः कोष्ठपंक्तिर्बोध्या ।

अथैतदनुसारेण चतुर्वर्णपताकालिखनप्रकार उच्यते। चतुर्वर्णपताकायामादौ एकं कोष्ठं कर्त्तव्यं, तत ऊर्द्धाधः कोष्ठचतुष्टयं कल्पनीयं, तत ऊर्द्धाधः कोष्ठषट्कं, तत ऊर्द्धाधः कोष्ठचतुष्टयं, ततएकः कोष्ठः। एवं परस्परसंश्लिष्टरेखं कोष्ठस्थानपंचकं विधाय, [य]त्रोपरितनप्रथमद्वितीयतृतीयचतुर्थपंचमकोष्ठेषु एकद्विचतुरष्टषोड़शेति पंचांका यथाक्रमं स्थाप्याः, तत्र प्रथममेककोष्ठस्थानमेकांकयुक्तमिति सर्व्वापेक्षया प[ू]र्वं एकोऽंकः, स च उत्तरवर्त्तिषु द्वितीयचतुर्थाष्टमांकेषु योज्यमानः प्रथमं द्वितीयांके योज्यते इति तद्योजननिःपन्ना अंका द्वितीयांकादधोऽधः स्थाप्या इति एकांकद्वितीयांकयोजननिःपन्नस्तृतीयांको द्वितीयांकादधः स्थाप्यः, ततएकांकचतुर्थांकयोजननिःपन्नः पंचमांकस्तृतीयांकादधः स्थाप्यः, ततः एकाष्टमांकयोजननिःपन्नो नवमोऽंकः पंचमांकादधः स्थाप्यस्ततएकांकस्य षोड़शांकयोजने सप्तदशोऽंकः प्रस्तारसंख्यातोऽधिकसंख्याको निःपद्यते इति तस्य तत्र योजनं न कार्यमेवं प्रथमांकस्य द्वितीयचतुर्थाष्टमांकेषु योजनं कृत्वा निःपन्नद्वितीयतृतीयपंचमनवमैश्चतुर्भिरंकैर्द्वितीयस्थानकोष्ठपंक्तिः कल्पनीया। एतत्कोष्ठपङ्क्तिस्था द्वितीयादयश्चत्वारोऽप्यंकाश्चतुर्थाष्टमांकपूर्ववर्त्तिन इति क्रमेण तयोर्योज्यमानाः प्रथमं चतुर्थांके योज्यंतेऽतस्तद्योजननिःपन्नाअंकाश्चतुर्थांकादधोऽधः स्थाप्या इति, द्वितीयचतुर्थांकयोजननिःपन्नः षष्ठोऽंकः चतुर्थांकादधः स्थाप्यस्ततस्तृतीयचतुर्थांकयोजननिःपन्नः सप्तमोऽंकः षष्ठांकादधः स्थाप्यः, ततः पंचमचतुर्थयोजने नवमांकः प्रथमप्राप्तो निःपद्यते इति तस्य तत्र योजनं न कार्यमिति,

पंचमाष्टमांकयोजननिःपन्नस्त्रयोदशांकः सप्तमांकादधः स्थाप्यः, एवं द्वितीयादिचतुर्णामंकानां चतुर्थांके योजनं कृत्वा द्वितीयाष्टमांकयोजननिःपन्नो दशमांकस्त्रयोदशांक[ा]दधः स्थाप्यस्ततः तृतीयाष्टमयोजननिःपन्न एकादशांको दशमांकादधः स्थाप्यः, ततः पंचमाष्टमयोजननिःपन्नस्त्रयोदशांकः प्रथमप्राप्तो निःपद्यते इति तयोर्योजनं न कार्यं, नवमाष्टमयोजननिःपन्नः सप्तदशो नवमषोड़शयोजननिःपन्नः पंचविंशतितमश्चांकः प्रस्तारसंख्यातोऽधिकसंख्याको निःपद्यते इति तद्योजनं न कार्यम्। एवं द्वितीयाद्यंकानां चतुर्थाष्टमांकयोर्योजनं कृत्वा चतुर्थषष्ठसप्तमत्रयोदशदशमैकादशेति षड़ंकैः तृतीयस्थानकोष्ठपङ्क्तिः कल्पनीया, ततश्चतुर्थादयः षड़ंका अष्टमांकपूर्व[व]र्त्तिन इति तेषां तत्र योजने चतुर्थाष्टमयोजननिःपन्नो द्वादशांकोऽष्टमांकादधः स्थास्ततः षष्ठाष्टमांकयोजननिःपन्नश्चतुर्दशोऽंको द्वादशांकादधः स्थाप्यस्ततः सप्तमाष्टमयोजननिःपन्नः पंचदशोऽंकश्चतुर्दशांकादधः स्थाप्यस्ततस्त्रयोदशदशैकादशांकानामष्टमांकयोजने, अष्टमादीनां च षोडशांकयोजने प्रस्तारसंख्यातोऽधिकसंख्याका अंका निःपद्यंते अतस्तेषां तत्र योजनं न कार्यमेवं चतुर्थाष्टमांकयोर्योजनं कृत्वाष्टमद्वादशचतुर्दशपंचदशेति चतुर्भिरंकैश्चतुर्थस्थानकोष्ठपङ्क्तिः कल्पनीया। पंचमस्थानकोष्ठकं षोडशांकयुक्तं कल्पनीयम्। एवं चतुर्वर्णवृत्तपताकायां कोष्ठस्थानपंचकं कल्पनीयं, तत्स्वरूपं लिखित्वा प्रदर्श्यते—[Vide figure p. 73—Ed.] एवं च चतुर्वर्णभेदपङ्क्तिवर्त्तिप्रथमकोष्ठस्थैकांकनिर्द्धारितचतुर्गुरुयुक्तत्वरूपैकत्वसंख्याकस्य भेदः प्रथम इति [प्राति]स्विकं रूपं पताकाप्रथम-

कोष्ठस्थकांकेन निर्द्धार्य्यते चतुर्गुरुयुक्त एको भेदः प्रथम इति । एवं चतुर्वर्णमेरुपंक्तिवर्त्तिद्वितीयकोष्ठस्थचतुर्थांकनिर्द्धारितैकलघुत्रिगुरुयुक्तत्वस्वरूपचतुष्टसंख्याकानां भेदानां द्वितीयतृतीयपंचमनवमेति प्रातिस्विकं रूपं चतुर्वर्णपताकाद्वितीयस्थानकोष्ठपङ्क्तिवर्त्तिभिश्चतुर्भिरंकैर्निर्द्धार्य्यते एकलघुत्रिगुरुयुक्ताश्चत्वारो भेदा द्वितीयतृतीयपंचमनवमरूपा इति । एवं चतुर्वर्णमेरुपङ्क्तिवर्त्तितृतीयकोष्ठस्थषष्ठांकनिर्द्धारितद्विगुरुद्विलघुयुक्तत्वस्वरूपषट्संख्याकानां भेदानां चतुर्थषष्ठसप्तमत्रयोदशदशमैकादशेति प्रातिस्विकं रूपं पताकातृतीयस्थानकोष्ठपङ्क्तिवर्त्तिभिः षड्भिरंकैर्निर्द्धार्य्यते द्विगुरुद्विलघुयुक्ताः षड्भेदाः चतुर्थषष्ठसप्तमत्रयोदशदशमैकादशरूपा इति । एवं चतुर्वर्णमेरुपङ्क्तिवर्त्तिचतुर्थकोष्ठस्थचतुर्थांकनिर्द्धारितैकगुरुत्रिलघुयुक्तत्वस्वरूपचतुष्टसंख्याकानां भेदानामष्टमद्वादशचतुर्दशपंचदशेति प्रातिस्विकं रूपं पताकाचतुर्थस्थानकोष्ठपङ्क्तिवर्त्तिभिश्चतुर्भिरंकैरवधार्य्यते एकलघुत्रिगुरुयुक्ताश्चत्वारो भेदा अष्टमद्वादशचतुर्दशपंचदशरूपा इति । एवं चतुर्वर्णमेरुपङ्क्तिवर्त्तिपंचमकोष्ठस्थैकांकनिर्द्धारितचतुर्लघुयुक्तत्वस्वरूपैकत्वसंख्याकस्य भेदस्य षोडश इति प्रातिस्विकं रूपं पताकापंचमकोष्ठस्थषोडशांकेन निर्द्धार्य्यते चतुर्लघुरेको भेदः षोडशेति । एवमन्यत्रापि पताका बोध्याः । ग्रंथविस्तरभयान्न लिख्यते ॥ (E).

४४ । अथ वर्णपताका । पूर्वं मेरौ अमुकगुरुका अमुका भेदा भवंतीत्युक्तं, ते च भेदाः प्रस्तारे अमुकस्थानेषु तिष्ठंतीति ज्ञानार्थं पताकामाह ॥ उद्दिट्ठा । तत्र मेरौ यावती गुर्वाद्यंकसंख्या भवि-

ष्यति तावंत्येव कोष्ठकानि पताकायां लेखनीयानीति युक्त्या सिध्यति ॥ उद्दि ॥ उद्दिष्टसदृशानंकान्देहि, पूर्वांकेण परभरणं कुरु । प्राप्तमंकं प्रथमं परित्यज्य प्रस्तारसंख्यया पताकां गृहाण ॥ अयमर्थः । आदौ तावत् यत्संख्याकवर्णवृत्तस्य[?] पताका चिकीर्षिता तत्संख्याका उद्दिष्टवदुत्तरोत्तरं द्विगुणिता एकपंक्त्यंकाः स्थाप्याः, पश्चान्मेरुप्रस्तारांकसंख्यया पताकाकोष्ठा वर्द्धनीयाः ॥ ततः क्रमात्पूर्वाग्रिमकोष्ठस्थांकयोगस्तले लेख्यः इति पताका पूर्यतां ॥ एतदुक्तं ॥

एको द्वावथ चत्वारः ततोऽष्टाविति वर्द्धनं ।
पूर्वं परेण संयुज्य तदधो लेखयेद्बुधः ॥
अंतिमांकावधिं नैव लंघयेदत्र कुत्रचित् ।
एकत्र लिखितं प्राज्ञः पुनरन्यत्र नो लिखेत् ॥

इति वर्द्धनं यावद्विकल्पं ॥ अत्रोदाहरणमेकाक्षरे १ । २ । अस्य द्विविकल्पत्वादेकस्थानस्य एकगुरुः, द्वितीयस्य एकलघुरित्येतावतैव सिद्धिः । सर्वत्राद्यांतांकौ सर्वगुरुलघुवाचकौ बोध्यौ ॥ द्व्यक्षरे यथा,

१	२	४
	१	

अत्रैकांकद्व्यंकयोर्योगे त्र्यंको द्व्यंकाधो लेख्यः ॥ तस्य चतुर्विकल्पत्वात् तावतैव सिद्धिः । आद्यस्थान एव सर्वगुरुः, द्वितीयद्विपंक्तिस्थौ द्वित्र्यंकौ एकगुर्व्वेकलघू, चतुर्थोऽंकः सर्वलघुरिति ॥ चतुरक्षरे यथा ॥ [Vide figure p. 73 —Ed.] अत्रैको द्वाभ्यां सह त्रयं द्व्यंकाधः, एकश्चतुर्भिः सह पंच त्र्यंकाधः, एकाष्टयोगे नव पंचाधः, द्विचतुर्योगे षट् चतुरधः, द्व्यष्टयोगे दश ष[ड़]धः, द्विषोड़शयोगे न संभवति, त्रिचतुर्योगे सप्त दशाधः, पंचचतुर्योगे नव एकत्र लिखितत्वान्न लेख्यः, अष्टयोगे एकादश

अह मत्ता मेरु।[1]

दुइ दुइ कोट्ठा सरि लिहहु[2]
पढ्ढम अंक[3] तसु अंत।
तसु आइहि पुण[4] एक्क[5] सउ[6]
पढमे[7] बेबि मिलंत॥ ४५ ॥ दोहा।

सिर अंके तसु सिरपर
अंके[8] उबरल कोट्ठ[9] पुरह[10] णिस्संके[11]।
मत्ता मेरु अंक संचारि बुज्झह[12]
बुज्झह[12] जण दुइ[13] चारि॥४६॥ [सिंहिणी?]

सप्ताधः, त्रिषोड़शयोगो न, पंचाष्टयोगे त्रयोदश एकादशाधः, चतुरष्टयोगे द्वादशाष्टाधः, चतुःषोड़शयोगो न, षड़ष्टयोगे चतुर्दश द्वादशाधः, दशाष्टयोगो न, सप्ताष्टयोगे पंचदश चतुर्दशाधः। अत्राद्यः सर्वगुरुः, द्वितीयपंक्त्यंका एकलघुस्थानानि, तृतीयपंक्तौ द्विलघुस्थानानीत्यादि ज्ञेयं। यथा आद्यस्थाने सर्वगुरुः, द्वित्रिपंचनवस्थाने[षु] एकलघवस्त्रिगुरवो वा, चतुःषट्दशसप्तैकादशत्रयोदशसु स्थानेषु द्विलघवो द्विगुरवो वा, अष्टद्वादशचतुर्दशपंचदशस्थानेषु त्रिलघवएकगुरवो वा, षोड़शस्थाने सर्वलघुरित्येवं सर्वत्र ज्ञेयम्॥ (G).

४५–४६। १ अथ मत्ता मेरु (C), अथ मात्रामेरुः (A, D, E & F). २ लिहेऊ (D), करऊ (F). ३ पढमह (C). ४ पुण (A), पुणि (D), dropt in (F). ५ रेक्क (C), सक्क (D). ६ दउ (C), सरि (D). ७ बिसमे (E), dropt in (F). ८ अंको (E). ९ कोट्ठा (B), कोट्ठ (E), कोट्टक (F). १० पूरह (D), पूरऊ (E & F). ११ निसङ्के (B), णिसङ्के (C), णीसंके (D & E), णीसंक (F). १२ बुज्झऊ (D & E), बुझऊ (F). १३ दुक्क (E).

४५-४६। अथ मात्रामेरुः। द्वयं द्वयं कोष्ठं समं लिख, प्रथमोऽङ्कस्तस्यान्ते। तस्यादौ पुनरेकं दत्त्वा [प्रथमं] द्वावपि मिलितौ॥ शिरोऽङ्के तस्य शिर उपर्यङ्केण कोष्ठं पूरय निःशङ्कम्। मात्रामेरोरङ्कं संचार्य बुध्यन्तां [बुध्यन्तां] जना द्विचत्वारः॥ मेरोस्तु प्रयोजनं द्विकलादौ प्रस्तारसंख्याज्ञानं सर्वगुर्वादिज्ञानञ्च। तथाहि यदि पृच्छ्यते द्विकलस्य कियान् प्रस्तारः सर्व्वगुरुः, सर्व्वलघुर्वा कियान्, एवं त्रिकलस्य कियान् प्रस्तारः सर्वगुरुः, सर्वलघुर्वा कियान् इत्येवमादिप्रश्ने तज्ज्ञानं मेरोः प्रयोजनं, तत्र चायं प्रकारः। प्रथमतः कोष्ठद्वयं लेख्यं तदधः कोष्ठद्वयं लिखित्वा तदधः कोष्ठद्व[त्र]यं पुनरपि कोष्ठत्रयमधो लेख्यं, ततः कोष्ठचतुष्टयं लिखित्वा तदधोऽपि कोष्ठचतुष्टयं लेख्यमेवं कोष्ठलिखनं कृत्वा तत्राङ्का देया भवन्ति। तत्र चायं प्रकारः। सर्व्वेषां कोष्ठानामन्ते प्रथमाङ्को देयः, प्रथमाङ्कशब्देनैकाङ्क उच्यते। ततश्च समीकृतकोष्ठयुग्मकानामादिमकोष्ठे सर्वत्रैकाङ्को देयस्तदधस्तनकोष्ठादौ च द्वयाद्यङ्कः। तत्रेयं युक्तिः। उपरिस्थिताङ्क एकस्तत्परतश्चैकः, इत्यधस्ताद्द्वयाङ्को लिखितः। एवं द्वितीयकोष्ठयुग्मस्यादिमकोष्ठकादावेकाङ्कोऽस्ति तदुपरि द्वयाङ्क इति मिलित्वा त्रयाङ्कोऽधस्ताल्लेख्यः। एवं तृतीयकोष्ठयुग्मकस्यादावेकाङ्कस्तदुपरि च त्रयाङ्क इति मिलित्वा चतुरङ्कोऽधस्ताल्लेख्य इति। प्रथमे द्वयोर्मिलनार्थमत्र प्रथमशब्देन द्वितीयकोष्ठकादिगृहमुच्यते। अथावशिष्टगृहणानां[गृहाणां]। तत्र च प्राथमिककोष्ठयुग्मके पूरणीयमेव नास्ति, द्वितीयकोष्ठ[युग्म]स्य मध्यगृहं पूरणीयं, तत्रायं प्रकारः, शून्यगृहस्योपरिस्थितो द्वयाङ्कस्तदुपरिस्थितद्विती-

प्रगृहे चैकाङ्क इति मिलित्वा त्रयं, तेन मध्यमकोष्ठे त्रयाङ्को लेख्यः। तदधोगृहं रिक्तमस्ति, तदुपरिस्थितस्य त्रयाङ्कस्य तदुपरि-द्वितीयगृहस्थितैकाङ्कयोजनात् चतुरङ्को जातः, स तदधो लेख्यः। तृतीयकोष्ठयुग्मप्रथमपंक्तौ मध्यमकोष्ठद्वयं रिक्तमस्ति, तत्र चैकस्यो-परि त्रयाङ्को द्वितीयगृहे च त्रयाङ्कस्तयोर्मिलनाच्च षड्ङ्कः, स तत्र लेख्यः; तदपरकोष्ठस्योपरि चतुरङ्कस्तदुपरिस्थितद्वितीयगृहे चैकाङ्क इति मिलित्वा पञ्चाङ्कः, स तत्र लेख्यः। तदधस्च कोष्ठ-द्वयं रिक्तमस्ति, तत्रादिगृहस्योपरि षड्ङ्कस्तदुपरिस्थितद्वितीय-गृहे च चतुरङ्क इति मिलित्वा दशाङ्कस्तत्र लेख्यः; तदपरकोष्ठस्य उपरि पञ्चाङ्कस्तदुपरिस्थितद्वितीयगृहे चैकाङ्क इति मिलित्वा षड्ङ्कः, स तत्र लेख्यः इति शिर अङ्केत्यादेरर्थः।

अथ प्रश्नस्योत्तरदानं प्रकटीक्रियते। तत्र द्विकलस्य कियान् प्रस्तार इति प्रश्ने, प्रथमगृहे एकाङ्कः परगृहे चैकाङ्क इति मिलित्वा द्वयं, तेन द्विकलस्य प्रस्तारद्वयमिति वाच्यम्। द्विकले सर्वगुरुः कियानिति प्रश्ने, प्रथम एकाङ्कसत्त्वात्सर्वगुरुरेक इति वाच्यमन्ते चैकाङ्कसत्त्वात्सर्वलघुरेक इति वाच्यम्। त्रिकले कियान् प्रस्तार इति प्रश्ने, प्रथमगृहे द्वयाङ्कः परगृहे चैकाङ्क इति मिलित्वा त्रयमिति। त्रिकले एकगुरुः कियानिति प्रश्ने, प्रथमतो द्वयाङ्कसत्त्वादेकगुरुद्वयमिति वाच्यम्। त्रिकले सर्व्वलघुः कियानिति प्रश्ने, अन्ते एकाङ्कसत्त्वात्सर्व्वलघुरेक इति वाच्यम्। सर्व्वलघुकथनमेवं बोध्यम्। एवं चतुष्कले कियान् प्रस्तार इति प्रश्ने, तृतीयकोष्ठके एकस्त्रयमेक इति मिलित्वा पञ्चाङ्कसत्त्वात्प्रस्ता[र]पञ्चकमिति

वाच्यम् । चतुष्कले सर्व्वगुरुः कियानिति प्रश्ने, प्रथमत एकाङ्क-सत्त्वादेक इति वाच्यम् । चतुष्कले एकगुरुः कियानिति प्रश्ने, परगृहे त्रयाङ्कसत्त्वादेकगुरुत्रयमिति वाच्यम् । एवं पञ्चकलो-[ले] कियान् प्रस्तार इति प्रश्ने, चतुर्थकोष्ठे मिलिताऽष्टाङ्क-सत्त्वादष्टाविति वाच्यम् । तत्र च प्रथमतस्त्रयाङ्कसत्त्वाद्विगुरुत्रय-मिति वाच्यम् । परगृहे चतुरङ्कसत्त्वादेकगुरुकचतुष्टयमिति वाच्यम् । एवं षट्कले मिलिता त्रयोदशाङ्कसत्त्वात् त्रयोदश प्रस्तारा-इति वाच्यम् । प्रथमत एकाङ्कसत्त्वादेकसर्व्वगुरुरिति वाच्यम् । परगृहे ष[ड़]ङ्कसत्त्वाद्विगुरुषट्कं, ततश्च पञ्चाङ्कसत्त्वादेकगुरुपञ्चक-मेवमग्रेऽपि बोध्यम् । एवमसंख्यातमानेतुं शक्यते इति सप्तकलोऽपि लिखितः । (C). [Vide figure p. 88.—Ed.]

४५-४६ । अथ मात्रामेरुप्रकारमाह दुइ दुइ कोट्ठेति । दुइ दुइ—द्वयोर्द्वयोः कलयोरिति शेषः, कोट्ठा—कोष्ठकानि, सरि—सदृशानि समसंख्याकानीति यावत्, लिहरु—लिखत । एककलप्रस्ताराभावात् द्विकलमारभ्य मेरूत्पत्तिः, एवं च द्वितीय-तृतीयेति द्वयोः कलयोः प्रत्येकं कोष्ठद्वयम् ऊर्द्धाधःस्थित्या पर-स्परसंश्लिष्टं, चतुर्थपंचमेति द्वयोः कलयोः प्रत्येकं कोष्ठत्रयमूर्द्धाधः-स्थित्या परस्परसंश्लिष्टं, षष्ठसप्तमेति द्वयोः कलयोरूर्द्धाधःस्थित्या परस्परसंसक्तं प्रत्येकं कोष्ठचतुष्टयमित्यादिरीत्या द्वयोर्द्वयो कलयोः समसंख्याकान्यूर्द्धाधःस्थित्या परस्परसंसक्तानि कोष्ठकानि उत्तरो-त्तरं वर्द्धितानि गुरूपदेशात् कल्पनी[नी]यानीति निर्गलितार्थः । अत्र कोष्ठसादृश्यं समसंख्याकत्वमेव । तसु—तेषु कोष्ठेषु, अंत—

अंतिमे कोष्ठे इत्यर्थः, पढम[अं]क — प्रथमोऽंकः स्थाप्य इति शेषः, तसु आइहि — तेष्वाद्येषु कोष्ठेषु मध्ये [पुनः] विषमे प्रथमतृतीय-पंचमसप्तमादिकोष्ठेषु, एक्क — एकः अंकः स्थाप्य इत्यनुषंगः। क्वचिद्विषमे इत्यस्य स्थाने पढमे इति पाठः, तत्र समादित्यध्याहृत्य योज्यम्, एवं च समात्प्रथमे पूर्ववर्त्तिनि विषमे इति, स एवार्थः, यतः समात्पूर्ववर्त्ती विषम एवेति, सउ — समेषु द्वितीयचतुर्थषष्ठाष्टमादिषु कोष्ठेषु, बेवि मिलंत — द्वौ मिलितौ पूर्वांकाविति शेषः, स्थापयेत्यनुषंगः। आद्या ये विषमाः कोष्ठास्तेष्वेकांको देयः, ये समास्तेषु पूर्ववर्त्त्यंकद्वययोजननिःपन्नोऽंको देय इत्यर्थः। ततः उवरल कोट्ठ — उर्वरितानि आद्यंतांतरालस्थितानि कोष्ठकानीत्यर्थः। सिर अंके तसु सिरपर अंके — शिरोऽंकाः तच्छिरउपर्यंकाभ्यां, णीसंक[के] — निःशंकं यथा स्यात्, पूरहि[ऊ] — पूरय, एवं अंक संचारी[रि] — अंकान् संचार्य संस्थाप्य, जण दुइ चारि — जना द्विचत्वारः, मत्ता मेरु — मात्रामेरुं जाणऊ [बुझ्झऊ] बुध्यध्वम् इति योजना।

अथैतन्निर्माणप्रकारो लिख्यते। एककलप्रस्ताराभावात् द्विकलमारभ्य मेरुप्रवृत्तिः। एवं च प्रथमं वामदक्षिणयोरि[रे]वांगुलमात्रदीर्घं मध्ये रेखाभूतमूर्द्धमधस्च द्व्यंगुलमात्रमंतरं विसृज्योर्द्धाधो रेखात्रयं कार्यं, ततस्तत्पार्श्वद्वयमेलनम् ऋजुरेखया कार्यम्, एवं दीर्घकोष्ठद्वयं विधाय तत्र प्रथमरेखामध्यदेशमारभ्याधस्तनतृतीयरेखामध्यदेशपर्यंतम् एकाम् ऋजुरेखां दत्त्वा प्रथमस्थाने ऊर्द्धाधःस्थिता परस्परसंसक्तं कोष्ठक[च]तुष्टयं कार्यं, तत्रांतिमकोष्ठयोः प्रत्येकमंको देयः, आद्ये उपरितने प्रथमे च विषमत्वा-

देको देयः, तदधस्तने च द्वितीयत्वात् समे उपरितनकोष्ठद्वय-स्थैकांकद्वयरूपपूर्व्वांकद्वययोजननिःपन्नद्वितीयांकेन पूरणं विधेयम्। एवं चोपरितनकोष्ठद्वयं द्विकलमेरुपङ्क्तिः, तत्र प्रथमकोष्ठस्थैकांकेन द्विकलस्यैकगुरुरूप एको भेद इति, द्वितीयकोष्ठस्थैकांकेन च द्विलघुरेको भेद इति प्रतीयते। कोष्ठद्वयस्थैकांकद्वययोजननिःपन्न-द्वितीयांकेन च द्विकलस्य भेदद्वयमिति द्विकलगणभेदपिंडीभूता समस्ता द्विलसंख्या प्रतीयते। एवमधस्त[न]कोष्ठद्वयं त्रिमात्रमेरु-पङ्क्तिः, तत्र प्रथमकोष्ठस्थद्वितीयांकेन त्रिकलप्रस्तारे एकगुरुयुक्तं भेदद्वयं, द्वितीयकोष्ठस्थैकांकेन च त्रिलघुयुक्त एको भेद इति प्रतीयते। कोष्ठद्वयस्थद्वितीयैकेत्यंकद्वययोजननिःपन्नतृतीयांकेन च त्रिकलस्य समस्तास्त्रयो भेदा इति पिंडीभूता समस्ता त्रिलरूपा त्रिकलगणभेदसंख्या प्रतीयते। ततोऽधस्तनीं तृतीयां रेखामाद्यंत-पार्श्वयोर्मनागवर्द्धयित्वाऽधोध एकैकमंगुलमंतरं विसृज्य तत्परिमाणं रेखाद्वयं कार्यम्, ऋजुरेखया तत्पार्श्वद्वयमेलनं च कार्यम्। एवं त्रिकलमेरुपङ्क्तिसंसृष्टं तदधःस्थं दीर्घं कोष्ठद्वयं कार्यं, तत्रोपरि-तनत्रिकलमेरुपङ्क्तिप्रथमकोष्ठाधोरेखामध्यदेशमारभ्याधस्तनांतिमरे-खापर्यंतम् एका ऋजुरेखा कार्या, एवं तत्पङ्क्तिद्वितीयकोष्ठाधो-रेखामध्यदेशमारभ्याधस्तनांतिमरेखापर्यंतमेका ऋजुरेखा कार्या, एवं द्वितीयस्थमेरूर्द्धापेक्षया अधःस्थित्या परस्प[र]संपर्क कोष्ठ-षट्कं कार्यं, तत्रोपरितनकोष्ठमयात्मिका सर्वापेक्षया तृतीया चतुः-कलमेरुपङ्क्तिः, तत्र सर्वापेक्षया तृतीयत्वाद्विषमे प्रथमकोष्ठे सर्वां-तिमे च तृतीये एकोऽंको देयः, द्वितीये च शिरोऽंकतच्छिरोऽंक-

द्वितीयैकेत्यंकद्वययोजननिःपन्नतृतीयांकेन पूरणं विधेयम्; ए[त]द-धस्तनी च कोष्ठत्रयात्मिका चतुर्थी पंचकलमेरुपङ्क्तिः, तत्र प्रथम-कोष्ठे सर्वापेक्षया चतुर्थत्वात्प्रमे एकद्वयेतिपूर्वांकद्वययोजननिःपन्न-तृतीयांकेन पूरणं कार्यं, तदग्रिमे च द्वितीयकोष्ठे त्रिरोऽंक-तच्छिरोऽंकतृतीयैकेत्यंकद्वययोजननिःपन्नचतुर्थांकेन पूरणं कार्यम्। तदग्रिमे च तृतीयकोष्ठे सर्वांतिमे एकोऽंको देयः, तत्रोपरितन-कोष्ठरूपात्मकचतुःकलमेरुपङ्क्तिप्रथमकोष्ठस्थैकांकेन चतुःकलप्रस्तारे द्विगुरुरेको भेद इति प्रतीयते। तदग्रिमद्वितीयकोष्ठस्थतृतीयांकेन तत्र प्रस्तारे एकगुरुयुक्तं भेदत्रयमिति प्रतीयते। अंतिमतृतीय-कोष्ठस्थैकांकेन च तत्र प्रस्तारे त्रि[चतुः]लघुयुक्त एको भेद इति प्रतीयते। एकतृतीयैकेतिकोष्ठत्रयस्थसमस्तांकयोजननिःपन्नपंचमांकेन त्रि[चतुः]कलस्य पंच भेदा इति समस्ता पिंडीभूता प्रस्तारसंख्या प्रतीये[यते]। एवमेतदधस्तनकोष्ठत्रयात्मकपंचकलप्रस्तारे द्विगुरुयुक्तं भेदत्रयमिति प्रतीयते। तदग्रिमद्वितीयकोष्ठस्थचतुर्थांकेन च तत्र प्रस्तारे एक[गुरु]युक्तं भेदचतुष्टयमिति प्रतीयते। तदग्रिमतृतीय-कोष्ठस्थैकांकेन च तत्र प्रस्तारे पंचलघुयुक्त एको भेद इति प्रतीयते। कोष्ठत्रयस्थत्रिचतुरेकेत्यंकत्रययोजननिःपन्नाष्टमांकेन च पंचकलस्याष्टौ भेदा इति समस्ता पिंडीभूताऽष्टलक्षपा पंचकल-[प्र]स्तारसंख्या प्रतीयते।

एवं पूर्ववदेतत्कोष्ठद्वयादधस्ताद्दीर्घं कोष्ठद्वयं निर्माय उपरि-तनपंचकलमेरुपङ्क्तिप्रथमकोष्ठाधोरेखामध्यदेशमारभ्याधस्तनद्वितीय-कोष्ठाधोरेखापर्यंतमृजुरेखा देया, तत उपरितनद्वितीयकोष्ठाधो-

रेखामध्यदेशमारभ्याधस्तनद्वितीयकोष्ठाधोरेखापर्यंतमृजुरेखा देया, तत उपरितनतृतीयकोष्ठाधोरेखामध्य[देश]मारभ्याधस्तनकोष्ठाधोरेखापर्यंतमृजुरेखा देया, एवं तृतीयस्थाने ऊर्द्ध्वाधःस्थित्या परस्परसंसक्तं कोष्ठाष्टकं कार्यं, तत्रोपरितनं कोष्ठचतुष्टयं षट्कलमेरुपङ्क्तिः। तत्र प्रथमकोष्ठे सर्वापेक्षया पंचमत्वादिषमे सर्वांतिमे चतुर्थे च एकोऽंको देयः। द्वितीयकोष्ठे च शिरोऽंकतच्छिरोऽंकतृतीयांकद्वययोजननिःपन्नषष्ठांकेन पूरणं कार्यम्। तदग्रि[ग्रि]मे च तृतीयकोष्ठे शिरोऽंकतच्छिरोऽंकचतुर्थैकेत्यंकद्वययोजननिःपन्नपंचमांकेन पूरणं विधेयम्। सर्वांतिमे च चतुर्थे कोष्ठे एकांकेन पूरणं विधेयम्। एवं चात्र प्रथमकोष्ठस्थैकांकेन षट्कलप्रस्तारे त्रिगुरुयुक्त एको भेद इति प्रतीये[यते]। तदग्रिमद्वितीयकोष्ठस्थषष्ठांकेन च त[त्र] प्रस्तारे द्विगुरुयुक्ताः षड्भेदा इति प्रतीयते। तदग्रिमतृतीयकोष्ठस्थपंचमांकेन च तत्र प्रस्तारे एकगुरुयुक्ताः पंच भेदा इति प्रतीयते। तदग्रिमचतुर्थकोष्ठस्थैकांकेन च षड्लघुयुक्त एको भेद इति प्रतीयते। कोष्ठचतुष्टयस्थांकचतुष्टययोजननिःपन्न[त्र]योदशांकेन च समस्ता पिंडीभूता षट्कलप्रस्तारे संख्या त्रयोदशरूपा प्रतीयते। तत्र प्रथमकोष्ठे च सर्वापेक्षया षष्ठत्वात्समे एकतृतीयेतिपूर्वांकद्वययोजननिःपन्नचतुर्थांकेन पूरणं कार्यम्। तदग्रिमे द्वितीयकोष्ठे शिरोऽंकतच्छिरोऽंकषष्ठचतुर्थेत्यंकद्वययोजननिःपन्नदशमांकेन पूरणं कार्यम्। तदग्रिमतृतीयकोष्ठे च शिरोऽंक[तच्छिरोऽंक]पंचमैकेत्यंकद्वययोजननिःपन्नषष्ठांकेन पूरणं कार्यम्। अधस्तनं कोष्ठचतुष्टयं च सप्तकलचतुर्थांकेन सप्तकलप्रस्तारे त्रिगुरुयुक्तं भेद-

चतुष्टयमिति प्रतीयते। तदग्रिमद्वितीयकोष्ठस्थदशमांकेन च तत्र प्रस्तारे द्विगुरुयुक्ता दश भेदा इति प्रतीयते। तदग्रिमतृतीयकोष्ठस्थषष्ठांकेन च तत्र प्रस्तारे एकगुरुयुक्ताः षड्भेदा इति प्रतीयते। तदग्रिमचतुर्थकोष्ठस्थैकांकेन च तत्र प्रस्तारे सप्तलघुयुक्त एको भेद इति प्रतीयते। कोष्ठचतुष्टयस्थांकचतुष्टययोजननिःपन्नैकविंशतितमांकेन च समस्ता पिंडीभूता एकविंशतिरूपा सप्तकल[मे]रुपङ्क्तिः। एवमग्रेऽपि मेरुकल्पना यथेच्छं विधेया। अस्माभिस्तु ग्रन्थविस्तरभयात्प्रयोजनाभावाच्च न लिखिता।

मात्रामेरुः।

१	१			२
२	१			३
१	३	१		५
३	४	१		८
१	६	५	१	१३
४	१०	६	१	२१

अथ द्विकलमारभ्य सप्तकलपर्यंतं मात्रामेरुस्वरूपं लिख्यते॥ (E).

४५-४६। अथ सर्वलघ्वेकगुरुद्विगुर्वादिज्ञानार्थं मात्रामेरुमाह। दुइ। द्वौ द्वौ कोष्ठौ सदृशौ कुरु, प्रथममंकं तेषामंते। तस्यादौ पुनरेकं स्थाप्यं समे द्वौ मिलंतौ॥ समे कोष्ठे द्विकोष्ठादिपंक्तेर्द्वितीयचतुर्थादौ कोष्ठे मिलितौ द्वावूर्द्ध्वांकौ कुरु इत्यर्थः॥ रिक्तकोष्ठपूरणोपायमाह। सिर। शिरोऽंकेण तस्य शिरःपरांकेण च उर्वरितं कोष्ठं पूरय निःशंकं मात्रामेरौ अंकसंचारं बुध्यंते बुध्यंते जना द्विचतुराः॥ अत्र खंडमेरौ त्रिकोष्ठकद्विपंक्तौ प्रथमपंक्तिस्थं रिक्तं कोष्ठं तिर्यक् तदुपरितनकोष्ठद्वयस्थांकद्वयमेकीकृत्य पूरणीयं, द्वितीयपंक्तिस्थं रिक्तं कोष्ठं तूपरितनमेव कोष्ठद्वयस्थांकमेकीकृत्य पूरणीयमित्यर्थः॥ एवमग्रेऽपि। उक्तं च। कोष्ठमेकं लिखेदादौ तदधः पंक्तियुग्मके। द्वौ द्वौ च

अह मत्ता पताका ।[१]

(क) उद्दिट्ठा[२] सरि अंका थप्पहु[३]
बामावत्ते[४] पर ले[५] लुप्पहु[६] ।
(ख) एक्क लोपे एक्क[७] गुरु आणहु[८]
दुइ[९] तिण्णि[१०] लोपे दुइ तिण्णि जाणहु[११] ॥ ४७ ॥

अडिल्ला ।

(ग) मत्त पताका पिंगल गाव[१२]
जो पारइ[१३] सो परहि[१४] मिलाव[१५] । ४८[१६] ॥

तदधस्त्रींस्त्रीनेवंरूपेण वर्धनम् ॥ अंत्यकोष्ठेषु सर्वेषु प्रथमांकं समालिखेत् । आद्यकोष्ठे द्विपंक्त्यादौ एवमेकांतरं लिखेत् ॥ आदावेकं ततो द्वौ च, पुनश्चैकं ततस्त्रयम् । तिर्यक्समोर्द्ध्व-कोष्ठांकै रिक्तं कोष्ठं प्रपूरयेत् । विवेकेनांकसंचारे मात्रामेरुः स्फुटो भवेत् ॥ लेखनपंक्त्याः प्रकारस्तु द्विधा ॥ स यथा, एकं कोष्ठमादौ कृत्वा ततो द्विकोष्ठद्विलेखनपंक्त्यादि लिखेत् ॥ द्विकोष्ठादारभ्यैव वा लिखेदिति ॥ (G).

(क) Not found in MSS. B & C ; (ख) found in all ; (ग) not found in MS F. There is a transposition of these Slokas in MS. D ; thus the Slokas ४५, ४६, ४७ and ४८ precede ४१, ४२, ४३ and ४४, the next two Slokas ४९ and ५० are also transposed in the same.—Ed.

४७—४८ । १ अथ मात्रापताका (A & D), अह मत्तामेरु (B). २ उद्दिट्ठा (A), उद्दिट्टा (D), उद्दिट्ठु (F). ३ थ (D), दिज्जहु (A). ४ वामापत्ते (A), वामावर्त्ते (D). ५ लेइ (A & D), लै (E). ६ लोपिज्जहु (A), लघुऊ (E). ७ एक (A). ८ जानहु (A), आनहु (B, C & E). ९ दु (D). १० तिन (B), तिण (C), भिण (D), तिखि (F). ११ माणहु (A), जानहु (B), जाणहु (C), जाऊ (E). १२ गावै (D). १३ पावहु (A), पावइ (E), जानै (D). १४ परहु (B & C). १५ बुभाव (E), बुभावेइ (D). १६ ४६ (A).

४७-४८। अथ मात्रापताकामाह॥ एकलोपे एकगुरुमानय, द्विचिलोपे द्वित्रीन् जानीहि। मात्रापताकां पिंगलो गायति, यः प्राप्यते स परतो मिल्यते॥ प्राप्यते अवशिष्यते, मिल्यते लिख्यते। अत्र षट्कलप्रस्तारे एकगुरुः कुत्र द्विगुरुः कुत्रेति ज्ञानं प्रयोजनं, तच्च चैकलोपादिना तज्ज्ञानमित्युक्तं, तत्राङ्कदानमन्तरेण [न] सम्भवत्येव अतस्तत्राङ्कादयः कथमित्याकांक्षाया दर्शनादुद्दिष्टसदृशाङ्कदानं सिद्ध्यति, तच्च पूर्व्वं सिद्धं, यथा १, २, ३, ५, ८, १३, तत्र शेषाङ्के पूर्व्वपूर्व्वाङ्कलोपः कार्य्यो भवति, अत्र त्रयोदशाङ्के शेषभूते तत्पूर्व्वस्य अष्टाङ्कलोपे पञ्चाङ्को निष्पद्यते स लेख्यः, तस्मिन्नेव त्रयोदशाङ्के तत्पूर्व्वस्य च पञ्चाङ्कस्य लोपे अष्टाङ्कोऽवशिष्यते स त[द]धस्ताल्लेख्यः, एवं तत्र त्रयाङ्कलोपे दशाङ्कोऽवशिष्यते स तदधो लेख्यः, एवं द्वयाङ्कलोपे एकादशाङ्कः स तदधो लेख्यः, एवमेकांकलोपे द्वादशाङ्कः स तदधो लेख्यः, इत्येकलोपादेकगुरुकपङ्क्तिः। अथ द्वयलोपे द्विगुरुरानीयते,—तत्र त्रयोदशाङ्के तत्पूर्वाङ्कद्वयलोपेन द्विगुरुर्द्वयः, तत्र यद्यष्टौ पञ्चेत्यनयोर्लोपः क्रियते तदा शून्यमेवेत्यतोऽष्टौ त्रयमित्यनयोर्लोपेन द्वयाङ्कः प्राप्यते स च द्वितीयपङ्क्तेरुपरि स्थाप्यः, ततश्चाष्टौ द्वयमित्यनयोर्लोपे त्रयाङ्कोऽवशिष्यते स द्वयाङ्कस्याधस्ताल्लेख्यः, ततश्चाष्टावेक इत्यनयोर्लोपे चतुरङ्कोऽवशिष्यते स तदधो लेख्यः, ततश्च पञ्च त्रयमित्यनयोर्लोपे पञ्चाङ्कः प्राप्यते स च पूर्व्वपङ्क्तिपतितत्वात्पुनर्न लिख्यते, तेन पञ्च द्वयमित्यनयोर्लोपे षड़ङ्कोऽवशिष्यते स तदधो लेख्यः, ततश्च पञ्चैक इत्यनयोर्लोपे सप्ताङ्कोऽवशिष्यते स तदधो लेख्यः,

ततश्च त्रयं द्वयमित्यनयोर्लोपे अष्टाङ्कः प्राप्यते स च प्रथमपङ्क्ति-पतितत्वात् [न] लिख्यते, तेन त्रयमेक इत्यनयोर्लोपे नवाङ्कः प्राप्यते स तदधो लेख्यः, इति [द्वि]गुरुपङ्क्तिः।

अथ त्रयलोपेन त्रिगुरुक आनेयो भवति,—तत्राष्टौ पञ्च त्रय-मिति मिलित्वा षोड़शाङ्कः, अष्टौ पञ्च द्वयमिति मिलित्वा पञ्चदशाङ्कः, अष्टौ पञ्च एक इति मिलित्वा चतुर्द्दशाङ्कः, एतेषां त्रयोदशाङ्के लोपो न सम्भवति, एवमष्टौ त्रयं द्वय[मि]ति मिलित्वा त्रयोदशाङ्कः, तस्य लोपश्चेत् क्रियते तदा शून्यमाया-त्यतस्तदपि व्यर्थं, पञ्च त्रयं द्वयमित्येषां लोपे त्रयाङ्कोऽवशिष्यते स च पूर्वलिखितत्वान्न लिख्यते, पञ्च द्वयमेक इत्येतेषां लोपे पञ्चाङ्कः प्राप्यते सोऽपि पूर्व्वलिखितस्तेनाष्टौ त्रयमेक इत्येतेषां लोपे एकाङ्कोऽवशिष्यते स तृतीयपङ्क्तौ लेख्यः। तथाच पञ्चमाष्टमदशमै-कादशद्वादशस्थाने[षु] षट्कलप्रस्तारस्यैकगुरुकः पततीति, एवं द्वितीय-तृतीयचतुर्थषष्ठसप्तमनवमस्थाने[षु] द्विगुरुः पततीति, प्रथमस्थाने च त्रिगुरुः पततीति ज्ञेयम्, अत्र च त्रयोदशाङ्कस्य लिखितत्वात्तत्र गुरुर्नास्तीति ज्ञायते, [ते]न त्रयोदशाङ्कः सर्व्वलघुरिति।

अत्र च पञ्चमादिस्थानेष्वेकैकगुरुकः पततीत्युक्तं, स कीदृश-इति प्रश्ने, सर्व्वाः कलाः कृत्वा उद्दिष्टवदङ्का देयाः, यथा १, २, ३, ५, ८, १३, ततश्च यदङ्कलोपेन पश्चाङ्कः तदीया मात्रा परमात्रया सह गुरुतां प्रापणीया भवति, प्रकृते च अष्टाङ्क-लोपात्पञ्चाङ्कः प्राप्तः, स चाष्टाङ्कः पञ्चम्यां कलायामस्ति, तेन पञ्चमी कला षट्कलया ।।।।।। गुरुतां प्राप्ता, तेन ।।।।ऽ एता-

दृश इति वक्तव्यम् । एवमष्टमस्थाने कीदृगिति प्रश्ने, पञ्चाङ्क-लोपादष्टाङ्कः प्राप्तः, पञ्चाङ्कस्तु चतुर्थ्यां कलायामस्ति, तेन चतुर्थी कला पञ्चम्या कलया सह गुरुतां प्राप्ता, तेन।।।ऽ। एतादृश इति वाच्यम् । एवमग्रेऽपि । एवं द्वितीयस्थाने द्विगुरुकः कीदृगिति प्रश्नेऽष्टाङ्कत्रयाङ्कलोपाद्द्वयाङ्को लब्धः, त्रयाङ्कस्तृतीयकलायामष्टाङ्कस्य पञ्चम्यां कलायामतस्तृतीया कला [चतुर्थीं कला]मादाय पञ्चमी कला षष्ठीं कलामादाय गुरुतां प्राप्ता, तेन ।।ऽऽ एतादृगिति वक्तव्यम्, एवमग्रेऽपि । अङ्कस्य वामगतित्वाद्वैंक्रमेण गणना कार्य्या। अत्र च पञ्चमादिस्थानेषु एकैकगुरुकः पततीति उक्तं, स कीदृश-इति प्रश्ने मात्रानष्टप्रकारं कृत्वा ज्ञातव्य इति संक्षेपः ॥ (C).

४७—४८। अथ मात्रापताकानिर्माणप्रकारमाह, उद्दिट्ठा सरि अंका इति। उद्दिट्ठा सरि अंका—अत्र उद्दिष्टपदस्योद्दिष्टांक-परत्वादुद्दिष्टांकसदृशानंकानेकद्वित्रिपंचाष्टत्रयोदशादिरूपानित्यर्थः ; थप्पहु—क्रमेणोत्तरोत्तरं स्थापयत तान् इति शेषः । वामावत्ते—वामावर्त्तेन प्रतिलोमविधिना सर्वांतिमांकाव्यवहित[त]पूर्वांकमारभ्येति यावत् । लेहु—गृहीत्वा, पर—परस्मिन्, सर्वांतिमांके, लुप्पहु—लोपयत न्यूनतां नयत सर्वांतिमेऽङ्के तदव्यवहितपूर्वांकमारभ्य पूर्व-पूर्वांकाः क्रमेण लोप्याः, तत्र एक लोपे—एकलोपे, अत्र एकपदस्यैकांकपरत्वादेकांक-लोपे इत्यर्थः, एक गुरु जाणहु—एकगुरुं

षट्कलपताका

१	२	५	१३
	३	८	
	४	१०	
	६	११	
	७	१२	
	९		

जानीत। दुत्तिणिलोपे—द्वित्राणामंकानां लोपे, दुत्तिणि—द्वित्रान्

गुरून् जाणह—जानीत। एकैकपूर्वांकलोपे येऽंका अवशिष्यंते ते एकगुरुयुक्तभेदज्ञापकाः, पूर्व्वांकद्वयलोपे येऽंका अवशिष्यंते ते गुरुद्वययुक्तभेदज्ञापकाः, पूर्वांकत्रयलोपे येऽवशिष्यंते ते गुरुत्रय-युक्तभेदज्ञापका इति निर्गलितार्थः। एवं प्रकारेण पिंगल णाग—पिंगलो नागः मत्त पताका—मात्रापताकां गावइ—गायति कथय-तीत्यर्थः। जो पावइ—यः प्राप्नोति गुरूपदेशाज्जानाति, सो परहि बुझावइ—सः परं बोधयति इति योजना। अत्र [?] एकत्वसंख्या-विशिष्टौ द्वित्वसंख्याविशिष्टौ च, पूर्वांकः प्रथमं सर्वांतिमांके लुप्यते तद्व्यवहितपूर्वांकमारभ्यतेऽवशिष्टांकाः क्रमेणाधोऽधः स्थाप्या इति, यदंकद्वयलोपे अन्योऽवशिष्यते पूर्वप्राप्तो वाऽंकः प्राप्यते तदंकद्वय-लोपो न कार्य इति नियमत्रयं गुरूपदेशाद्व्यवसेयम्।

अथ षट्कलपताकास्वरू[प]लिखनप्रकारतो वामदक्षिणयोरंगुल-पंचकपरिमाणमूर्द्धाध ऋजुरेखाद्वयमर्द्धांगुलमधिकं वा मध्यदेशे-ऽंतरं विसृज्य कर्त्तव्यं, ततो ऋजुरेखया तत्पार्श्वमेलनं विधेयमेवमेकं दीर्घं कोष्ठं विधाय तत्रैकांगुलपरिमितमंतरं त्यक्त्वोर्द्ध्वरेखामारभ्या-धोरेखापर्यंतं पंच ऋजुरेखाः क्रमेण दत्त्वा कोष्ठषट्कमुत्तरोत्तरं परस्परसंश्लिष्टं विधेयं, तत्रोद्दिष्टांकसदृशा एकद्वित्रिपंचाऽष्टत्रयोद-शेति षड्ंकाः क्रमेण स्थाप्याः। ततो द्वितीयांककोष्ठादधोऽर्द्धांगुल-मितानि परस्परसंश्लिष्टानि पंच कोष्ठकानि कार्याणि, ततः पंच-मांककोष्ठादधोऽधस्तादृशमेव कोष्ठचतुष्टयं कार्यं, ततः सर्वांतिम-त्रयोदशांकमध्ये तद्व्य[व]हिताष्टांकलोपे उर्वरितं पंचमांकं तत्र चतुर्थकोष्ठे विन्यस्तमेवास्तीति तदन्यत्र लेख्यमिति संप्रदायः। ततः

सर्वांतिमत्रयोदशांकमध्ये क्रमप्राप्तपंचमांकलोपे उर्वरितमष्टमांकं पंचमांकतो[को]ष्ठादधस्तनकोष्ठे स्थाप्यं, ततस्तत्र क्रमप्राप्ततृतीयांकलोपे उर्वरितं दशमांकमष्टमांककोष्ठादधस्तनकोष्ठे स्थाप्यं, ततस्तत्र क्रमप्राप्तद्वितीयांकलोपे उर्वरितमेकादशांकं दशमांककोष्ठादधस्तनकोष्ठे स्थाप्यं, ततस्तत्र क्रमप्राप्तैकांकलोपे उर्वरितं द्वादशांकमेकादशांककोष्ठादधस्तनकोष्ठे स्थाप्यं, सेयमेकांकलोपनिःपन्ना पंचकोष्ठात्मिका षट्कलमेरुपङ्क्तितृतीयकोष्ठस्थपंचमांकनिर्द्धारितैकगुरुयुक्तलस्वरूपपंचलसंख्याकानां षट्कलगणभेदानां पंचमाष्टमदशमैकादशद्वादशेतिप्रातिस्विकरूपज्ञापिका षट्कलपताकापङ्क्तिः। ततो द्व्यंकलोपेऽष्टमपंचमांकयोस्त्रयोदशांकमध्ये लोपः शून्यशेषत्वान्न कार्य इति, सर्वांतिमत्रयोदशांकमध्ये अष्टमतृतीयेत्यंकद्वयलोपे उर्वरितं द्वितीयमंकं तद्द्वितीयकोष्ठेऽस्त्येव ततस्त्रयोदशमध्ये अष्टमद्वितीयेत्यंकद्वयलोपे उर्वरितं तृतीयांकं द्वितीयांककोष्ठादधस्तनकोष्ठे स्थाप्यं, ततस्त्रयोदशमध्ये अष्टमैकेत्यंकद्वयलोपे उर्वरितं चतुर्थमंकं तृतीयांककोष्ठादधस्तनकोष्ठे स्थाप्यं, ततस्त्रयोदशमध्ये पंचमतृतीयेत्यंकद्वयलोपे प्रथमप्राप्तः पंचमांकोऽवशिष्यते इति पंचमतृतीयांकयोर्लोपं त्यक्त्वा पंचमद्वितीययोर्लोपे अवशिष्टः षष्ठांकश्चतुर्थांककोष्ठादधस्तनकोष्ठे स्थाप्यः, ततस्तत्र पंचमैकेत्यंकद्वयलोपे अवशिष्टः सप्तमोऽङ्कः षष्ठांककोष्ठादधस्तनकोष्ठे स्थाप्यः, ततस्तत्र पंचमैकेत्यंकलोपे अवशिष्टः सप्तमोऽङ्कः षष्ठांककोष्ठादधस्तनकोष्ठे स्थाप्यः, ततस्तत्र तृतीयद्वितीयेत्यंकद्वयलोपे अवशिष्टोऽष्टमोऽङ्कः प्रथमप्राप्तोऽवशिष्यते इति तयोस्तत्र लोपं त्यक्त्वा तृतीयैकेत्यंकद्वयलोपे

अवशिष्टो नवमोऽंकः सप्तमांककोष्ठादधस्तनकोष्ठे स्थाप्यः, सेयमंकद्वयलोपनिःपन्ना षट्कलमेरुपङ्क्तिद्वितीयकोष्ठस्थषष्ठांकनिर्द्धा[रि]तद्विगुरुयुक्तलस्वरूपषट्संख्याकानां षट्कलभेदानां द्वितीयतृतीयच[तु]र्थषष्ठसप्तमनवमेतिप्रातिस्विकरूपज्ञापिका षट्कोष्ठात्मिका षट्कलपताकापङ्क्तिः । एवं तत्र प्रथमतृतीयाष्टेत्यंकत्रयलोपे उर्वरितएकोऽंकः, स च षट्कलमेरुप्रथमकोष्ठस्थैकांकनिर्द्धारितत्रिगुरुयुक्तलस्वरूपैकलसंख्याकस्य षट्कलभेदस्य त्रिगुरुयुक्तो भेदः प्रथम इति प्रातिस्विकरूपज्ञापकः प्रथमकोष्ठेऽस्त्येवेति सर्व्वमनवद्यम् । अथ षट्कलपताकास्वरूपं लिख्यते । (E). [Vide figure p. 92.—Ed.]

४७—४८ । अथ सर्वलघ्वेकगुरुद्विगुर्वादयः कुत्र कुत्र स्थाने पतंतीति तज्ज्ञानार्थं मात्रापताकामाह ॥ उद्दि ॥ उद्दिष्टसदृशांकान् स्थापय, वामावर्तेन परस्मिन् गृहीत्वा लोपय । एकलोपे एकं गुरुं जानीत, द्वयोस्त्रयाणां लोपे द्वौ त्रीन् जानीत ॥ अंत्यांके वामावर्तेन पूर्वांका लोप्याः, शेषांकाः क्रमेण स्थाप्याः, तावंत्येकगुरुस्थानानि । एवं द्वयोः द्वयोः पूर्वांकयोर्योगं कृत्वा त्रयाणां त्रयाणां पूर्वांकाणां योगं कृत्वा लोपय ॥ मेरुगतं यावत्संख्यं कार्यं, द्वित्र्यादिलोपे द्विगुरुत्रिगुर्वादिका भेदा बोध्याः । एवं सर्वत्रांत्यांकः सर्वलघुर्भेदो ज्ञेयः; एवमग्रेऽपि । एकत्र लिखितं प्राज्ञः पुनरन्यत्र नो लिखेदित्यपि बोध्यम् ।

इदं षट्कलप्रस्तारे योज्यते यथा, १, २, ३, ५, ८, १३, वामावर्त्तेनांत्यांकैः शोध्याः । यथा, शेषांके त्रयोदशसु मध्ये अष्टादिशोधने कृते शेषांकाः ५, ८, १०, ११, १२, इयमेकगुरुस्थानसंख्या ॥ एवं

अह वित्तस्स लहुगुरु आणं ।[१]

पुच्छल[२] च्छंद[३] कला कइ[४] पुछल[२] अंक[५] मेटाव[६] ।
अवसिट्ठे[७] गुरु जाणिअहु[८] लहु जाणिव्वहु ताव[९] ॥ ४९ ॥
दोहा ॥

द्वयोर्लोपे द्विगुरुर्यथा। पंचाष्टयोस्त्रयोदशस्तु न लोपः शून्यशेषत्वात् । त्र्यष्टलोपे शेषं २, द्व्यष्टलोपे ३, एकाष्टलोपे ४, त्रिपंचलोपे न, तच्छेषस्य पंचरूपस्य पूर्वं गतत्वात् । द्विपंचलोपे ६, एकपंचलोपे ७, एकत्रिलोपे ८, एतावंति द्विगुरुस्थानानि ॥ त्रयाणामेकत्र्यष्टरूपाणां लोपेन १, इदं त्रिगुरुस्थ[ानम् ।] [Vide figure p. 92.—Ed.]

सप्तकले — एकः सर्वलघुः, षडेकगुरवो, दश द्विगुरवस्त्वारस्त्रिगुरव इति मेरुगतभेदास्ते चैषु स्थानेषु वामावर्त्तेन सर्वलघ्वेकगुरुद्विगुरुत्रिगुरुरूपा भेदा बोध्याः। विषमकले सर्वगुरुर्भेदो नास्त्येव ॥ एवमग्रेऽपि सर्वत्र बोध्यम् ॥ अष्टकला पताका।—अत्राष्टकले एकः सर्वलघुः, सप्त एकगुरवः, पंचदश द्विगुरवः, दश त्रिगुरवः, एकः सर्वगुरुरिति मेलितास्त्रतुस्त्रिंशत् ॥ नवकला पताका। —अत्रैकः सर्वलघुरष्टावेकगुरव एकविंशतिर्द्विगुरवो विंशतिस्त्रिगुरवः, पंच चतुर्गुरव इति सर्वे पंचपंचाशद्भेदा मेरुस्था बोध्याः ॥ (G).

[The figures for seven, eight, and nine kalás are similar in shape to the figure given in p. 92. The ingenious reader may make them for himself if he likes.—Ed.]

४९। १ अथ वृत्तस्य लघुगुरुज्ञान (A). २ पुच्छल (A), पुच्छल (E & F). ३ छंद (A, E & F). ४ कलां एवं करि (E). ५ अप (E & F). ६ मिटाव (F). ७ अवसिट्ठ (F). ८ जाणिअइ (A), जाणिअ (F). ९ जानिअ उताव (A, E & F).

४८। इदानीं मात्रावृत्तेर्वा वर्णवृत्तेर्वा कियन्तो गुरवः कियन्तो लघव इति ज्ञानार्थमाह पुच्छलेति। पृष्टच्छन्दः कलाः कला पृष्टवर्णान् लोपय। अवशिष्टं गुरुं जानीहि लघवो ज्ञायन्तां तावन्त इति॥ गुरो[र]वशिष्टा यावन्तस्तावन्तो लघव इत्यर्थः। उदाहरणेनास्यार्थः स्पष्टीक्रियते। पढ़मं बारह मत्तेति—कियन्तो लघवः कियन्तो गुरव इति प्रश्ने, सर्व्वलघवः कर्त्तव्याः, तेन ५७ सप्तपंचाशत् कला भवन्ति, तत्र पृष्टच्छन्दसो वर्णाः कर्त्तनीया-भवन्ति, ३७ सप्तत्रिंशद्वर्णा अत्र सन्ति, सप्तपंचाशदङ्के सप्तत्रिंशत्-कर्त्तने विंशत्यङ्कोऽवशिष्यते, तेन विंशतिर्गुरवोऽत्रेति ज्ञायते। गुरोश्च द्विकलत्वाद्विंशतिगुरुभिश्चत्वारिंशत् ४० कला गताः, ५७ सप्तपञ्चाशन्मध्ये ४० चत्वारिंशल्लोपे १७ सप्तदश अवशिष्टास्तेन सप्तदश लघव इति ज्ञायते। अथवा सर्व्वलघूकृताङ्के योऽङ्कः कर्त्तितः तत्रैव गुरोरङ्ककर्त्तनेनावशिष्टा लघवो ज्ञेयाः, यथात्र सप्तपञ्चाशदङ्के ३७ सप्तत्रिंशत्कर्त्तनेन विंशतिर्गुरवो ज्ञेयाः, सप्तत्रिंशदङ्के च विंशतिकर्त्तनेनावशिष्टाः सप्तदश लघवो ज्ञेयाः। एवं वर्णवृत्तेऽपि, यथा प्रमाणिकाच्छन्दसि सर्व्वलघूकरणेऽष्टचत्वारिंशत् ४८ कला-भवन्ति, तत्र च श्लोके द्वात्रिंशद्वर्णा ३२ भवन्ति, अष्टचत्वारिंश-दङ्के ४८ द्वात्रिंशल्लोपे ३२ षोड़शलाभात् षोड़शात्र गुरव इति ज्ञायते, अवशिष्टाश्च षोड़श लघव इति ज्ञायते। (C).

४९। अथैतावत्संख्याककलाविशिष्टैतावत्संख्याकाक्षरचरणे वृत्ते कति गुरवः कति लघव इति कौतुकात्केनचित्पृष्टे उत्तरप्रकार-माह, पुच्छलेति। पुच्छल छंद कलां—पृष्टच्छंदःकलायाम्, अत्र

कलापदस्य कलासंख्यापरत्वात्पृ[ष्ट]च्छंदःकलासंख्यायामित्यर्थः। यस्य गुरुलघुजिज्ञासा तत्पृष्टं छंदस्तस्य या मात्रासंख्या तन्मध्ये इत्यर्थः। पुछल [अंक] छंद — पृष्टं छंदः, अत्रापि छंदःपदस्य छंदोऽचर-संख्यापरत्वात्पृष्टच्छंदोऽचरसंख्यामित्यर्थः। मेटाव — हीनां कुरु। एवं करि — [एवं] कृत्वा एवं कृते सतीत्यर्थः। अवसिट्ठउ — अवशिष्टा संख्येति शेषः, कलासंख्यामध्योर्वरिता संख्येत्यर्थः, गुरु जानिअइ — गुरोर्ज्ञातव्या, उताव — उर्वरिता गुरुसंख्यातिरिक्ता वृत्ताचरसंख्येति यावत्। लघु जाणिअ — लघोर्ज्ञातव्या। यथा अष्टादशकलाविशिष्टे-कादशाचरचरणे वृत्ते कति गुरवो लघवश्चेति पृष्टे, अष्टादशरूप-कलासंख्यामध्ये एकादशरूपाचरसंख्यालोपे उर्वरिता सप्तसंख्या, सा गुरुसंख्या ज्ञेया। एकादशाचरमध्ये यदि सप्त गुरवस्तदोर्वरिता चतुष्टसंख्या, सा लघोर्ज्ञातव्या, एवं चैतादृशचरणे वृत्ते सप्त गुरव-श्चत्वारो लघव इत्युत्तरं देयमिदं च वृत्तमिंद्रवज्राख्यमेवमन्यत्रा-प्यूह्यम्। (E).

४९। अथ छन्दःसु गुरुलघुमात्रावर्णयत्ताज्ञानोपायमाह॥ पुच्छेति॥ पृष्टस्य छंदसः कलाः कुरु, पृष्टे वर्णान् लोपय। अव-शिष्टा गुरवो ज्ञायंते, लघवो ज्ञातव्या उर्वरिताः॥ पृष्टे कलासं-ख्यायामित्यर्थः, वर्णादीनां तद्गतसंख्योच्यते॥ यथास्यैव छंदसः मात्रासंख्या ४८, वर्णसंख्यया ३५ ऊनिता जाता १३, एतावती गुरुसंख्या॥ इयमेव वर्णसंख्योनिता जाता २२ लघुसंख्या, इयमेव १३ गुरुद्विगुणसंख्यया २६ मिलिता जाता मात्रासंख्या ४८, इयमेव गुरुसंख्योनिता वर्णसंख्या ३५ इति॥ ४९ (G).

[Compare this with Pingala's Sanskrit aphorisms, and the learned commentary of Haláyudha thereon, also with a symbolical exposition of the same in Ghosha's छन्दःसारसंग्रहः p. 34, paras. 2, 3 and 4. —Ed.]

[Between ४९ and ५०, the following slokas are inserted in MS. (F). This is apparently a later addition, for their enumeration even is not subsequently adhered to.—Ed.]

मत्तासंख्ये कोठ करु पंती छक्क पथारि ।
तत्थ दुआदिक अंक धरु पढ़महि पंति बिचारि ॥ ५० ।
आइ अंक परिज्जि कड्ड सब्बहि पंती मज्झारि ।
पुब्ब जुअल सरि अंक धरु बीजी पंति बिचारि ॥ ५१ ।
पढ़म पंति ठिअ अंक करि बीजी पंति गुणेहि ।
जो जो अंका उव्वरइ ते तीय पंति भरेहि ॥ ५२ ।
बि पिट्ठइ भेअ जोअइ अंका लड्डआ कोट्ठा पूरइ अंका ।
पूआ लड्डआ हारा तेक्खइ पिंगल जंपे बरूा दुअइ ॥ ५३ ।
छ पंती पत्थार करिज्जसु अक्खरसंख कोट्ठ धरिज्जसु ।
पहिली पंति बरू धरिज्जसु दुसरी पंति दूण करिज्जसु ॥ ५४ ।
अक्खर अंक गुणित करि लेहि चौ[चउ]थी पंति सोइ लिहि देइ ।
चौथी अद्धा पंचम पंति सोइ कड्ड मिलिज्ज णिभ्भंत ॥ ५५ ।
पंचमी चौथी तिअहि मिलाउ पिंगल जंपइ अंक फलाउ ।
बित्त भेअ मत्त अरु बरूह गुरु लड्ड एम संपरू इ ॥ ५६ ॥
अक्खर मक्कइ जाणड्ड लोइ जे जाणे मण आणंद होइ ।
जो बुज्झइ सोइ पे बुज्झइ मक्कइ जाल हत्थि बि रुज्झइ ॥ ५७ ।

[The corresponding gloss in commentary (G) runs thus:—Ed.]

अथ प्रस्तारसंख्या ।

मात्रासंख्यान् कोष्ठान् कुरु पंक्तिषट्कं प्रस्तारय, तत्र द्व्यादिकानंकान् धारय प्रथमपंक्तिविचारः । द्व्यादिकोष्ठेषु द्व्याद्यंका लेख्या इति प्रथमपंक्तेर्विवेकः ॥ ५० ॥ आद्यंकपरित्यागं कथयतु सर्वासां पंक्तीनां मध्ये पूर्वयुगलसदृशानंकान् धारय, द्वितीयपंक्तिविचारः । उद्दिष्टवदंका लेख्या इति द्वितीयपंक्तिविचार इत्यर्थः ॥ ५१ ॥ प्रथमपंक्तिस्थितांकैः कृत्वा द्वितीयपंक्तिं गुणय । यो योऽंक उत्पद्यते तेन तृतीयपंक्तिं भरय ॥ ५२ ॥ अथ पंचमपंक्तिपूरणं, विपि । अत्रांकशब्दस्य व्यत्यासेन योजनाद्द्वौ पृष्टांकौ भेदांकं च योजय । लघुकैः कोष्ठान् पूरय अंकैः । पृष्टांकद्वयं भेदांके चैकीकृत्य पंचमपंक्तिकोष्ठाः पूरणीयाः, ते लघुसंख्याका भवंतीत्यर्थः । यथा । तत्र प्रथमे कोष्ठे पूर्वांकयोः पूर्वोर्द्धांकसंख्याप्रभेदांकस्य चाभावादेक एव ॥ द्वौ[द्वि]तीये कोष्ठे पूर्वांक एकस्तदूर्द्धसंख्याभेदांकस्यैकस्तयोर्योगे द्वयं ॥ तृतीये कोष्ठे पूर्वांकयुगलं १ । २ ऊर्द्धप्रभेदांकयोर्योगे पंच ५, तत्तृतीये लेख्याः ॥ चतुर्थकोष्ठे पूर्व्वांकयुगलं २, ५ पूर्वोर्द्धांकः वृत्तभेदांकस्य तद्योगे दश ॥ एवमग्रेऽपि । अथ षष्ठपंक्तिः पूर्णा इति । पूर्व्वौ लघुकौ हारः, लघुद्वयं गुरुर्भवतीत्यर्थः, यथा प्रथमकोष्ठे लघुद्वयाभावाद्गुरुस्थाने शून्यं, द्वितीयकोष्ठे एक १ स्तृतीये द्वौ २ चतुर्थे ५ इत्यादि षष्ठपंक्तिपूरणं ॥ अथ चतुर्थपंक्तिः । तेक्खइ । तथा पिंगलो जल्पति वर्णान्द्वाभ्यां । गुरुलघुयोगे वर्णा भवंतीति चतुर्थपंक्तिपूरणम् । इति मात्रामर्कटी ॥ ५३ ॥

मात्रामर्कटीचक्रं यथा,—

वृत्त	१	२	३	४	५	६
प्रभेद	१	२	३	५	८	१३
मात्रा	१	४	९	२०	४०	७८
वर्ण	१	३	७	१५	३०	५८
लघु	१	२	५	१०	२०	३८
गुरु	०	१	२	५	१०	२०

वर्णमर्कटीचक्रं यथा,—

वृत्त	१	२	३	४	५	६
भेद	२	४	८	१६	३२	६४
मात्रा	३	१२	३६	९६	२४०	५७६
वर्ण	२	८	२४	६४	१६०	३८४
गुरु	१	४	१२	३२	८०	१९२
लघु	१	४	१२	३२	८०	१९२

अथ वर्णमर्कटी। छ पंती। षट्पंक्तिं प्रस्तारं कुरु, अक्षरसंख्यान् कोष्ठान् धारय, प्रथमपंक्तौ वर्णान्धारय, द्वितीयपंक्तौ द्विगुणान् कुरु ॥ ऊर्द्धाधः षट्पंक्त्यो लेख्यास्तिर्यग्वर्णसंख्याः कोष्ठाः कार्याः, तत्र प्रथमपंक्तौ वर्णांकाः, द्वितीयपंक्तौ उद्दिष्टवद्विगुणाअंका लेख्याः ॥ ५४ ॥ अक्ख। अक्षरांकैर्गुणितां कृत्वा [जा]ता चतुर्थी पंक्तिस्तया[सा] लेख्या। चतुर्थ्यर्धा पंचमी पंक्तिः, सैव षष्ठे मिलिता निश्चयात् ॥ प्रथमपंक्त्यंकैर्द्वितीयपंक्त्यंकान् गुणयित्वा चतुर्थी पंक्तिर्लेख्या, तदर्धं पंचमी, तथैव षष्ठी पंक्तिर्भवतीत्यर्थः ॥ ५५ ॥ पंचमीति। पंचमीचतुर्थ्योस्तृतीयामेलने पिंगलो जल्पति अंकान् प्रस्तारय। चतुर्थीपंचमीपंक्तियोगेन तृतीया पंक्तिर्भवतीत्यर्थः। वृत्तानि भेदा मात्रा अन्यद्वर्णा गुरवो लघव एवं संपन्नं भवति ॥ ५६ ॥ अक्षरमर्कटीं जानंतु लोकाः य[ज्]ज्ञाने मनस आनंदो भवति। यो बुध्यते स एव बुध्यते, मर्कटीजाले हस्ती अपि रुध्यते। दुर्गमेति भावः ॥ ५७ ॥ (G).

[Both the figures run to inconvenient lengths in the commentary; the portions here reproduced will enable the reader to extend them as far as he would like. —Ed.]

57797

अह सकल पत्थार संखा ।

छब्बीसा[1] सत्तसआ
तह[2] सत्तारह सहस्साइं[3] ।
बाआलीसं[4] लक्खं[5]
तेरह कोडीं[6] समग्गाइं[7] ॥ ५०[8] ॥ गाह्न ।

---

५० । अत्र चैकाचरमारभ्य षड्विंशत्यवधिवर्णवृत्तानां प्रस्तारे कियती संख्येत्यत्राह १३४२१७७२६ षड्विंशतिः सप्तशतानि तथा सप्तदशसहस्राणि द्विचत्वारिंशल्लचास्त्रयोदशकोव्यः समग्राणि, अङ्कस्य वामा गतिरित्यङ्काः स्थाप्याः । (C).

५० । अथैकाचरमारभ्य षड्विंशत्यचरपर्यंतसमस्तवर्णवृत्तपिंडीभूतसंख्यामाह छब्बीसेति । षड्विंशतिः सप्तशतानि तथा सप्तदशसहस्राणि द्विचत्वारिंशल्लचाणि त्रयोदशकोव्यः, एवं समग्राणि एकाचरादिषड्विंशत्यचरपर्यंतानीत्यर्थः वर्णवृत्तानि भवंतीति शेषः । मात्रावृत्तानामसंख्यातत्वात्तत्संख्या नोक्ता, वर्णवृत्तानां प्रत्येकसंख्या ग्रंथविस्तरभयादनतिप्रयोजनत्वाच्चास्माभिरत्र नोक्ता । (E).

५० । अथैकादिषड्विंशत्यंतानां वर्णवृत्तानां भेदैक्यसंख्यामाह, छब्बी । षड्विंशतिः सप्तशतानि तथा सप्तदशसहस्राणि द्विचत्वारिंशल्लचाणि त्रयोदशकोटयः समग्राणि । एतावंतः सर्वे भेदा इत्यर्थः ।

---

५० । १ छबिसा (C), छबीसा (D). २ तहा (A), तहं (D). ३ सहस्साइँ (A & D), सहस्साइ (B & C). ४ बाआरीसं (A). ५ रक्खं (C), लक्खं (D). ६ कोडी (B, C & D). ७ समग्गाइ (C), समगाइ (D). ८ ४८ (A).

अथ गाथाप्रकरणम् । (D).

होइ गाह्ण मत्त चउअस[1] गाहाइ[2] सत्तावणिअ[3],
तह[4] विग्गाह[5] पलट्टि किज्जइ[6] उग्गाहउ[7] सट्टिकल[8],
गाहिणीअ[9] बासट्टि[10] किज्जइ[11] ।
तह वि पलट्टइ[12] सिंहिणी[13] बे अग्गल[14] हो सट्टि[15]।
सत्तरूअ[16] असोस[17] गुण[18] खंध[19] मत्त चउसट्टि[20] ॥
५१[21] ॥ रड्डा ।

द्व्यादिषड्विंशतिपर्यंतं पूर्वपूर्वद्विगुणांकानां योगे एतावंतो भेदा-इति ॥ (G).

५१ । अथ गाथादीनां लक्षणं विवक्षुः तत्र मात्राविषमत्वमाह। भवति गाहूश्चतुःपञ्चाशन्मात्रा ५४, गाथा सप्तपञ्चाशन्मा[त्रा] ५७, तथा विगाथा वैपरीत्येन क्रियते,—गाथाद्वितीयार्द्धलक्षणं प्रथमार्द्धे, प्रथमार्द्धलक्षणं द्वितीयार्द्धे,—उद्गाथा षष्टिपरा ६०, गाहिन्यां द्विषष्टिः दी[क्रि]यतां ६२। तथैव परिवर्त्य सिंहिनी द्वयाग्रा भवति

५१। १ चउच्चम्र (B), चउउच (C), चौच्चच (E & F). २ तह गाहा (A), तह गाहाइ (E). ३ सत्तावणी (A & D), सत्तावच (E), सत्तावणइ (F). ४ वेहि (E). ५ विग्गाहउ (B & C), ६ किज्जड (B & C, किज्जिग्रइ (E). ७ उग्गाहाउ (D), उग्गाह (F). ८ सट्ठिपर (B & C), सट्ठिकला (F). ९ गाहि-णिच्च (E), गाहणिच्च (F). १० वासठि (E), सावट्ठि (F). ११ कर मणह (E). १२ पलटे (D), पलट्टिच (E), पलटइ (F). १३ सींहिणी (A), सिंहिणी (C), सिंघिणी (D), सिंहिणा (E), १४ ग्रग्गा (A & B), अग्ग (C). १५ होइ (A & E). १६ सत्तरूच (D & E), होइ सारूच (F). १७ अखोणु (C), अखोण (D). १८ गण (D), गुणं (E). १९ खन्द (B), खन्ध (C). २० चासट्ठि (D), चौसट्ठि (E & F). २१ ४९ (A), ५१ (F).

षष्टिमात्रा, [सप्त]रूपकाणि अन्योऽन्यगुणानि, खन्धके मात्रा चतुःषष्टिः। परिवर्त्त्येति। पूर्व्वार्द्धपरार्द्धयोर्व्यत्यासे गाथैव विग्गाहा[था] भवतीत्यर्थः, गाहिन्याः पूर्व्वार्द्धपरार्द्धयोर्व्यत्यासे सिंहिनी, तत्रापि द्विषष्टिमात्रा भवन्तीति स्पष्टार्थमाह, यथा ग्रुधिकेत्यर्थः। रूपकाणि छन्दांसि अन्योन्यगुणयुक्तानि, तेन सर्व्वाण्येव प्रथमतृतीयपादद्वादशमात्रत्वादियथागुणानीत्यर्थः॥ (C)

५१। अथ पुरस्ताद्वक्ष्यमाणानां गाहूप्रभृतिसप्तमात्राच्छंदसां सामान्यतश्चरणचतुष्टयसमुदितां संख्यां रड्डावृत्तेनोद्दिशति, होइ गाहू इति। गाहूनामके छंदसीत्यर्थः, मत्त चौअण—मात्राश्चतुःपञ्चाशत्, होइ—भवंति, तह गाहाइ सत्तवण्ण—तथा गाथायां सप्तपञ्चाशत् मात्राः भवंतीति पूर्वानुषंगः, तेहि—तां गाथां, पलट्टि—परावर्त्य, गाथायाः पूर्वार्द्धम् उत्तरार्द्धं कृत्वा उत्तरार्द्धं [च पूर्वार्द्धं] कृत्वेत्यर्थः, बिग्गाह—विगाथा, किज्जिअइ—क्रियते। अत्र तेहि इत्येकारो ह्रस्वो बोध्यः एओ सुद्धा अ वण्ण मिलिआ वि लहू इत्युक्तत्वात् [Vide ४म श्लोक p.7.—Ed]. उग्गाहउ—उद्गाथा छट्ठिकला—षष्टिकला षष्टिः कला मात्रा यस्याः सेत्यर्थः, गाहिणिअ—गाहिन्यां, बासट्ठि—द्विषष्टिः, मत्तह—मात्राः करु—कुरु, तह वि पलट्टिअ—तद्विपरीतायां तस्याः गाहिन्याः विपरीतायामित्यर्थः सिंहिणी—सिंहिन्यां, बे अग्गल—द्व्यधिका, सट्ठि—षष्टिः मात्रा इत्यनुषंगः, होइ—भवंति, अत्र हो इत्योकारः पूर्वोक्तदिशा ह्रस्वो बोध्यः। अत्र क्वचित् तह गाहाइ सत्ता[त्ता]वण्णो इति, तह बिग्गाह पलट्टि किज्जइ इति च पाठः, स रड्डा-

अथ गाहू । (F).

पुव्वद्धे[१] उत्तद्धे सत्तगलं[२] मत्त बीसाइँ[३] ।
छट्ठमगण पअमभञ्भे[४] गाहू मेरुव्व जुअलाइँ[५] ॥ ५२[६] ॥

गाहू ।

लचणविरुद्धत्वादुपेच्यः । खंध — स्कंधके, मत्त चौ[चउ]सट्ठि — मात्राः चतुःषष्टिर्भवंतीत्यनुषंगः । एतानि सत्तरूअ — सप्तरूपकाणि छंदांसि, अखोखगुण — अन्योऽन्यगुणानि, अन्योऽन्यं गुणाः षष्ठजगणानलघ्वेक-लघु-पादांतगुर्वाद्यो येषां तादृशानीत्यर्थः, भवंतीत्यनुषंगः, इति योजना ॥ (E). [Vide Ghosha's Compendium, p. 7.—Ed.]

५१ । अथ मात्राजातीनां कासांचित्कलासंख्यामाह । होइ । भवंति गाहूमात्राः चतुःपंचाशत्, गाथायाः सप्तपंचाशद्देव, तथा बिग्गाहा परावर्त्य क्रियते, उद्गाथा षष्टिकला, गाहिन्यां द्वाषष्टिः क्रियंते । तथा विपरिवर्त्तते सिंहिनी, भवंति सप्त-रूपाणि छंदांसि अन्योऽन्यगुणाः स्कंधके मात्राः चतुःषष्टिः ॥ अन्योऽन्येति गु[ग]णेति पाठे सप्तगु[ग]णाः अन्योऽन्यसंवलिता-भवंतीत्यर्थः ॥ ५१ ॥ (G).

---

५२ । १ पुव्वंद्धे (B), पूव्वद्धे (C), पुव्वर्द्धे (E). २ सत्तगाण (B & C), सत्तगल (D). ३ वीसाइ (B & F), dropt in (C), वीसांइ (D), वीसाइं (E). ४ पढमजभे (B & C), पढमज्झे (F). ५ जुगलाइ (B), जुअलाइं.(E), जुअलाइ (F). ६ ५० (A), ५२ (F).

५२ । अथ गाहूलक्षणमाह । पूर्व्वार्द्धे उत्तरार्द्धे सप्तोत्तरविंश-मात्राः २७ । षष्ठगणेत्यादिमध्ये गाहू मेरोरेव युगलं ॥ तेन पूर्व्वार्द्धे एको लघुरेव षष्ठो गणः, एवमुत्ता[त्तरा]र्द्धेऽपि । प्रथमपादे द्वादश मात्रा द्वितीये पञ्चदशेति मिलित्वा सप्तविंशतिमात्राः पूर्व्वार्द्धे, एवमुत्तरार्द्धेऽपि, अ[य]त्र विशेषः पादमध्येस्थितषष्ठगणे मेरोरेव युगलं, मेरुपदेन लघुरुच्यते, मिलित्वा लघुयुगलं, तेन पूर्वार्द्धे एकलघुरेव षष्ठो गणः, एवमुत्तरार्द्धेऽपि । एतादृशलक्षणं यत्र सा गाहूरित्यर्थः ॥ (C).

५२ । अथ गाहूप्रभृतिसप्तच्छंदःसु सामान्यतो मात्रा उद्दिश्य विशेषतस्तानि लिलक्षयिषुः प्रथमं गाहूं लक्षयति पुब्बद्धे इति । यत्र पुब्बद्धे उत्तद्धे—पूर्वार्द्धे उत्तरार्द्धे, पअमझ्झे—पादयोर्मध्ये पूर्वार्द्धे प्रथमद्वितीयपादयोर्मध्ये, उत्तरार्द्धे तृतीयचतुर्थयोः पाद-योर्मध्ये इत्यर्थः । सत्तग्गल—सप्ताधिकाः, मत्त वीसाइं—मात्राः विंशतिः, सप्तविंशतिर्मात्रा इत्यर्थः, पतंतीति शेषः, छट्ठमगण—षष्ठो गणः, मेरुब्ब जुअलाइं—मेरोः युगलं, मेरुर्लघुस्तद्युगल-मित्यर्थः । पूर्वार्द्धे उत्तरार्द्धे च प्रत्येकं गुर्वंताः सप्तगणाः स्थाप्या-स्तत्र षष्ठस्थाने एको लघ्वात्मको गणः स्थाप्यः, अन्यत्र चतुर्मात्रिक-इत्यर्थः, एवं च षण्णां चतुर्मात्रिकगणानां चतुर्विंशतिर्मात्राः, एका च मात्रा षष्ठस्थानस्थलघोर्मात्राद्वयं चांतस्थगुरोरेवमत्र सप्तविंशति-मात्राः पूर्वार्द्धे उत्तरार्द्धे च प्रत्येकं पतंति, तद्गाहूनामकं छंद-इति निर्गलितार्थः । (E).

जहा, चंदो चंदण[1] हारो ताबअ[2] रूअं[3] पआसंति[4] ।
चंडेसरबर कित्ती[5] जाव ण अप्पं णिदंसेइ[6] ॥ ५३[7] ॥
गाहू ।

---

५२ । अथ गाहू ॥ पूर्वार्धे उत्तरार्धे सप्ताधिका मात्रा विंशतिः । षष्ठो गणः पदमध्ये गाहू मेरुः एव युगलाख्यः ॥ युगे द्वे ४ [?] द्वये । संपूर्णपद्यमध्ये षष्ठएव मेरुः कार्यो नान्यत्रेति भावः ॥ ५२ ॥ (G).

५३ । चन्द्रश्चन्दनं हारस्तावद्रूपं प्रकाशयन्ति । चण्डीश्वरवर-कीर्त्तिर्यावन्नात्मानं निदर्शयति ॥ तत्कीर्त्त्यं तेषां निष्फलमिति व्यज्यते । (C).

५३ । गाहूमुदाहरति, चंदो इति । चंद्रः चंदनं हारो मुक्ता-दाम, एते तावद् रूपं स्वकांतिं प्रकाशयंति । चंडेश्वरवरकीर्त्तिः जाव—यावत्, अप्पं—आत्मानं स्वं, न [ण] णिअंसेइ—न निदर्शयति प्रकटयति ॥ (E).

५३ । यथा चंद्रश्चंदनं हारस्तावद्रूपं प्रकाशयति । चंडेश्वरस्य वरा कीर्त्तिर्यावदात्मानं न दर्शयति ॥ ततोऽपि कीर्त्तिर्धवले-त्यर्थः । ५३ ॥ (G).

---

५३ । १ चन्दो चन्दण (B & C). २ तावह (A), ताव (D). ३ रूप (B). ४ पअसंति (D), पआसेइ (F). ५ किति (A). ६ जावन अप्पं निदंसेइ (B), जाव अप्पं ण दंसेइ (D), जाव ण अप्पं णिअंसेइ (E), जाव अप्पाणं ण दंसेइ (F). ७ ५२ (F), ५१ (A).

अथ गाहा । (F).

पढ़मं बारह मत्ता बीए अट्ठारहेहिँ[1] संजुत्ता ।
जह पढ़मं तह तीअं दहपंचविह्लसिआ[2] गाहा ॥ ५४[3] ॥

---

५४ । गाथामाह । प्रथमे द्वादश मात्रा द्वितीयेऽष्टादशभिः संयुक्ता । यथा प्रथमं तथा तृतीयं दशपञ्चविभूषिता गाथा ॥ पञ्चदशेति—अर्थाच्चतुर्थचरणे पञ्चदशमात्राभूषिता भवतीत्यर्थः ॥ (C).

५४ । अथ गाथां लक्षयति पढ़ममिति । यत्र पढमं—प्रथममाद्यचरणे इत्यर्थः, बारह मत्ता—द्वादशमात्राः पतंतीति शेषः, या च बीए—द्वितीये चरणे इत्यर्थः, अट्ठारहेहिं—अष्टादशभिः मात्राभिरिति शेषः, संजुत्ता—संयुक्ता । यस्यास्तु जह पढ़मं तह तीअं—यथा प्रथमस्तथा तृतीयः चरण इति शेषः, द्वादशमात्रायुक्त इत्यर्थः, या च चतुर्थे चरणे इति शेषः, दहपंचविह्लसिआ—पंचदशभिर्मात्राभिरिति शेषः विभूषिता, सा गाहा गाथानामकं छंद इत्यर्थः । (E).

५४ । अथ गाथा ॥ पढ ॥ प्रथमो द्वादशमात्रो, द्वितीयोऽष्टादशभिः संयुक्तः । यथा प्रथमस्तथा तृतीयो दशपंचविभूषिता गाथा ॥ चरण इति शेषः ॥ चतुर्थः पंचदशमात्र इत्यर्थः ॥ [पथ्या] आर्येयं संस्कृते ॥ ५४ ॥ (G).

---

५४ । १ अट्ठारएहि (A), अट्ठारहेइ (C), अट्ठारहेहि (D & E), अट्ठारहेहिं (F). २ विह्लसिअ (D). ३ ५२ (A), ५४ (E & F).

जहा, जेण विणा ण जिविज्जइ[1]
अणुणिज्जइ सो कआवराहोवि[2] ।
पत्ते वि णअरडाहे[3]
भण[4] कस्स ण वल्लहो[5] अग्गी[6] ॥ ५५[7] ॥ गाहा ।

---

५५ । येन विना न जीव्यतेऽनुनीयते स कृतापराधोऽपि । प्राप्तेऽपि नगरदाहे भण कस[्य न] वल्लभोऽग्निः ॥ नगरदाहकोऽप्यग्निरावश्यकत्वात् प्रिय एवेति ॥ (C).

५५ । गाथामुदाहरति जेणेति । येन [जेण] विणा ण जिविज्जइ—येन विना न जीव्यते सः कआवराहोवि—कृतापराधोऽपि, अणुणिज्जइ—अनुनीयते । एनमेवार्थमर्थांतरन्यासेन द्रढ़यति पत्ते वीति । पत्ते वि – प्राप्तेऽपि, णअरडाहे—नगरदाहे, अग्गी—अग्निः, कस्स ण वल्लहो—कस्य न वल्लभ इति भण—वद, अपि तु सर्वस्यापि वल्लभ इत्यर्थः । मानवतीं कांचिन्नायिकां प्रति सखीवाक्यमेतत् । अयं च वक्ष्यमाणभेदेषु चूर्णानामको [Vide sloka 60 P. 114] दशमो भेद इति बोध्यम् ॥ (E).

५५ । यथा ॥ जेणेति ॥ येन विना न जीव्यतेऽनुनीयते स कृतापराधोऽपि । प्राप्तेऽपि नगरदाहे भण कस्य न वल्लभोऽग्निः ॥ ५५ ॥ (G).

---

५५ । १ जिवज्जइ (B & C). २ कवराहो (D). ३ णअरडाहे (F). ४ भणि (E). ५ वल्लभो (B & C). ६ अग्गि (A). ७ ५६ (A), ५५ (E & F).

सत्तगणा दीहंता[1] जो णलहू[2] छट्ट णेह जो बिसमे[3] ।
तह गाहे बिअ अद्धे छट्टं लहुअं बिआणेहु ॥ ५६[4] ॥

---

५६ । इदानीं गाथायां विशेषान्तरमाह, सप्तगणा दीर्घान्ता यो-[जो] नलघुः षष्ठः, नेजाजा[नेह जो] विषमे । तथा गाथायां द्वितीयार्द्धे षष्ठं लघुकं विजानीहि ॥ अत्र चतुष्कलो गणः । पूर्व्वार्द्धे तादृशाः सप्तगणाः कार्य्याः, अन्ते दीर्घो गुरुः कार्य्यः, जगणो [न]लघुर्वा षष्ठोगणः कार्य्यः ॥ इह गाथायां विषमे एकादौ जगणो न देयः । (C).

५६ । अथ गाथायां मात्रानियममुक्ता गणनियममाह सत्तेति । गाहे — गाथायां, सत्तगणा दीहंता — सप्तगणाः दीर्घांताः दीर्घोगुरुस्तदंताः भवंति । अत्र विशेषपरोऽपि दीर्घशब्दः सामान्यगुरुपरो ज्ञेयः, एवं च पूर्वार्द्धे उत्तरार्द्धे च गुर्व्वंतास्चतुर्मात्रिकाः सप्तगणाः कर्त्तव्या इत्यर्थः, इह इत्यग्रेतनस्यानुकर्षः, इह गाथायां छट्ठ — षष्ठः गणः, जो णलहू — जो जगणः गुरुमध्यः, नलघू लघुयुक्तो नगणो वा भवति, कर्त्तव्येषु गुर्व्वंतसप्तगणेषु षष्ठो जगणस्चतुष्कलः [?] नगणो वा देय इत्यर्थः । णेह जो बिसमे — इह गाथायां विषमे [प्रथमे] तृतीये पंचमे सप्तमे च स्थाने इत्यर्थः, यो [जो] जगणो गुरुमध्यो न पततीत्यर्थः, तह — तथा, बिअ अद्धे — द्वितीयार्द्धे छट्टं लहुअं बिआणेहु — षष्ठं गणं लघुकम् एकलघुरयं विजानीत, एवं च पूर्वं नलघुजगणयोरन्यतरदानं पूर्वा-

---

५९ । १ दीहान्ता (B & C). २ णलहू (E). ३ बिषमे (B & C).
४ ५७ (A), ५९ (E & F).

सव्वाए गाहाए सत्तावण्णाइ[1] होंति[2] मत्ताइं[3]।
पुव्वद्धम्मि[4] अ तीसा सत्ताईसा[5] परद्धम्मि[6] ॥ ५७[7] ॥ गाहा।

द्वाभिप्रायेणेति प्रतीयते, तथा च मध्यलघु[गुरु]गणः लघुसंयुक्तो-नगणस्त्रिलघ्वात्मको वा लगणः पूर्वार्द्धे षष्ठे विधेयः, उत्तरार्द्धे च एकलघ्वात्मक एव षष्ठोगणो विधेय इति भावः। (E).

५६। सत्तेति। सप्तगणा दीर्घांता जगणो नलघू षष्ठो नेह जो विषमे। तथा गाथायां द्वितीयार्द्धे षष्ठं लघुकं विजानीत॥ प्रथमार्द्धे त्रिंशन्मात्राः तत्र षष्ठो जगणो नलघू वा कार्यौ, विषमे स्थाने द्वितीयचतुर्थादौ [प्रथमतृतीयादौ] जगणो न कार्यः। द्वितीये षष्ठो लघुरेव कार्यः, शेषे पूर्वा [?] ॥ ५६। (G).

५७। पढमं बारह मत्तेत्यनेन उक्तमर्थं स्पष्टीकर्त्तुमाह। सर्व्वस्यां गाथायां सप्तपंचाशद्भवन्ति मात्राः। पूर्व्वार्द्धे च त्रिंशत् सप्तविंशतिः परार्द्धे॥ सप्तपञ्चाशतो विभागमाह पूव्वद्ध इत्यादिना। केचित्तु श्लोकोऽयं काल्पनिक इति मन्यन्ते, परे तु द्विपद्यपि गाथा भवतीति बोधयितुं पुनरिदमुक्तम्। (C).

५७। अथ गाथायां वर्त्तमानषड्विंशतिविधायां समुदितमात्रा-नियममाह, सव्वाए इति। पुव्वद्धम्मि अ तीसा — पूर्वार्द्धे त्रिंशत् परार्द्धे उत्तरार्द्धे इत्यर्थः, सत्ताईसा — सप्तविंशतिः। एवं प्रकारेण

५७। १ सत्तावण्णाइं (A & B), सत्तावण्णाईं (D). २ होंति (D). ३ मत्ताइ (C), मत्ताईं (D). ४ पूर्व्वद्धम्मि (B), पूव्वद्धम्मि (C). ५ संत्ताइसा (A). ६ पच्छद्धए (A), पच्छद्धए (B & C). ७ ५५ (A), ५७ (E & F).

सत्ताईसा[1] हारा[2] सल्ला जस्सम्मि[3] तिसि[4] रेहाई[5] ।
सा गाहाणं गाहा आत्रा तीसक्खरा[6] लच्छी[7] ॥ ५८[8] ॥

सव्वाए गाहाए — सर्वस्यां गाथायां सत्तावसाइ — सप्तपंचाशत् मत्ताइं — मात्राः होंति — भवंतीत्यर्थः । पूर्वार्धे षष्ठे चतुर्मात्रिकस्य जगणस्य लघुयुक्तनगणस्य वा दानात्त्रिंशन्मात्राः पतंति, उत्तरार्द्धे च षष्ठस्थाने एकलघ्वात्मकस्यैव गणस्य दानात्तदपेक्षया मात्रात्रयं न्यूनं भवंतीति सप्तविंशतिमात्राः पतंतीत्यर्थः । (E).

५७ । सव्वेति । सर्वस्या गाथायाः सप्तपंचाशद्भवंति मात्राः ॥ पूर्वार्द्धे च त्रिंशत् सप्तविंशतिः परार्द्धे च ॥ ५७ ॥ (G).

५८ । अथ गाथाभेदानाह । सप्तविंशतिर्हाराः, शल्यानि यस्यां त्रीणि राजन्ते । सा गाथानां गाथा आयाता त्रिंशदक्षरा लक्ष्मीः ॥ हारा गुरवः, शल्यानि लघवः, देवानां देव इतिवद्गाथानां गाथेति प्रकर्षार्थमुच्यते ॥ (C).

५८ । अथानुपदमेव वक्ष्यमाणेषु भेदेषु प्रथमं भेदं लक्ष्मी-नामकं लक्षयति सत्ताइसेति । जस्सम्मि — यस्यां, सल्ला — स्वा-[श्ला]घ्याः सत्ताइसा हाराः — सप्तविंशतिर्दीर्घाः गुरव इत्यर्थः, तिसि रेहाइं — तिस्रो रेखा लघवस्त्रित्यर्थः, पतंतीति शेषः, सा गाहाणं — गाथानां मध्ये, आग्रा — आद्या प्रथमेति यावत्, तीसक्खरा —

---

५८ । १ सत्ताइसा (A & E). २ हाय (E). ३ जस्सम्म (C). ४ तिसि (F). ५ रेहाइं (A & E), रेहेइं (B), रेहेइ (C), रेहोई (F). ६ तीसक्खरा (A, B & D). ७ लच्छी (A, D & E). ८ ५९ (A), ५८ (E & F).

तीसक्खरा हि[1] लच्छी[2]
सब्बे[3] बंदंति[4] होइ[5] विक्खाआ[6] ।
हासइ[7] एक्कं एक्कं[8]
बंकं[9] ता कुणह[10] णामाइं[11] ॥ ५९[12] ॥ [गाहा]

त्रिंशदक्षरा, लच्छी — लक्ष्मीः, गाहा — गाथा, सा लक्ष्मीनाम्नी गाथेत्यर्थः । अयमर्थः — पूर्वं गाथायाः प्रथमचरणे द्वादशमात्रादानमुक्तं, तासां च षड्गुरवो भवंति, द्वितीयचरणे अष्टादशमात्रादानमुक्तं, तत्र षष्ठस्थानपतितजगणाद्यंतस्थलघुद्वयवर्जनात्तासामष्टौ गुरवो भवंतीति पूर्वार्द्धे चतुर्दश गुरवः, एवं तृतीयेऽपि चरणे द्वादशमात्रादानस्योक्तत्वात्तासां षगुरुदः [षड्गुरवः], चतुर्थे च पंचदशमात्रादानस्योक्तत्वात्तत्र षष्ठस्थानपतितैकलघ्वात्मकगणवर्जनात्तासां सप्त गुरवः, इति उत्तरार्द्धे त्रयोदश गुरवः, एवं पूर्वार्द्धोत्तरार्द्धयोः संकलने सप्तविंशतिर्गुरवः, पूर्वार्द्धजगणाद्यंतस्थौ द्वौ लघू, उत्तरार्द्धे च षष्ठस्थैकलघुरेवं त्रयो लघवश्चेति त्रिंशदक्षराणि यत्र पतंति सा लक्ष्मीनाम्नी गाथेत्यर्थः । ५८ । (E).

५८ । अथ गाथाभेदेषु लक्ष्मीनाम्नीं गाथामाह ॥ सत्तेति ॥ सप्तविंशतिर्हाराः श्लाघ्या यस्यां त्रयः [तिस्रो] रेखाः । सा गाथानां

५९ । १ तीसक्खरा हिं (D), तीसचरा हिं (E). २ लच्छी (A & D), लच्ची (E). ३ सेव्वे (E). ४ वषन्ति (C), वदंति (E & F). ५ होअइ (F). ६ विक्खाआ (E). ७ होसइ (A), होसइ (B & C). ८ Once only in (F). ९ वषं (A), वक्रांच (C). १० कुणऊ (A). ११ नामाइ (B, C & D). १२ ५७ (A), ५८ (F).

लच्छी[1] रिद्धी[2] बुद्धी[3]
लज्जा[4] विज्जा क्खमा[5] अ देहीआ[6]।
गोरी धाई[7] चुसा[8]
छाआ[9] कांती[10] महामाई[11] ॥ ६०[12] ॥ [लक्ष्मी]

गाथा आद्या त्रिंशदक्षरा लक्ष्मीः॥ हारो गुरुः, रेखा लघुः॥ तत्र पूर्वार्द्धे चतुर्दश गुरवः षष्ठजगणस्थलघुद्वयं च, उत्तरार्द्धे त्रयोदश गुरवः षष्ठस्थैकलघुश्चेति सप्तविंशतिर्गुरवो लघुत्रयं चेति फलति त्रिंशदक्षरेति॥ ५८॥ (G).

५९। त्रिंशदक्षरलक्ष्मीः सर्व्वे वदन्ति भवति विख्याता। ह्रसैकमेकं वक्रं तत्कुरुते नामानि॥ कुरुते अर्थात् पिङ्गलः। (C).

५९। अथ लक्ष्मीनाम्नीं गाथां स्तौति तीसेति। विख्खाआ—विख्याता, ह्रासइ—ह्रसति, वंकं—वक्रं, गुरुरित्यर्थः। एकैकस्य गुरोर्ह्रासेन लघुद्वयवृद्धिर्बोद्धव्या, अन्यथा [सप्त]पंचाशन्मात्राणां नैयत्यं न स्यात्। तासां करोति नामानि, एकैकगुरोर्ह्रासे लघुद्वय-[यु]क्तस्य च वृद्धौ ये भेदास्तेषां नामानि करोतीत्यर्थः। (E).

५९। तीसेति॥ त्रिंशदक्षरैर्लक्ष्मीः सर्वे वदंति भवति विख्याता।

६०। १ सा लच्छी (A), सा लच्छी (B & C), लच्छी (D & F), लची (E). २ रुद्धी (B, D, E & F). ३ Omitted in (C). ४ लज्जे (D). ५ खम्मा (A), खमआ (B & C), ख्खमआ (E), क्खमआ (F). ६ देवी (B & C). ७ धाइ (B), राइ (C), राई (E). ८ पुसा (C). ९ च्छआ (C). १० कत्ती (A & D), कन्ती (C). ११ माहामाईआ (A), महामाआ (B), माहामाआ (C). महामाईआ (E). १२ ५७ (A), ६० (F).

कित्ती[1] सिद्धी[2] माणी[3]
रामा[4] गाहिणि[5] विसाअ[6] वासीआ[7]।
सोहा हरिणी[8] चक्की
सारसि[9] कुररी सिहीअ[10] हंसीआ[11] ॥ ६१[12] ॥
[उग्गाहा]

ह्रस्वत्येक एको गुरुस्तदा कुरुते नामानि ॥ अत्र सप्तविंशतिगुरूणां क्रमादेकैकह्रासे सप्तविंशति [?] नामानि भवंतीत्यर्थः ॥ ५८ ॥ (G).

As there must be at least one long syllable at the end of each half (गुर्वन्तेति), there cannot be more than 26 varieties in all. This has been fully discussed in commentary (E), vide p. 116.--Ed.

६० & ६१। नामान्येवाह, ता लक्ष्मी। लक्ष्मीर्ऋद्धिर्लज्जा विद्या क्षमा देवी। गौरी रात्रिः पूर्णा छाया कान्तिः महामाया॥ कीर्त्तिः सिद्धा मनोरमा गाहिनी विश्वा वासिता। शोभा हरिणी चक्री सारसी कुररी सिंही हंसी मिलिता षड्विंशतिनामानि। (C).

६० & ६१। लच्छीति। क्रमानुरोधात्पुनरुपात्तं। खमआ — क्षमा, देही — देवी, राई — रात्रिः, चुसा — चूर्णा, महामारी। मनोरमा विश्वावसिता। शोभा। तेन षड्विंशतिनामानि, भेदानामपि तावन्मात्रत्वात्। तथाहि, सप्तविंशतिरेव गाहायां गुरवो न त्वधिकाः, तत्रांतिमौ नियतौ, एवं चावशिष्टपंचविंशतिगुरूणां

६१। १ कित्ति (F). २ सिद्धा (B & C). ३ माणी (A), मणी (C), माणिणी (F). ४ रमा (B). ५ गाहिणी (B, C & E), गाहीणि (D). ६ वीसा (A, B, C & E), विस्सा (F). ७ वासिआ (C). ८ Omitted in (C). ९ सारसी (A). १० सिंही (A), सीही (B & C), सिंहीअ (D). ११ हंसि (B). १२ ५८ (A), ६१ (F).

भिद्यमानानां पंचविंशतिर्भेदाः, एकस्य सर्वगुरुक इति षड्विंशतिरेव भेदाः। एतेन पादांत्यस्य मात्रापूरणनिर्वाहाय गुरुत्वापादनेऽपि वस्तुगत्या लघुत्वादष्टाविंशतिर्भेदाः इत्यसंधाय मानिनी रमा विश्वा वसितेति अष्टाविंशतिनामानि वदन्तः परास्ताः।

अत्र प्रथमो भेदो जगणमेवावलंब्य ततो द्वितीयादयश्चतुर्विंशतिर्भेदाः षष्ठे जगणनलघ्वात्मकगणान्यतरदानमवलंब्य बोध्याः, अंतस्तु षष्ठे नलघुमेवावलंब्येति हृदयम्। यत्तु माणी रामेति नामद्वयं विधाय एकगुरुपंचपंचाशल्लघ्वात्मकः सप्तविंशतितमो भेदः कैश्चित्स्वीकृतस्तदनवधानात्। तथाहि यदि षष्ठे जगणो दीयते तदा जगणमध्यस्थ एको गुरुर्दलद्वयांतस्थं च गुरुद्वयमावश्यकमिति एको गुरुर्न संभवत्येव, यदि च षष्ठे नलघ्वात्मकगणो दीयते तदापि दलद्वयांतस्थगुरुद्वयस्यावश्यकत्वादेको गुरुर्न संभवत्येवेति षड्विंशतिरेव भेदा न सप्तविंशतिरिति सुधीभिर्विभावनीयम्। यदपि माणीरामेति एकं नाम विधाय गाहिनीति नाम लेखकप्रमादात्पतितमिति, लक्ष्म्याद्यास्त्रिगुर्व[क]पंचाशल्लघ्वात्मकांत्याः पंचविंशतिरेव भेदा नाम न च तु षड्विंशतिरिति,— तदप्यनवधाननिबंधनं, यतः षष्ठे नलघुरूपगणदानेनांत्ये चावश्यकगुरुद्वयदानेन निराबाधं संभवतो द्विगुरु त्रिपंचाशल्लघ्वात्मकस्य षड्विंशतितमस्य भेदस्य त्यागो नौचित्यमावहतीत्यलमतिविस्तरेणेत्यस्मत्तातचरणोपदिष्टः पंथाः सुधीभिर्विभावनीयः। (E).

६० & ६१। लच्छीति॥ लक्ष्मीः १, ऋद्धिः २, बुद्धिः ३, लज्जा ४, विद्या ५, क्षमा ६, देवी ७, गौरी ८, धात्री ९, चूर्णा १०, छाया ११,

BRANCH OF THE ASIATIC SOCIETY

पढमं चौ[१] हंसपअं
बीए सिंहस्स[२] विक्कमं जाआ[३]।
तीए गअवर[४] लुलिअं
अहिवर[५] लुलिअं[६] चउत्थए[७] गाहा॥ ६२[८]।

उग्गाहा।

कांतिः १२, महामाया १३, कीर्त्तिः १४, सिद्धिः १५, मानिनी १६, रामा १७, गाहिनी १८, विश्वा १९, वासिता २०, शोभा २१, हरिणी २२, चक्री २३, सारसी २४, कुररी २५, सिंही २६, हंसी २७ एतानि क्रमान्नामानीत्यर्थः॥ ६१॥ (G).

६२। पाठे क्रमं दर्शयति। प्रथममेव हंसस्य[प]दं द्वितीये सिंहस्य विक्रमं जाता। तृतीये गजवरललितम्, अहिललितं चतुर्थके गाथा॥ [चौ]शब्द एवार्थे, गाथायाः प्रथमपादं प्राप्य हंसगमनवल्गितं पश्यत इत्यर्थः। एवमग्रेऽपि। (C).

६२। अथ गाथापठनप्रकारमाह पढममिति। अत्र चौश[ब्द]-स्त्वर्थः, तथाच पढमं चौ—प्रथमं तु, गाहा—गाथा, हंसवांअं [हंसपअं]—हंसपदं, जाआ—यथा मंथरमित्यर्थः, तथा मंथर-इति शेषः सर्वत्र योज्यः, बीए—द्वितीये चरणे, सिंहस्स विक्कमं—सिंहस्य विक्रमो यथा, तीए—तृतीये चरणे, गअवरलुलिअं—

६२। १ चौ (F). २ सीहस्स (B & C), सिंह (F). ३ जासु (E). ४ गहवर (F). ५ अहिलुलिअं (A, B, C, E & F). ६ नलिअं (C). ७ चउच्छं (A), चउत्थहे (B), चउत्था (C), चतुत्था (F). ८ ५९ (A), ६१ (E & F).

एक्के जे कुलमंती[१]
वे णाअक्के[२] हि[३] होइ संगहिणी[४]।
णाअक[५]हीणा रंडा
वेसा बहुणाअका होइ[६] ॥ ६३[७] ॥ गाहा।

गजवरलुलितं गजेंद्रगमनमित्यर्थः यथा, चउत्थए—चतुर्थे चरणे, अहिलुलिअं—अहिलुलितं सर्पगतिविशेष इति यावत् यथा। (E).

६२। अथ पठनरीतिमाह॥ पढेति॥ प्रथमेऽंशे हंसपदं द्वितीये सिं[हस्य] विक्रमं याता। तृतीये गजवरलुलितं, अहिलुलितं चतुर्थे गाथा॥ हंसादिगमनवत् क्रमाच्चरणाः पठनीया इत्यर्थः॥ ६२॥ (G).

६३। गाथायां जगणात्प्रसं[शं]सामाह, एकस्मिन् जे कुलवती, द्वाभ्यां नायकाभ्यां भवति संगृहीता। नायकहीना रण्डा, वेश्या ये [या] बहुनायका भवति॥ नायको जगणः, संगृहीता पुनर्भूः। इह कुलवतीवत् एकजगणवती गाथा प्रशंस्या इत्यर्थः। (C).

६३। अथ समस्थानेऽपि जगणदाने गाथायां गुणदोषावाह—एक्के जे इति। एक्के जे कुलवंती—एकस्मिन् जगणे सति कुलवती होइ—भवति गाथेति शेषः। यथोक्तषष्ठस्थानस्थजगणमात्रेण समीचीना गाथा भवतीति, तदतिरिक्तो जगणः समस्थानेऽपि न कर्त्तव्य इति भावः। वे णाअकेण—द्विनायकाभ्यां द्वाभ्यां जग-

---

६३। १ कुलबंती (E). २ णाए (A). ३ ण (A), हो॑ (B), हिँ (C), हिं (E). ४ संगहणी (A & E). ५ णाअक (E). ६ होई (F). ७ ६० (A), ६१ (E & F).

तेरह लहुआ विप्पी[१] एआईसेहि[२] खत्तिणी भणिआ।
सत्ताईसा[३] वेसी सेसा सा सुद्दिणी होइ[४] ॥ ६४[५] ॥ गाहा।

णाभ्यामिति यावत्, संगहणी — संग्रहिणी भवतीति पूर्वेणा-न्वयः, यथा द्वाभ्यां नायकाभ्यां परस्परं गृहीता कामिनी न सतां संमता तथेयमपीति, जगणद्वयमत्र न देयमी[मि]ति भावः। णाअकहीना[णा] रंडा — नायकेन जगणेन हीना रहिता, षष्ठे स्थाने नलघुयुक्तेत्यर्थः रंडेव रंडेत्यर्थः, तथाच यथा नायकेन हीना कामिनी न शोभते तथेयमपीति, बहुधा षष्ठो जगण एव देय इति भावः। बहुणाअका [का] — बहुनायका बहवो नायका-जगणा यस्याः सा तादृशीत्यर्थः, वेश्या होइ — भवति, तथाच यथा वेश्या सतामनादरणीया तथेयमपि[पी]ती[ति] बहवो जगणा न देया इति भावः। (E).

६३। विषमस्थाने जगणदोषमाह ॥ एक्के ॥ एकेन जगणेन कुलवती द्वाभ्यां नायकाभ्यां भवति संग्रहणी। नायकहीना रंडा वेश्या सा बहुनायका भवति ॥ जेन षष्ठस्थानस्थेनैवेत्यर्थः ॥ संग्रहणी व्यभिचारिणी ॥ तासां यथा सदोषत्वं तथेत्यर्थः ॥ ६३ ॥ (G).

६४। गाथाया जातिमाह। त्रयोदशलघुका विप्रा, एकविंशत्या [क्षत्रिया भणिता। सप्तविंशत्या] वेश्या शेषैः [सा] शूद्रा भवति ॥ एकविंशत्या सप्तविंशत्या इत्यत्र लघुभिरिति पूरणीयम्। (C).

६४। १ विप्पा (F). २ एआईसेहं (C), एआइसेहिं (D & E), वीसेहि (F). ३ सत्ताईसे (A & E). ४ होई (F). ५ ६१ (A), ६४ (E & F).

जा पढम तीत्र पंचम
सत्तम ठाणे[1] ण[2] होइ गुरुमज्झा ।
गुव्विणिए[3] गुणरहित्रा
गाहा दोसं पत्रासेइ ॥ ६५[4] ॥ गाहा ।

---

६४ । अथ[य] वर्णभेदेन गा[गा]थाया जातिभेदमाह तेर-हेति । तेरह लहुआ — त्रयोदशलघुकाक्षराख्या गाथेत्यर्थः सर्वत्र योज्यं, विप्पी — विप्रा भवतीति शेषः, एआइसेहिं — एकचत्वा-रिंशद्भिरेकविंशद्भिर्वेत्यर्थः लघुभिरिति शेषः खत्तिणी — क्षत्रिया भणिता । सत्ताईसे — सप्तविंशतिभिर्लघुभिर्वेसी — वैश्या भणितेति पूर्वेणान्वयः, सेसा — शेषा, अनुक्तलघुसंख्याका सुद्दिणी होइ — शूद्रा भवतीत्यर्थः । (E).

६४ । प्रकारांतरेण भेदमाह ॥ तेरह ॥ त्रयोदशभिर्लघुभि-र्विप्रा एकविंशैः क्षत्रिया भणिता । सप्तविंशैर्वैश्या शेषैः सा शूद्रिणी भवति ॥ अत्रेदमवधेयम् ॥ श्रेष्ठार्थया हीनवर्णं वर्णयेद्यस्तु मूढधीः । उभयोर्जायते नाशस्तृतीयः सुखमेधते ॥ ६४ ॥ (G).

६५ । विषमस्थजगणाया निन्दामाह । या गाथा प्रथमादि-स्थाने गुरुमध्ययुक्ता भवति, सा गुर्विणीत्युच्यते । अत्र गुणरहितत्वं सदोषत्वं शत्रुमित्रादियोगवदिति । (C).

---

६५ । १ ठाणे (A). २ Omitted in (C & F). ३ गुव्विणिआ (A), गुव्विणिव्व (F). ४ ६२ (A), ६५ (E & F).

अथ बिग्गाहा। (D & F).

बिग्गाहा पढम दले
सत्ताईसाइँ[1] मत्ताइँ[2]।
पच्छिम[3] दले अ[4] तीसा
इअ[5] जंपिअ[6] पिंगलेण णाएण ॥ ६६[7] ॥

६५। अथ विषमस्थानस्थजगणदोषमाह, जा इति। जा पढम तीअ पंचम सत्तम ठाणे — या प्रथमे तृतीये पंचमे सप्तमे च स्थाने, ण — ननु निश्चयेनेति यावत्, गुरुमज्झा — गुरुमध्यो-जगणस्तद्युक्तेति यावत्, होइ — भवति, सा गाहा — गाथा गुण-रहिता, गुव्विणिए — गुर्विणीव दोषं प्रकाशयति। तथाच विषमे गाथायां जगणो न देय इति भावः। (E).

६५। जा पेति ॥ या प्रथम-तृतीय-पंचम-सप्तम-स्थाने[षु] भवति गुरुमध्या। गुर्विणीव गुणरहिता गाहा[था] दोषं प्रकाशयति ॥ गुरुमध्यो जगणः ॥ ६५ ॥ (G).

६६। विगाथा-प्रथमदले सप्तविंशतिमात्राः। पश्चिमदले त्रिंश-दिति जल्पितं पिंगलनागेन ॥ प्रथमपादे मात्रा द्वादश द्वितीये पञ्चदश इति सप्तविंशतिस्तृतीये द्वादश चतुर्थे चाष्टादश इति

६६। १ सत्ताईसाइं (A & E), सत्ताइसाइ (C), सत्ताइसाई (D). २ मत्ताइं (A & E), मत्ताइ (C), मत्ताई (D). ३ पच्छिम (A & D), पश्चिम (C). ४ Omitted in (F). ५ इम (E), ईएम (F). ६ जंपिअं (A), जम्पिअ (B), जम्पिअ (C), जंपिअ (D). ७ ६२ (A), ६६ (E & F).

जहा, परिहर माणिणि माणं
पेक्खहि[१] कुसुमाइँ[२] णीवस्स[३] ।
तुम्ह[४] कए[५] खर[६]हिअओ[७]
गेह्लइ[८] गुडिआ[९] धणुंहि[१०] किल[११] कामो ॥ ९७[१२] ॥
बिग्गाहा ।

त्रिंशत् । अत्र प्रथमार्द्धे एकलघुकः षष्ठो गणः, द्वितीयार्द्धे षष्ठो-जगणो नलघुर्वेति सप्त गणा दीर्घान्ता इति न व्यभिचरति, तेन पूर्वापरार्द्धव्यत्यासेन विगाथा भवतीति फलितार्थः । (C).

९९ । अथ विगाथां लक्षयति बिग्गाहेति । बिग्गाहा पढम दले — विगाथा-प्रथमदले पूर्वार्द्धे इति यावत्, सत्ताईसाइं मत्ताइं — सप्तविंशतिर्मात्राः भवंतीति शेषः, पच्छिमदले — पश्चिम-दले उत्तरार्द्धे इत्यर्थः, ण — ननु निश्चयेनेत्यर्थः, ति[तौ]सा — त्रिंशन्मात्रा भवंतीति पूर्वेणान्वयः, इअ — एवं पिंगलेन नागेन जंपिअ — जल्पितम् ॥ अयं भावः । पूर्वं विपरीतगाथा विगाथा भवतीत्युक्तं, तथाच गाथा[या] उत्तरार्द्धम् एव पूर्वार्द्धम् अग्रे देयमित्युक्तं भवति, अतएव पूर्वार्द्धे सप्तविंशतिर्मात्रा उत्तरार्द्धे

९७ । १ पेक्खइ (B & C), पेक्खहिं (F). २ कुसुमाइ (B), कुसुमाई (D), कुसुमाइं (E & F). ३ णीपस्स (B), णिंवस्स (F). ४ तुम्ह (A & D), तुम्मु (B), तुम (C), तुजम (E). ५ कए (C). ६ क्खर (A), रव (D). ७ हिअओ (A & E), हिअ (D). ८ गेण्हइ (B), गेऊइ (C), गेण्हइ (D). ९ गुलिआ (B), गुलिआ (C), गुडिका (F). १० धणूंहि (A), धनुहिं (B), धणइँ (C), धणुं (D), धणुहि (E). ११ कर (A), किर (D). १२ ९४ (A), ९० (E & F).

त्रिंशन्मात्रा उक्ताः, एवं चात्रापि पूर्वार्द्धे षष्ठो गण एकलघ्वात्मको देय उत्तरार्द्धे च षष्ठो गणो जगणो नलघ्वात्मको वा देयः, विषमे च जगणो न देय एवेति सुधीभिर्बोध्यम्। (E).

६६। अथ विगाहामाह॥ विग्गेति॥ विग्गा[गा]थायाः प्रथमदले सप्तविंशतिर्मात्राः। पश्चिमदले त्रिंशत् एवं जल्पितं पिंगलेन नागेन॥ ६६॥ (G).

६७। उदाहरति। परिहर मानिनि मानं प्रेच[क्ष] कुसुमानि नीपस्य। तव कृते खरहृदयो गृह्लाति गुटिकां धनुषि कामः॥ खरहृदयस्तीक्ष्णहृदयः कदम्बकुसुमव्याजेन गुटिकाः कामो धनुषि गृह्लाति॥ (C).

६७। विगाथामुदाहरति परिहरेति। णीवस्स—नीपस्य कदम्बस्य कुसुमानि पेक्खहि—प्रेचस्व। किं तावभे[ते]त्यत आह तुज्झ कए इति। खरहिअओ—कठिनहृदयो निर्दय इति यावत् कामो—कामः, धणुहि—धनुषि, गुडिआ—गुटिकां, यद्वा गुडिआधनूहि इत्येकं पदं, तस्य वटिकाधनुः गुटिकायुक्तां[क्तं] धनुरित्यर्थः। गुलेलेल इति लोके; गेन्ह[ह्न]इ—गृह्णा[ह्ला]ति, अतो मानं परिहरेत्यर्थः॥ (E).

६७। यथा, परिहर मानिनि मानं प्रेचस्व कुसुमानि नीपस्य। युष्मत्कृते खरहृदयो गृह्लाति गुटिका धनुषि किल कामः॥ कदंबपुष्पगुटिकाः कामो धनुषि योजयतीत्यर्थः॥ किलेति निश्चये॥ ६७॥ (G).

अथोद्गाथा । (D), अथोग्गाहा । (F).

पुब्बद्धे[1] उत्तद्धे[2] मत्ता[3] तीसंति[4] सुहअ[5] संभणिआ ।
सो[6] उग्गाहो[7] वुत्तो[8] पिंगल[9] कइ दिट्ठ सट्ठि मत्तंगो[10] ॥
६८[11] ॥

---

६८ । उद्गाथामाह । पूर्व्वार्द्धे उत्तरार्द्धे मात्रास्त्रिंशदिति सुभग संभणिताः । स उद्गाथा उक्तः पिङ्गलकविदृष्टः षष्टिमात्राङ्गः ॥ इयमेव गीतिरन्यैरुच्यते । [Vide Chhandah-sára-sangraha, p. 126.] हे सुभग, त्रिंशदित्युक्ता मात्रा इत्यर्थः, षष्टिमात्रा अङ्गं यस्य । (C).

६८ । उद्गाथां लक्षयति पुब्बद्धे इति । यत्र पु[ब्ब]द्धे उत्तद्धे—पूर्वार्द्धे उत्तरार्द्धे मत्ता तिसत्ति—मात्राः त्रिंशत् संभणिआ—संभणिताः, हे तु[सु]भग शिष्य । सो—तत् पिंगल कइ दि-च[ट्ठ]—पिंगलकविना दृष्टं, सट्ठि मत्तंगो—षष्टिमात्रांगं षष्टि-मात्रात्मकशरीरमित्यर्थः, उग्गाहो वुत्तो—ग्गुद्दा[उद्गा]थावृत्तम् । गाथापूर्वार्द्धं दलद्वयेऽपि देयमिति भावः । (E).

६८ । अथोद्गाथामाह ॥ पुब्बद्धेति ॥ पूर्वार्द्धे उत्तरार्द्धे मात्राः त्रिंशत् सुभग संभणिताः । तदुद्गाथावृत्तं पिंगलकविदृष्टं षष्टि-मात्रकम् ॥ इयं गीतिः संस्कृते ॥ ६८ ॥ (G).

---

६८ । १ पूर्व्वाड्ढे (C), सुव्वड्ढे (E). २ उत्तराड्ढे (C). ३ मा (D). ४ तिसत्ति (E). ५ सुभश्च (B & C). ६ सौ (E). ७ उग्गाहा (C). ८ उत्तो (C). ९ पिंग (E). १० मत्तांगो (E). ११ ६५ (A), ६८ (E & F).

जहा, सोउँण[1] जस्स[2] णामं
अंसू णअणाइँ[3] सुमुहि रुंधंती[4] ।
भण वीर चेइवइणो[5]
पेक्खामि[6] मुहं[7] कहं[8] जहिच्छं[9] से[10] ॥ ६८[11] ॥

उग्गाहा ।

---

६८ । उदाहरति । श्रुत्वा यस्य नाम अश्रूणि नयने सुमुखि रुन्धन्ति । भण वीर-चेदिपतेः पश्यामि वदनं कथं यथेष्टं तस्य ॥ (C).

६८ । उद्गाथामुदाहरति सोउँणेति । हे सुमुहि — सुमुखि, जस्स णामं — यस्य नाम सोउँण — श्रुत्वा अंसू — अश्रूणि कर्त्तृभूतानि णअणाइं — नयने कर्मणी रुंधेइ — रुंधंति, अतस्तस्य चेइवइणो — चेदिपतेः मुहं — मुखं जहिच्छं — यथेच्छं कहं — कथं, पेक्खामि — पश्यामि इति त्वं भण — कथय । (E).

६८ । यथा ॥ सोउ । श्रुत्वा यस्य हि नामाश्रूणि नयने सुमुखि रुंधंति । भण वीर-चेदिपतेः प्रेचामि मुखं कुत्र यथेच्छम् ॥ अश्रूणीति कर्तृ । नयने इति कर्म । शिशुपाले मृते तज्जाया-विलापः ॥ ६८ ॥ (G).

---

६८ । १ सोउण (B, D & F). २ जस्स हि (F). ३ णअणाइ (C), णअ-णाइं (A, D, E & F). ४ रुंधन्ति (A), रुकुन्ति (C), रुद्धति (D), रुंधेइ (E). ५ इपइणो (D), चइवइहिं (F). ६ पेच्छिमे (A), पेच्छेमि (B), पेच्छमि (C), पेक्खामि (D). ७ वअणं (C), मुह (D). ८ कहिं (F). ९ जइच्छं (B), जहिछं (E), जहित्थं (F). १० हि (F). ११ ६६ (A), ६८ (E & F).

अथ गाहिणी सिंहिणी ।

पुब्बद्ध[1] तीस मत्ता
पिंगल[2] पभणेइ[3] मुद्धिणि[4] सुणेहि ।
उत्तद्धे बत्तीसा[5]
गाहिणि[6] बिबरीअ[7] सिंहिणी[8] भणु[9] सच्चं[10] ॥ ७०[11] ॥

---

७० । अथ गाहिनीसिंहिन्यौ आह । पूर्व्वार्द्धे त्रिंशन्मात्राः पिंगलः प्रभणति मुग्धे शृणु । उत्तरार्द्धे [द्वा]त्रिंशद्गाहिनी विपरीतां सिंहिनीं भण सत्यं ॥ विपरीता — पूर्व्वार्द्धे द्वात्रिंशद् उत्तरार्द्धे त्रिंशन्मात्रा-यत्र सा सिंहिनी । यत्र द्वात्रिंशन्मात्रास्तत्राष्टौ गणाः कार्य्याः । (C).

७० । अथ गाहिनीं सिंहिनीं लक्षयति पुब्ब इति । मुद्धिणि — हे मुग्धे यत्र पुब्बद्धे तीस मत्ता — पूर्वार्द्धे त्रिंशन्मात्रा भवंतीति शेषः, उत्तद्धे बत्तीसा — उत्तरार्द्धे द्वात्रिंशन्मात्रा भवंतीति पूर्वेणा-[न्व]यः, सा गाहिणि — गाहिणी[नी]ति पिंगल पभणेइ — पिंगलः प्रभणति त्वं मुणेहि — जानीहि, अत्र तामिति शेषः । तथाच तां गाहिनीं बिबरीअ — परावर्त्य विपरीतां कृत्वेति यावत् सिंहिणी — सिंहिनीं सत्यं निस्संशयं भण — कथय ॥ अयं भावः, पूर्वं सामान्यतो गाहिन्यां द्विषष्टिमात्रा उक्तास्तत्र पूर्वार्द्धे कियत्य उत्तरार्द्धे कियत्य-इति शिष्यजिज्ञासायां पूर्वार्द्धे त्रिंशन्मात्रा उत्तरार्द्धे द्वात्रिंशन्मात्रा-

---

७० । १ पुव्वद्ध (B), पूर्व्वद्ध (C). २ पिंगलो (F). ३ पणेन्हि (B), पभणेहि (C), भणईए (F). ४ मुद्दिणि (B). ५ बत्तिसा (C). ६ गाहिणी (C). ७ बिअरीअ (A). ८ सींहिणी (A), सीहिणी (B), सिहिणी (C), सिंघिणी (D). ९ भण (E). १० सव्वं (F). ११ ६७ (A), ७० (E & F).

गाहिणी जहा,

मुंचहि सुंदरि पात्रं[1]

अप्पहि[2] हसिउंण[3] सुमुहि खग्गं मे[4]।

कप्पिअ[5] मेच्छ[6] सरीरं[7]

पेच्छइ[8] बअणाइं[9] तुमह[10] धुअ हम्मीरो[11] ॥ ७१[12] ॥

गाहिणी।

इत्युक्तमेवं च पूर्वार्द्धं गाथाया इवास्या अपि कर्त्तव्या उत्तरार्द्धे द्वात्रिंशन्मात्राया उक्तत्वात्तत्र षष्ठं जगणं कृत्वा चतुर्मात्रिका अष्टौ गणा वक्ष्यमाणस्कंधकवत्कर्त्तव्या इति गाहिनीव्यवस्था। सिंहिन्यां च षष्ठं जगणं दत्त्वाष्टौ चतुर्मात्रिका गणाः पूर्वार्द्धे देया उत्तरार्द्धं च गाथाप्रथमदलवद्विधेयमिति निर्णय इति सुधीभिर्ध्येयम् ॥ (E).

७०। पुव्वेति। पूर्वार्धे त्रिंशन्मात्राः पिंगलो भणति हे मुग्धे शृणु। उत्तरार्धे द्वात्रिंशद् गाहिनी, विपरीतां सिंहिनीं भणंति सर्वे ॥ विपरीतां—पूर्वार्धे द्वात्रिंशदुत्तरार्द्धे त्रिंशदितिस्वरूपामित्यर्थः ॥ ७० ॥ (G).

७१। उदाहरति, मुञ्च सुन्दरी[रि] पादम्, अर्पय हसित्वा सुमुखी[खि] खड्गमस्य। कर्त्तितम्लेच्छशरीरो द्रक्ष्यति वदनानि

७१। १ पाइं (B). २ अप्पहिं (D). ३ हँसिउंण (D), हसिउेण (E), हसिअउंण (F). ४ वे (C). ५ कप्पिद (C) ६ मेछ (A, D & F). ७ सरीरो (C). ८ पेक्खिहि (A), पेक्खइ (E). ९ बअणाइं (A & F). १० तुम्ह (A & D), तुम्ह (B & F), तुहइ (E). ११ हम्मीरो (B & C), हंमेरो (E). १२ ६८ (A), ७१ (E & F).

सिंहिणी जहा,

बरिसइ[१] कणअह[२] विट्ठिं[३]
तप्पइ भुअणे[४] दिआणिसं[५] जग्गंतो ।
णीसंक साहसंको
णिंदइ[६] इंदं च[७] सूरबिंबं च[८] ॥ ७२[८] ॥ सिंहिणी ।

तव ध्रुवं हम्मीरः ॥ युद्धोद्यतो हम्मीरः पद्पतितां [पत्नीं] बोधयति । वदनानीत्यादंराद्दकवचनम् । (C).

७१ । तत्र गाहिनीमुदाहरति मुंचहीति । हे सुंदरि पाअं—पादं मुंचहि—मुंच हे सुमुखि हसिऊण—हसित्वा मे—मह्यं मम वा खग्गं—खड्गं अप्पहि—अर्पय, मेच्छसरीरं—म्लेच्छशरीरं, कप्पिअ—कर्त्तयित्वा हम्मीरो—हम्मीरः तुह—तव बअणाइ—वदनं पेक्खइ—प्रेचते । युद्धार्थं संनद्धस्य हम्मीरस्य खड्गानयनार्थमागतवतः प्रतिबंधं कुर्वाणां कांतां प्रत्येतदाक्यम्, एवं च म्लेच्छान्निर्जित्य मया अचतेनैव झटित्यागत्य भवत्या दर्शनं विधेयम्, म्लेच्छतो वंदीभीतिर्मम वा संग्रामे मरणशंका न विधेयेति भावः । (E).

७१ । तत्र गाहिनी यथा ॥ मुंच ॥ मुंच सुंदरि पादौ अर्पय हसित्वा सुमुखि खड्गं मे । कृत्वा [कर्त्तित्वा] म्लेच्छशरीरं पश्यति वदनानि युष्माकं ध्रुवं हम्मीरः ॥ इति पत्नीं प्रति हम्मीरोक्तिः ॥ ७१ ॥ (G).

---

७२ । १ बरिसहि (B & C). २ कणअ (B). ३ दिट्ठिं (B), दिट्ठी (F). ४ भुअणो (E), भुअणेहि (F). ५ दिवाणिसं (B, C & F). ६ णिंदेइ (F). ७ अ (D). ८ ६९ (A), ७२ (E & F).

अथ स्कंधकं । (D & F).

चउ[1]मत्ता अट्ठगणा
पुव्वद्धे[2] उत्तरद्ध[3] होइ[4] समरुआ[5] ।
सा[6] खंधआ विआणहु[7]
पिंगल पभणेइ[8] मुद्धि[9] बहुसंभेआ[10] ॥ ७३[11] ॥

---

७२ । सिंहिनीमाह ॥ वर्षति कनकवृष्टिं, तपति भुवनं दिवानिशं जाग्रत् । निःशंक-साहसाङ्को निन्दति इन्द्रं सूरविम्बञ्च ॥ इन्द्रस्य कनकवृष्ट्यभावात् सूर्यस्य च दिवानिशमनवस्थानादेतेनास्याधिक्यम् ॥ (C).

७२ । अथ सिंहिनीमुदाहरति बरिसईति । निस्संव [णीसंक] — निश्शंकः जग्गंतो — जाग्रत् महाजागरूक इत्यर्थः, साहसंको — साहसांको विक्रमादित्यः, कण[अ]ह बिट्ठिं — कनकस्य वृष्टिं बरिसइ — वर्षति, अथच दिआणिसं — अहोरात्रं, भुवने जगति तप्पइ — तपति, अतः इंदं — इंद्रं च सूरबिंबं — सूर्यबिंबं च, णिंदइ — निंदति । इंद्रो जलं वर्षति महातापसेभ्यः साशंकस्य, सूर्यस्य दिवैव तपत्यजागरूकस्य, अयं तु कनकं वर्षति निश्शंकस्य, सर्वदा च तपति जागरूकस्येति तौ निंदतीति भावः । (E).

---

७३ । १ चतु (B), चौ (E). २ पूव्वड्डे (B & C). ३ उत्तद्द (A & E), उत्तरद्धे (D). ४ विहोइ (A), हो (B & D), dropt in (C), वि होंति (E), वि च (F). ५ समरूआं (C & E), समरूवा (F). ६ सो (D & F). ७ विआणह (A), विआणेह (B), विआणऊं (D). ८ भणेइ (C & F), भणइं (D). ९ मुद्धिणि (F). १० संभेदाः (F). ११ ७० (A), ७२ (E & F).

७२ । सिंहिनी यथा ॥ वरीति ॥ वर्षति कनकस्य वृष्टिं तपति भुवनानि दिवानिशं जाग्रत् । निःशंकः साहसांको निंदतींद्रं च सूर्यबिंबं च ॥ साहसांको विक्रमादित्यः ॥ व्यतिरेकोऽलंकारः ॥ ७२ ॥ (G).

७३ । अथ खंधकमाह ॥ चतुर्मात्रा अष्टौ गणाः पूर्व्वार्द्धे उत्तरार्द्धे भवन्ति समरूपाः । तां खन्धकां विजानीहि पिङ्गलः प्रभणति मुग्धे बहुसंभेदाम् ॥ समरूपा अष्टौ गणा इत्यर्थः । तेन चतुर्मात्रगणाष्टकं पूर्व्वपरार्द्धयोः । उत्तरार्द्धे चैकलघुः षष्ठो गणोऽत्र न सम्भवति । किन्तु जगणश्चतुर्लघुर्व्वा गणः कार्य्यः, दीर्घान्तत्वं चरणान्तःपातिदीर्घा णे[नै]वेति बोध्यम् ॥ (C).

७३ । अथ स्कंधकं लक्षयति चौमत्तेति । पुब्बद्धे उत्तद्धे वि—पूर्वार्द्धे उत्तरार्द्धेऽपि, समरुआ—समरूपाः समं षष्ठजगणं तद्रूपं येषां तादृशा इत्यर्थः । यत्तु समं षष्ठजगण-नलघ्वन्यतरत्कमिति तन्न, अत्र नलघुदानासंभवात् । इदं चानुपदमेव व्यक्तीभविष्यति । चौमत्ता अट्ठ गणा—चतुर्मात्रिका अष्टौ गणाः होंति—भवंति, तत् बहुसंभेआ—बहुसंभेदकं बहवो वक्ष्यमाणाः सप्तविंशतिविधाभेदा यस्य तत्तादृशं खंधहा[आ]—स्कंधकं विआणहु—विजानीत इति पिंगल पभणेइ—पिंगलः प्रभणति, मुद्धि—हे मुग्धे । अत्र उत्तद्ध इति तकारः संयुक्तपरोऽपि लघुर्बोध्यः, कत्थवि संजुत्तपरो इत्युक्तेः (Vide ४र्थ श्लोकः p. 6.—Ed.), अन्यथाऽत्र षष्ठे पंचमात्रापत्त्या जगणासंभवाल्लक्षणं न संगच्छते, एतत्तत्त्वं पुनर्भेदप्रकारावसरेऽनुपदमेव विवेचयिष्यामः । (E).

जहा, जं जं आणेइ गिरिं
रइरह[1] चक्क परिहट्टण[2] सहं हणुआ[3] ।
तं तं लीलाइ णलो
वामकरत्थंभिअं[4] रएइ[5] समुद्दे[6] ॥ ७४[7] ॥ [स्कंधकम्]

---

७३ । अथ स्कंधकम् ॥ चउम । चतुर्मात्रा अष्टगणाः पूर्वार्द्धे उत्तरार्द्धेऽपि च समरूपाः । तं स्कंधकं विजानीत पिंगलो भणति बहवो भेदाः ॥ अस्येति शेषः ॥ दलद्वयेऽपि द्वात्रिंशन्मात्रा-इत्यर्थः ॥ ७३ ॥ (G).

७४ । यं यमानयति गिरिं रविरथचक्रपरिघट्टनसहं हनु-मान् । तं तं लीलया नलो वामकरोत्तोलितं रचयति समुद्रे ॥ (C).

७४ । स्कंधकमुदाहरति जं जमिति । हणुआ — हनुमान्, रविरहचक्कपरिघसाणसह — रविरथचक्रपरिघर्षणसहं जं जं — यं यं गिरिं पर्वतं, आणेइ — आनयति, तं तं णलो — नलः वामकर-त्थंभिअं — वामकरोत्तंभितं, लीलाइ — लीलया अनायासेन, समुद्दे — समुद्रे, रएइ — रचयति ॥ (E).

७४ । यथा ॥ यं यमानयति गिरिं रविरथचक्रपरिघर्षणसहं हनूमान् ॥ तं तं लीलया नलो वामकरस्तंभितं रचयति समुद्रे ॥ ७४ ॥ (G).

---

७४ । १ रविरह (B & C), रइरथ (F). २ पद्रिम्वट्टण (D), परिवट्टण (E), परिग्घसण (F). ३ हणुमा (A, B & C). ४ करच्छंभिअं (A), करोत्थुभिअं (B), करत्थम्भिअं (C), करत्थंहि (D). ५ रचइ (D). ६ समुद्दे (C). ७ ७१ (A), ७४ (E & F).

णंदउ[1] भद्दउ[2] सेस सरंग[3]
सिब बंभ[4] बारण[5] बरुण[6],
णील[7] मअण[8] तालंक[9] सेहरु[10]
सरु[11] गअणु[12] सरहु[13] बिमइ[14],
खीर[15] णअरु णरु णिद्ध[16] णेहलु[17] ।
मअगलु[18] भोअलु[19] सुद्ध सरि
कुंभ कलस ससि जाण[20] ।
सरह[21] सेस ससहर[22] मुणहु
सत्ताइस[23] खंधाण ॥ ७५[24] ॥ राजसेना ।

७५। अथ स्कन्धकभेदानाह ॥ नन्द भद्र शेष सारङ्ग शिव ब्रह्म वारण वरुण नील मदन तालङ्क शेखर [शर] गगन शरभ [विमति] क्षिर नगर न[र] स्निग्ध नेहन मदकल भोल शुद्ध श्री कुम्भ कलश शशिनो जानीहि। सर्व्वस्य शेषैः शशधरं जानीहि अष्टाविंशतिं

७५। १ णंद (B, C & F). २ भद्द (F). ३ सारंग (A, B & C), सारंख (F). ४ बह्म (A), बम्भु (B), बमह (C). ५ बारण (A & B), बाराणा (D). ६ बरुणो (F). ७ णील (A), णीलइ (E). ८ मअणु (B & C), मदण (F). ९ मलंक (E). १० सेहर (E & F). ११ सर (C). १२ सरु गअणु (F). १३ सरद (B), सरह (C). १४ बिमद्दि (A), बिमई (D). १५ धीर (A), खोर (D), खीरअ (F). १६ सिद्ध (F). १७ णेहर (A). १८ मअगलु (E), मदगलु (F). १९ भोलउ (B, C & D), लोलउ (E), भूअलु (F). २० णाम (E). २१ सरङ्ग (B), सरभ (F). २२ सिहर (E), ससधर (F). २३ अट्ठा-इस (A, B, C & D), भेआ सव्वतुम अट्ठाईस खंधाण (F). २४ ७३ (A), ७५ (E & F).

खन्धकानाम्। एते च नन्दाद्याः शशिशेषा अष्टाविंशतिभेदा भवन्ति, तस्यैव विवरणं सर्व्वशेष इति। (C).

७५। अथ पुरः सप्तविंशतिभेदानयनप्रकारं विवक्षुः रड्डावृत्तेन प्रथमं तावन्नामानि संख्यां चाह। नंद इति। नंदः [१] भद्रः २ शेषः ३ सरंग—सारंगः ४ शिवः ५ ब्रह्मा ६ वारणः ७ वरुणः ८ णीलइ—नीलः ९ मअणतलंक—मदनताडंकः १० शेखरः ११ शरः १२ गगनं १३ शरभः १४ विमतिः १५ चीरं १६ नगरं १७ नरः १८ स्निग्धः १९ स्नेहलः २० मदकलः २१ लोलः २२ शुद्धः २३ सरिः २४ कुम्भः २५ कलशः २६ शशी २७ इति हि शरभ-शेष-शशधराः प्राकृतकवयः खंधाण—स्कंधके, सत्ताइस—सप्तविंशतिः णाम—नामानि, मुण-ऊ—जानीत॥ क्वचित्तु णाम इत्यत्र जाण इति पाठस्तत्र विज्ञेय-इत्यर्थस्तदा नामद्वैविध्यं परिहार्यम्। अत्र क्वचिदट्ठाइस खंधाण इति पाठः, स तु लेखकप्रमादाज्जातः, एतदनुरोधेन च मनंद-[मदन]स्ताटंक इति नामद्वयं विधाय त्रिगुर्वष्टपंचाशल्लघ्वात्मक-मष्टाविंशतिभेदं वदंति, तदपि भ्रमविलसितं, क[त]स्य गाथाभेद-त्वादत्रापि षष्ठो जगणो दलद्वये देयः, अंते च गुरुरेव स्थाप्य इति एकैको गुरुः [ज]गणस्य एकैकश्चांत्य इति मिलित्वा प्रतिभेदं दल-द्वये गुरुचतुष्टयमावश्यकम्, एवं च त्रिंशद्गुरवश्चत्वारो लघवश्च यत्र पतंति स आद्यो भेदः, चत्वारो गुरवः षट्पंचाशल्लघवश्च यत्र पतंति स चरमो भेद इति त्रिगुरूणामसंभवात् सप्तविंशतिरेव भेदा न त्वष्टाविंशतिरिति, तांश्च भेदाननुपदमेव स्पष्टीकरिष्यामः। न चैतस्य गाथाभेदत्वे उत्तरार्द्धे षष्ठो गण एकलघ्वात्मक एव

स्यादिति वाच्यम्, उद्गाथावदत्रापि षष्ठे जगणस्थापने बाधका-भावात् । ननु तथापि तद्वदत्रापि षष्ठो गणो नलघ्वात्मक एव स्यादिति पादांतस्थगुरुयुगस्यैवा[व]श्यकत्वं न तु जगणांतर्गतस्येति प्रतिभेदं कथं गुरुचतुष्टयस्यावश्यकत्वमिति चेत्तन्न, द्विगुरुषष्टि-लघ्वात्मकैकोनत्रिंशत्तमभेदापत्ते-र्नलघुदानस्य सर्वथा निषेधात् । अतएव गाथामध्योदितसप्तगणदाननियमादत्र तद्भंगेऽपि यथा नापौ[पि] विशेषलक्षहानिस्तथांतिमगुरुद्वयस्यैवावश्यकत्वं न पादांत-स्थस्य, तथा च त्रिगुरुसत्त्वेऽपि तथाविधगुरुद्वयवत्त्वस्याबाधान्न त्रिगु-र्वष्टपंचाशल्लघ्वात्मके भेदे किंचिद्बाध[क]मस्तीत्यपास्तं द्विगुरुषष्टि-[ल]घ्वात्मकभेदापत्तेः उर्वरि[त]त्वात् । किं च गाहिनीसिंहिन्यो-रुत्तरार्द्धपूर्वार्धयोरिवात्रापि गुर्वंतसप्तगणनियमभंगेना[ने]यं विशेष-लक्षहानिर्भवति भवति च दलद्वयांतस्थगुरुद्वयनियमभंगे सर्वत्र उद्गा-थादौ दलद्वयांतस्थगुरुद्वयनियमदर्शनात्, एवं चैतस्यावश्यकत्वे त्रिगु-र्वष्टपंचाशल्लघ्वात्मको भेदः खपुष्पकल्प एवेति, न च तथापि, दल-द्वयेऽपि षष्ठो जगण एव न देयः किंतु एकत्र जगणः परत्र नलघुः एवं जगणस्य एको गुरुः पादांतस्थं गुरुद्वयमिति प्रतिभेदं गुरु-त्रयमावश्यकमित्यं च यत्र षड्लघवः एकोनत्रिंशद्गुरवश्च पतंति स आद्यो भेदः, यत्र च त्रयो गुरवोऽष्टपंचाशल्लघवश्च पतंति सोऽंतिम-श्चेदिति तथाविधे भेदे न किं[चि]द्बाधकमस्त्यस्ति च तथाविधम् इति वाच्यम्, चौलक्क कत्यवीति विरोधात्, उदाहरणे च दलद्वये-ऽपि जगणस्यैव दर्शनात्, पूर्वं समरूपाश्चतुर्मात्रिका अष्टौ गणा-देया इति लक्षणोक्तविरोधाच्च, यतः समरूपत्वं तेषां तदैव निर्व-

चउ[1] लहु कत्थवि[2] पसर जहिँ सो सहि णंदउ जाण।
गुरु टुट्टइ बेलहु चलइ[3] तं तं णाम विआण ॥ ७६ ॥
दोहा।

इति यदि पूर्वार्द्धे यो गणः षष्ठः उत्तरार्द्धेऽपि स एव स्यादिति, पूर्वोक्तभेदापत्त्या चैकत्र तदावश्यकत्वेऽपरत्रापि तस्यैवोचितत्वात्, दीयतां वा षष्ठे जगणः अपरत्र चतुर्लघुः [लघवः] क्रियतां च तेनैव प्रकारेण भेदास्तथापि भवदुक्तरीत्या प्रस्तारक्रियया त्रिगुर्वष्टपंचाशत्संख्यात्मको भेदः सप्तविंशतितम एवायाति न त्वष्टाविंशतितम इत्यस्मत्तातचरणैरुपदिष्टः पंथास्सुधीभिर्विभावनीयः। (E).

७५। अथैकैकगुरुह्रासे भेदनामाह ॥ णंदेति ॥ नंद १ भद्र २ शेष ३ सारंग ४ शिव ५ ब्रह्मन् ६ वारण ७ वरुण ८ नील ९ मदन १० ताड़ंक ११ शेखर १२ शर १३ अन्यत् गगन १४ शरभ १५ विमति १६ क्षीर १७ नगर १८ नर १९ स्निग्ध २० स्नेहालु २१ मदकल २२ भूपाल २३ शुद्ध २४ सरित् २५ कुंभ २६ कलश २७ शशिन् २८। विज्ञाः शरभ-शेष-धरा जानीत भेदान् सर्वान् भवंतोऽष्टाविंशतिं स्कंधके ॥ भो विज्ञाः शरभ-शेष-धराः प्राकृतकवयः इति संबुद्धिः ॥ ७५ ॥ (G).

७६। कथमेते भेदा भवन्तीत्याह। अर्द्धे द्वौ लघू प्रसरतो यस्मिन् तं सखि नन्दं जानीहि। गुरुस्त्रुटति द्वौ लघू उत्तिष्ठत-

---

७६। १ चौ (A & E), कड्ड (B), कद्दवि (C), कट्टवि (F). २ लङ्घा (B, C & F). ३ स वि लङ्क बड़इ (D), विविलङ्क वड़इ (E).

तत्तन्नाम विजानीहि ॥ अयमर्थः — एकैकस्मिन्नर्द्धे लघुद्वयं प्रसरति षष्ठजगणसम्बन्धात्, तेन लघुचतुष्टयं त्रिंशद्गुर्व्वपि नन्दलक्षणम्, उदाहरणेनैव व्यक्तीकरिष्यति । एकैक[गुरु]स्थाने द्वि-द्वि-लघुकरणाद्यथाक्रमं भद्रादि-सप्तविंशतिगुरुह्रासास्त्रिगुरुः शशी शेषे ॥ (C).

[There should not be less than two long syllables in each half, one at the end, and the other in the 6th *gana* which must be a जगणः; otherwise there will be no जगणः, and it will be a रंडा. Vide p. 118, and commentary (E) pp. 134-135.—Ed.]

७६ । अथ सप्तविंशतिभेदानदा[य]नप्रकारं दोहावृत्तेनाह । चौ लहु कत्थवीति । सहि — सखि, जहि — यत्र, चउ लहु — चत्वारः लघवः, कत्थवि — कुत्रापि, पसर — प्रसरंति, सो णंदउ जाण — तं नंदं जानीहि, यदि गुरु टुट्टइ — गुरुस्तुटति ह्रसतीत्यर्थः, बिवि लहु बढइ — द्वौ लघू वृद्धिं प्राप्नुत इत्यर्थः, तदा तं तं णाम विआण — तत्तत् भद्रादिकं नाम जानीहि । अयमर्थः — पूर्वोक्तप्रकारेण दलद्वये षष्ठं जगणमेव दत्त्वा चतुर्मात्रिका अष्टौ गणाः प्रतिदलं विधेयाः, एवं च गाथावदत्रापि प्रथमचरणे द्वादशमात्राः स्थाप्यास्तासां षड्गुरवः, द्वितीयचरणे पंचचतुर्मात्रिकाणां सत्त्वात्तेषां विंशतिर्मात्रास्तासां च षष्ठजगणाद्यंतर्गतलघुद्वयं विहाय नवगुरवो भवंति, तदेवं प्रथमदले पंचदशगुरवो द्वौ लघू, एवं द्वितीयदलेऽपि, तथाच द्वयोर्दलयोर्मिलित्वा यत्र त्रिंशद्गुरवः षष्ठजग[ण]द्वयांतर्गतास्चत्वारो लघवः पतंति, स नंदः प्रथमभेदः, यदि च त्रिंशद्गुरुषु एकैकगुरुह्रासेन तत्समानमात्राकं लघुद्वयं वर्द्धते तदा भद्रादयो भेदा भवंति, ते च प्रदर्श्यंते लिखित्वा ॥ (E).

[Here something has been omitted by the scribe.—Ed.]

जहा, चंदा कुंदा कासा
हारा हीरा तिलोअणा केलासा ।
जेत्ता[1] जेत्ता[1] सेत्ता
तेत्ता[2] कासीस जिणिआ ते[3] कित्ती[4] ॥ ७७[5] ॥
नन्दः । इति गाथाप्रकरणम् ॥

---

७६ । भेदानयनप्रकारमाह ॥ अट्ठेति ॥ अष्टावपि लघवः प्रस-रंति यत्र तं सखि नंदं विजानीहि । गुरुस्तुत्यति द्विलघुर्वर्धते तत्तन्नाम विजानीत ॥ तत्तन्नामानि भद्रादीनीत्यर्थः । (G).

७७ । उदाहरति । चन्द्रः कुन्दं कासं हारो हीरस्त्रिलोचनः कैलासः । यावन्तो यावन्तः श्वेतास्तावन्तः काशीश जितास्ते कीर्त्त्या ॥ अत्रान्योऽपि खन्धकभेदो दृश्यते, यथा, अन्तेगुरुमध्य-लघुकौ पञ्चकलौ द्वौ तृतीयसप्तनागौ[?] । गाथावत् परमखिल कथितोऽसौ भिन्नखन्धकः कविना ॥ यथा, भ्रमिमरतिमलस-हृदयतां प्रलयं मूर्च्छां तमः शरीरपातं । मरणञ्च जलधर जगतां सम्प्रति कुरुषे विषं वियोगिनीनाम् ॥ एवमर्द्धखन्धकोऽपि । (C).

७७ । अथ नंदाख्यं स्कंधकभेदमुदाहरति चंदेति । चंदा — चंद्रः, कुंदा — कुंदः, कासा — कासः, हारा — हारो मुक्तादाम, हीरा — हीरकं, तिलोअणा — त्रिलोचनः कर्पूरगौर इति यावत्,

---

७७ । १ जत्ता (B), जात्ता (C). २ तत्ता (B & C). ३ तो (C). ४ कीर्त्ती (C). ५ ७४ (A), ७७ (F). This *sloka* has been omitted by the scribe in the text of (E), but not in the commentary.

अथ दोहा (D, E & F).

तेरह मत्ता पढम पत्र पुणु[1] एआरह देह[2] ।
पुणु[1] तेरह एआरहहि[3] दोहा लक्खण एह[4] ॥ ७८[5] ॥

केलासा — कैलासः पर्वतः इत्यादीनीति शेषः, जेत्ता जेत्ता सेत्ता — यावंति[यावंति]श्वेतानि, तेत्ता — तावंति, हे कासीस — काशीपते दिवोदास, ते तव कित्ती — कीर्त्त्या जिखिआ — जिता[ता]नि, एतेभ्योऽपि त्वदीया कीर्त्तिरतिधवलेति भावः ।

* इति श्रीपिंगलप्रकाशे गाथाप्रकरणम् ।* (E).

७७ । तत्र नंदो यथा ॥ चंदेति ॥ चंद्राः कुंदाः काशा हाराः हीराख्रिलोचनः कैलासः । यावंतो यावंतः श्वेताः काशीश्वर जीयंते ते कीर्त्त्या ॥ काशीश्वरो दिवोदासः ॥ ७७ ॥ (G).

७८ । अथ दोहामाह । त्रयोदशमात्राः प्रथमपदे पुनरेकादश मात्रा देहि । पुनस्त्रयोदशैकादशभिर्दोहालक्षणमेतत् ॥ पुनरित्यर्थात् द्वितीयपदे, त्रयोदशैकादशभिः तृतीयचतुर्थचरणौ भवतः । (C).

७८ । अथ द्विपथां लक्षयति तेरहेति । पढम पत्र — प्रथमपादे, तेरह मत्ता — त्रयोदश मात्राः, देऊ — देहि, इदं च क्रियापदं सर्वत्रान्वेति, पुनः द्वितीयचरणे इत्यर्थः, एआरह — एका-

---

७८ । १ पुण (B & C). २ देऊ (E), देहि (F). ३ एआरह (B), एआरहह (C), एआरहइ (D), हि dropt in (E). ४ सेऊ (B), एेह (C), एऊ (E), एहि (F). After this in D "द्विपथेयं" इति । ५ ७५ (A), ७८ (E & F).

जहा, सुरअरु सुरही परसमणि
णहि वीरेस समाण ।
ओ वक्कल[1] अरु[2] कठिणतणु
ओ पसु ओ पासाण[3] ॥ ७९[4] ॥ दोहा ।

दश मात्रा देहि [इ]ति पूर्वेणान्वयः, पुणु—पुनः तृतीयचरणे इत्यर्थः तेरह—त्रयोदश मात्रा देहीति पूर्वेणान्वयः, चतुर्थचरणे इति शेषः एआरह—एकादश मा[त्रा] देहीति तेनैवान्वयः, एऊ—एतद् दोहा लक्खण—द्विपथालक्षणम् ॥ (E).

७८ । अथ दोहामाह ॥ तेरहेति ॥ त्रयोदश मात्राः प्रथमे पादे पुनरेकादश देहि । पुनस्त्रयोदश एकादश दोहालक्षणमेतत् ॥ क्रमात्पादे[षु] एतत्संख्या मात्राः कार्या इत्यर्थः ॥ इयं द्विपथेति संस्कृते ॥ ७८ ॥ (G).

७९ । सुरतरुः सुरभिः स्पर्शमणिर्नहि वीरेशसमानः । असौ वल्कलेन भवति कठिनतनुः, असौ पशुः, असौ पाषाणः ॥ (C).

७९ । द्विपथामुदाहरति सुरअरु इति । सुरतरुः कल्पवृक्ष-इत्यर्थः, सुरही—सुरभिः कामधेनुरित्यर्थः, परसमणि—स्पर्श-मणिः, एते इति शेषः, वीरेस समाण—वीरेशसदृशा नहि । तत्र हेतुमाह ओ वक्कल इति । ओ—सः सुरतरुरित्यर्थः वक्कल ओ कठिणतणु—वल्कलः वल्कलमय इति यावत् अथच कठिन-

---

७९ । १ वक्कर (A), वक्कले (B), वक्कलु (F). २ हो (A, B & C), धो (D & E). ३ पाहाण (A), पाखाण (B & C). ४ ७१ (A), ७८ (E & F).

भमरु भामरु सरहु सेचाण[१] मंडूअ[२] मक्कड[३] करहु[४],
णरु[५] मरालु[६] मअगलु[७] पओहरु[८] बलु बाणरु[९] तिसि[१०]कलु,
कच्छ मच्छ[११] सद्दूल[१२] अहिवरु[१३] ।
बग्घ[१४] बिराडउ[१५] सुणह[१६] तह उंदुर[१७] सप्प पमाण[१८] ।
गुरु टुट्टइ बे लहु चलइ[१९] तं तं णाम बिआण[२०] ॥ ८०[२१] ॥
रड्डा ।

तनुः, ओ पसु — सा सुरभिः पशुः विवेकरहिता, ओ पाषाण — सः स्पर्शमणिः पाषाणः जड़ इति भावः, वीरेश्वरस्तु मृदुचित्तः विवेकी महाबुद्धिरिति तेभ्यो विलक्षण इति भावः । (E).

७९ । यथा सुरेति ॥ सुरतरुः सुरभिः स्पर्शमणिर्नहि वीरेश्व[र]समानाः । स सवल्कलोऽन्यत् कठिनतनुः, सा पशुः, स पाषाणः ॥ वीरेश्वराख्यो राजा स्तूयते ॥ ७९ ॥ (G).

८० । तद्भेदानाह । भ्रमर भ्रामर सरभ श्येन मण्डल मर्कट

---

८० । १ सचान (B & C), सेचाणु (D), सरवाय (E). २ मच्छ (B & C), मंडूका (E & F). ३ मक्कलु (B & C), मक्कड़ु (D). ४ करभ (E), करह (F). ५ वाणर (E). ६ मराल (A). ७ मयगंध (A), मअगण (B). ८ पअहर (A). ९ चल चारण (A), बल वाणर (B). १० तिसच (A), तिसं (D), तीस (E). ११ कच्छ मच्छ (B & C). १२ सद्दुल (B), सकुन (C), सदूलं (D), सदूल (E). १३ अहिवर (A), अहीवर (E). १४ बग्ग (B & C), बग्ग (D), तह बरघु (E). १५ विरालउ (B, C & E). १६ सणहि (B). १७ उँदुर (A), उन्दुर (B & C), उंदर (D). १८ पमाण (A), समाण (B), ममाण (D). १९ चलइ (E), चडइ (D & F). २० विआरि (A & B). २१ ७७ (A), ८० (E), ८१ (F).

छब्बीस[1] क्खर[2] भमर[3] हो गुरु बाइस लहु चारि[4]।
गुरु[5] टुट्टइ बे लहु चलइ[6] तं तं णाम बिआरि[7]॥८१[8]॥
दोहा।

करभास्व, [नर]मराल मद्कल पयोधर चल वानर त्रिकर कच्छप मत्स्य शार्दूलाहिवरान्। व्याघ्रविडालौ जानीहि, तथा उन्दुरसर्पौ प्रमाणम्। गुरुस्तुथ्यति द्वौ लघू उत्तिष्ठतः तत्तन्नाम विजानीत॥ (C).

८०। अथैतद्भेदान् रड्डावृत्तेनाह भमरु इति,—भ्रमरः १, भ्रामरः २, शरभः ३, सरवाण—श्येनः ४, मंडूकः ५, मर्कटः ६, करभः ७, नरः ८, मरालः ९, मद्कलः १०, पयोधरः ११, बलः १२, वानरः १३, त्रिकलः १४, कच्छपः १५, मत्स्यः १६, सद्दूल—शार्दूलः १७, अहो-वर—अहिवरः १८, व्याघ्रः १९, विरालः २०, शुनकः २१, तह—तथा उंदुरः २२, सर्पः २३ इति, यदा गुरु टुट्टइ—गुरुस्तुटति ह्रसतीत्यर्थः, बे लहु—द्वौ लघू बढइ—वर्द्धते, तदा तं तं—तत्तत् भ्रमरादिकं णाम—नाम, बिआण—विजानीहि इति पमाण—प्रमाणं निश्चितमित्यर्थः॥ ८०॥ (E).

८०। अथ तस्य त्रयोविंशतिनामानि। भ्रमर १, भ्राम[र] २, शरभ ३, श्येन ४, मंडूक ५, मर्कट ६, करभ ७, नर ८, मराल ९, मद्कल १०, पयोधर ११, ब[ल] १२, वानर १३, त्रिकल १४, कच्छ[प] १५, मत्स्य १६, शार्दूल १७, अहिवर १८, व्याघ्र १९,

---

८१। १ छब्बिस (A). २ क्खब (B & C), खर (F). ३ भमब (B & C). ४ चारी (A). ५ This line is dropt in (C). ६ च्चलइ (A), बढइ (D & E). ७ बिआरी (E). ८ ७७ (A), ८१ (E & F).

विड़ाल २०, शुनक २१, तथा उंदुर २२, सर्प्प २३ इति ॥ ८० ॥ (G).

८१ । गुरुत्रोटनादेव कथं तत्तद्भेदास्तत् स्पष्टीकर्त्तुमाह । षड्विंशत्यक्षरो भ्रमरो भवति, गुरवो द्वाविंशतिर्लघवश्चत्वारः । गुरुस्त्रुटति द्वौ लघू उत्तिष्ठतस्तन्नाम विचारय ॥ अत्र पादचतुष्टये लघुचतुष्कं विहाय अवशिष्टा द्वाविंशतिर्गुरवः ॥ तेन षड्विंशत्यक्षरा दोहा भ्रमरनामिका, एकैकगु[रु]ह्रासे द्विद्विलघुवर्द्धने भ्र[भ्रा]मरादिनामानि । (C).

८१ । अथैनमेव प्रस्तारप्रकारं दोहावृत्तेन विशदीकरोति छव्वीस इति । बाइत[स]—द्वाविंशतिः, गुरु—गुरवः, चारि—चत्वारः, लहु—लघवः, एवं छव्वीसक्खर—षड्विंशत्यक्षराणि, भमर हो—भ्रमरे भवंति, तत्र यदा गुरु टुट्टइ—गुरुस्त्रुटति न्यूनो भवति, बे लहु बढइ—द्वौ लघू वर्द्धेते, तदा तत्तद्भ्रामरादिकं नाम विश्रारि—विचारय जानीहीत्यर्थः । अयमर्थः—पूर्व्वं द्विपथायाः प्रथमचरणे त्रयोदशमात्राणामुक्तत्वात् तासां च प्रथमं षट्कलः पुनश्चतुष्कलः पुनस्त्रिकलः स्याप्य इति (Vide श्लोक ८१, p. 146. — Ed.) उड्डवनिकाप्रकारस्य वक्तव्यत्वादेकलघुः प्रथमचरणे त्रिकलांतर्गत आवश्यकः, अन्यथा त्रयोदशमात्राणामसंभवापत्तेः, एवं द्वितीयचरणे एकादशमात्राणामुक्तत्वात्तासां च प्रथमं षट्कलस्ततश्चतुष्कलस्तत एककलः स्थाप्य इति उड्डवनिकाप्रकारस्य वक्ष्यमाणत्वात्तत्राप्येको लघुरावश्यकः, एवं तृती[य]चतुर्थयोरप्येकैको लघुरावश्यक इति लघुचतुष्टयं प्रतिभेदमावश्यकमेवं च प्रथमचरणे द्वादशमात्राणां षड्-

जहा, जा अद्धंगे[१] पव्वई[२] सीसे गंगा जासु[३]।
जो लोआणं[४] बल्लहो बंदे पाअं तासु॥ ८२[५]॥

भ्रमरः।

गुरवस्त्रयोदशमात्रात्मकस्त्वेको लघुरेवं द्वितीयचरणे दशमात्राणां पंच गुरव एकादशतममात्राकस्त्वेको लघुरेवं पूर्वदले एकादश गुरवो द्वौ लघू, एवं त्रयोदशाक्षराणि पतंति, एवं परदलेऽपि इति द्वाविंशतिगुरवश्चत्वारश्च लघवो यत्र पतंति [तत्र] भ्रमरः। अत्र षड्विंशत्यक्षरात्मके भ्रमरे च यद्येको गुरुर्न्यूनो भवति पूर्वभेदस्थ-लघुचतुष्टयेनैकीकृत्य तत्समानमात्रासंख्याकं च लघुद्वयं वर्द्धते, एवमेकविंशतिगुरवः षड्लघवश्च यत्र पतंति, स भ्रामरः। एवं पूर्वभेदापेक्षया उत्तरत्र भेदे एकं गुरुं न्यूनं कृत्वा लघुद्वयमधिकं कृत्वा ते ते भेदा वाच्याः, ते लिखित्वा प्रदर्श्यंते॥ ८१॥ (E).
[Here apparently something has been omitted.—Ed.]

८१। अथ तदानयनप्रकारमाह॥ छव्वीसेति॥ षड्विंशत्यक्षरो भ्रमरो भवति। गुरवो द्वाविंशतिः लघवश्चत्वारः। एको गुरु-स्त्रुट्यति द्वौ लघू वर्धेते तत्तन्नाम विजानीहि॥ एकादिगुरुह्रासे द्व्यादिलघुवृद्धौ भ्रामरादीनि नामानि भवंतीत्यर्थः॥ ८१॥ (G).

८२। यस्यार्द्धाङ्गे पार्व्वती शीर्षे गङ्गावासः। यो लोकानां वल्लभो वन्दे पादं तस्य॥ (C).

८२। अथैतेषु भेदेषु आद्यं भ्रमरनामकं भेदमुदाहरति जा

८२। १ अद्धांगे (C), अद्धंगो (E). २ पव्वइ (A). ३ वासु (B & C), वासु (F). ४ देवाणं (D & F), देआणं (E). ५ ७८ (A), ८१ (E & F).

बारह लहुआ विप्पी
तह[1] बाईसे[2] हिँ खत्तिणी[3] भणिआ ।
बत्तीस[4] होइ वेसी[5]
जा इअरा[6] सुद्दिणी[7] होइ[8] ॥ ८३[9] ॥ गाहा ।

अद्धंग इति । जा अद्धंगे पव्वई — यस्याद्धांगे पार्वती, सीसे गंगा जासु — शीर्षे गंगा [यस्य], जो — यो, देवानां वल्लभः, तासु पाअं — तस्य पादौ, वंदे — नमस्करोमि ॥ ८२ ॥ (E).

८२ । तत्र भ्रमरो यथा ॥ यस्यार्धांगे पार्वती शीर्षे गंगा यस्य । यो देवानां वल्लभो वंदे पादौ तस्य ॥ (G).

८३ । या[जा]तिमाह, द्वादशलघुका विप्री[प्रा] भवति, तथा द्वाविंशत्या क्षत्रिया भणिता । द्वात्रिंशता भवति वैश्या जातिवरा, शेषे शूद्रा भवति ॥ (C).

८३ । अथ वर्णभेदेन द्विपथाया जातिभेदमाह, [बारह] लहुआ — द्वादशलघुका द्विपथेति शेषः, विप्पी — विप्रा भवतीति शेषः, तह बाईसेहिं — तथा द्वाविंशतिभिर्लघुभिरिति शेषोऽग्रेऽपि योजनीयः, खत्तिणी भणिआ — क्षत्रिया भणिता, बत्तीस — द्वात्रिंशद्भिर्लघुभिः वेसी — वैश्या होइ — भवति । जा इअरा — या इतरा अनुक्तलघुसंख्याका सा सुद्दिणी होइ — शूद्रा भवति ॥ (E).

---

८३ । १ तह (C). २ वाइसोह (C), बाबीसे (F). ३ खत्तीणी (D). ४ बत्तीसा (C). ५ वेसि (A). ६ इवरा (C). ७ सा सुद्दिणी (E). ८ होई (F). ९ ७९ (A), ८४ (E & F).

जस्सा[1] पढमहि तीए[2] जगणा[3] दीसंति[4] पाअ पाएण[5] ।
चंडालह[6] घर रहिआ[7] दोहा दोसं पआसेइ[8] ॥ ८४[9] ॥

गाहा ।

---

८३ । द्वादशैर्लघुभिर्विप्रा तथा द्वाविंशैः क्षत्रिया भणिता । द्वात्रिंशद्भिर्वैश्या, येतरा शूद्रि[द्रा]णी भवति ॥ ८३ ॥ (G).

८४ । दोहादोषमाह । यस्याः प्रथमे तृतीये जगणो दृश्यते पादपादैः । चण्डालगृहस्था [दोहा] दोषं प्रकाशयति ॥ पादपादैः सह — इत्यनेन प्रथमपादे द्वितीयपादेन सह, तृतीयपादो[दे] चतुर्थपादेन सह, इत्यर्थः । तेन पादचतुष्टये यत्र जगणा भवन्ति सा दोषवतीत्यर्थः । (C).

८४ । अथ द्विपथाया गणविशेषपुरस्कारेण दोषमाह जस्सेति । जस्सा — यस्याः द्विपथायाः, पढमहि — प्रथमे, पाअ — पादे, तथा तीए — तृतीये, पाए — पादे, ण — ननु निश्चितं, जगणा — मध्यगुरुका गणाः दीसंति — दृश्यंते, सा चंडालह घर रहिआ — चंडालगृहस्थिता, दोहा — द्विपथा दोषं पआसेइ — प्रकाशयति ॥ तथाच दोहाप्रथमतृतीयचरणयोर्जगणो न देय इति भावः । (E).

---

८४ । १ जिस्सा (B & C). २ पढम तीए (A), पढमे तीए (E), पढमह्न तीए (F). ३ जगण (E & F). ४ दिशन्ति (B), दिसंति (D), दिस्संहि (F). ५ पाआसु (A), पाएषु (B), पाएसु (C), पायेण (F). ६ चंडाल (B & C). ७ वसिआ (A). ८ पआसेई (D & E). ९ ८० (A), ८४ (E & F).

छक्कलु चक्कलु तिण्णि[1]कलु एमपरि[2] विसम पअंति[3] ।
सम पाअहिँ[4] अंतेक्ककलु ठवि[5] दोहा णिब्भंति[6] ॥ ८५[7] ॥
दोहा ।

---

८४ । अथ दोहादोषमाह ॥ जस्सा इति ॥ यस्याः प्रथमे तृतीये जगणा दृश्यंते पादे पादे । चंडालगृहस्थिता दोहा दोषं प्रकाशयति ॥ इव इति शेषः ॥ ८४ ॥ (G).

८५ । अत्र च कियत्कलो गणो ग्राह्य इत्यचाह । षट्कलश्चतुष्कलस्त्रिकल एवंप्रायो विषमपाद इति । समपादे अन्ते एककलं संस्थाप्य दोहां निर्व्वहति ॥ समपादे द्वितीये चतुर्थे च षट्कलगणनान्तरमेककलमिति [षट्कलचतुष्कलगणानन्तरमेककलमिति] । (C).

८५ । अथ द्विपथाया उट्टवनिकामाह छक्कलु इति । आदौ छक्कलु — षट्कलः, ततः चक्कलु — चतुष्कलः, ततस्त्रिकलः, एमपरि — अनया परिपाट्या विसम — विषमे चरणे गण इति शेषः, पअंति — पतंति, सम पाअहि — समे पादे द्वितीये चतुर्थे चेत्यर्थः । अंते षट्कलचतुष्कलयोरंते इत्यर्थः, एक्ककलु — एककलः पततीति शेषः, इमभंति — एवंप्रकारेण, दोहा — दोहां, ठवि — स्थापय । एक्ककलु अत्र एको ह्रस्वः । अयमर्थः — विषमचरणयोस्त्रयोदश-

---

८५ । १ तिण्ण (B & C). २ Here ए should be read as short. Vide श्लोक ५, p. 7. ३ पलंति (E), पतिअं (F). ४ पाँअ (A), पाआहि (C), पाअहि (E & F). ५ ठेवि (E). ६ निब्भन्ति (B), णिभवन्ति (C), णिव्वंति (D), इमभंति (E), णिब्भंत (F). ७ ८६ (A), ८५ (E & F).

दिअवरगण धरि[1] जुअल,
पुणविअ तिअलहु[2] पअल,
इम[3] विहि विहु[4] छउ[5] पअणि[6],
जिम सुहइ[7] सुससि[8] रअणि,
इह[9] रसिअउ मिअणअणि,
इह[10]दह कल गअगमणि ॥ ८६[11] ॥

मात्राणां सत्त्वात्प्रथमं षट्कलमात्रास्ततः चतुष्कलस्ततस्त्रिकल एवं त्रयोदश मात्राः स्थाप्याः, समचरणयोश्च प्रथमं षट्कलस्ततश्चतुष्कलस्तत एककल एवमेकादश मात्राः स्थाप्या इति ॥ ८५ ॥

इति पिंगलप्रकाशे दोहाप्रकरणम् ॥ (E).

८५। षट्कलश्चतुष्कलस्त्रिकलः एवंप्रकारेण विषमपादांते। समपादस्यांते एककलः स्थापनीयो दोहायां निर्भ्रान्तम् ॥ समे द्वा[एका]दश विषमे एका[त्रयो]दश मात्राः कार्या इत्यर्थः ॥ ८५ ॥ (G).

८६। द्विजवरयुगलं ध्रियते पुनरपि त्रयो लघवः प्रकटाः। अनेन विधिना द्विचतुष्पदा शोभते यथा शशी रजन्याम्। इयं रसिका मृगनयने एकादशकला गजगमने ॥ द्विजवर इति चतुष्कलगणे सर्व्वलघोः संज्ञा, तद्युगलेनाष्टौ लघवः, पुनश्च त्रयो-

---

८६। १ धर (A & C). २ पुणवि तिलङ (B). ३ एम (B & D), इअ (F). ४ विह (C), विवि (D & F). ५ छअ (A), चउ (C). ६ पल (C). ७ सुहइ जुजिम (A & C), सहइ सुजिम (B), जेम सुहइ (D), जिमु सुहइ (F). ८ सुसमं (D). ९ इअ (B & C), एह (D & E), इउ (F). १० इअ (B, C & D), एअ (E). ११ ८३ (A), ८९ (E & F).

जहा, बिमुह[१] चलिअ[२] रण अचलु[३],
परिहरिअ हअ गअ बलु[४],
हलहलिअ[५] मलअ णिबइ,
जसु जस[७] तिहुअण[८] पिअइ[९],
बणरसि[१०] णरबइ लुलिअ[११],
सअल उबरि[१२] जस[१३] फुरिअ[१४] ॥ ८७[१५] ॥

रसिका।

लघव इति मिलिता एकादश कलाः। द्विचतुष्पदेत्यनेन षट्पदल-
मुक्तम्। (C).

८६। अथ रसिकानामकं वृत्तं लचयति। दिअवरगणेति।
हे मिअणअणि — मृगनयने, गअगमणि — गजगमने, दिअवरगण
धरि जुअल — द्विजवरगणस्य चतुर्लघुयुक्तगणस्य युगले स्थापय,
पुणबिअ — पुनरपि च द्विजवरयुगलानंतरं चेत्यर्थः, तिअलहु
पअल — त्रीन् लघून् प्रकटय, इम बिहि — एवं विधिना छउ
पअणि — षट्पदेषु प्रत्येकमिति भावः, एअ[ह]दह कल — एकादश
कलाः, बिहु — विधेहि विरचयेत्यर्थः, एहु[अ] रसिअउ — एषा
रसिका, जिम — यथा, रअणि — रजन्यां, सुससि — पूर्णश्चंद्रः,

८७। १ बिमुह (E). २ चलिह (C). ३ अचल (A & E). ४ बल (A), घलु (B). ५ हलिअअ (A), हलि(F). ६ णर (F). ७ जस जसु (E & F). ८ गाण (D). ९ पिबइ (B, C, D & F). १० रणअसि (B), बरणसि (E & F). ११ गुण (C). १२ उबरि (B, C & D). १३ जसु (D, E & F). १४ फुलिअ (D, E & F). १५ ८४ (A), ८७ (E & F).

तथा सुहइ — शोभते। यत्र एकादशमात्रा एवं षट्चरणानि यस्याः सा रसिकेति फलितार्थः॥ ८६॥ (E).

८६। अथ रसिका छंदः॥ द्विजवरयोर्गणयोर्धारय युगलं, पुनरपि च त्रिलघु पातय॥ इति विधिविहितषट्पदा यथा शोभते सुशशी रजन्याम्॥ एषा रसिका मृगनयने एकादशकला गजगमने॥ रात्रौ चंद्र इव रसिका शोभते इत्यर्थः॥ ८६॥ (G).

८७। उदाहरति। विमुखचलितो रणेऽचलः, परिहृत्य हय-गजबलं। हलहलि[लि]तो मलयनृपतिः यस्य यशस्त्रिभुवनं पिबति। वाराणसी[नर]पतिर्लुलितः सकलोपरि यशः स्फुरति॥ यस्य राज्ञः रणे विमुखः सन् अचलनामा राजा चलितः, एता-दृशं वैमुख्यं हयगजबलमपि त्यक्तुं[त्वा] हलहलितः कम्पितः, लुलितो भग्नः॥ (C).

८७। रसिकामुदाहरति विमुहेति। अचलः कश्चिद्राजा हअ गअ बल — हयगजबलानि, परिहरिअ — परिहृत्य, रण — रणे विमुखः सन्, चलिअ — चलितः पलायित इत्यर्थः, किञ्च जस जसु तिहुअण पिअइ — यस्य यशः त्रिभुवनं पिबति सोऽपीति शेषः, मलअणिवइ — मलयनृपतिः, हलहलिअ — हलहलितः, किंच वर-णसि णरवइ — वाराणसीनरपतिः दिवोदास इत्यर्थः, लुलिअ — लुलितः पराङ्मुखीभूत इति यावत्। अतः तस्य राज्ञः सकलोपरि यशः स्फुरितम्॥ ८७॥ (E).

८७। यथा कश्चिद्राजसभायां[?] रणादचलन् वाराणसीनर-पतिर्लुलितः सकलोपरि यशः स्फुरि[र]ति॥ ८७। (G).

आइकव्व उक्कच्छ[१] मह[२] लोहंगिणि किउ[३] सारु[४] ।
गुरु बट्टइ[५] बि[६] बिलहु घटइ[७] तं तं णाम बिआरु ॥ ८८[८] ॥
[दोहा]

८८। तद्भेदानाह। आदिकाव्यमुत्कच्छा स्फुटा लोहाङ्गीमध्ये सारः। गुरुर्वर्द्धते द्वौ लघू विघटेते तत्तन्नाम विचारय॥ या रसिकेत्युक्ता सैवोत्कच्छा स्फुटा स्फुटीकृता। सर्व्वलघुरूपा सा आदिकाव्यं लोहाङ्ग्यादीनां वक्तव्यानां मध्ये सर्व्वलघुः श्रेष्ठा प्राथमिकत्वात्। अन्ये कथं भवन्तीत्याह। लघुह्रासगुरुवृद्धिभ्यां तत्तन्नाम ज्ञेयमित्यर्थः। (C).

८८। अथैतस्या नामान्तरकथनपूर्वकं भेदानयनप्रकारमाह॰ आईति। उक्कच्छ मह—उक्कच्छामध्ये उक्कच्छापरपर्यायरसिकामध्ये इति यावत्, सारु—सारभूता, लोहंगिणि—लोहांगिनी, आइकव्व—आदिकाव्यं प्रथमभेदः किउ—कृतं। गुरुर्वर्द्धते द्वौ लघू ह्रसतः, तदा तं तं—तत्तद् वक्ष्यमाणं नाम बिआरु—विचारय॥ अत्र उक्कच्छेति रसिकायाः पर्यायः, रसिकात्वं च सर्वभेदवृत्ति। तथाच लक्ष्मीत्यादिवत् लोहांगिनीत्वादि व्याप्यं, रसिकात्वं गाथात्वमिव व्यापकं बोध्यम्। (E).

८८। १ उकछ (A), उकच्छ (C), उक्कछ (D & E), उकच (F). २ मज (B). ३ किउ (A & B), फुरउ (C). ४ सच (A). ५ टुट्टइ (A), वड्ढइ (B). ६ वे (A, B & C). ७ धलइ (A), चलइ (B & C), पठइ (F). ८ ८५ (A), ८८ (E & F).

लोहंगिणि[1] हंसीआ[2] रेहा तालंकि[3] कंपि गंभीरा ।
काली कलरुद्दाणी[4] उक्कच्छा[5] अट्ठ[6] णामाई[7] ॥ ८९[8] ॥
गाहा ।

---

८८ । रसिकाया नामांतराण्याह ॥ आइ ॥ आदिकाव्यं उक्कच्छा छतं लोहांगिनीमध्ये सारं ॥ गुरुर्वर्धते द्वौ द्वौ लघू त्रुट्यतस्तदा तन्नामानि विजानीत ॥ रसिकाया एव आदिकाव्यं उक्कच्छा इति नामद्वयं ज्ञेयम्, लोहांगिन्यादिमध्ये श्रेष्ठं,तत्र गुरुगुरु[लघु]वृद्धिह्रासे अग्रिमाणि नामानि भवंतीत्यर्थः ॥ ८८ ॥ (G).

८९ । नामान्याह । लोहाङ्गी हंसी रेखा ताड़ङ्की कम्पिनी गम्भीरा काली कालरुद्राणी उत्कच्छाया अष्ट नामानि ॥ (C).

८९ । अथ नामान्याह लोहंगिणीति । लोहंगिणि—लोहांगिनी, हंसीआ—हंसिका, रेखा, ताड़ंकिनी, कंपिनी, गंभीरा, काली, कालरुद्राणी इति उक्कच्छाया अष्टौ भेदा इत्यर्थः ॥ (E).

८९ । लोहं ॥ लोहांगिनी १, हंसी २, रेखा ३, तालंकिनी ४, कंपिनी ५, गंभीरा ६, काली ७, कलरुद्राणी ८, उक्कच्छाया अष्ट नामानि ॥ ८९ ॥ (G).

---

८९ । १ Dropt in (D). २ हंसिणिआ (A, B & C), हंसीणिआ (D). ३ तालंकी (D). ४ कलरुद्दाणि (A), कालरुद्दणी (C), कालरुद्राणी (D). ५ उकच्छा (A), उकच्चा (F). ६ अट्ठ (B & C). ७ णामाइं (A & D), णामाइ (B, C & E). ८ ८६ (A), ८९ (E & F).

लोहंगिणि[1] सव्वलहू[2] जत्थ[3] गुरू[4] एक[5] सा हंसी ।
जं[6]जं वड्ढइ[7] हारो णामं जो[8] जत्थ[3] सो तत्थ[9] ॥ ९०[10] ॥
[गाहू ।] [इति] उक्कच्छा । (A, B & C).

९० । आसां स्वरूपमाह । लोहाङ्गी सर्व्वलघुर्यत्र गुरवश्चत्वारो भवन्ति सा हंसी । यो यो हारो वर्द्धते नाम यत्र तत्र ॥ हारो गुरुः, चत्वार इति चतुर्गुरुपर्य्यन्ता हंसी । ततश्च गुरुर्वर्द्धते तत्तन्नाम भवति । चतुर्गुरुः हंसीति कथनात् गुरुचतुष्कक्रमाद् वृद्धिर्बोद्धव्या, तेनाष्टावधिगुरू रेखा भवति । एवं ततो द्वादशावधिगुरुस्ताड़ङ्की ततः षोड़शावधिगुरुः कम्पिनी, एवं क्रमेणाष्टाविंशतिगुरुपर्य्यन्ता कालरुद्राणी । ननु इति ऊह्यं, अत्र द्वात्रिंशद्गुरुत्वमपि सम्भाव्यते, यतोऽत्र एकादशकलः पादः, उच्यते इत्यूह्यं, षट्सु पादेषु लघवः षड़ावश्यकाः, षट्षष्टिकलाया उत्कच्छाया लघुशेषे रुद्रशक्तयः सम्भवंति । अत्र च नामान्तरकथनात् सापि कालरुद्राण्येवेति सम्प्रदायः । परे च हंस्यनन्तरमेव एकगुरुवृद्ध्या रेखादयः, तेन दशगुरुः कालरुद्राणीति इतो वृद्धिर्नास्तीति वदन्ति । (C).

९० । अथ प्रस्तारक्रममाह लोहंगिणीति । सव्वलहु — सर्वलघुः सर्वे षट्पादस्थाः षट्षष्ट्यपि वर्णा लघवो यस्यां सा इत्यर्थः,

९० । १ होइ follows णि (F). २ सव्वलहु (B, C & D), सव्वलघू (F). ३ जत्र (A), जत्थ्य (B, C & F). ४ गुरु (B, C, D, E & F). ५ चारि होइ (B, C, D & F), एक्क होइ (E). ६ जहे (E). ७ वड्ढइ (B), वड्ढइ (C). ८ जोश्च (F). ९ तत्र (A). १० ८७ (A), ९० (E & F).

लोहांगिनी भवतीति शेषः, जत्थ — यत्र, एक्क — एकः, गुरु — गुरुः, होइ — भवति सा हंसी । एवं यथा यथा वर्द्धते हारः गुरुः, तथा तथा यत्र यत् नाम, तत्र तत् नाम ज्ञेयमित्यर्थः । अयं भावः — यत्र षट्षष्टिर्लघवः सा लोहांगिनी, यत्रैको गुरुश्चतुःषष्टिर्लघवः सा हंसी, यत्र द्वौ गुरू द्विषष्टिर्लघवः सा रेखा, एवं पूर्वभेदापेक्षया यथा उत्तरत्र भेदे एको गुरुर्वर्द्धते, लघुद्वयं च य[अ]वहीयते, तथा भेदा बोध्याः, ते च लिखिला प्रदर्श्यंते । [Here a blank space has not been filled in.—Ed.]

अत्र यद्यपि नवमाद्योऽप्यन्ये त्रयोविंशतिर्भेदाः संभवंति बाधकाभावात्तथापि ते ग्रंथकृता नोक्ताः, वस्तुतस्तु तेऽपि सुधीभिरूहनीयाः । तत्र च त्रिंशद्गुरवः षट् लघवो यत्र भवंति सोऽंतिमो भेदः, प्रतिच[रण]मेकादशमात्राणामुक्तत्वादेकादशतम एको लघुरवश्यं प्रतिचरणमंतेऽपेक्षित इति बोध्यम् । अत्र क्वचित् जत्थ गुरु चारि होइ सा हंसीति पाठश्च — यत्र गुरुचतुष्टयं भवति सा हंसी, एकगुरुमारभ्य यावत् गुरुचतुष्टयं वर्द्धते तावत्पर्यंतं भेदचतुष्टयं हंसीसंज्ञकमित्यर्थः । अत्रायमाशयः । यत्र चरणषट्के षट्षष्टिर्लघवः पतंति सा लोहांगिनी, यत्रैको गुरुश्चतुःषष्टिर्लघवः [Here apparently something has been omitted.] यत्र च षड्गुरवश्चतुःपंचाशल्लघवः यत्र सप्त गुरवः द्विपंचाशल्लघवः [Here something has been left out] एते चत्वारो भेदा रेखासंज्ञकाः २ । यत्र च नव गुरवः अष्टचत्वारिंशल्लघवः, यत्र दश गुरवः षट्चत्वारिंशल्लघवः, यत्रैकादश गुरवः चतुश्चत्वारिंशल्लघवः, यत्र च द्वादश गुरवः द्विचत्वा-

रिंशल्लघवः, एषां च चतुर्णां ताडंकिनी संज्ञा ३। यत्र त्रयोदश गुरवः चत्वारिंशल्लघवः, यत्र च चतुर्दश गुरवः अष्टत्रिंशल्लघवः, यत्र च पंचदश गुरवः षट्त्रिंशल्लघवः, यत्र च षोड़श गुरवः चतुस्त्रिंशल्लघवः, एषां चतुर्णां कंपिनी संज्ञा ४। यत्र सप्तदश गुरवः द्वात्रिंशल्लघवः, यत्र चाष्टादश गुरवस्त्रिंशल्लघवः, यत्रैकोनविंशतिर्गुरवः अष्टाविंशतिर्लघवः, यत्र विंशतिर्गुरवः षड्विंशतिर्गुरवः[र्लघवः], एषां चतुर्णां गंभीरा संज्ञा ५। यत्रैकविंशतिर्गुरवः चतुर्विंशतिर्लघवः, यत्र द्वाविंशतिर्गुरवो लघवश्च, यत्र त्रयोविंशतिर्गुरवः विंशतिर्लघवः, यत्र च चतुर्विंशतिर्गुरवः अष्टादश लघवः, एषां चतुर्णां काली संज्ञा ६। यत्र पंचविंशतिर्गुरवः षोड़श लघवः, यत्र षड्विंशतिर्गुरवः चतुर्द्दश लघवः, यत्र सप्तविंशतिर्गुरवः द्वादश लघवः, यत्र षड्विं[अष्टाविं]शतिर्गुरवः दश लघवः, एषां चतुर्णां कालरुद्राणी संज्ञा। अत्रैकगुरुवृद्धिमारभ्यागुरुचतुष्टयवृद्धि प्रथमभेदकरणादुत्तरोत्तरभेदानामपि तथैव विधानमुचितमित्यष्टौ भेदा बोध्याः। अत्रैकोनत्रिंशद्गुर्वष्टलघुयुक्तः त्रिंशद्गुरुषड्लघुयुक्तश्चैतद्भेदद्वयम् अन्यदपि संभवति बाधकाभावात्, ग्रन्थकृता तन्नोक्तं, वस्तुतस्तु तदपि बोध्यम्। अथवा एतदपि भेदद्वयं कालरुद्राणीमध्ये पातनीयम्, एवं च कालरुद्राण्याः षड्भेदा बोध्याः। अथवा यत्र चत्वारो गुरवः अष्टपंचाशल्लघवः सा हंसी, यत्राष्टौ गुरवः पंचाशल्लघवः सा रेखा, यत्र द्वादश गुरवः द्विचत्वारिंशल्लघवः सा ताड़ंकिनी, यत्र षोड़श गुरवः ऊदश [चतुस्त्रिंशत्] लघवः सा कालरुद्राणी, अत्र प्रथमं गुरुचतुष्टयवर्द्धनादुत्तरत्रापि तथैव [व]र्द्धनमुचितमिति

अथ रोला । (D & F).

पढम होइ[1] चउ[2]बीस[3]मत्त गुरु अंतर[4] जुत्ते
पिंगल होंति[5] सेस णाअ[6] तग्गिह[7] रोला उत्ते[8] ।
एग्गाराहा[9] हारा[10] रोलाछंदो[11] जुज्झइ[12]
एक्के एक्के[13] टुट्टइ[14] अणो अणो बड्डइ[15] ॥ ९१[16] ॥

लोहांगिनीसहिता अष्टौ भेदा बोध्या इत्यस्पष्टातचरणोपदिष्टः पंथा निर्मत्सरैः सुधीभिर्विभावनीयः । (E).

९० । यत्र षट्षष्टिमात्राः सर्वलघुरूपा भवंति चेत्तदा लोहांगिनी । यत्र चत्वारो गुरवोऽष्टपंचाशल्लघवस्तदा हंसी । एवं रेखादीन्यपि नामानि भवन्तीत्यर्थः । केचित्तु अस्य षट्षष्टिकलाचरणांते चैकैकलघोरावश्यकत्वादवशिष्टानां षष्टिलघूनां मध्ये एकैकगुरुवृद्ध्या लघुद्वयह्रासे त्रिंशद्भेदा भवंतीति तन्नामानि सामान्येनाष्टावुक्तानीत्याहुः ॥ (G).

९१ । रोलाच्छन्दमा[आ]ह ॥ प्रथमे भवन्ति चतुर्विंशतिर्मात्राः गुरवः अन्तरा युक्ताः । पिङ्गलोऽभूत् शेषनागस्तेन रोला उक्ता ।

---

९१ । १ होहिं (E). २ चओ (B), चो (F), ३ बीसे (C). ४ अंतरा (C). ५ होंते (A), होन्ते (D), होंते (E), होवे (F). ६ णाम (D), नाम (E). ७ तग्घि (B & C), ते यन्ह (D), तेन्ह (E), तह (F). ८ वुत्ते (A, B, C & D). ९ एग्गार (B), एग्गारहा (F). १० हारो (B), हा (C). ११ छन्दो (C), छंदाहि (F), १२ बुचइ (A), बुज्झइ (B & C). १३ एक्कैं एक्कैं (D). १४ टुट्टे (B & C), टुटइ (D). १५ वड्डइ (A, B & C). १६ ८८ (A), ९१ (E), ९० (F).

एकादश हारा रोलाच्छन्दसि उच्यन्ते, एक एकस्त्रुटति अन्यदन्यन्नामोत्तिष्ठति॥ प्रथमे प्रथमपादे, एवं पादत्रयेऽपि बोध्यम्। अन्तरान्तरा गुरुयोगः कार्य्यः, तत्र स्थाननियमाभावाद् यथेच्छं हारो गुरवः, एकैकपादे एकादश, तत्रैकैकगुरुस्थाने लघुद्वयवशाद्वादश नामानि भवन्ति॥ (C).

९१। अथ रोलावृत्तं लक्षयति पढम इति। यत्र पढम—प्रथमे चरणे, इदं च द्वितीयादीनामप्युपलक्षकं, गुरु अंतर जुत्ते—अंतरा गुरुयुक्ता मध्ये गुरुसंयुक्ता इत्यर्थः, चउवीस मत्त—चतुर्विंशतिर्मात्राः, होहिं—भवंति, सेस नाग—शेषनागः, पिंगल होंते—पिंगलोऽभूत्, तेन्ह रोला उत्ते—तेन रोला उक्ता, एग्गाराहा हारा—एकादश हारा गुरवः द्विलघुयुक्ता इति शेषः, त्रयोदशाक्षरगणम[स्या]ग्रे वक्ष्यमाणत्वात्, रोला छंदो—रोलाच्छंदसि प्रतिचरणमित्यर्थः, जुज्जइ—युक्ता भवतीत्यर्थः, एक्के एक्के—एकैकः गुरुरिति शेषः, टुट्टइ—त्रुटति ह्रसतीत्यर्थः, अरणो अरणो—अन्यः अन्यः लघुरित्यर्थः, बड्ढइ—वर्द्धते, तथाचात्र प्रतिचरणमेकादश गुरवो लघुद्वययुक्ताः पतंति, तत्र चैकैकगुरुह्रासेन लघुद्वयवृद्ध्या द्वादशभेदा भवंतीत्यर्थः। एतल्लक्षणनिष्कर्षः। यथैतस्योदाहरणे संगतिस्तथानुपदमेव विवेचयिष्यामः। (E).

९१। अथ रोला॥ पढेति॥ प्रथमं भवंति चतुर्विंशतिर्मात्राः गुरुणा अंतरा युक्ताः। पिंगल-भवता शेषेण नागेन तत्र रोलायामुक्ताः॥ एकादश हारा रोलाच्छंदसि युज्यंते, एक एकस्त्रुटति अन्योऽन्यो वर्धते॥ अत्रैकादश गुरवो लघुमिश्राः कार्याः, ते च

जहा,

पअभरु[1] दर[2]मरु[3] धरणि[4] तरणि रह[5] धुल्लिअ[6] झंपिअ
कमठ पिट्ठ[7] टरपरिअ[8] मेरु मंदर सिर[9] कंपिअ[10]।
कोह[11] चलिअ[12] हमीर[13] बीर गअजूह[14] संजुत्ते[15]
किअउ कट्ठ[16] हाकंद[17] मुच्छि[18] मेच्छहके[19] पुत्ते॥ ९२[20]॥
[रोला]

गुरवः प्रत्येकचरणे कार्या इति संपूर्णे छंदसि वेति मतद्वयमपि संमतम्। गुरुलघुह्रासवृद्धौ वक्ष्यमाणानि नामानि भवंतीत्यर्थः॥ ९०॥ (G).

९२। उदाहरति। पदभरेण दलमलिता धरणी तरणिरथो धूलिभिराच्छाद्यते, कमठपृष्ठं चलितं, मेरुमन्दरशिरः कम्पते। कोपेन चलितो वीरहम्मीरः गजरथसंयुक्तः, कष्टेन कृत आक्रन्दो-मूर्च्छिता म्लेच्छकुपुत्रेण॥ (C).

९२। रोलामुदाहरति पअभरेति। यदा गअजूह संजुत्ते—गजयूथसंयुक्तः हंमीरवीरः, कोहे चलिअ—क्रोधेन चलितः, तदा

९१। १ पअभर (B, C, D & E). २ दव (A), मर (F). ३ मर (C), मरि (E), दउ (F). ४ धरणी (B). ५ रथ (B & C). ६ धूलिहि (A), धुलिहिँ (B & C), धलिअ (F). ७ पीट्ठ (A), पिट्ठि (B, C & D). ८ दरमलिअ (A). ९ मंद सिर (C). १० कम्पीअ (E). ११ कोहे (B & C), कोहिँ (D), कोहेँ (F). १२ चलइ (B), चलिह (C). १३ हम्मीर (A, D & F), वीर हम्मीर (B & C). १४ गअरह (C), गअजूअ (F). १५ सँजुत्ते (A), सुजुत्तें (D), सुजुत्ते (F). १६ कट्ठे किअउ (B & C), कट्ठ (D), किएउ कट्ठ (E). १७ आकन्दे (B). १८ मुच्छि (A), मुछिं (D). १९ मेच्छका (B), मेच्छहका (C), मेछिअके (D), मेच्छके (E & F). २० ८९ (A), ९१ (E), ९१ (F).

कुंद करअल[1] मेह[2] तालंक, कररुद्द[3] कोइल[4] कमलु[5],
इंदु संभु[6] चामरु[7] गणेसरु[8], सहसक्खो[9] सेस भण[10],
णाअ राअ[11] जंपइ[12] फणीसरु[13] ।
तेरह अक्खर जं पलइ इग्गारह[14] वंकेहिँ[15] ।
अक्खर[16] अक्खर[17] जं चलइ[18] तं तं णाम कुणेहि[19] ॥
९३[20] ॥ रड्डा । [इति] रोला । (A).

धरणि — धरणिः, पअभर दरमरि — पादभरेण दलिता वेगधावद्धस्तिहयपत्तिप्रभृतिसेनासमूहचरणघातेन दलितेत्यर्थः, तरणि रह धुल्लिहि झंपिअ — तरणिरथः धूलिभिः प्रयाणोत्थरेणुभिश्छादितः, कमठपिट्ठ टरपरिअ — क[म]ठपृष्ठमधस्तात् गतं, मेरु मंदर सिर कंपीअ — मेरुमंदरशिरः कंपितं, मेच्छके पुत्ते — म्लेच्छानामपि पुत्रैः, कट्ठ — कष्टं यथा स्यात्तथा, हाकंद — हाक्रंदः, किएउ — कृतः, मुच्छि — मूर्च्छितं च । अत्र किएउ इत्येकारः एओ सुद्धा वि — इत्युक्तत्वाल्लघुर्बोध्यः, अन्यथा पंचविंशतिमात्रापत्तिः ॥ (E).
[Vide श्लोक ५, p. 7.—Ed.]

९३ । १ कलअल (B). २ मेघ (E). ३ कलिरुद्द (F). ४ किल (A), कोइल (B). ५ कमल (E). ६ चंदु (A, B & C), इंदु omitted and हार added after चामरु in (C). ७ चारुम (D), चामर (E). ८ गणेसर (B). ९ सहसक्ख (A, D & E), सहसक्खी (B), सहसक्ख (C). १० भणु (D), भणिअ (E). ११ राज (D). १२ जम्पइ (B). १३ फणेसरु (A). १४ एआरह (A), एग्गारह (D & E), अगा and thereafter dropt up to चलइ in (F). १५ गुरु देइ (A), गुर देउ (D), जेहि (E). १६ अक्खरे (B & C). १७ अक्खरे and thereafter dropt up to चलइ in (B). १८ पलइ (D). १९ मुणेह (A), मुणेऊ (D), विआणेऊ (F). २० ९० (A), ९२ (F).

९२ । यथा ॥ पद्म ॥ पदभरेण मर्द्दिता धरणी तरणिरथो- धूल्या आच्छादितः । कमठपृष्ठमधः पतितं मेरुमंदरयोः शिरः कंपितम् ॥ कोपेन चलिते हम्मीरवीरे गजयूथसंयुक्ते । कृतः कष्ट-आक्रंदः मूर्छितं मे[ले]च्छानां पुत्रैः ॥ ९१ ॥ (G).

९३ । नामान्याह । कुन्दकरतलमेघताटङ्ककालरुद्रकोकिल-कमलानि, चन्द्रचामरहारगणेश्वरान् सहस्राक्षं शेषं भण, नागराजो जल्पति फणीश्वरः ॥ त्रयोदशाक्षराणि यत्र पतन्ति एकादशवक्रैः गुरुभिः । एतेन एकादश गुरवो, लघु[द्वयम्] । अक्षरे अक्षरे चलति यदि तत्तन्नाम कुरु ॥ (C).

९३ । अथैतद्भेदानयनप्रकारं तेषां च नामानि रड्डावृत्तेनाह, कुंद करअलेति । जेहि — येषु, एग्गारह गुरु — एकादश गुरवः, एवंभूतानि, तेरह अक्खव[र] — त्रयोदशाक्षराणि, जं — यत्र, पलइ — पतंति, त्रयोदशाक्षरमध्ये एकादश चेत् गुरवस्तदोर्वरित-मक्षरद्वयं तल्लघुरूपमित्यर्थाच्चिद्धं, तथाच द्विलघुयुक्ता एकादशगुरवः एवं प्रतिचरणं यत्र त्रयोदशाक्षराणि पतंतीत्यर्थः, तेषु यदि अक्खर अक्खर — अक्षरमक्षरमेकैको गुरुरित्यर्थः, जं चलइ — यत्र चलति ह्रसतीत्यर्थः, तदा कुंदं १, करतलं २, मेघः ३, ताढंकः ४, काल-रुद्रः ५, कोकिलः ६, कमलं ७, इंदुः ८, शम्भुः ९, चामरं १०, गणे-श्वरः ११, सहस्राक्षः १२, इति, तं तं — तत्तत् नाम, कुणेहि — कुरु इति नागराजः फणीश्वरः शेषः पिंगलः, जंपइ — जल्पति इति, भणिअ — भणितं पूर्वाचार्यैरिति शेषः । इदमत्र तत्त्वम्, — रोलायां चतुर्विंशतिर्मात्राः प्रतिचरणं देया इत्यावश्यकं, तत्र प्रकारद्वयेन

संभवति, लघुद्वययुक्तैकादशगुरुदानेन, यथेच्छं गुरुलघुदानेन वा। एवं च पूर्वं लक्षणद्वयं कृतमिति बोध्यं, तथाहि पढमेति पूर्वार्द्धेनैकं, एग्गाराहा हारा इत्युत्तरार्द्धेन च द्वितीयं। तत्र यदि यथाकथंचिच्चतुर्विंशतिर्मात्रा अंतरा अंतरा गुरुयुक्ताः क्रियंते, तदा रोलावृत्तं भवतीति प्रथमलक्षणार्थः। यदि च लघुद्वययुक्तैकादशगुरुभिश्चतुर्विंशतिर्मात्राः क्रियंते, तदापि रोलावृत्तं भवतीति द्वितीयलक्षणार्थः। तत्र पअभ इत्युदाहरणं प्रथमलक्षणाभिप्रायेण, भेदानयनप्रकारश्च द्वितीयलक्षणाभिप्रायेण प्रदर्शितमित्यवधेयम्।

एवं च यत्रैकादश गुरवः अंते च द्वौ लघू, एवं त्रयोदशाक्षराणि चतुर्विंशतिर्मात्राश्च प्रतिचरणं पतंति सः कुंदः, यत्र दश गुरवः एवं चतुर्दशाक्षराणि चतुर्विंशतिर्मात्राश्च प्रतिचरणं पतंति सः करतलम्, एवं पूर्वभेदापेक्षया उत्तरत्र भेदे एकगुरुन्यूनक्रियया लघुद्वयमेकमक्षरं च वर्द्धते तदा ते ते भेदा ज्ञेयाः, ते लिखिला प्रदर्श्यंते। [There is a blank space here]. यद्वा पूर्वोक्तमेकमेव लक्षणं, तत्र च कथमंतरांतरा गुरुयोगः कर्त्तव्यइत्यपेक्षायामाह एग्गाराहा हारेति, तथा च द्विलघुयुक्तैकादशगुरुषु एकैकगुरुह्रासेन लघुद्वयवृद्ध्या अंतरांतरा गुरुयोगश्च कर्त्तव्य इति भावः। न चैवं सत्युदाहरणासंगतिरिति वाच्यमव्यवहितपूर्वोक्ते रसिकानामके वृत्ते इवात्रापि भेदकरणात्। [Vide श्लोक ६०, p. 153.—Ed.]

तथाहि यत्र चरणचतुष्टयपिंडीभूतास्चतुश्चत्वारिंशद्गुरवः अष्टौ लघवः, यत्र च त्रयश्चत्वारिंशद्गुरवो [दश लघवः, यत्र च द्विचत्वारिंशद्गुरवो] द्वादश लघवः, यत्र च एकचत्वारिंशद्गुरवश्चतुर्दश

लघवः, एषां चतुर्णां कुंदसंज्ञा । एवं चत्वारिंशद्गुरुषोडशलघुक-मारभ्य सप्तत्रिंशद्गुरुद्वाविंशतिलघुकपर्यंतं चतुर्णां करतलसंज्ञा २ । एवं षट्त्रिंशद्गुरुचतुर्विंशतिलघुकमारभ्य त्रयस्त्रिंशद्गुरुत्रिंशल्लघुक-पर्यंतं चतुर्णां मेघसंज्ञा ३ । एवं द्वात्रिंशद्गुरुद्वात्रिंशल्लघुकमारभ्य एकोनत्रिंशद्गुरु-अष्टत्रिंशल्लघुकपर्यंतं चतुर्णां ताढंकसंज्ञा ४ । एव-मष्टाविंशतिगुरुचत्वारिंशल्लघुकमारभ्य पंचविंशतिगुरुषट्चत्वारिंश-ल्लघुकपर्यंतं चतुर्णां कालरुद्रसंज्ञा ५ । एवं चतुर्विंशतिगुरु-अष्ट-चत्वारिंशल्लघुकमारभ्य एकविंशतिगुरुचतुःपंचाशल्लघुकपर्यंतं चतुर्णां कोकिलसंज्ञा ६ । एवं विंशतिगुरुषट्पंचाशल्लघुकमारभ्य सप्तदश-गुरुद्विषष्टिलघुकपर्यंतं चतुर्णां कमलसंज्ञा ७ । एवं षोडशगुरु-चतुःषष्टिलघुकमारभ्य त्रयोदशगुरुसप्ततिलघुकपर्यंतं चतुर्णां इंदु-संज्ञा ८ । एवं द्वादशगुरुद्विसप्ततिलघुकमारभ्य नवगुरु-अष्टसप्तति-लघुकपर्यंतं चतुर्णां शम्भुसंज्ञा ९ । एवमष्टगुरु-अशीतिलघुकमारभ्य पंचगुरुषडशीतिलघुकपर्यंतं चतुर्णां चामरसंज्ञा १० । एवं चतुर्गुरु-अष्टाशीतिलघुकमारभ्य एकगुरुचतुर्णवतिलघुकपर्यंतं चतुर्णां गणे-श्वरसंज्ञा ११ । एवं सर्वलघुः सहस्राक्षः १२ । इत्थं च भेदानयन-प्रकारः ।

जेहि — येषु एग्गारहगुरु — एकादशगुरुकः द्वौ लघू, एवं-भूतानि जं — यत्र तेरह अक्खर — त्रयोदशाक्षराणि पलइ — पतंति, इत्थं यत्र चरणचतुष्टये द्विपंचाशदक्षराणि स्थापयित्वेति शेषः, अक्षरमक्षरं एकैको गुरुः यावद्गुरुचतुष्टयं ह्रसति तदा कुंदादि तत्तन्नाम कुरु इति व्याख्येयम् । एवं द्वा[एक]विंशतिगुरुयुक्तं

पञ्चभरेत्युदाहरणं [Vide श्लोक ८२, p. १५७। —Ed.] कोकिलाख्य-षष्ठभेदाभिप्रायमिति सर्वं सुस्थमित्यस्मत्तातचरणोपदिष्टः पंथाः सुधीभिर्विभावनीयः ।

कश्चित्तु [* * *] चयोदशगुरु १ ल [?] कालरुद्रः, यत्राष्टौ गुरवोऽशीतिर्लघवः स कोकिलः, यत्र सप्त गुरवो द्व्यशीतिर्लघव-स्तत्कमलं, यत्र षड्गुरवश्चतुरशीतिर्लघवः स इंदुः, यत्र पंच गुरवः षडशीतिर्लघवस्तच्चामरं, [* * *] यत्र चयो गुरवो नवतिर्लघवः स गणेश्वरः, यत्र गुरुद्वयं [द्वि]नवतिर्लघवः स सहस्राक्षः, यत्रैको-गुरुश्चतुर्णवतिर्लघवः स शेषनामा चयोदशतमो भेदः, इत्थं शेषइति नामवाचकमेव मत्वा चयोदशभेदानाह । तदनवधानात् इत्थं भेदानयनस्य ग्रंथादनुपलब्धेः, यतः प्रतिचरणं लघुद्वययुक्तैकादश-गुरुषु चरणचतुष्टयसमुदितचतुश्चत्वारिंशद्गुरुषु वा एकैकगुरुह्रासेन लघुद्वयवृद्ध्या भेदानयनं ग्रंथस्वारस्येन प्रतिपत्तेः, न तु चयोदश-गुरुषु स्वेच्छया। इत्थं यथाकथंचित् षण्णवतिमात्रामवलंव्य भेदकरणे विंशतिर्गुरवः षट्पंचाशल्लघवस्तेषु एकैकगुरुह्रासेन विंशतिर्भेदा-श्रायांति । एवं त्रिंशद्गुरवः[रुषु] षट्त्रिंशद्गुरुषु वा एकैकगुरुह्रासेन लघुद्वयवृद्ध्या भेदानयनं ग्रंथस्वारस्येन प्रतिपत्तेः न तु चयोदश-गुरुत्रिंशद्भेदा [?] भवंति । एवं यथाकथंचित्तावन्मात्रामात्रपूर-कतावत्तावद्गुरुलघ्वापादनेन यथारुचि तावत्तावद्भेदापत्तेर्दुर्वारत्वात्, त्वदुक्तरीत्या चतुर्दशतमभेदापत्तिरपि दुर्वारा, तर्ह्येको गुरुराव-श्यको येन गुरुराहित्येन गाथायामिवाचाप्यनिष्टमापद्येत उदा-हरणासंगतिश्च स्पष्टैवेति विभावनीयं वक्ष्यमाणकाव्यच्छन्दसश्चास्याय-

अथ गंधाना । (D).

इहसत्त बस पढमपत्र भणइ[1] सुत्रणा
तह बीत्रम्मि[2] अट्ठारहहिँ[3] जमत्र[4] जुत्र चरणा ।
एरिसित्र[5] बीत्र[6] दल कुणहु[7] भणइ पिंगलो[8]
गंधाणा[9] णाम रूत्रउ[10] हो[11] पंडित्र जण[12] चित्तहलो[13] ॥
९४[14] ॥ [गंधाण]

मेव भेदः यत्काव्ये लघुद्वयं जगणाद्यंतर्गतं मध्ये पतति, अत्र तु यथेच्छमिति । (E).

९३ । रोलानामान्याह ॥ कुंदेति ॥ कुंदं १, करतलं २, मेघः ३, तालंकः ४, कलिरुद्रः ५, कोकिलः ६, कमलं ७, इंदुः ८, शंभुः ९, चामरं १०, गणेश्वरः ११, सहस्राक्षः शेषो भण नागराजो जल्पति फणीश्वरः ॥ त्रयोदशाक्षराणि यत्र पतंति अग्रे तत्तन्नाम विजानीहि ॥ अत्र द्विलघुमारभ्य चतुर्विंशतिलघुपर्यंतं द्वादश कुंदादीनि नामानि भवंतीति केचित् ॥ सहस्राक्षः सहस्रभुज इति शेषं विशिष्य एकादशनामानीति इतरे । रोलेति सर्वगुरोर्नामेति केचित् ॥ (G).

---

९४ । १ सुणह (A), भणश्च (C), कुणउ (F). २ विश्रस्मि (D), बीश्रंमि (E). ३ श्रठारहिँ (A), श्रठारहइ (E), उट्ठारहहि (F). ४ जमजुश्च (B). ५ एरिस (A), एरिसश्च (B), एरीसश्च (C), एरिसं (F). ६ विश्च (A). ७ कुणह (A & B), कुण (C). ८ पिंगल (A). ९ गंधाण (B & E), गंधा (C). १० रूश्रश्रणु (A), रूश्रश्रो (B & C), रूश्र (E). ११ होइ (A & E). १२ जणं (E). १३ चित्तहरणा (A), चित्तहरो (B & C), चित्तंहलो (D). १४ ९१ (A), ९४ (E), ९२ (F).

दह सत्तक्खर[१] संठवहु पढमचरण गंधाण ।
बीअक्खर[२] पुणु[३] जमअ दइ[४] अट्टारहइ[५] बिआण ॥ ९५[६] ॥
दोहा ।

---

९४ । दशसप्तवर्णान् प्रथमपादे भणत संस्थापयत हे सुजनाः, तथा द्वितीयेऽष्टादशवर्णाः, यमकयुताश्चरणाः । चरणः पादः । एतादृशञ्च द्वितीयार्द्धं कुरुत —— भणति पिङ्गलो गन्धनाम रूपकं छन्दः भवति पण्डितचित्तहरम् ॥ (C).

९४ । अथ गंधाननामकं वृत्तं लक्षयति दहसत्त वण्णेति । हे सुअणा — सुजनाः पढमपअ — प्रथमपादे दहसत्त — सप्तदश वण्ण — वर्णान् भणह — भणत, तह — तथा, बीअंमि — द्वितीयेऽपि, जमअजुअचरणा — यमकयुते चरणे, अठारहइ — अष्टादशैव वर्णान्, भणतेति पूर्वेणान्वयः । एरिसिअ बीअ दल कुणऊ — एतादृशमेव बीअ दल — द्वितीयं दलम् उत्तरार्द्धमिति यावत् कुणऊ — कुरुत, तृतीयचरणं सप्तदशवर्णयुक्तं चतुर्थं चाष्टादशवर्णयुक्तमिति यावत् । इअ — इदं, पंडिअजण चित्तहरो — पंडितजनचित्तहरं, गंधाण णाम — गंधाननामकं वृत्तं होइ — भवति इति पिंगलो — पिंगलः भणइ — भणति ॥ ९४ ॥ (E).

९४ । अथ गंधाण ॥ दहेति ॥ दशसप्तवर्णाः प्रथमे पदे कुरुत

---

९५ । १ सत्त अक्खर (C). २ बीअ अक्खर (A), बीए (B), बिअ अक्खर (E), बीए पुण (F). ३ पुण (E & F). ४ देइ (A & E), जमअं ददूअ (F). ५ अट्ठारहउ (B & C), अट्ठारहहि (F). ६ ९१ (A), ९५ (E), ९४ (F).

जहा, कम्म चलंते कुम्म चलइ पुणवि[1] असरणा
कुम्म चलंते महि[2] चलइ भुअण[3] भअ करणा ।
महिअ चलंते महिहरु तह[4] असुर[5]अणा
चक्कवइ[6] चलंते चलइ चक्क[7]तह[8] तिहुअणा ॥ ९६[9] ॥
गंधाण[10] । (A).

सुजनाः । तथा द्वितीयेऽष्टादश एवं यमकयुगचरणाः ॥ पु[न-]स्तादृशं द्वितीयदलं कुरुत भणति पिंगलः । गंधाननाम रूपकं भवति पंडितजनचित्तहरम् ॥ ९३ ॥ (G).

९५ । दशसप्ताक्षराणि संस्थापय प्रथमचरणे गन्ध[न्धा]नायाः । द्वितीयेऽष्टादशाक्षराणि पुनर्यमकं देहि विजानीहि ॥ (C).

९५ । अथ गंधानकमेव दोहावृत्तेन स्पष्टयति दहसत्तक्खरेति । पढमचरण — प्रथमचरणे, गंधाण — गंधानस्य, दहसत्तक्खर — सप्तदशाक्षराणि संठवऊ — संस्थापयत, विअ — द्वितीये चरणे, अक्खर — अक्षराणि पुनः, अट्ठारहइ — अष्टादशैव, जमअ देइ — यमकं दत्त्वा, विआण — विजानीहि ।

अत्र च वर्णनियम एव न तु मात्रानियम इति बोध्यम् । ९५ । (E).

[It would have been better placed in the 2nd part among (वर्णवृत्ते) Varṇavṛittas.—Ed.]

---

९६ । १ पुहवि (D). २ मही (F). ३ भुअ भअ (A). ४ चलइ तहा (A), त तेहिं (E). ५ सुर (E). ६ चक्कवई (D). ७ चक्कु (A). ८ जह (B & C), जेऊं (E). ९ ९३ (A), ९६ (E & F). १० गंधाणा (B & C).

९५। दोहया पुनस्तदेवाह॥ दहेति॥ सप्तदशाक्षराणि स्थापय प्रथमे चरणे गंधानस्य। द्वितीये पुनर्यमकं दत्त्वा अष्टादश अक्षराणि विजानीत॥ ९४॥ (G).

९६। उदाहरति। यथा राजविशेषे कर्णे चलति कूर्म्मस्खलति, पुनरपि अशरणे कूर्म्मे चलति सति मही चलति भुवनभयकरी। मह्यां चलन्त्यां महीधरास्खलन्ति, सुरगणास्खलन्ति, चक्रवर्त्तिचलने चलति चक्रवद्यावत्त्रिभुवनम्॥ (C).

९६। अथ गंधानमुदाहरति कस्म चलंते इति। चक्कवइ—चक्रवर्त्तिनि कस्म—कर्णे चलंते—चलति सति, कुम्म चलइ—कूर्मस्खलति, कुम्म चलंते—कूर्मे चलति सति, असरणा—अशरणा कूर्मचलनादधिष्ठानरहितेति भावः, भुअण भअ करणा—भुवनभयकर्त्री पुणवि—पुनरपि महि चलइ—मही चलति, महिअ चलंते—मह्यां चलंत्यां, [महिहरु]—महीधरः मेरुः चलतीति पूर्वेणान्वयः। सामान्यवचनमपि महीधरपदं विशेषपरं बोध्यम्। तेहि—तस्मिन् महीधरे चलति सति, सुरअणा—सुरगणस्खलति, मेर्वधिष्ठानत्वात् सुरगणस्येति भावः, एवं जेक्क चक्क—यथा चक्रं तथा तिहुअणा—त्रिभुवनं चलति। अत्र जेक्क इति एकारो लघुर्वाच्यः [?]॥ ९६॥ (E).

९६। यथा॥ कश्चित्कर्णं स्तौति॥ कर्णे चलिते कूर्मस्खलति पुनरपि अशरणः, कूर्मे चलति मही चलति भुवनभयकारिणी। मह्यां चलंत्यां महीधरास्तथा असुरगणाः, चक्रवर्तिनि चलिते चलति चक्रं तथा त्रिभुवनम्॥ ९६॥ (G).

अथ चौ[चउ]पइआ ।

चउपइआ छंदा भणइ फणिंदा
चउमत्ता गण[1] सत्ता,
पाएहि[2] सगुरु[3] करि[4] तीस मत्त धरि
चउ सअ असिअ णिरुत्ता ।
चउ छंद लविज्जइ[5] एक्कु[6] ण किज्जइ
को जाणइ एहु[7] भेउ[8],
कइ[9] पिंगल भासइ छंद पआसइ
मिअणअणि अमिअ[10] एहू[11] ॥ ९७[12] ॥

९७। चतुष्पदं छन्दः भणति फणीन्द्रः चतुर्मात्रिकाः सप्तगणाः भवन्ति पादे पादे सगुरुं कृत्वा एवं त्रिंशन्मात्रा धार्य्यन्ते। चतुश्चरणसंख्यामाह, चत्वारिंशता [चतुःशतं] अशीतिर्निरुक्ता, एतच्छन्दश्छन्दश्चतुष्टयेन लभ्यते, एकेन पादेन क्रियते, को जानाति इमं भेदं, कविः पिङ्गलो भाषते, हे मृगनयने अमृतमेतत् ॥ (C).

९७। अथ चतुःपादिकां लक्षयति चउपइआ इति। पाएहि—पादे एकैकचरणे इत्यर्थः, चउमत्ता—चतुर्मात्रिकान्, [गण सत्ता]—गणान् सप्त, सगुरु करि—सगुरून् कृत्वा, गुरुयुक्तान्

९७। १ गणा (E). २ पाए (A, B & C). ३ सगुरू (F). ४ कए (D). ५ लेकिज्जइ (E). ६ एक्क (B & C). ७ एह (A), एउ (F), ए should be read as short, vide श्लोकः ५, p. 7—Ed. ८ भेउ (B, D & F), भेञ (E). ९ कहि (B). १० अवि (A). ११ एड (B, C & D), एउ (E & F). १२ ९४ (A), ९७ (E & F).

सप्तचतुर्मात्रिकान् गणान् विधायेत्यर्थः, एवं तीस मत्ता धरि—त्रिंशन्मात्रा धृत्वा, चउपइआ छंदा—चतुःपादिकाच्छन्दः, फणिंदा—फणींद्रः पिंगलः भणइ—भणति। तत्र विशेषमाह चउछंदेति। इदं वृत्तं चतुश्छंदांसि लेकिज्जइ—गृहीत्वा क्रियते, एक्क—एकं छंदः गहीला ण किज्जइ—न क्रियते, वृत्तचतुष्टयेनैकं पद्यं विधेयं, न त्वेकेनैव वृत्तेन। तथाच षोडशचरणैरिदं कर्त्तव्यं, न तु चतुर्भिश्चरणैरिति भावः। एवं चात्रेति शेषः, चउसअ-असिअ—चतुश्शतमशीतिश्च मात्रा इति शेषः, णिरुत्ता—निरुक्ताः कथिता-इत्यर्थः, मिअणअणि—हे मृगनयने, एक्क भेअ—एतं भेदं, को जाणइ—कः पिंगलातिरिक्तः जानाति, एअ[उ]—एतच्छंदः [अमिअ]—अमृततुल्यमित्यर्थः, पआसइ—प्रकाशते इति कइ—[कविः] पिंगलो भाषते। अत्र चतुर्मात्रिकसार्द्धसप्तगणात्मकचरणं चतुर्गुणीकृ[त्वे]त्यर्थः एकश्चरणो विधेयः, एवं चत्वारश्चरणा विधेया-इति फलितार्थः ॥ ९७ ॥ (E).

९७। अथ चतुःपदिकाच्छन्दः ॥ चउ इति ॥ चतुःपदिका-च्छन्दो भणति फणींद्रश्चतुर्मात्रान् गणान् सप्त पादे सगुरून् कुरु। त्रिंशन्मात्रा धारय ॥ जायते युवमिति शेषः [?] ॥ चतुःशतमशी-तिर्निरुक्ता ॥ चतुश्छंदांसि लेख्यंते ॥ एकं न क्रियते ॥ को जाना-त्येतान् भेदान् कविः पिंगलो भाषते, छंदः प्रकाशते, मृगनयने अमृतमेतत् ॥ चतुःपदीच्छन्दोऽशीत्यधिकचतुःपंचशत[चतुःशत]मा-त्राकं षोडशचरणं कार्यं, चतुश्चरणं न प्रयोज्यमित्यर्थः ॥ त्रिंशदंके षोडशगुणिते सं ४८० ॥ (G).

जहा, जसु[1] सीसइ[2] गंगा गोरि अधंगा
गिव[3] पहिरिअ[4] फणिहारा,
कंठट्ठिअ वीसा[5] पिंधण दीसा
संतारिअ संसारा।
किरणावलि कंदा[6] वंदिअ[7] चंदा
णअणहि अणल[8] फुरंता,
सो संपअ[9] दिज्जउ[10] बहु सुह किज्जउ[11]
तुह्म[12] भवाणीकंता ॥ ९८[13] ॥

चउपइआ। (A, B & C).

९८। उदाहरति। यथा, यस्य शीर्षे गङ्गा गौरी अर्द्धाङ्गे ग्रीवाप्र[परि]धानं फणिहारः, कण्ठस्थितं विषं, परिधानं दिक्, संसा[ता]रितसंसारः। किरणावलिकन्दो वन्दितचन्द्रः नयनेऽनलः स्फुरति, स मङ्गलं करोतु, बहु सुखं ददातु तव भवानीकान्तः॥ किरणावलीनां कन्दः मूलं, वन्दितस्तिलकीकृतश्चन्द्रो येन सः तथा। (C).

९८। चतुःपादिकामुदाहरति जसु सीसहि इति। जसु

९८। १ जस्सु (F). २ सीसे (A), सीसह (D), सीसहि (E), सीस (F). ३ गिव (A), गिम (B & C). ४ पिंधिअ (A), पिन्धण (B & C), परिहिअ (F). ५ विसा (C). ६ वन्दा (B). ७ णंदिअ (D & F). ८ णअल (F). ९ मंगल (A, B & C). १० किज्जउ (C). ११ दिज्जउ (C). १२ तुम्ह (B, C, D & F). १३ ९५ (A), ९८ (E & F).

अथ घत्ता । (D & F).

पिंगल कइ दिट्ठउ[१] छंद उकिट्ठउ[२]
घत्त मत्त बासट्ठि[३] करि ।
चउ[४] मत्त सत्त गण बे बि पाअ भण
तिणि तिणि लहु अंत धरि ॥ ९९[५] ॥

सीसहि गंगा—यस्य शीर्षे गंगा शोभितेति शेषः, यश्च गोरि अधंगा—गौर्यर्द्धांगः गौरी अर्द्धांगे यस्य तादृश इत्यर्थः, गिव पहिरिअ फणिहारा—ग्रीवापरिधृतफणिहारः ग्रीवायां परिधृताः फणिहारा येन तादृश इत्यर्थः, कंठट्ठिअ बीसा—कंठस्थितविषः, पिंधणदीसा—दिक्पिंधनः दिक् पिंधनमाच्छादनं यस्य स इत्यर्थः, संतारिअ संसारा—संतारितः संसारः येन च, किरणावलिकंदा—किरणावलिकंदः, बंदिअ—वंदितः चंदा—चंद्रः भाले धृत-इत्यर्थः, यस्य च णअणहि—नयने तृतीये नेत्रे अणल फुरंता—अनलः स्फुरन्नस्तीति शेषः, सो—सः भवाणीकंता—भवानीकांतः शिवः, तुह्म—युष्मभ्यं संपअ दिज्जउ—संपदं दद्यात्, बहु सुह किज्जउ—बहु सुखं कुरुतात् । अत्र एक एव चरण उदाहृतः, एतादृशा अन्ये त्रयश्चरणाः सुधीभिः स्वयमुदाहरणीयाः ॥ ९८ ॥ (E).

९८ । तत्र चरणोदाहरणं यथा ॥ जसु इति ॥ यस्य शीर्षे गंगा गौरी अर्धांगे ग्रीवापरिधृतफणिहारः कंठस्थितविषः पिंधनदिक्

९९। १ दिट्ठउ (B & C). २ उकिट्ठउ (B & C), उक्किट्ठउ (F). ३ बासट्ठि (B & C). ४ चौ (E & F). ५ ९१ (A), ९९ (E), ९८ (F).

पढमं दह बीसामो[1] बीए मत्ताइँ अट्ठाइँ[2] ।
तीए तेरह बिरई[3] घत्ता मत्ताइँ बासट्ठि[4] ॥ १००[5] ॥
गाह्न ।

संतारितसंसारः ॥ किरणावलिकंदो नंदितचंद्रो नयनेऽनलः स्फुरति, स संपदं ददातु बहु सुखं करोतु युष्माकं भवानीकांतः ॥ ९८ ॥ (G).

९९ । अथ घत्ताच्छन्दः । पिङ्गलकविदृष्टं छन्द उत्कृष्टं घत्ता द्विषष्टिः मात्राः कार्य्याः, चतुर्मात्रान् शब्द[सप्त] गणान् द्वयोरपि पदयोः त्रीन् त्रीन् लघूनन्ते धृत्वा ॥ (C).

९९ । अथ घत्तानामकं वृत्तं लक्षयति पिंगल कइ इति । बे बि पाअ — द्वयोरपि पादयोः, तिण्णि तिण्णि लहु — त्री[न् त्रीन्] लघून्, अंत धरि — अंते पदांत इति यावत् धरि — धृत्वा, चउमत्त सत्त गण — चतुर्मात्रिकान् सप्त गणान् भण — कथय, एवं बासट्ठि मत्त — द्विषष्टिर्मात्राः करि — कृत्वा, छंद उक्किट्ठउ — छंदस्सूत्कृष्टां, पिंगल कइ दिट्ठउ — [पिंगलकवि-]दृष्टां, घत्त — घत्तां जानीहीति शेषः । अयमर्थः—घत्ता द्विपदी, तत्र चतुर्मात्रिकसप्तगणानंतरं लघुत्रयं प्रत्येकं विधेयमिति ॥ ९९ ॥ (E).

९९ । अथ द्विपदी घत्ताच्छन्दः । पिंगलेति ॥ पिंगलकविदृष्टं

---

१०० । १ विस्सामो (B & C). २ अट्ठाइं (B & C), अट्ठाहि सुमत्ताहि (F). ३ विरइ (A, B & C). ४ बासट्ठी (B & C), बासट्ठो (D). ५ ९७ (A), १०० (E), ९९ (F).

जहा, रणदक्ख दक्ख हणु जिसु[1] कुसुमधणु
अंधअ गंध[2] विणासकरु ।
सो रक्खउ संकरु[3] असुर भअंकरु
गिरिणारि अद्धंग[4] धरु ॥ १०१[5] ॥

घत्ता । (A, B & C).

छंद उत्कृष्टं घत्तां मात्राद्विषष्ट्या कुरु ॥ चतुर्मात्राः सप्त गणाः द्वयोरपि पादयोर्भण, त्रयस्त्रयोलघवोऽन्ते धार्याः ॥ ९८ ॥ (G).

१०० । अत्र विरतिमाह । प्रथमं दशसु विश्रामः, द्वितीये मात्रास्वष्टसु, तृतीये मात्रासु त्रयोदशसु विरतिर्घत्तामात्राः द्विषष्टिः ॥ दशमात्रानन्तरं प्रथमो विरामः, ततोऽष्टमात्रानन्तरं द्वितीयः, ततः त्रयोदशमात्रानन्तरं तृतीयः । एवं द्वितीयपादेऽपि । एवं क्रमेण एकपादे एकविंश[त्रिंशत्]मात्राः द्वितीये चैकत्रिंशदिति द्विषष्टिर्मात्राः, द्विपदी घत्ता, तदिदमुक्तं बे वि पाअ भणेति ॥ (C). [Vide *śloka* 99.—Ed.]

१०० । अथ घत्तायां यतिनियममाह पढममिति । [पढमं]— प्रथमं, दह बीसामो—दशसु मात्रासु विश्रामः, बीए—द्वितीये स्थाने अट्ठाइ मत्ताइ—अष्टसु मात्रासु विश्राम इति पूर्वेणान्वयः, तीए—तृतीये तेरह—त्रयोदशसु मात्रासु, विरई—विरतिः,

---

१०१ । १ जिम्मि (B), जिनमु (D). २ कन्ध (C), अंधअंधकगंध (E). ३ अ dropt in (D). ४ अध्धङ्ग (B), गोरिणरि अद्धंग (D), गोरिणारि अद्धंग (E), गोरिणारि अंधंग (F). ५ ९८ (A), १०१ (E), १०० (F).

अथ घत्तानंद। (D).

सो घत्तह[1] कुलसारु किंत्ति अपारु[2]
णाअराअ पिंगल कहइ[3]।
एआरह बीसाम[4] णंदउ णाम
पुणुवि[5] सत्त तेरह विरइ॥ १०२[6]॥

एवं घत्ता—घत्तायां मत्ताइ बासट्ठि—मात्राः द्विषष्टिः भवंतीति शेषः। यतिकथ[न]क्रमेणैकत्रिंशन्मात्रा लभ्यंते, तासु द्वयोर्दलयोः प्रत्येकं देया इति संभूय द्विषष्टिमात्रिका घत्ता भवतीति भावः॥ १००॥ (E).

१००। पढेति॥ प्रथमो दशसु विश्रामो द्वितीयोऽष्टसु मात्रासु। तृतीयस्त्रयोदशसु विरतिर्घत्तायां मात्रा द्विषष्टिः॥ ९९॥ (G).

१०१। उदाहरति। यथा, रणदक्षदक्षहन्ता जितकुसुमधनुः अन्धकस्कन्धविनाशकरः। स रक्षतु शङ्करः असुरभयंकरः गिरिनागर्य्यर्द्धाङ्गधरः॥ (C).

१०१। अथ घत्तामुदाहरति रणदक्खेति। येन रणदक्ख—रणदक्षः संग्रामकुशल इति यावत्, दक्ख—दक्षः, हनु[णु]—हतः, येन च कुसुमधणु—कुसुमधन्वा कंदर्पः जिणु—जितः, यश्च अंधअ गंध विणासकरु—अंधगंधविनाशकरः, गिरिणअरि अद्धंग धरु—गिरिनागर्यर्द्धांगधरः गिरिनागरी पार्वती अर्द्धांगे धरति यस्तादृश-

---

१०२। १ घत्ता (F). २ अपार (E). ३ भणइ (A). ४ विस्साम (B & C), बीस्सम (E). ५ पुणवि (A & E). ६ ९९ (A), १०२ (E), १ (F).

इत्यर्थः, असुर भअंकरु — असुरभयंकरः, स: शंकर: रक्खउ — रचतु मामिति शेष: ॥ १०१ ॥ (E).

१०१ । रणेति॥ रणदचो दचो हतो जित: कुसुमधनु: अंधकासुरगंधविनाशकर: । स रचतु शंकरोऽसुरभयंकरो गौरीनार्धद्धांगधर: ॥ १०० ॥ (G).

१०२ । अथ घत्तानन्दच्छन्द: । स घत्ताकुलसार: कीर्त्त्याऽपार: नागराज: पिङ्गल: कथयति । एकादशसु विश्राम: नन्दनामा पुनरपि सप्तसु त्रयोदशसु विरति: ॥ पूर्व्वं दशादिमात्रासु विराम उक्त:, अत्र एकादश इति विशेष: । घत्ताकुलसारत्वकथनात् नन्दनामकथनाच्च घत्तानन्देति नाम लभ्यते । (C).

१०२ । अथ घत्तानंदं लचयति सो घत्तह कुलेति । यत्र प्रथमं एआरह बीसाम — एकादशसु मात्रास्विति शेष:, अग्रेऽपि योजनीय:, बीसाम — विश्राम:, पुणवि — पुनरपि द्वितीये तृतीये च स्थाने इत्यर्थ:, सत्त तेरह — सप्तसु मात्रासु त्रयोदशसु मात्रासु च, बिरइ — विरतिर्भवतीति शेष:, [सो—]तत् घत्तह कुलसार[ह] — घत्तानामकं यद्वृत्तं तज्जातिश्रेष्ठमित्यर्थ:, णंदउ णाम — नंदनामकं वृत्तं विद्धि इति शेष: । इति कित्ति अपार — अपारकीर्त्तिर्नागराज: पिंगल: कहइ — कथयति ॥ १०२ ॥ (E).

१०२ । घत्ताया यतिभेदेन नामान्तरमाह ॥ सो घेति ॥ सां[तां] घत्तां कुलसारां कीर्त्यापरां नागराज: पिंगल: कथयति । एकादशविश्रामादनाम्नीं, पुनरपि सप्तत्रयोदशविरतिं तां घत्तां घत्तानंदनाम्नीं पिंगल: कथयतीत्यर्थ: ॥ १ ॥ (G).

छक्कलु आइहिँ संठबहु तिणि चउक्कल देहु ।
पंचक्कल[1] चउकल[2] जुअल घत्ताणंद मुणेहु[3] ॥ १०३[4] ॥

दोहा ।

---

१०३ । विशेषान्तरमाह, षट्कलमादौ संस्थापय, त्रीन् चतुष्कलान् देहि, पंचकल-चतुष्कलयुगलं घत्तानन्दं जानीहि ॥ अत्र विरतिभेदाद्गणनियमाच्च पूर्व्वतो भेदस्तेन एकविंश[त्रिंशत्]-मात्राः । (C).

१०३ । अथ घत्तानंदगणनियममाह छक्कलु इति । आइहि — आदौ छक्कलु — षट्कलं गणं, संठबहु — संस्थापयत, ततश्च तिणि चउक्कल — त्रीन् चतुष्कलान् देहु — दद्त, ततश्च पंचक्कल — पंचकलं, चक्कल जुअल — चतुष्कलयुगलं च दद्तेति पूर्वेणान्वयः, एवं घत्तानंदं मुणेहु — जानीध्वं । घत्ताघत्तानंदयोश्च विश्राममात्रकृत एव भेद इति अत्रापि लघुत्रयमंते देयमिति बोध्यम् ॥ १०३ ॥ (E).

१०३ । छक्केति ॥ षट्कलमादौ स्थापय त्रीन् चतुष्कलान् देहि । पंचकलं चतुष्कलयुगलं घत्तानंदं जानीत ॥ एवमेकत्रिंशन्मात्राः कार्या इत्यर्थः ॥ २ ॥ (G).

---

१०३ । १ छकल (F). २ चक्कल (D & F), dropt in (E). ३ मुणेहु (A). ४ १०२ (A), १०३ (E), २ (F).

जहा, जो[1] बंदिअ सिरगंग हणिअ अणंग
अद्धंगहि[2] परिकर धरणु ।
सो जोई[3]जण मित्त हरउ दुरित्त
संकाहरु[4] संकर चरणु[5] ॥ १०४[6] ॥

घत्ताणंद । (A, B & C).

१०४ । उदाहरति । येन वन्दिता शिरसि गङ्गा, हतोऽनङ्गः, अर्द्धाङ्गेन परिवारधारकः । स योगिजनमित्रं हरतु दुरितं शङ्काहर-शङ्करचरणः ॥ परिवारो भार्य्या, चरणं पदं, आदरातिशयद्योतनार्थम् । (C).

१०४ । अथ घत्तानंदमुदाहरति, यो बंदिअ इति । जो—यः, सिरगंग—शिरोगंगया शिरःस्थितया गंगया इत्यर्थः, बंदिअ—वंदितः नमस्कृत इत्यर्थः । अथवा येन शिरसि गंगा वंदितेति । येन अणंग—कामः हणिअ—हतः, यस्य अद्धंगहि—अर्द्धांगे परिकर धरणु—परिकरं कलत्रं धृतवान्, सो—सः, जोईजण मित्त—योगिजनमित्रं, संकाहरु—शंकाहरः, संकर चरणु—शंकरचरणः, वो [दुरित्त—]दुरितं हरउ—हरतु ॥ १०४ ॥ (E).

१०४ । घत्तानंदो यथा ॥ यो वंदितः शीर्षे गंगया ॥ हतानंगः ॥ अर्द्धांगे परिकरधरः ॥ स योगिजनमित्रं हरतु दुरितं शंकाहरः शंकरचरणः ॥ ३ ॥ (G).

---

१०४ । १ जे (A & B). २ अद्धंगहिँ (A & D). ३ सोइ योइ (B), सो जोइ (C). ४ संकाहर (A & D). ५ चरण (A). ६ १ (A), १०४ (E), ३ (F).

अथ छप्पउ[1] । (F).

छप्पअ छंद छइल्ल[2] सुणहु[3] अक्खरसंजुत्तउ
एआरह तसु[4] बिरइ त पुणु[5] तेरह णिब्भंतउ[6] ।
बे मत्ता धरि पढम त[7] पुणु[8] चउ चउकल[9] किज्जइ
मज्झट्ठिअ[10] गण पंच हेट्ठ बिण्णबि[11] लहु[12] दिज्जइ ॥
उल्लाल बिरइ[13] बे पण्णरह[14] मत्ता[15] अट्ठाइस[16] सोइ[17]
एम[18] भणह मुणह[19] छप्पअ[20] पअ
अणहा[21] णच्छि[22] किंपि[23] ण होइ ॥ १०५[24] ॥

---

१०५ । अथ षट्पदिका । षट्पदच्छन्दः छदन्द जानीहि अक्षरैः संयुक्तम्, एकादशसु विरतिः, ततः पुनस्त्रयोदशसु निर्भ्रान्तां, द्विमात्रं धृत्वा प्रथमे ततः पुनश्चतस्रः कलाः क्रियन्तां, मध्येस्थितपञ्चगणाधो द्वावपि लघू दीयेतां ॥ उल्लालयोर्विरतिर्द्वयोः

---

१०५ । १ षट्पदं (D). २ षट्ल (B), छदन्द (C), षट्लु (D). ३ सुणह (A, B & C), सणउ (D). ४ तह (A, B & C). ५ पुणवि (B & C), पुणि (F). ६ णिव्वुत्तउ (A), णिब्भन्त (B & C), णिब्भत्त (D). ७ उ (B & C). ८ पुण (B), पुणि (F). ९ चउक्कल (B), चउकला (C). १० मउझ-ट्ठिष (C), मझ्झट्ठिष (E), मउझठिष (F). ११ विण्णउ (A), विणुवि (C), विणवि (F). १२ लेइ (A). १३ वे बिरइ (E), वि चरण वे (F). १४ पन्दरह (C). १५ मत्त (A). १६ अठाइस (A), अट्टाइस (C), अट्ठावीस (F). १७ होइ (B & E), सो (F). १८ एव (F). १९ गुणह (D), सुणउ (F). २० छप्पंअह (A), छप्पअ पअह (E). २१ अणण (B), अणहा (E), अणह (C). २२ इत्थिण (C, D, E & F). २३ किंवि (F). २४ २ (A), ४ (F).

पञ्चदशसु, मात्रा अष्टाविंशतिर्भवन्ति, एवं गणय जानीहि षट् पदानि। अन्यथाऽत्र न किञ्चिद्भवति॥ छइन्दो — विदग्धः। अक्खरे: सानुप्रासैः। एकादशमात्रास्थाने त्रयोदशमात्रास्थाने च यतिकथनाच्चतुर्विंशतिमात्रः पादो लभ्यते। तत्र मात्रानियममाह। आदौ द्विमात्रगणः, ततश्चतुष्कलामध्यस्थिताः पञ्च गणाः कार्य्याः, ततो द्वावपि लघू देयौ, एवं क्रमेण चतुर्विंशतिमात्राश्चत्वारः पादाः कार्य्याः। पुनश्च पादद्वयं कार्य्यं, तस्य च उल्लालसंज्ञा, ततः प्रत्येकमष्टाविंशतिमात्रा भवन्ति। पञ्चदशसु विश्रामः कार्य्यः। अत्र च पादचतुष्टये षण्णवतिः उल्लालयोश्च षट्पञ्चाशदिति द्विपञ्चाशदधिकशतमात्रा षट्पदी। (C).

१०५। अथ षट्पदनामकवृत्तं लक्षयति। छप्पअ छंद इति। हे छइल्ल — छइल्लाः विदग्धाः, अक्खरसंजुत्तउ — अक्षरसंयुक्तं वक्ष्यमाणप्रकारेण द्वाशीत्यादिवर्णयुक्तमिति यावत्, छप्पअ छंद — षट्पदं छंदः सुणहु — शृणुत। तत्र यतिनियमपूर्वकं गणनियममाह, एआरहेत्यादिना। तत्र विरइ — विरतिः, एआरह — एकादशसु मात्रासु भवतीति शेषः, त पुणु — ततः पुनः णिब्भंतउ — निर्भ्रांतं यथा स्यात्तथा तेरह — त्रयोदशसु मात्रासु विरतिर्भवतीति पूर्वेणान्वयः, तथा च चरणे चतुर्विंशतिर्मात्राः भवंतीति भावः, पढम — प्रथमे च चरणे, इदं चोपलक्षणं, द्वितीये तृतीये चतुर्थेऽपि बोध्यं, बे मत्ता धरि — द्वे मात्रे धृत्वा संस्थाप्येत्यर्थः, मज्झझ्ठिअ — मध्येस्थिता मध्ये प्रथमस्थमात्राद्वयांतस्थद्विलघ्वोरंतराले स्थिता इत्यर्थः, पंच चउ चउकल — चतुश्चतुःकलाश्चतस्रः

चतस्रः कला मात्रा येषु तादृशाश्चतुर्मात्रिका इति यावत् गण—गणाः किज्जइ—क्रियंते, त पुणु—ततः पुनः हेट्ठ—अधस्तात्पादांते इति यावत्, बिण्णिवि लहु—लघुद्वयं दिज्जइ—दीयते, ततः पादचतुष्टयानंतरम्, उल्लाल—उल्लालः वक्ष्यमाणलक्षणं उल्लालनामकं वृत्तं दीयते इति पूर्वेणान्वयः। तत्र च उल्लाले बे बिरइ—द्वे विरती यतिस्थानद्वयमित्यर्थः, प्रथमं पञ्च [There seems to be a gap here.—Ed.] लघुद्वयं स्थाप्यमेवमेकैकचरणे चतुर्विंशतिर्मात्रा विधाय चरणचतुष्टयं विधेयमनंतरं च उल्लालपादद्वयं देयमिति षट्पदं छंदो भवतीति। इदं च शिष्यबोधायोक्तं, वस्तुतस्तु काव्यपादचतुष्टयोत्तरोल्लालपादद्वयेन षट्पदं छंदो भवतीति। अंते लघुद्वयमेव देयमिति न नियमः काव्यपादेषु तथाऽदर्शनादिति बोध्यम्। (E).

१०५। अथ षट्पदं छंदः॥ छप्पेति॥ षट्पदं छंदो विदग्धाः शृणुत, अक्षरसंयुक्तं, एकादशसु तस्य विरतिस्ततः पुनस्त्रयोदशसु निर्भ्रान्तम्। द्वे मात्रे धृत्वा प्रथमं ततः पुनश्चतुष्कलाः क्रियंते। मध्ये स्थिता गणाः पंच। अधस्ताद्द्वावपि लघू दीयेते॥ उल्लालस्य द्वौ चरणौ॥ द्वि[?]पंचदशमात्रासु [यतिः]। अष्टाविंशौ तौ॥ एवं मनसि जानातु षट्पदे पदानि, अन्यथात्र न किमपि भवति॥ अत्र चतुर्विंशतिमात्राकं पादचतुष्टयं॥ तेषु एकादशसु त्रयोदशसु च यतिः कार्या॥ ततोऽष्टाविंशतिमात्राकं पादद्वयं॥ तत्र च सप्तदशसु[?] यतिर्भवतीत्यर्थः॥ चरणद्वये द्वितीया यतिरेकादशसु[?] भवतीति फलति॥ ४॥ (G).

जहा,

पिंधउ[१] दिढ सखाह[२] बाह उप्पर पक्खर[३] दइ[४]
बंधु समदि[५] रण धसउ[६] सामि[७] हम्मीर[८] बत्रण[९] लइ[१०]।
उड्डल[११] णहपह भमउ खग्ग[१२] रिउ[१३] सीसहि[१४] डारउ[१५]
पक्खर[१६] पक्खर[१७] ठेल्लि पेल्लि[१८] पव्वत्र अ प्फालउ[१९] ॥
हम्मीर[२०] कज्जु[२१] जज्जल[२२] भणइ[२३]
कोहाणल मुह मह[२४] जलउ ।
सुल[२५]ताण सीस करवाल[२६] दइ[२७]
तेज्जि[२८] कलेबर दित्र[२९] चलउ ॥ १०६[३०] ॥

१०६ । उदाहरति ॥ पिनद्धदृढ़सन्नाहो वाहस्योपरि पक्खरं दत्त्वा बन्धून् संवाद्य रणे पतामि स्वामिहम्मीरवचनं नीत्वा। उड्ड-

१०६ । १ पिंधउँ (A), पिंधिच (E). २ सभाह (D). ३ पक्ख (E). ४ देइ (A & E). ५ समरि (A), संभरि (F). ६ धसिच (E). ७ सामहि (D), धाहि (E). ८ हम्बीर (B & C), हम्मीच (F). ९ विणच (B). १० थइ (C), लई (D), लेइ (E). ११ उक्मल (B & C), उड्डुल (D & E), उडल (F). १२ खक्ख (F). १३ चरि (A & E), रिपु (F). १४ सिसहि (E), सीस (F). १५ माडउँ (A), भालउ (B & C), भाजउ (D), भालउ (F). १६ पक्खरे (A & B), पक्ख (E). १७ पक्खरे (B). १८ वेल्लि (F). १९ प्फारउँ (A), पप्फारउ (B), चपफालउ (C), चप्फारउ (F). २० हम्मीर (B & C), हंमी (E). २१ कज्ज (D, E & F). २२ तज्जल (D), उउज्जलु (B & C), उज्जल (E). २३ भणु (B & C), भण (D, E & F). २४ मुह (A), महँ महँ (D), मह मह (E), मह (F). २५ सुरि (A), सुल्लि (D & E), सुर (F). २६ कवाल (A). २७ देइ (A, D & E), दरि (C). २८ तज्जि (A). २९ दिव (B, C & F). ३० २ (A), ५(F).

यामि नभःपथं, भ्रामयामि खड्गं, रिपुशिरसि ज्वालयामि पक्खरं, ठेलयित्वा पेलयित्वा पर्व्वतमुत्पाटयामि ॥ हम्मीरकार्य्ये उज्ज्वलनो भणति, क्रोधानलमुखमध्ये ज्वलति, सुरतानशीर्षे करवालं दत्त्वा त्यक्त्वा कलेवरं दिवं चलामि ॥ हम्मीरसेनापतेरुज्ज्वलनस्येयमुक्तिः । वाहो — घोटकः, पक्खरशब्दोऽश्वकवचवाची, नीत्वा — प्राप्य, कलेवरं त्याजयित्वा दिवं चालयामीत्यर्थः । (C).

१०६ । अथ षट्पदमुदाहरति पिंधिअ दिढ इति । दिढ सणाह — दृढसंनाहं पिंधिअ — पिधाय, बाह उप्पर — वाहोपरि पक्खर देइ — वाणवारणं दत्त्वा, बंधु समदि — बन्धून्संभाव्य, साहि हम्मीर बअण लेइ — शाह-हमी[र]वचनं गृहीत्वा, रण धसिअ — रणे प्रविश्य, पक्ख[र] पक्खर — वाणवारणेन वाणवारणं, खकवचेन प्रतिपक्षाणां कवचमित्यर्थः, ठेल्लि — चोटयित्वा, पेल्लि — नोदयित्वा, उड्डउ — उड्डीयमानः सन्, णहपह — नभःपथे भमउ — भ्रमामि, अरि सिसहि — अरिशिरसि, खग्ग — खड्गं डारउ — पातयामि, पब्बह अ फालउ — पर्वतानहं स्फालयामि (क्रोधानलमध्ये जलउ — ज्वलामि, हम्मीरकज्ज यामि) [?] उल्लंघयामीति यावत् । किं च सुरताणसीस करवाल देइ — खड्गेन तस्य शिरश्छित्त्वेति यावत्, मइ — अहं, कोहाणल मह — क्रोधानलमध्ये जलउ — ज्वलामि, हम्मीरकज्जं — [ह]मीरका[र्य्या]र्थाय, कलेवर तेज्जि — कलेवरं शरीरं त्यक्त्वा, दिअ चलउ — दिवं गच्छामि इति अज्जलः * * * हमीर * * । (E). [Something seems to be wanting here.— Ed.]

पत्र[१] पत्र[१] तलउ[२] णिबद्ध[३] मत्त चउ[४]बीसह[५] किज्जइ[६]
अक्खर[७] डंबर[८] सरिस छंद[९] इत्र सुद्ध गणिज्जइ[१०] ।
आइहि[११] छक्कलु[१२] होइ चारि चउकलउ[१३] णिरुत्तउ[१४]
दुक्कल अंत णिबद्ध[१५] सेस कइ[१६]बत्थु[१७] णिवुत्तउ[१८] ॥
बावस[१९] सउ बि मत्तह[२०] मुणहु[२१]
उल्लालउ[२२] सहिअउ[२३] गुणह[२४] ।
छप्पत्र छंद[२५] एरिसि[२६] बि होइ
काइँ[२७] गंथि गंथि[२८] बिमरह[२९] ॥ १०७[३०] ॥

---

१०६ । यथा ॥ पिंधेति ॥ पिधाय दृढसन्नाहं वाहोपरि कवचं दत्त्वा, बन्धून्संभाव्य रणे प्रविशामि, स्वामिहम्मीरवचनं लब्ध्वा ॥ उड्डीय नभःपथे भ्रमामि, खड्गेन रिपुशिरांसि पातयामि ॥

---

१०७ । १ पत्र (D). २ तलउ (A & E) ३ णिंब (A), णिबद्धं (D), णिबद्धा (F). ४ चउस (C), चौबीसहि (E), चोबीसह (F). ५ किसउ (A). ६ किज्जई (D). ७ अक्खरं (A). ८ डमरु (B & C). ९ छन्दसह (C). १० भणिज्जइ (D, E & F). ११ आइइ (C). १२ छक्कलु (D). १३ चउकलअ (C), चउकलउँ (D). १४ णिवुत्तउ (A & E). १५ णिवुत्त (A), ठवेउ (D & F). १६ कहि (B), कई (D), कवि (F). १७ वच्छु (A), वथु (B). १८ णिरुत्तउ (D & E), णिउत्तउ (F). १९ बामसु (A), बावस (B & C). २० मत्तउ (E). २१ मुणउ (A), मुणमु (C), मुणह (D). २२ उल्लालहि (E), उल्लालउ (F). २३ सहिसउ (A, B, C & D), सहिअ (E). २४ गुणउ (A & B). २५ छन्दत्र (B). २६ एरिस (B), एम (C), एरिसिअ (D), एरिस (F). २७ काँहि (B & C). २८ गंथ गंथि (A & E). २९ अमरउ (A), बिरमइ (B), बिमरउ (C), बिमरसह (F). ३० ४ (A), ६ (F).

कवचं कवचं त्रोटयित्वा नोदयित्वा पर्वतानप्यास्फारयामि॥ हम्मीर-कार्याय जल[ज्ज]लो भणति कोपानलमध्ये ज्वलामि, सुरत्राण-शीर्षे करवालं दत्त्वा त्यक्त्वा कलेवरं दिवं चलामि॥ हम्मीरसेवकस्य जज्जलनाम्न इयमुक्तिः॥ ५॥ (G).

१०७। षट्पदच्छन्दस एव प्रकारांतरमाह। पादपादतले निबद्धा मात्राः च[तु]र्विंशतिः, कथ्यन्ताम् अक्षराणि डम्बराणि, सदृशं छंद इदं शुद्धं गम्यताम्, आदौ षट्कला भवन्ति चत्वारश्चतुष्कलाः निरुक्ताः, द्विकलोऽन्ते निबद्धः, शेषकविना वस्तु निरुक्तं। द्विपञ्चाशत् शतमपि मात्रा जानीहि, उल्लालेन समं गुण[य] षट्-पदच्छन्द ईदृशमपि, किं ग्रन्थं ग्रन्थं विमृषत॥ तलशब्दः स्वरूपार्थः, डम्बराणि दृढबन्धयोग्यानि, सदृशमिति प्रतिपादं दृढबन्धः कार्य्य इत्यर्थः, शुद्धं सर्व्वावयवसुश्रवं ज्ञायताम्। पूर्व्वमादौ द्विकलः ततश्चतुष्कलाः पश्चेत्युक्तमिदानीन्तु प्रथमतः षट्कलः ततश्चत्वारश्चतुष्कला इति विशेषः। (C).

१०७। अथ षट्पदमेव प्रकारांतरेण लक्षयति। पअ पअ तलह इति। यत्र आइहि छक्कलु होइ — आदौ षट्कलो भवति, ततः चारि चउकल[उ] — चत्वारश्चतुःकलाः णिबुत्तउ — निरुक्ताः, अंत — पादांते, दुक्कलु — द्विकलः निबद्धः, एवं यत्र पअ पअ तलह णिबद्ध — पदपदतले प्रतिचरणतलमित्यर्थः निबद्धाः मत्त चउवीसहि — मात्राश्चतुर्विंशतिः किज्जइ — क्रियंते, तत उल्लालहि सहिअ — उल्लालेन सहितम् अंते उल्लालपादद्वययुक्तमित्यर्थः, सेस कइ वत्थु णिरुत्तउ — शेषकविना वस्तु निरुक्तम्। एतदेव वस्तु इति

जहा,

जहा सरअ ससि बिंब जहा हर[1] हार[2] हंस ठिअ[3]
जहा फुल्ल सिअ कमल जहा सिरि[4] खंड खंड किअ[5]।
जहा गंग कल्लोल जहा रोसाणिअ[6] रुप्पइ[7]
जहा दुद्धवर[8] सुद्ध[9] फेण[10] फंफाइ[11] तलप्पइ[12] ॥
पिअ पाअ[13] पसाए[14] दिट्ठि[15] पुणि[16]
णिहुअ[17] हसइ जह[18] तरुणिजण[19]।
वरमंति चंडेसर[20] कित्ति तुअ
तत्थ[21] देक्ख[22] हरिबंभ[23] भण[24] ॥ १०८[25] ॥ [छप्पउ]

नामांतरेणोक्तमित्यर्थः। इति गुणह — गुणयत जानीतेत्यर्थः। इअ छंद — इदं छंदः, अक्खर डंबर सरिस — अक्षराडंबरसदृशं सुश्राव्यवर्णसमुल्लसितगौडीरीतिमदित्यर्थः, भवतीति शेषः, तदा छ[प्]ड्डु भणिज्जइ — षड्ढं भण्यते। अत्र च वावण्ण सउ वि मत्तह

१०८। १ हइ (E). २ हास (C). ३ ष्ठिअ (C). ४ सिर (A). ५ दिअ (A, B & C). ६ रोसाणि (C). ७ रूप्पइ (B). ८ दुद्ध वरि (F). ९ सुद्ध (B & C). १० फेण (A). ११ फंफाए (A), फम्फाइ (B & C), फंकाइ (D), संकाइ (F). १२ ललप्पइ (A), तलप्पुइ (D), लफुप्पइ (F). १३ पाँअ (A), पाए (D). १४ पसाइ (C), पसाअ (D), पहारे (F). १५ दिट्ठि (A, E & F). १६ पल (A), पञ्ञ (B), पन्द (C), पणु (E). १७ विहंसि (D). १८ जइ (B), जहा (C). १९ तरुणिगण (A), तरुणीजण (B). २० चंडेसरवर (B), चंडसर (F). (Here डे should be read as short, vide श्लोक ५, p. 7). २१ तच्छ (A). २२ पेक्खि (A), देक्खु (D), देक्खि (E). २३ हरिवम्भु (B), हरिहरवम्भ (C), हरिवंम्ह (F). २४ भणु (B). २५ ५ (A), ७ (F).

—द्विपंचाशत्शतमपि मात्राः काव्यपादचतुष्टयस्य षण्णवतिरुल्लाल-पादद्वयस्य च षट्पंचाशदेवमुभयोर्मिलित्वा द्विपंचाशदधिकं शतं मात्रा इत्यर्थः, मुणक्ष—जानीत, छप्पत्र छंद—षट्पदच्छंदः, एरिसि वि होइ—एतादृशमपि भवति, काइ गंथ गंथि—किमर्थं ग्रंथग्रंथिं विमरह—विस्मृशत। इदं च पूर्वोक्तलक्षणेनैव गतार्थत्वात् क्षेपकमिवाभातीति बोध्यम्। (E).

१०७। अस्य लक्षणस्य निष्कर्षमाह ॥ पत्र पेति ॥ पद्पद्-तल-निबद्धा मात्राश्चतुर्विंशतिः क्रियंते, अक्खराडंबरसदृशं छंद-इदं शुद्धं भण्यते ॥ आदौ षट्कलो भवति चत्वारश्चतुष्कला-निरुक्ताः ॥ द्विकलमंते स्थापय शेषकविना वस्तु निरुक्तम् ॥ द्विपंचाशत् शतमपि मात्रा जानीत, उल्लालेन सहितं शुणय ॥ षट्पदं छंद एतादृशं भवति, किमर्थं ग्रंथग्रंथिं विस्मृशत ॥ श्लोक-पादचतुष्टय उल्लालपादद्वययोगे द्विपंचाशदधिकं शतं मात्रा भवंति। तत्र च लघुगुरुनियमो नास्ति। वस्त्विति नामांतरेणेत्यर्थः ॥ (G).

१०८। उदाहरति। यथा शरच्छशिबिम्बं यथा हरहासहंस-स्थितिः यथा फुल्लसितकमलं यथा श्रीखण्डखण्डं दीयते, यथा [गंगा]कल्लोलः, यथा रोषाणितं रूप्यं, यथा दुग्धवरमुग्धफेनः कम्पायितः आप्लवते, प्रियपादप्रसादे पृष्ठे निभृतहसितं यथा तरुणी-जनस्य, वरमन्त्रिचण्डेश्वर कीर्त्तिस्तव तथा दृश्यते हरिहरब्रह्मा वदति ॥ रोषणशब्दः सुवर्णरजतमार्जनशिला[बोधकः], तेन कृत-मार्जनरजतवदित्यर्थः ॥ हरिहरब्रह्मा कविः, ब्रह्मेति वन्दिविशेष-उच्यते ॥ (C).

१०८। अथैतदुदाहरति जहा सरअ ससि बिंबेति। यथा शरत्-शशिविंबं, यथा हरहारहंसस्थितिः, हरः — कर्पूरगौरः, हारो — मौक्तिकदाम, हंसाः — पक्षिविशेषास्तेषां स्थि[ति]रित्यर्थः, जहा फुल्ल सिअ कमल — यथा फुल्लसितकमलं पुण्डरीकमिति यावत्, जहा खण्ड किअ — खंडीकृतः, सिरि खंड — श्रीखंडश्चंदनमित्यर्थः, जहा गंग कल्लोल — यथा गंगाकल्लोला महोर्मय इत्यर्थः, जहा रोसाणिअ रुप्पइ — यथोज्ज्वलितं रूप्यं, जहा दुद्ध वर सुद्ध फेण फंफाइ तलप्पइ — यथा दुग्धवरस्य सुग्धफेनः फंफाइ — उद्गम्य तलप्पइ — लपति, यद्यपि अत्र दुग्धसाम्यं कीर्त्तेः कविसंप्रदायविरुद्धं शीतत्वेनैव कीर्त्तिवर्णनस्योचिततवात् तथापि श्वैत्यमात्रे तात्पर्य्यं न तदंशेऽपीति भावः, तप्तीभूय भांडादुद्गतः दुग्धफेनश्चातिश्वेतो भवतीति तथोक्तिः। पुणः[नः] यथा पिअ पाअ पसाए दिट्ठि — प्रियप्राप्तप्रसाददृष्टिः प्रियस्य प्राप्ता प्रसाददृष्टिर्य्येन स तादृश इत्यर्थः, तरुणिजण — तरुणिजनः णिहुअ हसइ — निभृतं हसति, तत्थ — तथा तव कित्ति — कीर्त्तिं देक्खि — प्रेक्ष्य, वरमत्ति — वरमते चण्डेश्वर महाराज, हरिर्ब्रह्मा भणति। ब्रह्मेति वंदिनामुपनाम जातिविशेषो वा, तथाच ब्रह्मजातीयस्तदुपनामको वा हरिनामा भवतीत्यर्थः। (E).

१०८। यथा जहेति॥ यथा शारदशशिविंबो, यथा हरहारहंसस्थितिः, यथा फुल्लसितकमलं, यथा श्रीखंडं चूर्णितं। यथा गंगाकल्लोलो, यथोज्ज्वलितं रौप्यं, यथा दुग्धोपरिशुद्धफेनः फंफायितः स्फुरति, प्रिये पादप्रहारे दृष्टे निभृतं हसति यथा तरुणि-

Here follows a *śloka* १०८ (क) in MSS. (A, B and E), not found in MSS. (C, D and F), nor in the gloss (G).

चारि पाअ[१] भण कव्वके[२] वे वि पाअ उल्लाल[३]।
इम बिहु लक्ष[क्ख]ण एक्क कइ[४] पढ़ छप्पअ पत्थार[५]॥
१०८ (क)॥ [दोहा]

अह कव्व लक्खण[१]। (B).

आइ अंत दुहु[२] छक्कलउ तिण्णि तुरंगम मज्झ[३]।
तीए[४] जगणु[५] कि विप्पगणु[६] कव्वह[७] लक्खण बुज्झ॥
१०९[८]॥ दोहा।

जनः॥ वरमंत्रिन् चंडेश्वरस्य कीर्त्तिस्तव तथापेक्ष्य हरि-ब्रह्मणो[ह्मा] भणति॥ हरिकवेश्चंडेश्वरमंत्रिणं प्रत्युक्तिः॥ ७॥ (G).

१०८ (क)। अथ पूर्वोक्तमेव दोहावृत्तेनोपसंहरति चारि पाअ इति। चारि पाअ — चत्वारः पादाः, कव्वके भण — काव्यस्य भण, वे वि पाअ उल्लाल — द्वावपि पादा उल्लालस्य भणेति पूर्वेणान्वयः,

---

१०८ (क)। १ पअह (B). २ इअ कव्वकइ (A), इअ कव्व भण (B). ३ 2nd and 4th quadrants transposed in A, and पा for पाअ in the same MS. ४ विउ लच्चण पढम एक्क कइ (A), दुउ लक्खण पढ एक्क करि इअ (B). ५ छप्पअ पअ पच्छार (A).

१०९। १ अथ काव्यलक्षणं (A), अह कव्व लक्खण (C), अथ काव्यं (F). २ दुइ (F). ३ मज्झ (F). ४ नाए (D), तीय (F). ५ जगण (A). ६ विप्पगण (A). ७ कव्वहि (A), कव्वउ (C). ८ ७ (A).

इम — एवं, बिङ्क लक्खण — द्वे लक्षणे एक्क कइ — एकं कृत्वा पढ, एष छप्पअ पत्थार — षट्पदप्रस्तारः ॥ (E).

१०९ । अत्र च काव्यनामच्छन्दः पादचतुष्टयेन भवति, उल्लाल-पदद्वयोः साहित्येन च तत्र षट्पदीत्वमिति दर्शयितुमादौ काव्य-च्छन्दो दर्शयति । आदावन्ते द्वौ षट्कलौ, त्रयस्तुरङ्गमा मध्ये । तृतीये जगणः किं विप्रगणः, काव्यलक्षणं बुध्यस्व ॥ तुरङ्गमश्चतुष्कलः, किमिति विकल्पेन, सर्व्वलघुचतुष्कलो विप्रगणः ॥ (C).

१०९ । अथ षट्पदोपयोगिकाव्यलक्षणमाह आइ अंत इति । यत्र आदौ अंते, दुङ्क छक्कलउ — द्वौ षट्कलौ भवतः इति शेषः, एक आदौ एकः अंते इत्यर्थः, मझ्झ — मध्ये आद्यंतस्थयोः षट्कलयोरंतराले इत्यर्थः, तिणि तुरंगम — त्रयस्तुरंगमास्त[य]-श्चतुःकलाः भवंतीति शेषः, तत्र तीए — तृतीये स्थाने द्वितीय-चतुःकल इत्यर्थः जगणो मध्यगुरुर्गणः किंवा विप्रगणश्चतुर्लघुको-गणः कर्तव्यः, तत् कब्बह लक्खण — काव्यस्य लक्षणं, बुझ्झ — बुध्यतां ॥ अयमर्थः, प्रथमं षट्कलस्ततस्त्रयश्चतुष्कलास्ततश्च षट्कलः एवं प्रतिपादं पंच गणाः कर्त्तव्यास्तेष्वेव च प्रथमषट्कला * * * त्रये तृतीयो गणो जगणो विप्रो वा विधेयः, एवं च तृतीये विप्रश्चेद्दी-यते तदा सर्वलघ्वात्मकोऽपि काव्यभेदो भवति, यदि च जगणो-दीयते तदा तु न तृतीयस्थजगणांतर्गतस्य एकैकगुरोः प्रति-चरणमावश्यकत्वात्सर्वगुर्वात्मकस्तु न भवति च, जगणपक्षे तृतीयस्थ-गणाद्यंतस्थस्य लघुद्वयस्य प्रतिचरणमावश्यकत्वादिति, विप्रपक्षे च चतुर्लघूनां प्रतिचरणमावश्यकत्वादिति सुधीभिर्विभावनीयम् । (E).

चउ अग्गल[1] चालीस गुरु एक्कक्के गुरु[2] लेहु[3]।
जो गुरुहीणउ सक्क सो[4] णाम ग्गहण कुणेहु[5] ॥ ११०[6] ॥
दोहा।

१०९। अथ काव्यमात्रलक्षणमाह ॥ आईति ॥ आदावंते द्वयं षट्कलयोस्त्रयस्तुरंगमा मध्ये। तृतीयो जगणः किंवा विप्रगणः काव्यस्य लक्षणं बुध्यस्व ॥ ८ ॥ (G).

११०। अथ काव्यच्छन्दसो भेदान् दर्शयितुमुपक्रमते। चतुरग्रचत्वारिंशद्गुरव एकैकस्मिन् गुरुं लघुं नय, यो गुरुहीनः शक्रनामग्रहणं कुरु ॥ चतुरग्रेति चतुरधिकेत्यर्थः। चतुरधिका चत्वारिंशद्गुरवोऽत्र सम्भवन्ति एकादशगुरु-लघुद्वय-युक्तैकैकपादयोगात्। अत्र च एकैकगुरुस्थाने लघुद्वयकरणे यो गुरुहीनः स शक्रनामेत्यर्थः। (C).

११०। अथ वक्ष्यमाणेषु काव्यभेदेषु शक्रनामकं भेदं लक्षयन् भेदान[यन]प्रकारमाह चउ अग्गलेति। चउ अग्गल चालीस गुरु — चतुरधिकचत्वारिंशद्गुरु काव्यपादचतुष्टयं चतुश्चत्वारिंशद्गुरु इति यावत्, एक्कक्के गुरु लेइ — एकैकं गुरु गृहाण न्यूनं कुरु, एवं कृते च जो गुरुहीणउ — यो गुरुहीनः एकैकगुरुह्रासेन द्विलघुवृद्ध्या क्रियमाणेषु भेदेषु यः सर्वलघुरित्यर्थः भवतीति शेषः, सो स[क्क — स] शक्रः। तत्र च एकैकगुरुवृद्ध्या लघुद्वयह्रासेनेति

११०। १ चउग्गल (B), चउलग्ग (C), चतुग्गल (F). २ लक्कगुरु (C). ३ देइ (D & F). ४ सउ (A), सोइ (B, C & D). ५ करेहु (A). ६ ८ (A), ९ (F).

जहा,

जसु कर फणिवइ बलअ तरुणिवर तणुमह बिलसइ[1]
णअण अणल[2] गल गरल बिमल ससहर[3] सिर णिवसइ।
सुरसरि सिरमह रहइ[4] सअलजण[5] दुरित दमण[6] कर[7],
हसि ससिहर[8] हरउ दुरित[9]
बितरह अतुल[10] अभअवर[11] ॥ १११[12] ॥

सक्क[13] । (B & C).

शेषः, णाम ग्गहण कुणेहु — नामग्रहणं शंभ्वादिर्भं ांतमिति भावः कुरुष्व । अयं भावः — तृतीये जगणदानपचे प्रथमषट्कलस्य गुरुत्रयं, द्वितीयचतुष्कलस्य गुरुद्वयं, तृतीयचतुष्कलस्य जगणस्वरूपत्वात्तस्यैको गुरुः, चतुर्थचतुष्कलस्य गुरुद्वयं, पंचमस्य षट्क स्य गुरुत्रयमेकादश गुरवः, जगणाद्यंतःस्थलघुद्वयं च प्रतिचरणं काव्ये आवश्यकं, चरण-चतुष्टये च मिलित्वा चतुश्चत्वारिंशद्गुरवोऽष्टौ लघव आवश्यकाः, अतएव काव्ये सर्व्वेऽपि चरणा गुरुरूपा एवेति न संभवति जगण-पचे अष्टलघूनां विप्रपचे षोड़शलघूनामावश्यकत्वात्, तेषु च [चतुः]-चत्वारिंशद्गुरुषु क्रमेण एकैकगुरुह्रासेन लघुद्वयवृद्ध्या भेदेषु क्रिय-

---

१११। शिवसइ (B). १ श्रल (A). २ सिजसु (D), ससि जसु (E), शसि (F). ४ वसइ (A, B & C). ५ सअलअ (A), मअसअल (B), सअसअन (C). ६ दलण (B, C & D). ७ कव (B). ८ हसि हर (A), हसिअ ससिहर (B & C). ९ हर हरउ दुरित (A), हर दुरित (B), हरदु दुरित (D), तुअ दुरित हरउ (E). १० तुह दिसउ (A), तुअ वितरहउ (B), उ (C), वितरइ सो (E), वितर हर (F). ११ अभअवर (B). १२ ९ (A), १० (F). १३ सक्क। (A).

माणेषु यः सर्वलघुर्भवति सः शक्रः, षण्णवतिलघ्वात्मके शक्रे च क्रमेण एकैकगुरुवृद्धा लघुद्वयह्रासेन यावच्चतुश्चत्वारिंशद्गुरवोऽष्टौ च लघवो भवंति, तावंति नामानि भवंति। तांश्च भेदाननुपदमेव विवेचयिष्यामः। अत्र च प्रथमं गुरुनादायैकगुरुह्रासलघुद्वयवृद्धिक्रमेण शक्रनिरुक्तिस्ततश्च लघूनादाय लघुद्वयह्रासैकगुरुवर्द्धनक्रमेणान्येषां निरुक्तिरुभयथापि भेदानयनं संभवतीति • प्रदर्शनार्थेति ध्येयम्। (E).

११०। काव्यभेदानाह ॥ चउ इति ॥ चतुरधिकाश्चत्वारिंशद्गुरव एकैको गुरुर्ह्रसति। यो गुरुहीनः शक्रः स नामग्रहणं कुरुत ॥ अयमर्थः — प्रतिचरणं जगणस्थावस्थितौ अष्टौ लघवश्चतुश्चत्वारिंशद्गुरवइति फलति ॥ तत्र गुरुहीनो भेदः शक्रसंज्ञो भवतीति ॥ ८॥ (G).

१११। तत्र सर्व्वलघुकमुदाहरति। यस्य करे फणिपतिवलयं, तरुणिवरा तनुमध्ये विलसति, नयनेऽनलो गले गरलं, विमलशशधरः शिरसि निवसति, सुरसरित् शिरोमध्ये वहति, स सकलजनदुरितहरः[दलनः] हसित्वा शशिधरो दुरितं हरतु तव वितरतु अभ[य]वरौ ॥ (C).

१११। अथ शक्रमुदाहरति जसु करेति। जसु कर — यस्य करे, फणिवइ वलअ — फणिपतिवलयं, तणुमह — तनुमध्ये तरुणिवर — तरुणिवरा युवतीश्रेष्ठा पार्वती विलसइ — विलसति, यस्य णअण — नयने भालस्थतृतीयनेत्रे अणल — अनलः, गल गरल — गले कंठे गरलं विषं, विमल ससि जसु सिर — विमलः एककलात्मकतया कलंकशून्यः शशी [यस्य शिरसि] णिवसइ — निवसति,

जह जह वलग्रा बड्डि[1] हइ तह तह णाम कुणेहु[2] ।
संभुहि[3] सउ[4] भण[5] भिंग[6]गण चउग्रालीस[7] मुणेहु[8] ॥
११२[9] ॥ दोहा ।

इदं च क्रियापदं नयने-इत्यादिप्रत्येकान्वयि । यस्य सिरमह—शिरोमध्ये, सुरसरि [सुरसरित्] रहइ—तिष्ठति, यस्य सग्रल जण दुरित दमण कर—सकलजनदुरितदमनकरः, सो—सः, ससिहर—शशिधरो महादेवः, हसि—हसिला, तुग्र दुरिग्र—तव दुरितं हरउ—हरतु, बितरउ ग्रभग्रबर—वितरतु ग्रभयवरम् ॥ ग्रत्र चरणस्थाः चतुर्विंशतिरपि मात्रा लघुरूपाः स्पष्टाः । ग्रत्र सो इत्योकारो लघुर्बोध्यः । (E).

१११ । यथा जसु करेति ॥ यस्य करे फणिपतेर्वलयं ॥ तरुणीवरा तनुमध्ये विलसति ॥ नयनेऽनलो गले गरलं, विमलः शशी यस्य शीर्षे निवसति ॥ सुरसरिच्छीर्षमध्ये तिष्ठति ॥ सकलजनदुरितदमनकर हसिला शशिधर हर दुरितं वितर हर ग्रतुलमभयवरम् ॥ १० ॥ (G).

११२ । ग्रत्र लघुद्वयह्रान्या एकैकगुरुवृद्धितो नामानि वक्तुमुपक्रमते । यथा यथा वलयो वर्द्धते तथा तथा नाम कुरु । शक्रमारभ्य नीला भृङ्गगणं पंचचत्वारिंशज्जानीहि ॥ वलयो गुरु-

११२ । १ बड्डइ (B), बड्ढइ (C). २ कुणेह (A & C). ३ चक्क (A), सक्क (B & C). ४ संठ (B). ५ भणि (E). ६ भृङ्ग (B). ७ पचतालीस (A), पाचतालीस (B), पाँचतालीस (C), चौग्रालीस (E & F). ८ मुणेह (A), कुणेऊ (B & C). ९ १० (A), ११ (F).

ता[1] सक्को[2] संभो सूरो गंडो खंधो बिजओ दप्पो
तालंको समरो[3] सीहो[4] सीसो[5] उत्तेओ[6] पडि[7]बक्खो ।
परिधम्म मआलु[8] मइंदो दंडो[9] मक्कलु[10] मअणु[11] मरट्टो[12]
बासंठो[13] कंठो[14] मोरो[15] बंधो[16] भमरो भिस मरट्ठो[17] ॥

[११३ । चउपइआ]

वर्द्धते — लघुद्वयस्थाने भवति, शक्रगणमारभ्य भृङ्गगणपर्य्यन्तं पंचचत्वारिंशत् भेदान् जानीहि, एकैकगुरुवृद्धिक्रमेण चतुश्चत्वा-रिंशद्गुरुर्भृङ्गनामा, शक्रः सर्व्वलघुरिति मिलिता पंचचत्वारिंश-न्नामान्याह । (C).

११२ । अथ स्पष्टतया संख्यानियतकाव्यभेदानयनप्रकारमाह जहेति । यथा यथा वलआ वड्ढि हइ — वलयं गुरुर्वर्द्धते, तह तह — तथा तथा णाम कुणेहु — [ना]म कुरुष्व, संभुहि सउ — शंभुना सार्द्धं भिंगगण — भृंगगणं भणि — भणित्वा, शंभुमारभ्य भृंग-गणपर्य्यंतमित्यर्थः, चौ[चउ]आलीस — चतुश्चत्वारिंशत्, भेदानिति शेषः, सुणेहु — जानीहि । अयं भावः — षण्णवतिलघ्वात्मक एको

---

११२ । १ Non est (F). २ Non est (E & F). ३ सरसी (C). ४ सिंहो (D & F). ५ सेसो (D). ६ उत्तेउ (B & C). ७ बलि (A), परि (B & D), पलि (C). ८ मरालु (B & C), मराल (D & E). ९ मज्जो दप्पो (C). १० मक्कर (A). ११ मथाणु (A), मथाङ्ग (B), मथाम्भ (C). १२ मरट्ट (D), मह्हरट्ठो (E), मरहट्ट (F). १३ वामपो (B & C), वासंतो (D & E), वाचंत (F). १४ कन्दो (C). १५ मेरो (B & C). १६ वन्दो (C). १७ मरहट्ट (D & F), मह्हारट्ट (E).

गुरुर्वर्द्धते, एवं यः शक्रः उक्तः तत्र च यदि लघुद्वयमूनीकृत्य तन्मात्राक एको गुरुर्वर्द्धते एवमेकोगुरुश्चतुर्णवतिर्लघवश्च यत्र पतंति, संभु[शंभु]नामा द्वितीयो भेदः । एवमग्रेऽपि बोध्यम् । ते लिखित्वा प्रदर्श्यंते, तथा । (E).

११२ । यथेति [जहेति] ॥ यथा यथा वलयो वर्धते तथा तथा नाम कुरुत ॥ शंभुमारभ्य भृंगावधिं गणय ॥ चतु[श्चत्वा]-रिंशज्जानीहि ॥ ११ ॥ (G).

[Including S'akra there are 45 varieties, besides S'akra 44.—Ed.]

११३ । तत् शक्रः शम्भुः सूरः गण्डः स्कन्दः विजयः दर्पः तालङ्कः सरभः सिंहः शीर्षः उत्तेजाः प्रतिपक्षः परिधर्म्मा मरालः मृगेन्द्रः दण्डः मर्कटः [अनुः] आन्धः[मदान्धः] मरट्टः वामस्थः कण्ठः मयूरः बन्धः भ्रमरः भिन्दः महाराष्ट्रः । (C).

११३ । गु १ ल ९४ शम्भुः, गु २ ल ९२ सूर्य्यः, गु ३ ल ९० गंडः, गु ४ ल ८८ स्कंधः, गु ५ ल ८६ विजयः, गु ६ ल ८४ दर्पः, गु ७ ल ८२ तालांकः, गु ८ ल ८० समरः, गु ९ ल ७८ सिंहः, गु १० ल ७६ शीर्षं, गु ११ ल ७४ उत्तेजाः, गु १२ ल ७२ प्रति-पक्षः, गु १३ ल ७० परिधर्मः, गु १४ ल ६८ मरालः, गु १५ ल ६६ मृगेंद्रः, गु १६ ल ६४ दंडः, गु १७ ल ६२ मर्कटः, गु १८ ल ६० कालः [?], गु १९ ल ५८ महाराष्ट्रः, गु २० ल ५६ वसंतः, गु २१ ल ५४ कंठं, गु २२ ल ५२ मयूरः, गु २३ ल ५० बंधः, गु २४ ल ४८ भ्रमरः, गु २५ ल ४६ भिन्न[न्न]महाराष्ट्रः । (E).

११३ । नामान्याह ॥ संभो इति ॥ शंभु १, सूर्य २, गंड ३,

बलहद्दो[1] राओ[2] बलिओ[3] मोहो[4] मंथाणो[5] बलि मेहो[6]
सहसक्खो[7] बालो दरिओ सरहो[8] दंभोऽहो[9][10] उदंभो[11] ।
बलिअंको तुरओ हरिणो[12] अंधो मुद्धीए[13] तह भिंगो
वत्थुआ[14] णामो[15] पिंगलणाओ[16] जंपइ[17] छंदपबंधो[18] ॥
११४[19] ॥ [चउपइआ] ।

स्कंध ४, विजय ५, दर्प ६, तालंक ७, समर ८, सिंह ९, शेष १०, उत्ते[जा] ११, प्रतिपक्ष १२, परिधर्म्म १३, मराल १४, मृगेंद्र १५, दंड १६, मर्कट १७, मदन १८, महाराष्ट्र १९, वसंत २०, कंठ २१, मयूर २२, बंध २३, भ्रमर २४, भिन्नमहाराष्ट्र २५। (G).

११४। बलभद्रः रजोबली मोहः मन्थानः परिमोहः सहस्राक्षः बालः दृप्तः समरो हस्तो भवत्युदकुम्भः। बालीरङ्कं तुरगः हरिणः अंधः मुग्धे तथा भृङ्गः, अमूः संज्ञा वस्तुनाम पिङ्गलनागो जल्पति छन्दःप्रबन्धम्। (११२ श्लोकपादे) मरट्टशब्दो गर्भवाचकः, अनुशब्दः कामुकवाची, वामण्ड इत्यत्र वामन्न इति पाठे वामनः, वस्त्विति काव्यच्छन्दसो नामान्तरम्। (C).

११४। १ बलहद्दों (E), बलभद्द (F). २ चाओ (A), राआ (E). ३ Non est (A). ४ मेह (B), रामो (D & F), मोक्खो (E). ५ मन्थाणो (B & C). ६ बलिमोहो (A, B, D & F). ७ सहसक्को (B & C). ८ मरहो (E), सनरो (C). ९ दम्भो (B & C). १० ओ (A). ११ उकुम्भो (B & C). १२ ररिणो (A). १३ मुद्धीओ (B & C), मुद्धिए (E), मुद्धो (F). १४ बच्छु-आ (A), वाबुआ (B), चउआरीसए वत्थुअ (F). १५ नामं (A), नीमो (D). १६ राओ (A). १७ जप्पइ (B & C). १८ पराओ (C), छंदबंधो (E). १९ १४ (F).

११४ । गु २६ ल ४४ बलभद्रः, गु २७ ल ४२ राजा, गु २८ ल ४० बलितः, गु २६ ल ३८ मोचः, गु ३० ल ३६ मंथानः, गु ३१ ल ३४ बलिः, गु ३२ ल ३२ मेघः, गु ३३ ल ३० सहस्राक्षः, गु ३४ ल २८ बालः, गु ३५ ल २६ दरिद्रः, गु ३६ ल २४ सरभः, गु ३७ ल २२ दंभः, गु ३८ ल २० उद्दंभः, गु ३९ ल १८ अहः, गु ४० ल १६ पलितांकः, गु ४१ ल १४ तुरंगः, गु ४२ ल १२ हरिणः, गु ४३ ल १० अंधः, गु ४४ ल ८ भृंगः। एवं पूर्वभेदापेक्षया लघुद्वयन्यूनक्रियया तत्समानमात्राकैकगुरुवर्द्धनेन च शक्रमारभ्य भृंगपर्यन्तं पंचचत्वारिंशद्भेदा बोध्याः ॥

अथ शक्रात् क्रममारभ्य चत्वारो भेदास्तृतीये विप्रदानपक्ष एव संभवन्ति। पंचममारभ्य एकचत्वारिंशत्पर्यन्तं च तृतीये जगणदानपक्षेऽपि विप्रपक्षेऽपि संभवंति। द्विचत्वारिंशत्तममारभ्य पंचचत्वारिंशत्पर्यन्तं च चत्वारो भेदास्तृतीये जगणमवलम्ब्यैव संभवन्ति। विप्रपक्षे पदचतुष्टये मिलित्वा षोडशलघूनां जगणपक्षे चाष्टगुरूणा-[लघूना]मावश्यकत्वादिति बोध्यम् ॥

अथ प्राकृतसूत्रेण शंभ्वादिभृंगांतानां पूर्वोक्तचतुश्चत्वारिंशद्भेदानां नामान्याह, ता संभो इति। शम्भुः १, सूर्यः २, गंडः ३, स्कंधः ४, विजयः ५, दर्पः ६, तालांकः ७, समरः ८, सिंहः ९, शीर्षं १०, उत्तेजाः ११, प्रतिपक्षः १२, परिधर्मः १३, मरालः १४, मृगेंद्रः १५, दंडः १६, मर्कटः १७, [?] कालः १८, महाराष्ट्रः १९, वसंतः २०, कंठं २१, मयूरः २२, बंधः २३, भ्रमरः २४, भिन्नमहाराष्ट्रः २५, बलभद्रः २६, राजा २७, बलितः २८, मोचः २९, मंथानः ३०,

पचतालीसह[1] वत्थुआ[2] छंदे[3] छंद विअंभ[4]।
अड्डा कइ पिंगल[5] कहइ चलइ[6] ण हरिहर बंभ[7]॥
११५[8]॥ दोहा।

वलिः ३१, मेघः ३२, सहस्राक्षः ३३, बालः ३४, दरिद्रः ३५, सरभः ३६, दंभः ३७, उद्दंभः ३८, अहः ३९, पलितांकः ४०, तुरंगः ४१, हरिणः ४२, अंधः ४३, तह—तथा, भृंगः ४४। हे मुद्धि—मुग्धे, ता—एतानि चतुश्चत्वारिंशदिति शेषः, वत्थुआ णाम—वस्तुकनामान्येतानि वास्तु—ता संभो सूरो गंडो खंधो विजओ दप्पो तालांको समरो सीहो सेसो उत्तेओ पडिव * * * वोकापरनामकाव्यच्छंदसः ' नामानीति यावत्, छंदपवंधो—छंदःप्रबन्धः छंदसा प्रकृष्टो बंधो यस्मात् स तादृश इत्यर्थः, पिंगलणाओ—पिंगलनागः जंपइ—जल्पति॥ (E).

११४। बलभद्र २६, राजा २७, बलित २८, राम २९, मंथान ३०, बली ३१, मोह ३२, सहस्राक्ष ३३, बाल ३४, दरिद्र ३५, शरभ ३६, दंभ ३७, अहः ३८, उद्दंभ ३९, बलितांक ४०, तुरग ४१, हरिण ४२, अंधमुग्ध ४३, तथा भृंग ४४—चतुश्चत्वारिंशत्॥ इति वस्तुनो नामानि पिंगलो नागो जल्पति छंदःप्रबंधे॥ वस्तु काव्य-नामकच्छंदः॥ १४॥ (G).

११५। १ पाँचतालीसह (B & C), पचतालीसह (E). २ वच्छु (A). ३ छंद (F). ४ विश्रमह (B & C), विभंत (F). ५ पिंगलु (F). ६ वलइ (D). ७ वम्मु (B), वमह (C). ८ ११ (A), १५ (F).

पअह्[1] असुद्धउ पंगु हीण खोडउ पभणिज्जइ
मत्तग्गल बाउलउ[2] सुसकल[3] कस सुणिज्जइ[4] ।
झल[5]वज्जिअ[6] तह बहिर[7] अंध अलंकार रहिअउ[8]
बुलउ[9] छंद[10] उट्टवण[11] अत्थ[12] विणु[13] दुब्बल कहिअउ ॥
डेरउ हट्ट[14]क्खरहिं[15] होइ काणा गुण सव्वहि रहिअ[16] ।
सव्वंगसुद्ध समरुअ[17]गुण छप्पअ[18] दोस पिंगल कहिअ[19] ॥
११६[20] ॥ [छप्पअ]

११५। पञ्चचत्वारिंशदस्तु छन्दसा विजृम्भते। तत्त्वतः कवि-पिङ्गलः कथयति न चलति हरिहरब्रह्मा ॥ वस्तुनामकच्छन्दः छन्दसा प्रकारभेदेन पञ्चचत्वारिंशद्विधं विजृम्भते, न चलति— अन्यथा न भवति, हरिहरादिनाऽन्यथा कर्त्तुं न शक्यते इत्यर्थः, अथच ग्रन्थकर्त्ता हरिहरवन्दी न चलति न भ्रान्तो भवतीत्यर्थः ॥ (C).

११५। अथ शक्रमादाय संख्यान्तरं दोहावृत्तेनाह पंचतालीसह

११६। १ पअहं (D). २ वाउॅलज्ज (B), वाउॅल (D), बाउल (E & F). ३ सुसफल (D & F). ४ कहिज्जइ (A), खुणिज्जइ (B & C), सुणिज्जसु (F). ५ फल (A). ६ वज्झिअ (B). ७ गुणरहिअ (A), गुणवहिर (B & C). ८ लंकारविरहिअउ (A), लंकारहं रयिअउ (D), लंकारहि रहिअउ (E). ९ बोलउ (A, B & C), बूलउ (E & F). १० छंदु (A). ११ उट्टिअवणु (F). १२ अच्छ (A). १३ विण (B & C). १४ अवहट्ट (A), अहट्ट (B & C). १५ रहि (E & F). १६ काणउ तह राअ रंक सव्वहि गहिअ (A), काणउ अगुण राअ अङ्क सवहिँ गहिउ (B & C). १७ रूअ (A & F), अङ्कसरिसगुण (B), रसरूअगुण (C). १८ कव्वह (E). १९ पिङ्गले कहिउ (B & C), पिंगलु कहिअ (D). २० १३ (A), ११ (F).

इति। वत्युग्रा छंदे—वास्तुकच्छंदसि वास्तुकापरनाम्नि काव्यच्छंदसीति यावत्, पंचतालीसह—पंचचत्वारिंशत् छंद—छंदांसि भेदा इति यावत्, विग्रंभ—विजृंभतें इति अद्धाकइ—साचात्कृत्य, पिंगल कहइ—पिंगलः कथयति, अत्र हरिहरब्रह्मणोऽपि न चलंति, तेऽप्येनमन्यथा न कुर्वंतीति भावः॥ (E).

११५। पंचेति॥ पंचचत्वारिंशद्वस्तुनश्छंदसो भेदा विजृंभन्ते॥ शक्रनामकसर्वलघुभेदेन सहेत्यर्थः॥ अद्धेति॥ अद्धा कविः पिंगलः कथयति, चलंति न हरिहरब्रह्माणः॥ चलंति अन्यथा कर्त्तुमसमर्था इत्यर्थः॥ १५॥ (G).

११६। अथ षट्पद[स्य] ये दोषाः काव्यच्छन्दसोऽपि ते दोषा इत्यतः षट्पददोषानाह। पदमशुद्धं पङ्गुः, हीनः खोडः, मात्राधिको वाहूलः, शून्यकलः काणो जायते। झलवर्जितो गुणरहितः, अन्धोऽलङ्काल[र]रहितः, वोडश्छन्दउत्थापनं, अर्थेन विना दुर्ब्बलः कथितः, टेरो हटः, काणोऽगुणः, राजाङ्गैः सर्वैर्गृहीतः सर्व्वाङ्गशुद्धो रसरूपगुणः षट्पददोषः पिङ्गलेन कथितः॥ पदमशुद्धश्चेत्तदा पङ्गुः, पदस्याशुद्धता जगणादिनियमराहित्यं। हीनो गणहीनः। मात्राधिकः पञ्चविंशत्यादिमात्रायुक्तः, शून्यकलः त्रयोविंशत्यादिमात्रः। झलवर्ज्जितः झलप्रत्याहाररहितः, तेन झलप्रत्याहारे ये वर्णा झभघढधादयस्तद्राहित्यं न कार्य्यमन्तरा अन्तरा तादृशवर्णा देया इति भावः। उपमादयोऽलङ्काराः। षट्कलादिस्थाने पञ्चकलादियोगे छंदस उत्थापनं, तेन वोडोभग्नः। अर्थाभावे दुर्ब्बलः। हठः प्रतिपदमैत्रीरहितः, स टेरः

केकराक्षो भवति। प्रसादादिगुणरहितः काणो बधिरः। सर्व्वै-रङ्गैर्यथोक्तविन्यासविशिष्टः सकलमात्राभिर्युक्तश्चेद् राजा भवति। शृङ्गारवीरादिरसानुरूपगुणयुक्तः सर्व्वाङ्गशुद्धः। अत्रालंकारादि-राहित्यं काव्यदोषो न छन्दोदोष इति ध्येयम्। (C).

११६। अथ काव्ये वर्जनीयदोषानाह पअह इति। पअह असुद्धउ—पादैः अशुद्धः न्यून इत्यर्थः पंगुः इत्युच्यते, पादचतुष्टय-मध्ये एकेनापि चरणेन हीनश्चेत्तदा पंगुरित्यर्थः। यत्तु पदे अशुद्धः प्राकृतव्याकरणदुष्ट इत्यर्थ इति तन्न, तथा सति संस्कृतरचित-काव्यस्य दुष्टत्वात्। हीनः पूर्वोक्तेन केनापि गणेन हीनश्चेदित्यर्थः तदा सः खोडउ—खंजः पभणिज्जइ—प्रभण्यते। यत्तु मात्रया हीन-इत्यर्थ इति तन्न, शून्यकलेत्यनेन पौनरुक्त्यापत्तेः। मत्तग्गल—मात्रयाधिकः लक्षणोक्तमात्रापेक्षया एकया एकयापि मात्रया अधिक इत्यर्थः, बाउल—व्याकुलः। सुण्णकल—शून्यकलः एकयापि मात्रया न्यून इत्यर्थः कण्ण सुणिज्जइ—काणः श्रूयते। तथा झलवज्जिअ—झकारलकाराभ्यां वर्जित इत्यर्थः वहिर—बधिरः। अलंकारैः रहितः अंधः। छंदउट्टवण विणु—छंदसः यत् उट्टवनम् उट्टवनिका तां विनेत्यर्थः, उट्टवनिकायां क्रियमाणायां यदि आद्यंतषट्कलस्थाने सप्तकलः पंचकलो वा पतति, एवं मध्यस्थचतुष्क-लेषु यदि कश्चित्पंचकलस्त्रिकलो वा भवति, तृतीये च जगण-विप्राभ्यामन्य एव गणः पततीत्यर्थः बूलउ—मूकः कथितः। अत्थ विणु—अर्थेन विना, दुब्बल कहिअउ—दुर्ब्बलः कथितः। टट्ठ-क्खरहि—टठाक्षरैर्टटाक्षरैरक्षरैः परस्परमैत्रीरहितैरित्यर्थः [डेरउ]

—डेरः केकरः होइ—भवति। गुण सब्बहि—सर्व्वगुणैः प्रसाद्-प्रभृतिभिः रहितः काणा—काणः भवति। एते कब्बह दोस—काव्यस्य दोषाः, सब्बंगसुद्ध समरूअगुण—सर्वांगशुद्धसमरूपगुणः सर्वांगे शुद्धः, समौ रूपगुणौ यस्य सः समरूपगुणः, सर्वांगशुद्धश्चासौ समरूपगुणश्च तादृशेन पिंगलेन कथिताः। अत्र हिअ इत्यक्षरद्वयमेकं बोध्यं "बण्णो वि तुरिअ पढिओ" इत्युक्तेः [Vide श्लोकः ८, p. 11. —Ed.] अन्यथा मात्राधिक्यापत्तिः। (E).

११६। पादे अशुद्धः पंगुः हीनः खंजः प्रभण्यते। हीनो मात्रादिन्यूनः, मात्राधिको वातुलः, शून्यकलः कर्णः [?] श्रूयते॥ झकारलकाराभ्यां वर्जितस्तदा बधिरोऽंधोऽलंकाररहितः, मूकस्त्रुटितवर्णोऽर्थेन विना दुर्बलः कथितः, केकरो हठाक्षरैर्भवति, काणः सर्व्वगुणैरहितः। हठेति—हठाच्छिन्नाक्षरमित्यर्थः। सर्वांगशुद्धेन समरूपगुणेन षट्पददोषाः पिंगलेन कथिताः॥ १६॥ (G).

[Hereafter the following śloka is seen in MS. (A) only.—Ed.]

कइ पीडइ पंगुलउ लच्छिअ पहरिअइ खोडउ
कुलहाणिअ बाउलउ कन्न होइ पउर सक्कोलउ।
सुद्धि हरइ बिमलंगु दुमण होइ अद्ध पआसइ
दुब्बल उब्बण वहइ देउलउ किंत्ति विणासइ॥
काण कुब्ब वऊदुक्खकरु
पिंगल जंपइ कवि अणउ।
तलउ जाणि छप्पअ करउ
सेस रहिज्जउ गुणिजणउ॥ १४॥

बिप्प होअ[1] बत्तीस खत्ति बेआल[2] करिज्जसु[3]
अठतालिस[4] लहु बेस[5] सेस सुद्दउ सलहिज्जसु ।
चउअग्गल[6] पअ बीस[7] मत्त[8] छाणबइ[9] ठबिज्जसु
पंचताली[लि]सह[10] णाम कब्बलक्खणह करिज्जसु[11] ॥
छहबिस[12] उल्लालहि[13] एक्ककइ[14]
बिण्णि पाअ छप्पअ मुणहु[15] ।
समबण्ण[16] सरिससमदोसगुण[17]
णाम एहत्तरि[18] परिगुणहु[19] ॥ ११७[20] ॥ षट्पदम् ।

११७ । जातिदोष[भेद]माह । विप्रलोको द्वाविं[त्रिं]शता—क्षत्रियो द्विचत्वारिंशता—[अष्टचत्वारिंशता] लघुभिर्वैश्यः, शेषैः शूद्रः श्लाघ्यताम् । चतुरधिकचत्वारिंशद्गुरुभिर्मात्राः षण्णवतिः स्थाप्यते । पञ्चचत्वारिंशन्नाम काव्यलक्षणं क्रियताम् । षड्विंशतिरुल्लाले एकीकृत्य द्वौ पादौ षट्पदं जानीहि । समवर्णं सदृशगुणं नामान्येकसप्ततिं जानीहि ॥ द्वाविं[त्रिं]शतेत्यादौ लघुभिरित्यनुषज्यते । शेषैस्ततो-

११७ । १ होअ (A, B & C), होइ (E). २ बेआलीस (F). ३ भणिज्जसु (A). ४ अठताली (B), आठताली (C). ५ बिस (B & C). ६ चउग्गल (B & C). ७ चालीस (B), चालीसगुरुहि (C). ८ मत्ता (F). ९ छाणवहि (B), छन्नवइ (C). १० पाँचतालीसह (B & C). ११ भणिज्जसु (D). १२ छहवीस (A & F), छअवीस (B), छअविस (C), छहवील (D). १३ उल्ला- लउ (A, B & C), उल्लाल (D & F). १४ एक्ककरि (A, B & C). १५ मणउ (A). १६ समवण्णहि (B), समवण्णहि (C). १७ सरिसगुण (A), उसरिगुण (B), उपरिगुण (C), सरिसदोसगुण (F). १८ ए short, vide श्लोक ५, p. 7. १९ परिमुणउ (B, C, E & F), परिलुणह (D). २० १५ (A), १७ (F).

ऽधिकैः, श्लाघ्यतां कथ्यताम् ॥ चतुर्विंशतिमात्रैश्चतुर्भिः पादैः षण्णवति-मात्रा भवन्ति, तत्र चतुश्चत्वारिंशद्गुरवः सन्ति, पञ्चचत्वारिंशन्नामकं काव्यलक्षणं क्रियतामुल्लालपादयोर्मिलित्वा षड्विंशतिर्गुरवः सन्ति। अत्र च प्रतिपादं जगणस्थाने लघुद्वयमावश्यकं, तेन पादचतुष्टयेऽष्टौ लघव आवश्यकाः, अवशिष्टा अष्टाशीतिर्मात्राश्चतुश्चत्वारिंशद्गुरुभिः सम्भवन्ति, एवमुल्लालपादद्वये लघुचतुष्कमावश्यकं प्रतिपादं त्रिकल-गणद्वयस्य वक्ष्यमाणत्वात्। अवशिष्टा द्विपञ्चाशन्मात्राः षड्विंशति-गुरुभिः सम्भवन्ति, तेन षट्पदे सप्ततिर्गुरवः सम्भवन्ति। किन्तु जगणस्थाने चतुर्लघुकरणाद्द्विपञ्चाशदधिकशतमात्राः केवललघुभि-रपि सम्भवन्ति, ततश्चैकैकगुरुवृद्धिक्रमेण सप्ततिर्गुरवः संभवन्ति। (C).

११७। अथ वर्णलघुभेदेन काव्यस्य जातिमेकैकचरणस्थां चरणचतुष्टयसमुदितां च मात्रां कथयन् भूयोऽपि भेदसंख्यामनु-वदन् उल्लालगुरुसंख्यामुपदिशन् काव्योल्लालाभ्यां षट्पदं वृत्तं भवति तस्य चैकसप्ततिर्भेदा भवन्तीति षट्पदेनैवाह विप्पेति। विप्प—विप्रे विप्रजातीये काव्ये बत्तीस—द्वात्रिंशत् लहु—लघवः होइ—भवंति, खत्ति—क्षत्रिये क्षत्रियजातीये काव्ये बेआल—द्विचत्वारिंशत् लघवः करिज्जसु—क्रियंतां, वेस—वैश्यः अटतालिस—अष्टचत्वारिंशत् लघवः क्रियंतामिति पूर्वेणै-वान्वयः, सेस—शेषा उर्वरिता इति यावत् लघवः सुद्दहि[उ]—शूद्रजातीये काव्ये सलहिज्जसु—श्लाघ्यंतां, पअ—पाद एकैक-चरण इत्यर्थः काव्यस्येति भावः चउअग्गल—चतुरधिकाः बीस—विंशतिः चरणचतुष्टये च इति शेषः, छाणवइ—षण्णवतिः मत्त

— मात्राः ठविज्जसु — स्थाप्यंतां, कव्वलक्खणहि[ह] — काव्यलक्षणे पंचतालीसह णाम — पंचचत्वारिंशन्नामानि पूर्वोक्तानि शक्रादीनि शृंगांतानीति भावः करिज्जसु — क्रियंतां, उल्लालहि — उल्लाले छहविस — षड्विंशतिं गुरून् जानीहीति शेषः, बिहि पाअ — द्वयोः पादान् काव्योल्लालयोश्चरणान् एक्ककइ — एकीकृत्य, सम-बण्ण — समा वर्णाः काव्योल्लालसमानाः वर्णा गुरुलघुरूपा यस्मि-न्नत्तादृशमित्यर्थः सरिससमदोसगुण — सदृशसर्वदोषगुणं सदृशाः काव्यसमानाः सर्व्वे दोषा गुणाश्च यस्य तत्तादृशमित्यर्थः छप्पअ — षट्पदं वृत्तं मुणहु — जानीत, तस्य चेति शेषः एहत्तरि णाम — एकसप्ततिनामानि परिमुणहु — परिजानीतेति योजना। एह-त्तरीत्येकारो लघुर्बोध्यः। अयमर्थः — काव्यचरणचतुष्टयस्याश्चतु-श्चत्वारिंशत् गुरवस्तृतीयजगणदानपक्षे चाष्टौ लघवः, उल्लालचरण-द्वयस्याश्च षड्विंशतिर्गुरवः, पादद्वयस्थत्रिकलचतुष्टयांतर्गताश्च चत्वारो लघ[व] एवं मिलित्वा सप्ततिर्गुरवो द्वादश लघवश्च षट्पदे पतंति, तत्र चैकैकगुरुह्रासेन क्रमेण तत्समानसंख्याकलघुद्वयवृद्ध्या एकसप्ततिर्भेदा भवंति। तांश्च भेदाननुपदमेव प्रपंचयिष्याम इति सुधीभिर्ध्येयम्। (E).

११७। जातिभेदमाह ॥ बिप्पेति ॥ विप्रा भवति द्वात्रिंशद्भिः, क्षत्रिया द्विचत्वारिंशद्भिः॥ अष्टचत्वारिंशद्भिर्वैश्या, शेषैः शूद्रि[द्रा]णी स्थाप्यतां॥ चतुरधिका पदे विंशतिर्मात्राः, षण्णवतिः स्थाप्यतां॥ चरणचतुष्टये इत्यर्थः॥ पञ्चचत्वारिंशन्नामानि काव्यलक्षणस्य· क्रियंतां॥ सर्वलघुशक्रभेदेन सहेत्यर्थः॥ षड्विंशतिमुल्लालस्यैकीकृत्य

अह उल्लाल लक्खण[1]। (B).

तिण्णि[2] तुरंगम तिअल[3] तह[4] छह[5] चउ तिअ तह[6] अंत[7]।
एम उल्लाल[8] उट्टवहु[9] विहु[10] दल छप्पण मत्त॥ ११८[11]॥

दोहा।

द्वौ पादौ षट्पदे जानीत॥ उल्लालचरणद्वये लघुचतुष्टयं षड्विंशतिगुरूंश्चैकीकृत्य चरणद्वयमेवं षट्पदं जानीतेत्यर्थः॥ समवर्णसदृशदोषगुणनामानि एकसप्तति परिजानीत॥ अत्र यथा काव्यदोषास्तथा उल्ला[ल]स्यापि भवंति॥ एवं [पंच]चत्वारिंशत्काव्यभेदाः षड्विंशतिरुल्लालस्येति एकसप्ततिर्भेदा इत्यथ उल्लालेऽपि एकसप्ततिर्भेदा भवंतीत्यर्थः॥ (G).

११८। अथोल्लाले गणनियममाह। त्रयस्तुरङ्गमास्त्रिकलगणस्तथा षट् चत्वारस्त्रयस्तथा अन्ते, एवमुल्लाल उत्थाप्यतां षट्पञ्चाशन्मात्राः॥ तुरङ्गमशब्दश्चतुष्कलवाची, ततः त्रिकलः, ततः षट्कलस्ततश्चतुष्कलः ततस्त्रिकलः एवमष्टाविंशतिकलः पादः, दलद्वयेन च षट्पञ्चाशन्मात्रा भवन्ति॥ (C).

११८। अथ षट्पदोपोद्घातेनोल्लालं लक्षयति तिण्णि तुरंगमेति। प्रथमं तिण्णि[—त्रयः] तुरंगमाश्चतुष्कला गणाः, तह — ततः, तिअल

११८। १ अथोल्लाललक्षणं (A), अथ उल्लाललक्खण (C), अथोल्लाल (D). २ तिणि (A & D). ३ तीअ (F). ४ लङ्ग (F). ५ छअ (B & C), छउ (F). ६ लङ्ग (B), तिलङ्ग (C), तेहि (E). ७ अणु (C), अंते (E). ८ उल्लाला (A, B & D). ९ संठ (A) उट्टरण (B & C). १० विह (D). ११ ११ (A), १८ (F).

—त्रिकलः गणः, तेहि अंत—तस्य त्रिकलस्यांते छह चउ तिन्न—षट् चतस्रः तिस्रः मात्रा इति शेषः प्रत्येकं योजनीयः, एम—एवं, बिह्न दल छप्पण मत्त—द्विदलषट्पंचाशन्मात्राकं द्वयोर्दलयोर्मिलित्वा षट्पंचाशन्मात्रा यस्य तत्तादृशमित्यर्थः, उल्लाल—उल्लालं उल्लालनामकं वृत्तं, उट्टवऊ—उट्टवयत उट्टवनिकाविषयं कुरुतेति यावत्। अथवा षट्पंचाशन्मात्राकमुल्लालं बिह्न दल—द्वयोर्दलयोरुट्टवयत, एम—[ए]वं दलद्वयेऽपि गणान् विभजत॥ इदमत्रावधेयम्। त्रिचतुष्कलानां षट् गुरवस्तदनंतरपतितस्य त्रिकलस्य च एको गुरुस्तदनंतरपतितस्य षट्कलस्य च त्रयो-गुरवस्तदनंतरपतितस्य चतुष्कलस्य च गुरुद्वयं तदनंतरपतितस्य त्रिकलस्य चैको गुरुरेवं प्रतिचरणं त्रयोदशगुरवो लघुद्वयं चैव-मष्टाविंशतिर्मात्राः एके दले पतंति, दलद्वये च मिलित्वा षड्विं-शतिर्गुरवश्चत्वारश्च लघवः एवं षट्पंचाशन्मात्राः पतंति। एवं च काव्यवदुल्लालेऽपि सर्वे वर्णा गुरुरूपा न संभवंति। तथा हि यदि त्रिकलो गुर्वादिस्तदंतो वा दीयते, तदा एकैकपादे त्रिकल-द्वयांतर्गतं लघुद्वयमावश्यकं, द्वयोर्दलयोश्च लघुचतुष्टयं, यदि च त्रिकलस्य मात्रात्रयमपि लघुरूपमेव क्रियते, तदा तु त्रिकल-द्वयस्य षट् लघ[व] एकैकचरणे, द्वयोर्दलयोश्च द्वादश लघवः आवश्यका इति कथमपि उल्लाले सर्वे वर्णा गुरुरूपा न संभवंत्येव, लघुरूपास्तु संभवंत्येव, त्रिकलानामपि सर्वलघुरूपाणां संभवादत-एव क्वचित्सर्वगुर्वात्मकवर्णसमय[?]मुदाहरणमपि दृश्यते तल्लेखक-प्रमादात्पतितमिति बोध्यम्। अत्राप्येकैकगुरुह्रासेन क्रमेण लघु-

जहा[1], जाआ जा अद्धंग[2] सीस[3] गंगा लोलंती
सव्वासा पूरंति सव्व[4] दुक्खा[5] तोलंती ।
णाआ राआ हार[6] दीस[7]वासा भासंता[8]
वेआला जा संग[9] णट्ठ[10] दुट्ठा[11] णासंता ॥
णाचंता[12] कंता उच्छ्छवे[13] ताले भूमी कंपले ।
जा दिट्ठे मोक्खा पाविज्ज[14] सो तुम्हाणं सुक्ख[15] दे[16] ॥
११९[17] ॥ [छप्पअ]

द्वयवृद्ध्या सर्वलघ्वन्ताः सप्तविंशतिर्भेदाः संभवंति, ते च ग्रंथकृता न प्रदर्शिताः, अप्रदर्शिता अपि स्वयमूहनीयाः, मया तु ग्रंथविस्तर-भयान्न प्रदर्शिता इति सुधीभिर्विभावनीयम् । (E).

११८ । अथोल्लाललक्षणमाह ॥ तिण्णीति ॥ त्रयस्तुरंगमास्त्रिकलः षट्कलश्चतुष्कलस्त्रिकलस्तस्यांते ॥ एवमुल्लालमुद्दवयंतु द्वयोर्दलयोः षट्पंचाशन्मात्राः ॥ तुरंगमश्चतुर्लघुः ॥ (G).

११९ । तत्र सर्व्वगुरुमुदाहरति । जाया यस्यार्द्धाङ्गे, अङ्गे गंगा लोलते, सर्व्वाशाः पूरयति यः सर्व्वाणि दुःखानि त्रोटयति, नागराजहारः दिशो वासः भासते, वेताला यस्य सङ्गे नष्टान्

---

११९ । १ सव्वगुरु जहा (E). २ अद्धंगे (A & C), जाआधंगे (D). ३ Dropt in (A), अङ्ग (B & C), सीसे (D). ४ सव्वा (A), सव्वतो (D). ५ दुःखं (B & C), दुखाँ (D). ६ हारा (A & D). ७ दीसा (A & D). ८ Dropt in (D), वासंता (E). ९ संगे (A, C & D). १० णट्ठा (A), dropt in (D). ११ उट्ठा (E). १२ णचंता (A). १३ उच्छवे (B, C & F). १४ पाविज्जे (A), पाविज्ञा (B, C & D), पाइए (F). १५ सुक्खं (A), सुम (B), तुम्भाणं सुम (C), सुक्खा (D). १६ दो (D, E & F). १७ १६ (A), १९ (F).

दुष्टान् नाशयति। नृत्यति कान्तया[या] उच्चैर्वेतालैः भूमिं कम्पयन् यस्य दृष्ट्वा मोक्षः प्राप्यते, स युष्माकं सुखं ददातु ॥ अत्र च प्रथमचतुर्थपादयोरेकारस्य वर्णमिलितस्य लघुत्वात् तृतीये जगणो न विरुद्ध्यते, किन्तु आवश्यकलघुव्यतिरिक्तानां सर्व्वेषां गुरुत्वादस्य सर्व्वगुरुत्वमिति ध्येयं, न तु सर्व्व एव गुरुरिति भ्रमः कार्य्यः। (C).

११९। अथ काव्योल्लालयोः सर्वगुर्वात्मकमाद्यभेदमुदाहरति जाआ जा अद्धंगेति। जा अद्धंग — यदर्द्धाऽंगे जाआ — जाया पार्वतीति यावत् शोभते इति शेषः, अग्रेऽपि योजनीयः, सीस — शीर्षे सव्वासा पूरंति — सर्वाशाः पूरयंती सव्वदुक्खा तोलंती — सर्व्वदुःखानि त्रोटयंती एतादृशी गंगा लोलंती — लोलायमाना। अत्र गंगाविशेषणद्वयं पार्वत्या अपि योजनीयम्। यस्य णाआ राआ हार — नागराजहारः नागराजस्य वासुकेर्हारो-यस्य तादृश इत्यर्थः। यस्य दीसव्वासा वासंता — दिग्वासो वसानः। जा संग — यत्संगे णट्ठ उट्ठा णासंता — नष्टदुष्टान् नाशयंतः, अत्र नष्टशब्दो धूर्त्तवाची, तथाच धूर्ता ये दुष्टा वैरिणस्तान् नाशयंत-इत्यर्थः, उच्छ्‌वे — उत्सवे कंता — कांतं यथा स्यात्तया णाचंता — नृत्यंतः, ताले भूमी कंपले — तालकंपितभूमयः, अथवा येषां तालेन भूमिः कंपिता, तादृशा वेआला — वेतालास्तिष्ठंतीति शेषः। जा दिट्ठे — यस्मिन्दृष्टे मोक्खा पाविज्ज — मोक्षः प्राप्यते, सो तुम्हाणं — स युष्मभ्यं सुक्ख दो — सुखं ददातु। अत्र जाआ जा अद्धंगेत्यारभ्य णट्ठ उट्ठा णासंता एतावत्पर्यंतं पादचतुष्टयं काव्यस्योदाहरणमेतदग्रे च चरणद्वयमुल्लालस्येति बोध्यम्। (E).

चउआलिस[1] गुरु कव्वके[2] छह[3]वीसउ[4] उल्लाल।
जं[5] गुरु टुट्टइ लहु[6] बढइ[7] एहत्तरि[8] पत्थार[9] ॥ १२०[10] ॥
दोहा।

११९। अथ षट्पदस्य आल्लूली‍प्रस्तारगतं सर्वगुरुभेदमुदाहरति ॥ सर्वगुरुभेदो यथा॥ जाआ इति॥ जाया ज[य]स्यार्द्धांगे शीर्षे गंगा लुठंती, सर्वाशाः पूरयति सर्वदुःखानि त्रोटयति। नागराजो हारः दिग्वासो भासते, वेताला यस्य संगे नष्टदुष्टान्नाशयंति ॥ नृत्यत्[ति] कांतमुल्लवे ताले भूमिः कंपिता। यस्मिन्दृष्टे मोचः प्राप्यते, स युष्माकं सुखं ददातु ॥ १९ ॥ (G).

१२०। एतदेव स्पष्टयन्नाह। चतुश्चत्वारिंशद्गुरवः काव्यस[स्य] षड्विंशतिरुल्लालस्य। यद्गु[रु]स्त्रुट्यति लघुर्वर्द्धते एकसप्ततिः प्रस्ताराः — काव्यच्छन्दसः॥ (C).

१२०। अथ षट्[पद]भेदानयनप्रकारमाह चउआलिसेति। चउआलिस गुरु कव्वके — [चतुः]चत्वारिंशद्गुरवः काव्यस्य, छहवीसह — षड्विंशतिर्गुरवः इत्यनुषंगः, उल्लाल — उल्लालस्य। जं गुरु टुट्टइ — यः गुरुस्त्रुटति, लहु बढइ — लघुर्वर्द्धते, अतः एहत्तरि — एकसप्ततिः पत्थार — [प्रस्तारः] भेदेषणा भवतीति शेषः॥ भावस्तु पूर्वमेवोक्तः। (E).

१२०। १ चउआलीस (B & C), चउआल (D), चउवाली (F). २ कव्वक (F). ३ छप (B & C). ४ वीस गुरु (B), विस (C), वीसु (D), वीसह (E), वीस (F). ५ Non est (B & C). ६ वेलङ (A & B). ७ चलइ (A, B, & C). ८ एहत्तर (F). ९ पच्छार (A). १० १७ (A), २० (F).

अथ शाल्मली[ली]प्रस्तारः । (A).

अजअ वेआसी[1] अक्खर[2] गुरु सत्तरि रवि रेह ।
एक्कक्खर[3] चल[4] गुरु घटइ[5] दुद्दुइ[6] लहुआ देह[7] ॥१२१[8]॥
दोहा ।

१२० । अथ भेदानयनप्रकारमाह ॥ चउ इति ॥ चतुश्चत्वारिंश-द्गुरवः काव्ये षड्विंशतिश्चलाले । यथा गुरुस्त्रुट्यति लघुर्वर्धते एक-सप्ततिः प्रस्तारः ॥ सर्वलघुभेदेन सहैकसप्ततिर्भेदा भवंतीत्यर्थः ॥ २० ॥ (G).

१२१ । प्रस्तारं दर्शयति अजअ इति । अजये द्व्यशीत्यक्षराणि गुरवः सप्तती रविरेखाः । एकाक्षरं चलति गुरुस्त्रुटति द्वौ द्वौ लघू आनय ॥ एकसप्ततिप्रस्तारेषु प्राथमिकमजयनामकं छन्दः, तत्र द्विरशीत्यक्षराणि भवन्ति, तत्र सप्ततिर्गुरवः रविरेखा द्वादश लघवः, षट्सु पदेषु एकसप्ततिमध्ये एकमक्षरं चलति ह्रसति तेन गुरुस्त्रुट्यति तत्स्थाने लघुद्वयं स्थाप्यते, इत्येवंक्रमेणैकसप्ततिर्भेदाः भवन्ति । (C).

१२१ । अथैनमेवार्थं प्रकारांतरेणाह, अजअ इति । गुरु सत्तरि — गुरवः सप्ततिः, रवि रेह — रविरेखाः रविसंख्याका रेखाः

---

१२१ । १ वेआसि (C), बयासी (E), वेअसी (F). २ अक्खरह (A, B & C), अक्खरहि (E), अक्खरउ (F). ३ एकक्खर (B & F). ४ चलइ (A), चढ (D & E), चढइ (F). ५ घलइ (A, B & C). ६ दुइ (A), दुऊइ (C), दइमपरि (D), दुदुइ (E), दु तह दुइ (F). ७ देउ (A), लेह (E & F). ८ १८ (A), ११ (F).

अजअ[1] बिजअ[2] बलि कस[3] बीर बेआल बिहस्सरु[4]
मक्कलु[5] हरिहर बंभ[6] इंदु[7] चंदणु सुसुहंकरु[8]।
साण[9] सीह[10] सद्दूल[11] कुम्म कोइल खर[12] कुंजरु
मअण[13] मच्छ तालंक[14] सेस सारंग[14] पओहरु[15]॥
ता[16] कुंद कमलु[17] बारण[18] भसल[19]
सरहु[20] जंगमु[21] सर बिल हइ[22]।
सुसऊ[23] समरु[24] सारसु सरअ[25]
छप्पअ[26] णाम पिंगलु[27] कहइ॥ १२२[28]॥ छप्पअ।

द्वादश लघव इति यावत्, एवं बयासी [बेआसी] अक्खरहि—द्व्यशीत्यक्षरैः अजअ—अजयनामा षट्पदस्य प्रथमो भेद इत्यर्थः। तत्र गुरु घटइ—एकैकगुरुर्ह्रसति, दुहुइ लहुआ लेइ[ह]—द्वौ द्वौ

१२२। १ अजउ (B & C). २ बिजउ (B, C & D), बिच (E). ३ कण (A & B). ४ बिहसलु (B), बिहसल (A & C), बिहसाठ (E). ५ मक्कल (A & C). ६ बम्ह (B). ७ इन्द (B). ८ सुहत्कार (A), भयक्कर (C), सुसहंकाव (D), सुहंकर (F). ९ साणु (A), साल (C). १० सिंह (D & F). ११ सद्दूल (D). १२ खर (B & C). १३ अमण (F). १४ Transposed in (B & C). १५ हर (A, E & F). १६ Non est (E). १७ कमल (A, B & C). १८ बाल (C). १९ भसण (B & C), dropt in (D & F), transposed in (E). २० सुरड (A), सरह (C). २१ अचमर (A), अजंम (B), मिचंक (C), जंमस (D), जंगलु (E). २२ लुठ लहइ सर (A), पुठ बिलहइ सव (B), सर बिल बिचइ (C), जइथ इवि लहइ सव (D), इथ ठवि लीहइ (E), जुइइह हा सव (F). २३ Dropt in (B), सव (C), सुसव (D, E & F). २४ Dropt in (B), पुक्खर (C). २५ सरऊ (A), dropt in (B & C), सरसु (E). २६ छप्प (C). २७ पिंगल (A, B & C). २८ १९ (A), ११ (F).

लघुकौ ग्राह्यौ वर्द्धनीयाविति यावत्। एवं सति एक्कक्खर चढ — एकैकमक्षरं वर्द्धते [* *]॥ अयमर्थः। तृतीयजगणपक्षे काव्यस्य [चतुः]चत्वारिंशद्गुरवः अष्टौ लघव उल्लालस्य षड्विंशतिर्गुरवश्चत्वारो-लघव एवमुभयोर्मिलित्वा सप्ततिर्गुरवो द्वादश लघवो यत्र पतंति स अजयः, तत्र च यदि एकैको गुरुर्ह्रसति तत्समानसंख्याक-मात्राकं च लघुद्वयं वर्द्धते, एवं च पूर्वपूर्वभेदापेक्षयोत्तर[रोत्तर]-भेद एकैकमक्षरं वर्द्धते तदा ते ते भेदा भवंति। एतस्यैव प्रस्तारस्य शाल्मलीप्रस्तारसंज्ञा। (E).

१२१। अस्य शाल्मल्यभिधस्य प्रस्तारस्य विशेषमाह॥ अजेति॥ अजये द्व्यशीत्यक्षराणि, गुरवः सप्ततिः, रवयो रेखाः॥ एकाक्षरं वर्धते, गुरुस्त्रुट्यति, तदा द्वौ द्वौ लघू गृहाण॥ अजयनाम्नि भेदे द्व्यशीत्यक्षराणि भवंति॥ तत्र सप्ततिर्गुरवो द्वादश लघव इति॥ (G).

१२२। अथैकसप्ततिभेदानां नामान्याह। अजयो विजयो बलिः कर्णो वीरो वेतालो बृहन्नलो मर्कटो हरिहरौ ब्रह्मा इन्द्रश्चन्दनं भयंकरः श्वा सिंहः शार्दूलः कूर्मः कोकिलः खरः कुञ्जरो मदनो मत्स्यः सारङ्गः शेषताड़ङ्कः पयोधरः कुन्दं कमलं बालभसनः सरभः मृगाङ्कः शरं विलं हितं[?] सरः पुष्करः समरं सारं सुकरः षट्पदे नाम पिंगलः कथयति॥ (C).

१२२। अथैकसप्ततिभेदानां नामान्याह अजअ इत्यादिना। अजयः १, विजयः २, बलिः ३, कर्णः ४, वीरः ५, वेतालः ६, बृहन्नटः ७, मर्कटः ८, हरिः ९, हरः १०, ब्रह्मा ११, इंदुः १२, चंदनं १३, शुभंकरः १४, श्वा १५, सिंहः १६, शार्दूलः १७, कूर्मः

मेरु मअरु[1] मअ सिद्धि बुद्धि करअलु[2] कमलाअरु[3]
धवल[4] मलउ[5] धुअ कणउ[6] किसणु[7] रंजणु[8] मेहाअरु[9] ।
गिम्ह[10] गरुड[11] ससि सूर सल्ल[12] णवरंग मणोहरु[13]
गअणु[14] रअणु[15] णरु[16] हीरु[17] भमरु[18] सहेरु कुसुमाअरु[19] ॥
ता दिप्पु[20] संखु[21] वसु सद्द[22] मुणि णाअराअ पिंगलु[23] कहइ ।
छप्पअ[24] णाम[25] एहत्तरिहि[26] छंदआर पत्थरि[27] लेहइ[28] ॥
१२३[29] ॥ छप्पअ ।

१८, कोकिलः १९, खरः २०, कुंजरः २१, मदनः २२, मत्स्यः २३, ताडंकः २४, शेषः २५, सारंगः २६, पयोधरः २७, कुंदः २८, कमलं २९, वारणः ३०, शरभः ३१, भमलो — भ्रमरः भास्वरश्च ३२, जांगलः ३३, शरः ३४, सुसरः ३५, समरं ३६, सारसः ३७, सरसः ३८, इअ — इति छप्पअ णाम — षट्पदनामानि ठवि —

१२३। १ मअर (E). २ कलअरु (A). ३ कमलाकरु (E), कमलाएु (F). ४ धवलु (B & C). ५ मणउ (D & F), मअण (E). ६ कण (A & B), धअ (C), कणअ (E). ७ किसउणु (A), किसइ (B), किसअ (C), कीसणु (F). ८ रंजण (A). ९ मेहासु (E). १० गिह्म (A & D), गीम्ह (B). ११ गरल (A), गवल (B & C). १२ सलण (A), मन्द (C). १३ पओहरु (A). १४ गअण (A), गअसु (D). १५ रअण (A), रअसु (D). १६ रणु (D). १७ हारु (A). १८ भमारु (D). १९ कुसुआअरु (B). २० ता दीप्पु (B), ता दिप्प (C & F), ता दिप्पं (E). २१ संख (D), स (E). २२ सकु (B), रुद्द (C). २३ पिंगल (A & F). २४ कप्पअहँ (D), कप्पइ (E). २५ साम (B). २६ एहत्तरहि (B & C). २७ पत्थरि (A). २८ लहइ (A & D), किज्जइ (B & C), कइइ (F). २९ २० (A), २३ (F).

स्थापयित्वा लेहइ—लभ्यंत इति पिंगल कहइ—पिंगलः कथयति॥ (E).

१२२। अथ नामान्याह॥ अजयः १, विजयः २, बलिः ३, कर्णः ४, वीरः ५, वेतालः ६, बृहन्नलः ७, मर्कटः ८, हरिः ९, हरः १०, ब्रह्मा ११, इंदुः १२, चंदनं १३, शुभंकरः १४, श्वा १५, सिंहः १६, शार्दूलः १७, कूर्मः १८, कोकिलः १९, खरः २०, कुंजरः २१, मदनः २२, मत्स्यः २३, तालंकः २४, शेषः २५, सारंगः २६, पयोधरः २७, ततः कुंदं २८, कमलं २९, वारणः ३०, शरभः ३१, जंगमः ३२, द्युतीष्टः ३३, दाता ३४, शरः ३५, सुशरः ३६, समरं ३७, सारसः ३८, सरटः ३९, षट्पदनामानि पिंगलः कथयति॥२२॥ (G).

१२३। मेरुः मकरः मृगः सिद्धिर्बुद्धिः करतलं कमलाकरः धवलो मलयो ध्रुवो धर्म्मः किशलयो व्यजनं[?] मेधाकरः ग्रीष्मः गरलं[?] शशी सूरः मन्दो नवरङ्गः मनोहरो ग[ग]नं रत्नं नरः हीरं भ्रमरः शेखरः कुसुमाकरः ततो द्वीपः शङ्खः वसुः सत्यः शृणु नागराजपिङ्गलः कथयति षट्पदनामान्येकसप्ततिं छन्दसां परं कथयति॥ (C).

१२३। मेरुः ३९, मकरः ४०, मदः ४१, सिद्धिः ४२, बुद्धिः ४३, करतलं ४४, कमलाकरः ४५, धवलः ४६, मदनः ४७, ध्रुवः ४८, कनकं ४९, कृष्णः ५०, रंजनः ५१, मेधाकरः ५२, ग्रीष्मः ५३, गरुड़ः ५४, शशी ५५, शूरः ५६, शल्यं ५७, नवरंगः ५८, मनोहरः ५९, गगनं ६०, रत्नं ६१, नरः ६२, हीरः ६३, भ्रमरः ६४, सेखरः ६५, कुसुमाकरः ६६, द्विपः ६७, शङ्खः ६८, वसुः ६९, शब्दः ७०,

जत्ते[1] सव्वहि[2] होइ लहु अड्ढ बिसज्जहु[3] ताम[4] ।
तह बि[5] बिसज्जहु[6] एक्कसर[7] एहि[8] पमाणे[9] णाम॥ १२४[10]॥

दोहा । इति षट्पदप्रकरणम् ॥

मुनिः ७१, इति एहत्तरिहि—एकसप्ततिः षट्पदनामानि छंद-आर—छंदःकारकः पत्थरि—प्रस्तार्य्य लेहइ—लभते, इति पिंगलः कहइ—कथयति ॥ (E).

१२३ । मेरु इति ॥ मेरुः ४०, मकरः ४१, मदः ४२, सिद्धिः ४३, बुद्धिः ४४, करतलं ४५, कमलाकरः ४६, धवलः [४७,] म[द]नः ४८ ध्रुवः ४९, कनकं ५०, कूर्म्मः[?] ५१, रंजनः ५२, मेधाकरः ५३, ग्रीष्मः ५४, गरुडः ५५, शशी ५६, सूर्यः ५७, शल्यं ५८, नवरंगः ५९, मनोहरः ६०, गगनं ६१, रत्नं ६२, नरः ६३, हीरः ६४, भ्रमरः ६५, शेखरः ६६, कुसुमाकरः ६७, ततः दीपः ६८, शंखः ६९, वसुशब्दः ७०, मुनिः ७१ ॥ नागराजः पिंगलः कथयति ॥ षट्पदे नामान्येकसप्ततिः छंदस्कारः प्रस्तार्य्य कथयति ॥ २३ ॥ (G).

१२४ । तथाहि यावद्भवति सर्व्वैर्लघुभिरर्द्धं विसर्जय । तत्रापि एकं शरम् एतत्प्रमाणं नाम ॥ सर्व्वैर्लघुभिर्हि[र्द्वि]पञ्चाशदधिकं [शतं] तस्यार्द्धदूरीकरणे षट्सप्ततिरवशिष्यते । तत्रैकपञ्चसंख्यायां

---

१२४ । १ जेत्ते (B, C & E), जते (D), डत्ते (F). २ सव्वइ (B & C). ३ विसज्जइ (B & C), विसज्जहिँ (D). ४ तासु (F). ५ पुणवि (A), तहँवि (D). ६ विसज्जइ (B & C), विसज्जहिं (D), विसज्जहँ (E), विसज्जउ (F). ७ एक्कवसर (B), एक्कनर (C & F). ८ एह (A), एम (B & C). ९ पमाणेहि (B & C), परमाणे (D). १० २१ (A), २५ (F).

दूरीकृतायामेकसप्ततिनामानि भवन्तीत्यर्थः। इति षट्पदप्रकरणम् ॥ (C).

१२४। अथैतेषां प्रकारांतरेण संख्यामाह जत्ते इति। यावंतः सर्वे लघवों भवंति अर्द्धं विसृज्यतां तन्मध्ये। तत्रापि विसृज एकं शरं पंचकं, शर इति पंचसंज्ञा, एतत्प्रमाणेन नामानि विद्धीति शेषः॥ अयमर्थः, द्विपंचाशदुत्तरं शतं लघवः अंतिमभेदे ये, तन्मध्ये अर्द्धत्यागे षट्सप्ततिरवशिष्यते, तत्र पंचत्यागे एकसप्ततिरवशिष्यते, तत्प्रमाणेन एकसप्ततिप्रमाणानि नामानि भवंतीत्यर्थः।

अथैते भेदाः खरूपतो लिखित्वा प्रदर्श्यंते। गुरु ७० लघु १२ अजयः, गुरु ६९ लघु १४ विजयः, गु ६८ ल १६ बलिः, गु ६७ ल १८ कर्णः, गु ६६ ल [२०] वीरः, गु ६५ ल २२ वेतालः, गु ६४ ल २४ वृहन्नटः, गु ६३ ल २६ मर्कटः, गु ६२ ल २८ हरिः, गु ६१ ल ३० हरः, गु ६० ल ३२ ब्रह्मा, गु ५९ ल ३४ इंदुः, गु ५८ ल ३६ चंदनं, गु ५७ ल ३८ सुशुभंकरः, गु ५६ ल ४० श्वा, गु ५५ ल ४२ सिंहः, गु ५४ ल ४४ शार्दूलः, गु ५३ ल ४६ कूर्मः, गु ५२ ल ४८ कोकिलः, गु ५१ ल ५० खरः, गु ५० ल ५२ कुंजरः, गु ४९ ल ५४ मदनः, गु ४८ ल ५६ मत्स्यः, गु ४७ ल ५८ ताडंकः, गु ४६ ल ६० शेषः, गु ४५ ल ६२ सारंगः, गु ४४ ल ६४ पयोधरः, गु ४३ ल ६६ कुंदः, गु ४२ ल ६८ कमलं, गु ४१ ल ७० वारणः, गु ४० ल ७२ शरभः, गु ३९ ल ७४ भसलः, गु ३८ ल ७६ जांगलः, गु ३७ ल ७८ शरः, गु ३६ ल ८० सुसरः, गु ३५ ल ८२ समरं, गु ३४ ल ८४ सारसः, गु ३३ ल ८६ सरसः,

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIAT

अथ पज्झटिका छंदः । (D).

चउ[1]मत्त करह[2] गण चारि ठाइँ[3]
ठइ अंत[4] पओहर पाइँ पाइँ ।
चउ[5]सट्ठि[6] मत्त पज्झलइ[7] इंदु
सम[8] चारि पाअ पज्झटिअ[9] छंदु ॥ १२५[10] ॥

गु २२ ल ८८ मेरुः, गु २१ ल ९० मकरः, गु २० ल ९२ मदः, गु [२९ ल ९४ सिद्धिः, गु २८ ल ९६] बुद्धिः, गु २७ ल ९८ करतलं, गु २६ ल १०० कमलाकरः, गु [२५ ल] १०२ धवलः, गु २४ ल १०४ मदनः, गु २३ ल १०६ ध्रुवः, गु २२ ल १०८ कव[न]कं, गु २१ ल ११० कृष्णः, गु २० ल ११२ रंजनः, गु १९ ल ११४ मेघाकरः, गु १८ ल ११६ ग्रीष्मः, गु १७ ल ११८ गरुडः, गु १६ ल १२० शशी, गु १५ ल १२२ शूरः, गु १४ ल १२४ शल्यं, गु १३ ल १२६ नवरंगः [गु १२ ल] १२८ मनोहरः, गु ११ ल १३० गगनं, गु १० ल १३२ रत्नं, गु ९ ल १३४ नरः, गु ८ ल १३६ हीरः, गु ७ ल १३८ भ्रमरः, गु ६ ल १४० शेखरः, गु ५ ल १४२ कुसुमाकरः, गु ४ ल १४४ दिपः, गु ३ ल १४६ शंखः, गु २ ल १४८ वसुः, गु १ ल १५० शब्दः, ल १५२ मुनिः ॥ ७१ ॥ (E).

---

१२५ । १ चो (E). २ करहि (D & E), करऊ (F). ३ मह (D), चारि (F). ४ आंत (E). ५ चौ (E & F). ६ सट्ठि (C). ७ पजभारइ (B, C, D & E). ८ एम (A, B, C, D & E). ९ पजभलिश (A, B & C). १० ११ (A), २१ (F).

१२४ । पुन: प्रकारांतरेण नामसंख्या[न]यनमाह ॥ जत्ते इति ॥ यावंत: सर्वे भवंति लघव: अर्धं विसर्जय तेषु । तत्रापि विसर्ज्ज-येकवारं शरान् अनेन प्रमाणेन नामानि ॥ यथा षट्पदसर्वलघव: १५२, तेषामर्धं ७६, तत्रापि [५] पंच त्याज्या:, अवशिष्टा: ७१ इति प्रकारेण जातानि नामानीत्यर्थ: ॥ इति षट्पदप्रकरणम् ॥ (G).

१२५ । अथ प्रोज्झटिकाच्छन्द: ॥ चतुर्मात्रा: क्रियन्तां गणा-श्चत्वार: अन्ते पयोधर: स्थाप्यतां पादे पादे । चतु:षष्टिमात्रं प्रज्झ-रतीन्दुरिव चतुर्भि: पादै: प्रोज्झटिकाच्छन्द: ॥ पादे पादे चतुर्मा-त्राश्चत्वारश्चत्वारो गणा: क्रियन्तां, तत्रान्त्यो गणो मध्यगुरु:, पयो-धरशब्दो मध्यगुरुवाची । यथेन्दुरमृतं प्रोज्झति, एवं प्रोज्झटिक-शब्दोऽप्यमृतं चरतीत्यर्थ: ॥ पज्झटिकेति केचिद्वदन्ति ॥ (C).

१२५ । अथ पज्झटिकावृत्तं लक्षयति चउमत्तेति । अंत — अंते, पओहर — पयोधरं मध्यगुरुं जगणमिति यावत् ठइ — स्थाप-यित्वा, अंतस्थं चतुर्मात्रिकं जगणस्वरूपमेव विधायेत्यर्थ:, पाइ पाइ — पादे पादे प्रतिचरणमिति यावत् चारि ठाइ — चतु:-संख्याकान् चउमत्त — चतुर्मात्रिकान् गणान् करहि — कुरुष्व । एम — एवं, चारि पाअ — चतु:पादे चउसट्ठि मत्त — चतु:षष्टि-मात्राकं पज्झटिअ छंद — पज्झटिकाच्छंद: भवति, एतत् अलेति शेष: इंदु: पज्झरइ — प्रस्रवति ॥ प्रथमं त्रयश्चतुष्कलास्तदनंतरमेको जगण एवं षोडश मात्रा: प्रतिचरणं यत्र पतंति, तत्पज्झटिका-वृत्तमिति फलितार्थ: ॥ (E).

१२५ । अत्र चतु:षष्टिमात्रकं भेदत्रयं, तत्र पर्यटिकामाह ॥

जहा, जे गंजिअ गोलाहिवइ[1] राउ[2]
उद्दंड[3] ओड्ड[4] जसु[5] भअ[6] पलाउ[7].।
गुरुविक्कम विक्कम जिणिअ[8] जुज्झ[9]
ताकम परक्कम[10] कोइ[11] बुज्झ ॥ १२६[12] ॥
पज्झलिआ[13] । (A & F).

चउ इति ॥ चतुर्मात्राः कार्या गणाश्चलारश्चलारः स्थापयांते पयोधरं पादे पादे ॥ चतुःषष्टिमात्राभिः पर्यटिका भवति इंदुसमाश्चलारः पादाः पर्यटिकाच्छंदसि ॥ अंत इति ॥ चतुर्थो गणो-जगणरूपः कार्य इत्यर्थः ॥ २६ ॥ (G).

१२६ । उदाहरति ॥ यो गञ्जितगौडाधिपतिराजः उद्दण्ड-ओड्रो यस्य भयेन पलायते । गुरुविक्रमं विक्रमं जिला युध्यते तत् कर्णपराक्रमं क इह बुध्यते ॥ ओड्रः — ओड्रदेशीयो राजा, विक्रमं राजानं युद्धे न त्यजतीत्यर्थः । (C).

१२६ । अथ [प]ज्झटिकामुदाहरति जे इति । येन पराक्रमेण गोलाहिवइ — गौडाधिपतिः राउ — राजा गंजिअ — गंजितः, हत इति यावत्, जसु भअ — यस्य पराक्रमस्य भयेन उद्दंड

१२६ । १ गउलाहिव (A), गोल्लाहिवइ (B), गोलआहिवइ (C), गोउवइ (F). २ वाउ (D). ३ उड्डुउ (D). ४ दंड (A), ओज्ज (C), ओड (E), मोड्ड (F). ५ इस (D & F). ६ जस (A), भए (B & C). ७ पसाउ (A), पलाइ (B), पराउ (D & F). ८ जिणु (A), जोणिअ (C), जिणिअ (D). ९ जज्झ (F). १० परिक्कम (B). ११ इह (C). १२ २१ (A), २० (F). १३ पज्झटिका (B & C), इति पज्झलिआ (F).

अथाडिल्ला छंदः । (D).

सोलह[१] मत्ता पाउअलि लह[२]
बेबि जमक्का[३] भेउ अलिल्लह[२] ।
हो ण[४] पओहर[५] किंपि अलिल्लह[२]
अंत सुपिअ[६] भण[७] छंदु[८] अलिल्लह ॥ १२७[९] ॥

—समरदुर्द्धर्षः ओड—उत्कलदेशाधिपतिः पलाउ—पलायितः । येन च जुज्झ—युद्धे, इदं सर्वत्र चेति, गुरुविक्कम—गुरुविक्रमः गुरुरन्यैरनतिक्रमणीयः विक्रमः पराक्रमो यस्य स तादृश इत्यर्थः, विक्कम—विक्रमः विक्रमनामा कश्चित्प्रसिद्धः राजा, जिणिअ—जितः, ताकण्ण परक्कम—तत्कर्णपराक्रमं कोऽपि बुज्झ—जानाति, अपि तु न कोऽपीत्यर्थः ॥ (E).

१२६ । यथा ॥ येन गंजितो गौडपतिः राजा, वङ्गः[?] उत्कलः सभयं पलायितः । गुरुविक्रमो विक्रमो जितो युद्धे कर्णपराक्रमं को बुध्यते ॥ २७ ॥ (G).

१२७ । षोडश मात्राः पादावली लभते द्वयोर्यमकं भेदं कलयत । भवति पयोधरः किमप्यलं ह अंते सुप्रियः भण छन्दोऽलिन्दाम् ॥ पादावली पादचतुष्टयं षोडश मात्राः लभते, तथाच

१२७ । १ सोलंह (A), सोलाह (E). २ अडिल (D). ३ जमक्का (F). ४ होइ (A, B & C). ५ पयहर (E), पयोहर (F). ६ सुपिअ अंत (A, B & C), सुपिअंते (D), सुपिअ अंते (F). ७ भइ (D, E & F). ८ छंद (A & B). ९ २४ (A). १८ (F).

षोडशमात्रं पदमित्यर्थः, द्वयोर्द्वयोरन्ते यमकं, भेदं विशेषं कलयत जानीत, पयोधरो जगणो भवति चेत्, किमपि क्वचिदपीत्यर्थं अलं व्यर्थं, तस्माज्जगणो न देय इत्यर्थः। ह्व-शब्दः पादपूरणे। सुप्रियो द्विकलः सर्व्वलघुः। तत्र चतुष्कलगणत्रयं, ततो द्विकलगणस्ततो द्विलघुरिति साम्प्रदायिकी परिपाटी। (C).

१२७। अथ अलिल्लहवृत्तं लक्षयति सोलह मत्तेति। जहा, सोलह मत्ता — षोडशमात्रिकाः षोडश मात्रा यस्यां सा तादृशीत्यर्थः, पाअअलि — पादावली, लह — लभ्यते, बेबि — द्वयोरिति शेषः, जमक्का — ज[य]मकौ भेउ — भवत इति, अलिल्लह कथयेत्यर्थः। किंपि कुत्रापि चरणे इत्यर्थः, अलोलह[?] — अप्रयोजकइत्यर्थः। अयं च देशीशब्दः। पओहर — पयोधरः मध्यगुरुर्जगण इति यावत्, ण हो — न भवति, अत्र जगणो न देय इति भावः, अंते पादांते सुपिअ — सुप्रियः द्विलघुर्गण इत्यर्थः पततीति शेषः। क्रियमाणासु षोडशमात्रासु अंतिम[मा]त्राद्वयं यत्र लघुरूपमेव पतति, न तु षोडशमात्रातिरिक्तः सुप्रियो देय इति भावः, तत् अलिल्लह छंदु — अलिल्लहनामकं छंदः भण — कथय इत्यर्थः॥ (E).

१२७। सोलेति॥ षोडश मात्राः पादावली लभतां द्वेऽपि यमके भेद इति गृह्यतां॥ भवति पयोधरः किमपि अश्लाघ्यः सुप्रियोऽंते यत्र छंदः अलिल्लह॥ प्रतिपादं षोडश मात्राः, द्वयोश्चरणयोर्यमकं, जगणो न कर्त्तव्यः, अंते लघुद्वयं च, तत् अभि[लि]ल्लह छंदइत्यर्थः॥ २८॥ (G).

जहा, जहि[१] आसावरि[२] देसा[३] दिण्हउ[४]
सुत्थिर[५] डाहर[६] रज्जा लिल्लउ[७] ।
कालंजर[८] जिणि[९] कित्ती[१०] थप्पिअ[११]
धणुआ[१२] वज्जिअ[१३] धम्मक[१४] अप्पिअ[१५] ॥ १२८[१६] ॥

अलिल्लह । (F).

---

१२८ । येनाशापूर्य्यै देशो दत्तः सुस्थिरडाहरराज्यं गृहीतं । कालञ्जरं जित्वा कीर्त्तिः स्थापिता धनदाररराज्यं धर्म्मायार्पितम् ॥ आशापूरी काचन देवी, डाहरो देशविशेषः । (C).

१२८ । अथ अलिल्लहमुदाहरति जिह्नि इति । जिह्नि — येन आसावरिनामको देशः, दिल्लउ — दत्तः, सुत्थिर — सुस्थिरं, वैरिकृतास्कंदनाभावादव्याकुलजनमिति भावः, डाहर रज्जा — डहारराज्यं डहारः पर्वतविशेषस्तस्य राज्यमित्यर्थः, लिल्लउ — गृहीतं । कालिंजरे येन कीर्त्तिः स्थापिता, धणु आवज्जि — धनम् आवर्ज्य दशदिग्भ्य एकीकृत्येत्यर्थः, धम्मके — धर्माय अप्पिअ — अर्पितम् ॥ अत्र दिल्लउ लिल्लउ, थप्पिअ अप्पिअ इति दलद्वये यमकवत्त्वं स्फुटमेव ।

---

१२८ । १ जिणि (B & C), जिहिँ (D), जिन्हि (E). २ असा (B), असापरि (C). ३ देसा (A, B & C). ४ दिस्रउ (C), दिल्लउ (F). ५ सुत्थिर (A), दुत्थिर (B). ६ डाहल (B). ७ लिल्लउ (A), णिण्हउ (B), णिखउ (C), लिण्हउ (D). ८ कालिंजर (A). ९ जिणि (F). १० कीती (C). ११ तप्पिअ (D), थप्पीअ (E). १२ धणुआ (A & B), धन्नअ (C). १३ वज्जीअ (E). १४ धम्मके (A, D & E). १५ अपिअ (B), अप्पिज (D). १६ २५ (A), २९ (F).

लहु[1] गुरु[1] एक्क[2] णिअम[3] णहि जेहा[4]
पअ पअ लेक्खउ[5] उत्तम[6] रेहा।
सुकइ फणिंदह कंठह[7] वलअं
सोलह[8] मत्तं[9] पाआउलअं[10] ॥ १२९[11] ॥

अत्र जिह्णीति संयुक्तपरोऽपि जकारः लघुर्बोध्यः, 'कत्थवि संजुत्तपरो वण्णो लहु होइ', इति पूर्वमुक्तत्वात्। [Vide श्लोक ४, p. ६. —Ed.] धम्मके इति एकारोऽपि लघुर्बोध्यः, 'एओ शु[सु]द्धाअ वण्ण मिलिआ चे'ति पूर्वमुक्तत्वात्। [Vide श्लोक ५, p. 7. —Ed.] अन्यथा तत्तच्चरणे मात्राधिक्यं स्यादिति बोध्यम्। (E).

१२८। यथा॥ जह्णीति॥ येनाश्वावरोदेशा दत्ताः, सुस्थिरं डहाररराज्यं गृहीतम्। कालंजरं जित्वा कीर्त्तिः स्थापिता, धनमर्जयित्वा धर्मार्थमर्जि[र्पि]तम्॥ २९॥ इत्यडिल्लहनामकच्छंदः॥ अडिल्लहेति, अरिहल्लहेति क्वचित्पाठः॥ (G).

१२९। लघुगुरोरेको नियमो नास्ति यत्र, पदे पदे लिख्यतामुत्तमरेखा। सुकविफणीन्द्रस्य कण्ठवलयं षोडशमात्रं पादाकुलकम्॥ (C).

१२९। अथ पादाकुलकं वृत्तं लक्षयति लहु गुरु एक्क णि[अ]-

१२९। १ Transposed in (F). २ Non est (B). ३ णिम्म (A, B, C & D), णेम्म (E), णियम (F). ४ जाहा (B & C). ५ लेहउ (A), लेक्खइ (B & C), लेक्खउ (D), लेक्खिउ (E). ६ उत्तिम (A). ७ कण्ठा (B & C); कंठ (F). ८ सोरह (D). ९ मत्ता (A). १० कुलअं (B, C & D), पादाकुलअं (E), पादाउलअं (F). ११ २६ (A), ३० (F).

जहा, सेर एक्क[1] जइ[2] पावउ[3] घित्ता
मंडा बीस पकावउ[4] णित्ता ।
टंकु[5] एक्क[6] जउ[7] सेंधव[8] पात्रा[9]
जो[10] हउ[11] रंको[12] सो हउ[13] रात्रा ॥ १३०[14] ॥
पादाकुलकम्[15] ।

सेति । जेहा — यत्र, लहु गुरु एक्क णि[से]म — लघु गुर्वेक-नियमः णहि — नास्ति, यत्र षोडशापि मात्रा अष्टगुरुरूपेणैव पतंति, अथवा षोडशलघुरूपेणैव पतंतीति नियमो नास्तीत्यर्थः, किंतु पत्र पत्र — पादे पादे प्रतिचरणमिति यावत् उत्तम रेहा — उत्तमा रेखा मात्रा लघुगुर्वंतरिता इति भावः लेक्खिए — लिख्यंते स्थाप्यंते इत्यर्थः । सुकविफणींद्रकंठवलय[मि]ति पिंगल-कंठाभरणतुल्यमित्यर्थः, कंठाभरणं यथा सस्नेहं कंठे स्थाप्यते, तथे-दमपि सस्नेहं पिंगलेन कंठे धृतमित्यर्थः, सोलहमत्तं — षोडश-मात्राकं, प्रतिचरणं षोडश मात्रा यस्मिंस्तत्तादृशमित्यर्थः, पादा-कुलअं — पादाकुलकनामकं वृत्तं भवतीति शेषः ॥ पादे मात्राः

---

१३० । १ एक्कु (D). २ जउ (D), जौ (E). ३ पावउ (A & D), पावहि (B), पावइ (F). ४ पकावउँ (A), पकाविल (B), पचावउ (F). ५ टंक (A, B & C). ६ एक्कु (F). ७ ज (B), जइ (C, E & F). ८ सिन्धव (B & C), सेधउ (E). ९ पावा (A). १० सो (A). ११ हउं (A), हुँ (D). १२ रंक (A & E), रक्कु (D & F). १३ सोइ हउ (A, E & F), सो उह (D). १४ १७ (A), ११ (F). १५ पाआकुलकम् (B & C).

लिख्यंते इत्युक्तं, तत्र कियंत्यो मात्रा इत्यपेक्षायां षोड़शमात्राक-मिति हेतुगर्भं विशेषणम्। (E).

१२९। गुरुवर्णं[गुरूणां] लघूनां वा एकोऽपि नियमो न हि यत्र पदे पदे लेखय उत्तमा रेखाः। सुकवेः फणींद्रस्य कंठवलयं षोडशमात्रं पादाकुलकं॥ पदे मध्ये, रेखा लघवः॥ ३०॥ (G).

१३०। उदाहरति। सेर एको यदि प्राप्यते घृतस्य, मण्डा-विंशतिः पच्यते नित्यं। टंकैकमितं यदि सैन्धवं प्राप्यते, यो भवति रङ्कः स भवति राजा॥ मण्डा पिष्टकं, सेरटङ्कौ परिमाणविशेषौ। दीनस्येयमुक्तिः। (C).

१३०। अथ पादाकुलकमुदाहरति सेर एक्केति। सेर एक्क जौ [जउ] पावउ घित्ता—सेरकैकं यदि प्राप्नुया[द्] घृतं, मंडा वीस पकावउ णित्ता—तदा विंशतिं मंडकान् पचामि नित्यं। तत्र च जइ—यदि टंकु एक्क सेधउ पाआ—टंक एकः सैंधवः प्राप्तः, तदा जो हउ रंक सोइ हउ राआ—योऽहं रंकः स एव अहं राजा॥ (E).

१३०। यथा॥ सेरेति॥ शेरैकं यदि प्राप्यते घृतं, मंडविंशतिं पचामि नित्यं। टंकैकं यदि सैंधवं प्राप्यते, योऽहं रंकः स एवाहं राजा॥ रंकोक्तिरियम्॥ ३१॥ इति पादाकुलकम्॥ (G).

[This differs from the Pádákulakam of Pingala's Sanskrit Treatise. Vide Ghosha's compendium, pp. 22-24.—Ed.]

अथ चउबोला छंदः। (D). Non est (B & C).

सोलह[१] मत्तह[२] बेबि[३] पमाणह[४]
बीअ चउत्थह[५] चारिदहा।
मत्तह[६] सट्ठि समग्गल जाणह[७]
चारि पआ[८] चउबोल[९] कहा॥ १३१[१०]॥

१३१। चौ[चउ]बोलां लक्षयति सोलह मत्तेति। सोलह मत्तह—षोडशमात्राभिः बेबि—द्वावपि द्वितीयचतुर्थयोरग्रे उपादानात्प्रथमतृतीयावित्यर्थः चरणाविति शेषः [पमाणह—] प्रमाणयत, बीअ चउत्थह—द्वितीयचतुर्थयोश्चरणयोः चारिदहा—चतुर्दश मात्रा इति शेषः प्रमाणयतेति पूर्वेणान्वयः, मत्तह सट्ठि—षष्टिर्मात्राः समग्गल जाणह—समग्राः जानीत, चारि पआ—चतुष्पादं चौ[चउ]बोल कहा—चौबोलं कथय॥ तत्र प्रथमचरणे षोडश, द्वितीये चतुर्दश, तृतीयेऽपि षोडश, चतुर्थे च चतुर्दश मात्राः पतंति, ततः चौबोलानामकं वृत्तमिति फलितार्थः। (E).

१३१। षोडश मात्रा द्वयोः पादयोः [प्र]माणय॥ द्वितीय[चतुर्थ]योः स्थानयोश्चतुर्दश॥ मात्राणां षष्टिः समग्रा जानीत चतुर्षु पदेषु चौबोलं कथय॥ द्वयोः प्रथमतृतीययोः षोड़श, द्वितीयचतुर्थयोश्चतुर्दशेत्यर्थः॥ तच्चौबोलं नाम छंदः॥ (G).

१३१। १ सोरहँ (D), सौलह (E). २ मत्तहँ (D). ३ बेअ (A), बेपअ (F). ४ पआणऊ (D). ५ दुउठह (A), चउट्ठहँ (D), चउठाइ (F). ६ मत्तहउ (D), मत्ता (F). ७ जाण (A), जाणऊँ (D). ८ चारी पअ (E). ९ चौबोल (E & F). १० ११ (F).

जहा, रे धणि मत्त मअंगज[1] गामिणि
खंजण[2]लोअणि[3] चंदमुही[4] ।
चंचल जुव्वण[5] जात[6] ण जाणहि[7]
छइल[8] समप्पहि[9] काइ णही[10] ॥ १३२[11] ॥
चउबोला[12] ।

---

१३२ । अथ चौबोलामुदाहरति रे धणीति । रे धणि—धन्ये, मत्त मअंगज गामिणि—मत्तमतंगजगमने खंजनलोचने चंद्रमुखि चंचलं गच्छद्यौवनं ण जाणहि—न जा[ना]सि, अतः तत् छइ-ल्लेभ्यः विदग्धेभ्यः काइ णही—कुतो न समप्पहि—समर्पयसि । अथवा यतः चंचलम् अतएव गच्छद्यौवनं छइल्लेभ्यो न समर्पयसि, अतः त्वं काइ णही—किमपि न जानासि, यदि तु समर्पयसि तदा अभिज्ञा भवसीति भावः ॥ (E).

१३२ । यथा रे इति ॥ हे वनिते मत्तमतंगजगामिनि खंजनलोचने चंद्रमुखि ॥ चंचलं यौवनं याति न जानीहि चतुरे समर्पयसि कार्यं किं वा न हि ॥ ३२ ॥ इति चौ[बो]ला छंदः ॥ (G).

---

१३२ । १ मतंगज (D), मअंगच (F). २ पंजण (A), खंजअ (F). ३ लोचण (A). ४ चंमुही (E). ५ जीव्वण (E). ६ जातं (E). ७ जाणइ (A), श्राणहिँ (D), हि (E). ८ छइल्ल (A), छइ (E). ९ समप्पइ (A), समप्पहिँ (D). १० काँइँ (A), काइँ णहीँ (D), काइ णाही (E). ११ ३३ (F). १२ चौबोला (F).

अथ रड्डा छंदः । (D).

पढम बिरमइ[1] मत्त दह[2] पंच, पत्र बीत्र[3] बारह ठवहु[4],
तीत्र ठाँइ दहपंच जाणहु[5], चारिम एग्गारहहिं[6],
पंचमे हि[7] दहपंच आणहु[8] ।
अट्ठा[9]सट्ठी[10] पूरवहु[11] अग्गे दोहा देहु[12] ।
रात्रसेण[13] सुपसिद्ध[14] इत्र[15] रड्डु[16] भणिज्जइ[17] एहु[18] ॥
१३३[19] ॥ [राजसेना]

---

१३३ । अथ नवपदप्रकरणम् ॥ प्रथमविरतिं मात्रा[सु] पञ्चदशसु, द्वितीये द्वादशसु स्थापय, तृतीये स्थाने पञ्चदशसु जानीहि, चतुर्थे चैकादशसु, पञ्चमे पञ्चदशसु आनय । अष्टषष्टिं पूरयाग्रे दोहां देहि । राजसेनं सुप्रसिद्धं रड्डं भण्यते तत् ॥ अत्र चोक्तलक्षणैः पञ्चभिः पदैः अष्टषष्टिर्मात्रा भवन्ति, अग्रे च दोहापादचतुष्टयेन मिलित्वा नवपदी ॥ नवपदच्छन्दसः सप्त भेदा भवन्ति, तत्रेदं राजसेननामकं रड्डमित्युच्यते । (C).

१३३ । अथ रड्डां[रंडां] लक्षयति पढमेति । भो शिष्याः पढम—

---

१३३ । १ विरइ (A), विरइय (D). २ दद (E). ३ वीद्द (C). ४ ठवड (E). ५ जाणु (B), जाणद्द (C). ६ इग्गारहि (A), इग्गारहहिँ (B & C), एग्गारहिँ (D). ७ ड (A & E), च (C). ८ आणड (A & C), जाणड (B). ९ एम च्छड (F). १० सट्टा (B & C), सट्ठा (D), सट्ठि (F). ११ संठवड (A), पुरद्द (F). १२ देउ (F). १३ रायसेइ (B), रायसेणि (A), राजसेण (F). १४ सपसिद्ध (E). १५ चद्द (A, B & C). १६ रणं (C), वड्डुउ (D), रंड (F). १७ भणिज्जय (B & C). १८ एद्द (C). १९ २८ (A), ३४ (F).

प्रथमचरण इत्यर्थः दहपंच मत्त—पंचदशसु मात्रासु विरमइ—विरमति विरामं समाप्तिं प्राप्नोतीत्यर्थः, प्रथमचरणे पंचदश मात्राः कर्त्तव्या इति भावः। बीअ—द्वितीये पअ—पदे बारह—द्वादश मात्रा इति शेषः, सर्वत्र यथा यथा योजनीयः, ठवऊ—स्थापयत। तीअ ठाइ—तृतीये स्थाने तृतीयचरणे इत्यर्थः दह-पंच मात्राः जाणऊ—जानीत। चारिम—चतुर्थे चरणे इति शेषः, इदं च यथापेक्षमन्यत्रापि योज्यं, एग्गारहहि—एकादश मात्राः जानीतेति पूर्वेणान्वयः। पंचमे उ—पंचमेऽपि चरणे दहपंच—पंचदश मात्राः आणऊ—आनयत। एवंप्रकारेण अट्ठासट्ठी—अष्ट-षष्टिर्मात्राः पूरवऊ—पूरयत, अग्ये अष्टषष्टिमात्रांते दोहा—द्विपदिकां तेरह मत्तेत्यादिना पूर्वमुक्तां देऊ—ददत। एऊ—एषा रड्डा, [इअ—] इयं सुपसिद्ध—सुप्रसिद्धं यथा स्यात्तथा राअ-सेण—राजसेना इत्यपि भणिज्जइ—भण्यते॥ एतस्या राजसेना इति नामांतरमपि कथ्यत इत्यर्थः। (E).

१३३। अथ रंडामाह॥ पढमेति॥ प्रथमा विरतिर्मात्रासु दशपंचसु, पादे द्वितीये द्वादशसु स्थापय, तृतीयस्थाने दशपंचसु जानीहि, चतुर्थ एकादशसु, पंचमे दशपंच मानय। एवमष्टषष्टिं पूरय, अग्ये दोहां देहि॥ राजसेनसुप्रसिद्धिता रंडा भण्यते एषा॥ प्रथमतृतीयपंचमे पादे पंचदश मात्रा द्वितीये द्वादश चतुर्थे एकादशेति द्वा[अष्ट]षष्टिर्मात्रा भवंति, तदुपरि दोहा देयेति॥ राजसेनो राजसेनप्रसिद्धिं प्रापित इति केचित्, राजसेनेति नामां-तरप्रसिद्धिं प्रापितेत्यन्ये॥ सा रंडेति भण्यते॥ ३४॥ (G).

बिसम तिकल[1] संठबहु तिणि पाइक्क[2] करहु[3] लहु[4]
अंत[5] णरेंद्[6] कि बिप्प पढम[7] बेमत्त अबर[8] पइ[9] ।
सम पअ तिअ पाइक्क सब्बलहु[10] अंत बिसज्जहु[11]
चउठा चरण[12] बिआरि[13] एक्क लहु कड्ढिअ लिज्जहु ॥
इम[14] पंच पाअ[15] उट्टवण[16] कइ
बत्थु[17] णाम पिंगल[18] कहइ[19] ।
ठबि दोसहीण[20] दोहाचरण
राअसेण[21] रड्डउ[22] भणइ ॥ १३४[23] ॥ छप्पअ ।

---

१३४ । तत्र गणव्यवस्थामाह । विषमे त्रिकलं संस्थापय, त्रीन् पदातिकान् कुरु नीत्वा प्रथमे नरेन्द्रः किं विप्रोऽन्ते द्विमात्रोऽपर-पदे । समे पदे त्रयः पदातिकाः सर्व्वलघुरन्ते विसृज्यतां, चतुर्थ-चरणे विचार्य्य एकलघुर्दृष्ट्वा नीयताम् ॥ एवं पञ्चपदोत्थापनं वस्तु-नाम पिङ्गलः कथयति । स्थापयित्वा दोषहीनान् दोहाचरणान् राजसेननामा रड्डा भण्यते ॥ विषमे प्रथमे तृतीये पञ्चमे पादे

---

१३४ । १ तिक्कल (B). २ पाएक्क (D). ३ Non est (F). ४ लघु (E). ५ अंत and पढम transposed in (E). ६ णरिंदु (D), णरेंदु (E & F). ७ पढमे (B & C). ८ अवर (B & C). ९ पअ (B, C & E), मइ (F). १० वङ्ग (F). ११ विज्जइ (B), विसलङ्ग (D), बिसङ्ग (E). १२ चउ चरण (C & F), चौत्था चरण (E). १३ अपि (A), बिचारिअ (C). १४ एम (A, B, C, D & F), ए short. Vide श्लोक ५, p. 7. १५ पाए (D). १६ उट्ठवणु (D), उट्टवण (F). १७ वच्छु (A), वसु (B). १८ पिंगलु (D & F). १९ कुणइ (A, B, C & D), कहअ (E). २० दोसहिण (B). २१ राअसेण (B). २२ रड्डइ (B), रडइ (C), रड्डइँ (D), रट्टउ (E), रड्डउ (F). २३ १९ (A).

एकस्त्रिकलस्त्रयः पदातिकाश्चतुष्कलगणाः कार्य्याः, नीत्वा ज्ञात्वा, प्रथमपादे तु नरेन्द्रः किंवा विप्रश्चरमगणः । नरेन्द्रो जगणः, विप्र-श्चतुर्लघुः । अपरपदे तृतीये पञ्चमे चान्ते द्विमात्रो द्विलघुस्तेन चरमो यः चतुष्कलस्तृतीयपञ्चमयोरुक्तः स भगण इति वदन्ति । समपादे द्वितीये चतुर्थे च त्रयश्चतुष्कलाः, तत्रान्तिमः सर्व्वलघु-श्चतुर्थचरणस्यैकादशमात्रत्वात् चतुष्कलगणत्रयं [न] सम्भवत्येव, अतोऽन्तिमगणे लघुरेको विकर्षणीयः । वस्त्वित्यपि एतस्य छन्दसो नाम । नाम प्राकाश्ये । (C).

१३४ । अथ रंडायां तावत्तावन्मात्रा तत्तच्चरणे देया इत्युक्तं, तत्र विप्रा[न्या]सप्रकारमाह बिसमेति । बिसम — विषमे पादे प्रथमे तृतीये पंचमे चेत्यर्थः, आदौ तिकल संठवऊ — त्रिकलं स्थापय, ततश्च त्रिकलानंतरमित्यर्थः तिणि पाइक्क — त्रीन् पदातीन् चतुष्कलानित्यर्थः करऊ — कुरुत, पढम — प्रथमे पादे अंत — अंते प्रथमपादांते इत्यर्थः णरिंद कि बिप्प — नरेंद्रं मध्यगुरुं जगणं किंवा विप्रं चतुर्लघ्वात्मकं गणं कुरुतेति पूर्वेणान्वयः, तथाच प्रथमे चरणे त्रिकलानंतरं कर्त्तव्येषु त्रिषु चतुष्कलेषु तृतीयश्चतु-ष्कलो जगणस्वरूपो विप्ररूपो वांते कर्त्तव्यः न तु पृथगिति हृदयं । अवर पअ — अपरपादे विषमचरणगणविचारस्यैव प्रक्रांतत्वात्प्रथमा-दपरस्मिन् विषमे तृतीये पंचमे च पादे इत्यर्थः बे मत्त — द्वे मात्रे द्वौ लघू इत्यर्थः, उदाहरणानुरोधाद्दत्र मात्राशब्दो लघुवाची, अंते देये इत्यर्थः, तथाच तृतीयपंचमकानंतरदेयेषु चतुष्कलेषु तृतीयो गणः भगणो देय इति भावः तस्यैव द्विलघ्वंतत्वात् ।

अथ विषमचरणव्यवस्थां विधाय समचरणव्यवस्थामाह सम पञ इति ।। सम पञ — समे पादे द्वितीये चतुर्थे चेत्यर्थः आदौ बिअ पाइक्क — द्वौ पदाती चतुष्कलावित्यर्थः, अंत — अंते चतुष्कलद्वयांते पादांते चेत्यर्थः सब्बलहु — सर्वलघु विसज्जह — विसृजत, चौ[चउ]त्था चरण — चतुर्थचरणे अंते इति पूर्वतनमनुषंजनीयं, विचार्य सावधानतया एक्कलहु — एकं लघुं कड्डिअ लिज्ज — निष्कास्य गृह्यतां द्वितीयचरणांतिमगणापेक्षया चतुर्थचरणांतिमगणे एको लघुर्न्यूनः कर्त्तव्यः, तत्र एका मात्रा न देयेति हृदयं ॥ तथाच समे पदे चतुष्कलद्वयांते सर्वलघ्वात्मकगणदानमुक्तं, तत्र चतुर्थचरणे चतुष्कलद्वयानंतरं सर्वलघुः त्रिकलो देयः, द्वितीये च सर्वलघुश्चतुष्कलो देय इति व्यवस्था ।

इम पंच पाअ उट्टवण कइ — एवं पंचपादोट्टवनं कृत्वा, उट्टवनं विन्यासः, तथाच एवं पंचपादविन्यासं कृत्वेत्यर्थः, दोसहीण दोहाचरण — दोषहीनदोहाचरणान् जस्सेत्यादिना [Vide श्लोक ८४, p. 145.—Ed.] पूर्वोक्तप्रथमतृतीयजगणवत्त्वरूपदोषरहितान् दोहाचतुश्चरणानित्यर्थः, ठवि — स्थापयित्वा पूर्वोक्तचरणपंचकानंतरं दोहां दत्त्वेत्यर्थः, पिंगलः वत्थुणाम — वस्तुनामकं वृत्तं कहेइ — कथयति, एतदेव राअसेण रड्डउ — राजसेनरडा च एतस्यैव राजसेना रंडेति च नामांतरं भणइ — भणति ॥ (E).

१३४ । अस्योट्टवनिकामाह ॥ विसमेति ॥ विषमेषु त्रिक[लः] संस्थाप्यतां, त्रयः पदातयस्ततः, अंते नरेंद्रः किं विप्रः, प्रथमे द्वे मात्रे, अवर — मध्ये ॥ विषमेषु प्रथमतृतीयपंचमेषु चरणेषु, पदातिस्चतु-

जहा,

भमइ महुअर[१] फुल्ल[२] अरबिंद[३], णवकेसु[४] काणण जुल्लिअ[५],
सव्वदेस पिकराव[६] चुल्लिअ, सिअल पवण लहु वहइ,
मलअ कुहर णव[७] बल्लि[८] पेल्लिअ ।
चित्त[९] मणोभव सर[१०] हणइ दूर दिगंतर[११] कंत ।
किम[१२] परि अप्पउ बारि[१३]हउ एम[१४] परि पलिअ[१५] दुरंत ॥
१३५[१६] ॥ राजसेना ।

ष्कलः ॥ तत्र प्रथमे पादे द्वौ [?] इति तृतीये न कार्य इत्यर्थः, एवं च द्वितीये द्वादश चतुर्थे एकादश मात्रेति निष्कर्षः ॥ तृतीयचतुष्कलस्थाने जगणश्चतुर्लघुर्वा देयः ॥ अवरयोस्तृतीयपंचमयोरंते लघुद्वयं देयमित्यर्थः ॥ समयोः पादयोः द्वौ पदातौ सर्वत्र लघुमंते विसर्ज्जय ॥ चतुर्थचरणे विचार्य एकं लघुमाकृष्य क्रियतां ॥ एवं पंचपादोद्ववनं कृत्वा वस्तुनाम पिंगलः कथयति, स्थापयित्वा दोषहीनं दोहाचरणं राजसेनरंडामिति भणति ॥ (G).

---

१२५ । १ मऊकर (F). २ फुल्लु (A), पल्लो (F). ३ अरदंद (D). ४ णवकिसु (F). ५ फुल्लिअ (D), पुल्लिअ (F). ६ पिकराअ (A), पिकरवे (B & C), पिअ राव (D), पिक राग (F). ७ मऊलअ कुहर वण (C). ८ वल्लिअ (D). ९ चेउ (B & C). १० सरे (B). ११ दिगंत (F). Three letters dropt after त in (C). १२ केम (A), के (B & C). १३ धारि (C), वाद्दिरि (E). १४ पा एव (C), ए short. Vide श्लोक ५, p. 7. १५ पलि (A), पल्लिह (C), फलि (F). १६ २० (A), २६ (F).

१३५। उदाहरति। भ्रमति मधुकरः फुल्लमरविन्दं, नवकिंशुक-काननं स्फुटितं, सर्व्वदेशः पिकरावेण घूर्णितः, शीतलपवनो लघु वहति, मलयकुहरवनवल्लीः प्रेरयति। चित्तं मनोभवशरो हन्ति, दूरदिगन्तरे कार्य्यः[न्तः]। किमुपर्य्यात्मानम् उद्धरिष्यामि, अयं पतितो दुरन्तः॥ किमुपरि किमु[पा]लम्बेन उद्धारयिष्यामि जीविष्यामीति यावत्, दुरन्तः समय इति यावत्। विरहिण्याः उक्तिरियम्। (C).

१३५। रङ्गामुदाहरति भमईति। मङ्गअर—मधुकराः भमइ—भ्रमंति, फुल्लु अरविंद—पुष्पितान्यरविंदानि, काणण—काननानि [णवकेसु—] नवकिंशुकैः जुलिअ—ज्वलितानीव भांती[ति] शेषः, सव्वदेस—सर्वदेशः पिकराव चुलिअ—पिकरावैश्चुलुकितः निपीत-इति यावत्, कोकिलालापानाकर्ण्य संजातकंदर्पबाधया सर्वोऽपि देशि[शो] निःपीत इव भातीति भावः, मलअ कुहर णव बल्लि पेल्लिअ—मलयकुहरनववल्लीः प्रेषयित्वा ताः कंपयित्वेत्यर्थः, सिअल अवण—शीतलः पवनः लहु—लघु मंदं यथा स्यात्तथा वहइ—वहति। चित्त मणोभव सर हणइ—चित्तं मनोभवः शरैर्हंति, कंत—कांतः दूरे दिगन्तरे एव, दुरंतः दुष्टः अंतो यस्य [स] तादृशः समय इति शेषः परिपलिअ—परिपतितः, अप्पउ—आत्मानं किम परि—कया परिपाट्या रक्खारिहंउ—रक्षिष्यामि॥ (E).

१३५। यथा॥ भमेति॥ भ्रमंति मधुकराः, फुल्लान्यरविंदानि, नवं किंशुककाननं पुष्पितं, सर्वदेशे पिको रागं वंदते, शीतलः पवनो लघु वहति, मलयकुहरनववल्लीः प्रेषयित्वा। चित्तं मनोभव-

करही णंदा मोहिणी[1] चारुसेणि[2] तह भद्द ।
राअसेण तालंक[3] पिअ[4] सत्त वत्थु[5] णिप्पंद[6] ॥ १३६[7] ॥

दोहा ।

भरो हंति, दूरं दिगंतरे कांतः । केन प्रकारेणात्मा वारणीयः एवं दुरंतः एवं प्रकारेण दुरंतः ॥ ३६ ॥ (G).

१३६ । करभी नन्दा मोहिनी चारुसेनी तथा भद्रः । राजसेनः ताड़ङ्कः प्रियाणि सप्त वस्तूनि निष्पन्नानि ॥ कवीनां प्रियाणि । (C).

१३६ । अथैतस्यैव भेदानां ससंख्यं नामान्याह करहीति । पिअ — हे प्रिये करभी नंदा मोहिनी चारुसेना तथा भद्रः । राजसेनः तालंकिनी इति सत्त — सप्त वत्थु णिप्फंद — वस्तुनिस्यंदाः वस्तु-नामकस्य पूर्वोक्तवृत्तस्य निस्यंदा भेदा इत्यर्थः ॥ रड्डाया एव वस्तु राजसेन इति च नामांतरम् । (E).

१३६ । दोहांतस्य रंडेति जातिनाम्नो वृत्तस्य भेदानाह ॥ करहीति ॥ करभी १, नंदा २, मोहिनी ३, चारुसेना ४, तथा भद्रा ५ । राजसेना ६, तालंकिनी [७] प्रिये सप्त वस्तुभेदाः ॥ प्रिये इति संबुद्धिः ॥ ३७ ॥ (G).

---

१३६ । १ मोहणी (A & F). २ चारुसेणी (A, B & C), चारुसेण (E). ३ तालंकु (E). ४ किअ (A). ५ वत्थु (A). ६ णिप्फन्न (B), णिप्पण्ण (C), णिप्फुंद (D), णिप्पूल (E). ७ ३१ (A), ३७ (F).

पढम तीअ[1] पंचम पअह तेरह मत्ता जासु ।
बीअ चउत्थ[2] एगारहि[3] करहि[4] भणिज्जइ[5] तासु ॥ १३७[6] ॥
दोहा ॥ [इति] करही[7] । (C).

१३७ । प्रथमतृतीयपञ्चमपादेषु त्रयोदश मात्रा यस्यां । द्वितीयचतुर्थयोरेकादश करभी भण्यते सा ॥ अत्र चान्ते दोहा सर्व्वत्रैव बोध्या, पादपञ्चक एव विशेषः क्रियते, तत्र च त्रिकल-चतुष्कल-द्वय-द्विकलगणाः कार्य्याः, समे चतुष्कलद्वयं त्रिलघु चेत्येवमन्यत्रापि विचार्य्य व्यवस्थेयम् । (C).

१३७ । तेषु प्रथमं करभीं लक्षयति पढमेति । जासु — यस्याः प्रथमतृतीयपंचमपादेषु तेरह मत्ता — त्रयोदश मात्राः । बीअ चउत्थ — द्वितीयचतुर्थयोश्चरणयोरिति शेषः, एआरहहि — एकादशैव मात्रा भवंतीत्यर्थः, तासु — तस्याः करहि — करभीति नामेति शेषः भणिज्जइ — भण्यते ॥ अयमभिप्रायः, पूर्ववस्तुच्छंदसि प्रथमे चरणे पंचदशमात्राः द्वितीये द्वादश तृतीये पंचदश चतुर्थे एकादश पंचमे पंचदश देया इति फलितं, तत्रैव प्रथमतृतीयपंचमचरणेषु प्रथमोपान्त्यत्रिकले मात्राद्वयं दूरीकृत्य द्वितीयचरणे चांतोपान्त्यसर्वलघुचतुर्मात्रिके एकां मात्रां दूरीकृत्य चतुर्थं च पूर्व[व]देव संस्थाप्याग्रे दोहां दत्त्वा करभी वाच्या, न तु [?] विषमपादेषु प्रथमोपान्त्यत्रिकले मात्राद्वयं न्यूनं कर्त्तव्यम् । अंतोपान्त्य-

१३७ । १ तीमत्र (C), तीए (D). २ चउक्क (A). ३ एआरहि (A), इआरहहि (B & C), एआरहिँ (D), एगारहहि (E). ४ करइ (F). ५ भणिज्जसु (B & C), भणिज्जउ (F). ६ ३२ (A), ३८ (F). ७ करहि (B).

पढम तीअ पंचम पअह मत्त होइ[1] दहचारि।
बीअ[2] चउत्थ[3] एगारहिं[4] छंद भणिज्ज[5] विआरि॥ १३८[6]॥
दोहा। [इति] छंद। (A, B & C).

जगणभगणेषु चेत्यत्र किं विनिगमकमिति चेत्, सत्यं, सामान्या-नालिं[गि]तविशेषाभावात् पूर्वोक्तं रड्डानियमानामुत्तरचाप्यावश्यक-तया करभ्यामपि प्रथमचरणांते जगणविप्रान्यतरस्य, तृतीयपंच-मयोश्च भगणस्यावश्यं स्थापनीयत्वात्प्रथमपरित्यागे मानाभावाच्च प्रथमोपात्तत्रिकलमध्यत एव मात्राद्वयं न्यूनं विधेयं, द्वितीये च समचरणे अंते सर्वलघुर्देय इति नियमस्य पूर्वमुक्तत्वात् अंते सर्व-लघुस्थापनमावश्यकमिति चतुर्थचरणसाम्यतया द्वितीयचरणस्थापने बाधकाभावादंतिमसर्वलघ्वात्मकगणमध्यत एव ह[ए]का मात्रा न्यूना विधेयेति न कश्चिद्दोष इत्यस्मत्तातचरणोपदिष्टः पंथाः सुधीभिर्विभावनीयः। यत्तु विषम आद्युपात्तत्रिकलमध्ये मात्राद्वयं न त्याज्यमेककलगणाभावादिति, तत्र आर्यायामुत्तरार्द्धे षष्ठस्ये-वात्रापि प्रथमस्यैककलस्य स्थापने बाधकाभावात्। (E).

१३७। पढमेति॥ प्रथमतृतीयपंचमे पादे त्रयोदश मात्रा यस्य। द्वितीयचतुर्थयोरेकादश करभी भण्यते सा॥ अंते दोहा देयेति सर्वत्र शेषः॥ ३८॥ (G).

१३८। १ हो (A). २ विश्व (A). ३ चउच्छ (A), चतुत्थ (F). ४ एआ-रहइं (A), इआरहहि (B), इआरहइ (C), एआरहहिँ (D), एआरहहि (E). ५ सुणिज्ज (A & C), सुणिज्जहु (B). ६ ३२ (A), ३९ (F).

पढम तीअ पंचम पअह णबदह मत्ता जासु ।
बीअ[1] चउत्थ[2] एगारहि[3] तं[4] मोहिणि मुणि[5] आसु ॥ १३९[6] ॥
दोहा । [इति] मोहिणी । (B & C).

१३८ । विषमे मात्रा भवन्ति चतुर्दश । समे एकादश नन्दा भण्यते विचार्य्य ॥ (C).

१३८ । अथ नंदां लचयति पढमेति । यत्र प्रथमतृतीयपंचमपादेषु दहचारि — चतुर्दश मत्त होइ — मात्रा भवंति । बीअ चउत्थ एआरहहि — द्वितीयचतुर्थयोरेकादशैव मात्रा भवंतीति पूर्वतनानुषंगः, तं विआरि — विचार्य णंदं भणिज्ज — नंदां भण ॥ अत्रापि पूर्वोक्तरीत्या विषमपादेषु प्रथमोपान्त्यचिकलमध्यत एव एकां मात्रां दूरीकृत्य द्वितीयपादे चांतस्थचतुर्लघ्वात्मकगणमध्यत एकां मात्रां त्यक्त्वा चतुर्थं पूर्ववदेव स्थापयित्वाग्रे दोहां दत्त्वा नंदा वाच्या इति निष्कर्षः । (E).

१३८ । पढेति ॥ चतुर्दशमात्राभिर्नंदेति । शेषं पूर्ववत् । एवमग्रेऽपि ॥ ३८ । (G).

१३९ । विषमे नवदश मात्रा यस्यां । समे एकादश सा मोहिनी ज्ञायतामियम् ॥ (C).

१३९ । अथ मोहिनीं लचयति पढमेति । यस्यां प्रथमतृतीयपंचमपादेषु णबदह मत्ता — एकोनविंशतिर्मात्राः । बीअ चउत्थ

१३९ । १ बीए (D). २ चउत्ह (A), चतुत्थ (F). ३ एआरहइ (A), इआरहि (B), एआरहहिँ (D), एआरहहि (E). ४ दं (A). ५ सुणि (A), भणि (E). ६ ३४ (A), ४० (F).

पढम तीअ पंचम पअह मत्त[1] पणरह[2] जासु।
बीअ चउत्थ[3] एआरहि[4] चारुसेणि[5] मुणि आसु[6]॥१४०[7]॥
दोहा। [इति] चारुसेणी। (B & C).

एआरहहि—द्वितीयचतुर्थयोरेकादशैव मात्रा भवंति, तं—तां आसु—एनां मोहिणी [—मोहिनीं] सुणि—जानीहि॥ अत्र विषमेषु त्रिकलानंतरं चत्वारश्चतुर्मात्रिका विधेयास्तेष्वेव प्रथम-पादांते जगणो विप्रो वा विधेयस्तृतीयपंचमयोश्चांति[म]भगण एव विधेयो द्वितीये चांतिममध्यत एव एकां मात्रां निष्कास्य चतुर्थं च पूर्ववदेव संस्थाप्याग्रे दोहां दत्त्वा मोहिनी वाच्येति व्यवस्था। (E).

१३९। पढेति॥ एकोनविंशतिस्तां मोहिनीं जानीत॥ ४०॥ (G).

१४०। विषमे मात्राः पञ्चदश यस्यां। समे एकादश चारुसेनी ज्ञायतामियम्॥ (C).

१४०। अथ चारुसेनां लक्षयति। जासु—यस्याः प्रथम-तृतीयपंचमपादेषु पणरह—पंचदश मत्त—मात्राः। बीअ चउत्थ—द्वितीयचतुर्थयोः पादयोः एकादशैव मात्रा भवंतीति शेषः, आसु—एनां चारुसेनां भण—कथय॥ अत्र विषमचरणान् वस्तुन इव संस्थाप्य द्वितीयचतुर्थौ चरणौ करभ्या इव विधायाग्रे दोहां दत्त्वा चारुसेना वाच्येति निष्कर्षः। (E).

१४०। पढेति॥ पंचदश चारुसेना ज्ञेया॥ ४१॥ (G).

१४०। १ मत्ता (F). २ पणर (B), पणद्द (F). ३ चउक (A). ४ एआ-रहहि (A, D & E), इआरहहि (B & C). ५ चारुसेणी (B), चारुसेण (D & E). ६ भणु तासु (A). ७ ३५ (A), ४१ (F).

पढम तीअ पंचम पअह मत्ता दहपंचाइँ ।
बीअ चउत्था[१] बारहहि[२] भद्द णाम कहि आइँ ॥ १४१[३] ॥
दोहा । [इति] भद्द । (B & C).

पढम तीअ पंचम पअह मत्त पणरह[१] जासु[२] ।
सम बारह अरु[३] एक्कदह राअसेण[४] भण[५] तासु[६] ॥ १४२[७] ॥
दोहा । [इति] राअसेण । (B & C).

---

१४१ । विषमे मात्राः पञ्चदश । समे द्वादश भद्रनाम उच्यते भण्यते वा ॥ (C).

१४१ । अथ भद्रं लक्षयति पढमेति । प्रथमतृतीयपंचमपादेषु मात्राः पंचदश, द्वितीयचतुर्थयोर्द्वादश मात्राः भवंति, आइं — एतस्य भद्रेति नाम कथितम् ॥ अत्र चतुर्थे त्रयश्चतुर्मात्रिका अन्ये वस्तुनइवेति निष्कर्षः । (E).

१४१ । पढेति ॥ द्वितीयचतुर्थयोर्द्वादश, भद्रा नाम कथ्यते ॥ ४२ ॥ (G).

१४२ । विषमे मात्राः पञ्चदश। द्वितीये द्वादश, चतुर्थे एकादश, राजसेनो भण्यताम् ॥ (C).

१४२ । अथ पूर्वं विसम तिकलेत्यनेन [Vide श्लोक १२४ p. 230.] लक्षितमपि राजसेनापरनामकं वस्तु वृत्तं करही नंदेत्यत्र तदन्य-

---

१४१ । १ चउतहे (A). २ वारहइ (A), वारइ (B & C). ३ ३९ (A), ४२ (F).

१४२ । १ पन्नर (B), पणरह (F). २ जच्छ (A), चल (D). ३ चरद (A). ४ राजसेण (E). ५ भणु (B, C & D). ६ तच्छ (A), तथ (D). ७ ३० (A), ४३ (F).

पढम तीअ पंचम पअह मत्ता सोलह जासु।
सम बारह अरु[1] एक्कदह तालंकिणि भणु[2] तासु॥ १४३[3]॥
दोहा। [इति] तालंकिनी[4]। (A).
इति रड्डाप्रकरणम्[5]। (A, B & C).

एत्र राजसेनः कथित इति भ्रमनिरासार्थं पुनस्तमेव लक्षयति पढमेति। प्रथमतृतीयपंचमपादेषु मात्राः पंचदश यत्र। समे चरणे द्वादश अरु—अथच एक्कदह—एकादश राजसेनं भणत च॥ एतन्निष्कर्षश्च पूर्वमेव कृतः। (E).

१४२। पढेति॥ समे द्वादशान्यदेकादश राजसेना भण्यते सा॥ समे प्रथमे[द्वितीये] अन्यत् चतुर्थेऽर्थः॥ ४३॥ (G).

१४३। विषमे मात्राः षोडश, द्वितीये द्वादश, चतुर्थे एकादश, ताडङ्किनी भण्यताम्॥ (C).

१४३। अथ ताडं[लं]किनीं लक्षयति पढमेति। यस्याः प्रथम-तृतीयपंचमपादेषु सोलह—षोडश मात्रा भवंतीति शेषः। समे—द्वितीये चतुर्थे च द्वादश अथच एक्कदह—एकादश मात्रा भवंतीति शेषः, यथायथं योजनीयः। द्वितीये द्वादश मात्रा भवंतीत्यर्थः। तासु—तां ताडं[लं]किनीं भण॥ अत्र विषमपादेषु [ज]गणांता विप्रांता वा चत्वारश्चतुष्कलाः कार्य्याः, समौ च पूर्ववत्, अग्रे दोहां दत्त्वा ताडं[लं]किनि[नी] वाच्येति निष्कर्षः। * इति श्रीपिंगलप्रकाशे रंडाप्रकरणम्॥ * (E).

१४३। पढमेति। * * * तालंकिनी भण्यते सा॥ ४४॥ (G).

१४३। १ वा (A, B & C). २ भणि (B), भण (D). ३ १८ (A), ४४ (F). ४ तालकी (B & C). ५ इति रंडा (F).

अथ पद्मावती छंदः । (D).

भणु[1] पउमावत्ती[2] ठाणं ठाणं
चउ[3]मत्ता गण[4] अट्ठाआ[5],
धुअ कण्णो करअल[6] विप्पो चरणो
पाए[7] पाअ उक्किट्ठाआ[8] ।
जइ पलइ[9] पओहर[10] किमइ[11] मणोहर[12]
पीडइ[13] तह णाअक्क[14]गुणो[15],
पिअरहि[16] संतासइ कइ[17] उब्बासइ
इअ[18] चंडालचरित्त गणो ॥ १४४[19] ॥

---

१४४ । भण पद्मावतीं स्थाने स्थाने चतुर्मात्रा गणा अष्टौ । अत्र के गणा इत्याह, ध्रुवं कर्णः करतलं विप्रश्चरणः पादे पादे उत्कृष्टस्थाप्याः । यदि पतति पयोधरः किमयं मनोहरः पीडयति तथा नायकगुणं तथा न यो जनं प्रियवत्संस्थापयति, कविमुद्वासयति, अयं चण्डालचरितगणः ॥ कर्णो द्विगुरुः ऽऽ, करतलमन्त-

---

१४४ । १ भण (B & C). २ पोमावती (A), पउम्मावत्ती (B & C), पोमावत्ती (E), पोमावती (F). ३ चत्र (A), चौ (E & F). ४ गणा (F). ५ अट्ठाआ (B & C), अठाआ (F). ६ करअलु (B & C). ७ पाअ (A). ८ उक्किट्ठाआ (B & C), उक्किट्ठाआ (F). ९ पइ (A). १० पओहर (B & C). ११ किमउ (F). १२ माणोहर (A), मणोहर (C). १३ पीडउ (C). १४ णाइक्क (F). १५ गुणा (F). १६ पिअरह (A, B & C), पिअरही (E). १७ कवि (F). १८ इअ (B & C). १९ २९ (A), ४५ (F).

गुरु ॥ऽ, विप्रः सर्व्वलघुः ॥॥, चरण आदिगुरुः ऽ॥, एते यथेच्छं स्थाप्या न तु क्रमनियमः । अत्र च जगणः सर्व्वथा न कार्य्यः । (C).

१४४ । अथ पद्मावतीं लक्षयति भण पोमावत्तीति । यत्र कणो—कर्णः गुरुद्वयात्मको गण इत्यर्थः, करअल—करतलं गुर्वंतः सगण इत्यर्थः, विप्पो—विप्रश्चतुर्लघुको गण इत्यर्थः, चरणः गुर्वादिर्भगण एत एवेति शेषः चउमत्ता—चतुर्मात्रिकाः अट्ठाआ—अष्टौ गणाः पाए पाअ—[पादे पादे] देयाः प्रतिचरणमित्यर्थः, ठाणं ठाणं—स्थले स्थले, उक्किट्ठाआ—उत्कृष्टाः अधिका बहुश इति यावत् पतंति । यत्र प्रतिचरणं स्थापनीया अष्टौ गणाः कर्णसगणविप्रभगणस्वरूपा एव पतंति नान्य एत एव पौर्वापर्य्येण पुनः पुनः वाराष्टकं पतंतीति यावदित्यर्थः, तां पोमावत्ती—पद्मावतीं भण पद्मावतीनामकं तद्वृत्तं कथयेत्यर्थः । अत्र जइ—यदि पओहर—पयोधरः मध्यगुरुर्जगण इत्यर्थः पलइ—पतति, तह—तदा किमपि मनोहरं सम्यक् न भवतीति शेषः, किंतु चंडालचरित्रः इअ—अयं जगणाख्यो गणः णाअक्कगुणं—नायकगुणं पीडयति, पिअरहि—पितरं संत्रासयति, अतएव कइ उव्वासइ—कविमुद्वासयति ॥ अत्र जगणे पतिते यस्य कवित्वमेतच्छंदसा भवेत्स राजा नश्येत्, नष्टे च तस्मिन्नेतादृशकवित्वनिर्माणकर्त्रा कविनापि बंधनताडनादिव्यथा प्राप्तव्येति, अत्र जगणः सर्वथा न देय इति भावः । (E).

१४४ । भणु इति । भण पद्मावतीं स्थाने स्थाने चतुर्मात्[त्रि]कं गणाष्टकं ॥ मात्रा गण[य]ति ॥ ध्रुवेति ॥ ध्रुवं कर्णः करतलं विप्र-

जहा, भअ भंजिअ[१] बंगा भंगु[२] कलिंगा
तेलंगा[३] रणमुक्कि चले,
मरहट्टा[४] धिट्टा[५] लग्गिअ[६] कट्टा[७]
सोरट्टा भअ[८] पाअ पले ।
चंपारण कंपा पव्वअ[९] झंपा
ओत्था[१०] ओत्थी[११] जीव हरे[१२],
कासीसर[१३] राणा[१४] किअउ[१५] पआणा[१६]
बिज्जाहर भण[१७] मंतिबरे[१८] ॥ १४५[१९] ॥ पद्मावती ।

स्वरणः पादे पादे उत्कृष्टः, यदि पतति पयोधरः किमपि न मनोहरं, पीडयति तथा नायकगुणं, पितरमपि संतापयति, कविमुद्वासयति इति चंडालचरित्रो गणः, जगण इत्यर्थः ॥ द्विगुरुः कर्णः, करतलं सगणः, विप्रश्चतुर्लघुश्चरणो भगणः ॥ तत्र जगणस्य दुष्टफलत्वान्न कार्य इति ॥ दशाष्टचतुर्दशसु यतिः ॥ ४५ ॥ (G).

१४५ । उदाहरति । भयभग्ना वङ्गा भग्नाः कलिङ्गाः तेलङ्गारणमत्तास्खलिताः, महाराष्ट्रा धृष्टा नग्नकोष्ठाः सौराष्ट्रा भयात्पदे

---

१४५ । १ भज्जिअ (C & E). २ भजु (A), भक्क (C), भग्ग (E). ३ तेरंगा (C). ४ मरहट्टा (B & C), मरहट्ठु (E). ५ ढिट्ठा (A). ६ लगिअ (E). ७ कट्टा (B & C), कंठा (F). ८ गअ (A), पअ (B & C). ९ पव्वह (C). १० ओत्था (A), ओत्थौ (D & F). ११ ओत्थी (A). १२ जीअ हरे (A & C), जीवपर (F). १३ वणासीसर (C). १४ सणा (D), राआ (F). १५ किण (A), किएउ (E). १६ पआआ (F). १७ भणु (B & C). १८ सान्तसरे (B), मंतिवरे (E). १९ ४० (A), ४६ (F).

पदे पतिताः। चन्दनेन[?] कम्पिताः पर्व्वतसर्पा उत्थितोत्थिताः जीवितं हापितवन्तः काशीश्वरराणाः कृतोपयानाः विद्याधरोभणति मन्त्रिवरः॥ राणाः तत्तद्देशीयाः चत्रियाः पराजिताः पर्व्वते कृतः सर्पो यैः ते तथा कृतोपयानाः कृतपलायनाः। कस्यचिद्राज्ञः स्तुतिरियम्। (C).

१४५। अथ पद्मावतीमुदाहरति भञ्ज भञ्जिञ्ज इति। यदा कासीसर राणा—काशीश्वरेण दिवोदासेन राज्ञा, पञ्चाणा—प्रयाणं किएउ—कृतं, तदा बंगा—वंगदेशीया राजानः भञ्ज भञ्जिञ्ज—भयेन भग्नाः कृताः, भग्ग कलिंगा—पलायिताः कलिंगाः, तेलंगा रण मुक्कि चले—तैलंगाः रणं मुक्त्वा चलिताः, धिट्ठा—धृष्टा रणनिर्भीका इत्यर्थः मरहट्ठ—महाराष्ट्राः कट्ठा—काष्ठासु दिचु लगिञ्ज—लग्नाः पलाय्य दिगंतं गता इत्यर्थः, सौराष्ट्रा भयेन पादपतिताः, पब्बञ्ज झंपा—पर्वतझंपाः कंपा—कंपाः कंपनशीला इत्यर्थः चंपारणाः ञोत्था ञोत्थी—उत्थायोत्थाय पौनःपुन्येन कंपवशात्पूर्वं पतित्वा अनंतरं उत्थायोत्थायेत्यर्थः, जीव हरे—जीवं स्वप्राणान् हरंति त्यजंति इति, विद्याधरः मंत्रिश्रेष्ठो भणति॥ अत्र प्रथमचरणे तृतीयः पंचमः षष्ठो गणः कर्णस्वरूपः, प्रथमो द्वितीयश्चतुर्थः सप्तमोऽष्टमश्च सगणस्वरूपः, द्वितीयचरणे च द्वितीयतृतीयपंचमषष्ठगणाः कर्णस्वरूपा अन्ये च सगणस्वरूपाः, तृतीये चरणे च प्रथमतृतीयपंचमषष्ठसप्तमगणाः कर्णस्वरूपा अन्ये च सगणरूपाः, चतुर्थे च प्रथमपंचमौ गणौ कर्णरूपौ षष्ठतृतीयौ भगणरूपौ अन्ये च सगणरूपाः, इत्थं गणाः पतिताः,

अथ कुंडलिआ छंदः । (D).

दोहा लक्खण पढम पढि[१] कव्वह[२] अद्ध णिरुत्त ।
कुंडलिआ बुहअण मुणहु[३] उल्लाले[४] संजुत्त ॥
उल्लाले संजुत्त[५] जमक[६] सुद्धउ[७] सलहिज्जइ[८]
चउ[९]आलह सउ[१०] मत्त सुकइ दिढ बंधु[११] कहिज्जइ[१२] ।
चउ[१३]आलह सउ[१४] मत्त जासु तणु[१५] भूसण सोहा[१६]
एम[१७] कुंडलिआ जाणहु[१८] पढमपढि जह[१९] दोहा ॥ १४६[२०] ॥

विप्रस्तु न कचिदपि पतितस्तथापि सोऽपि यदि पतति तदापि बाधकं नास्तीति । (E).

१४५ । भग्न इति ॥ भयभग्ना वंगा भग्नाः कलिंगास्तेलिंगा रणं मुक्ता चलिताः ॥ महाराष्ट्रा धृष्टा लीनकंठाः सौराष्ट्रा भयेन पादयोः पतिताः ॥ चंपारणाः कंपिताः पर्वतनिलीना उत्थायोत्थाय जीवाः पतंति ॥ काशीश्वर राजन् कृता उपाया विद्याधरेण बड़ [भण्यते] मंत्रिवरेण ॥ ४६ ॥ (G).

---

१४६ । १ पढ (F). २ कम्महि (F). ३ मुणऊ (A, B & E). ४ उल्लले (E). ५ Non est (B & E). ६ जमच (F). ७ सुद्दइ (B). ८ सुलहिज्जसु (B), सलहिज्जसु (C). ९ चौ (E & F). १० सौ (E & F). ११ बंध (A & E). १२ कहिज्जसु (B), करिज्जइ (F). १३ चौ (F). १४ सौ (F). १५ भस (B). १६ सेहा (C). १७ तं (B & C), एमह (E). १८ जाण (A, B & C), मुणऊ (D & E). १९ पढम जहि पडिए (A), पढम पाठ चइ पुटि (B), पढम पढि चइ पढि (C), पढम पढि चइ जहँ (D & E). २० ४१ (A).

१४६। दोहालक्षणं प्रथमं पठित्वा काव्यस्यार्द्धं निरुक्तं। कुण्ड-लिकां बुधजना जानीत उल्लालेन संयुक्ताम्। यमकशुद्धां श्लाघ्यचतु-श्चत्वारिंशत्शतमात्राः कविना दृढबन्धाः कथ्यंते, चतुश्चत्वारिं-शत्शतं मात्रा यस्यां तथा भूषणशोभां तां कुण्डलिकां जानीहि प्रथमं पद्यते दोहा॥ एतस्य छन्दसः संपूर्णा दोहैव प्रथमार्द्धं, काव्य-च्छन्दः संपूर्णं परार्द्धं, पादचतुष्टयादधिकपादस्य उल्लालसंज्ञा, यमकमत्रानुप्रासः पुनरावृत्त्या भवति यमकेन शुद्धः, अतएव श्लाघा-विषयः, दृढबन्धता झढधघभादिमहाप्राणाक्षरयोगात्, भूषणसु-पा[पमा]द्यलङ्कारः। प्रथमं दोहां पठित्वा कुण्डलिकेत्यर्थः॥ (C).

१४६। अथ कुंडलिकां लक्षयति दोहा लक्खणेति। बुह-अण—बुधजनाः यस्याः पढम—प्रथमम् अद्ध—अर्द्धं, तथाच पूर्वार्द्धमित्यर्थः, दोहा लक्खण—द्विपदिकालक्षणं पढि—पठित्वा, णिरुत्त—निरुक्तं, द्विपदिकास्वरूपमेव यस्याः पूर्वार्द्धमित्यर्थः, द्वितीयं चेति शेषः अर्द्धमिति पूर्वानुषंगः, तथाच द्वितीयम् अर्द्धम् उत्तरार्द्धमित्यर्थः कव्वह—काव्येन निरुक्तं—काव्यस्वरूपं यस्याः उत्तरार्द्धमित्यर्थः उल्लाले संजुत्त—उल्लालेन संयुक्ताम्। उल्ललनम् उल्लालः कतिपयवर्णानां परावृत्य पठनमित्यर्थः कव्व [—काव्येन] तेन सहितामित्यर्थः, तां कुंडलिआ—कुंडलिकां मुणऊ—जानीत, इयं च उल्लाले संजुत्त जमअ—उल्लालसंयुक्तयमका उल्लालेन संयुक्तानि यमकानि शीर्षादृश्यवंत्यक्षराणि यस्यां तादृशीत्यर्थः, सुद्धउ—शुद्धा, सलहिज्जइ—श्लाघ्यते, तथाच न केवलमुल्लाल-युक्तैवेयं विधेया किंतु यमकान्यपि देयानीति भावः। चौ[चउ]-

आलइ सउ मत्त सुकिअ दिढ बंधु—चतुश्चत्वारिंशदधिकशत-मात्रासुकृतदृढबंधा चतुश्चत्वारिंशदधिकशतमात्राभिः सुतरां कृतः दृढः बंधो योजनं यस्यां सा तादृशीत्यर्थः कहिज्जइ—कथ्यते। क्वचित्तु सुकइ दिढ बंधु इति पाठस्तत्र सुकविदृढबंधुनाम-कवि-परममित्रेण पिंगलेनेति यावत्। चतुश्चत्वारिंशदधिकं शतं मात्राः अत्र कथ्यंत इति भिन्नं भिन्नमेव योजनीयं, चउआलइ सउ मत्त—चतुश्चत्वारिंशदधिकं शतं मात्राः जासु—यस्यां, तणु भूसण सोहा—तनुभूषणशोभाः शरीरभूषणानां शोभा इत्यर्थः जनयंतीति शेषः। एम कुंडलिआ मुणहु—एवं कुंडलिकां जानीत, पढम पठि जइ दोहा—प्रथमं पठ्यते यत्र दोहा इति योजना॥ भावार्थस्तु—पूर्वार्द्धं पूर्वोक्तदोहावृत्तेन विधेयमुत्तरार्द्धं च पूर्वोक्त-काव्यवृत्तेन विधेयमित्युक्तं। तत्र यद्यपि दोहायां काव्ये च उल्लाल-यमकयोर्नियमो नोक्तस्तथाप्यत्र उल्लालो यमकं चेति द्वयमवश्यं विधेयमिति विशेषः। एवं च दोहाचरणचतुष्टयस्याष्टचत्वारिंश-न्मात्राः काव्यचरणचतुष्टयस्याश्च षण्णवतिमात्रा एकीकृत्य चतु-श्चत्वारिंशदधिकशतं मात्राश्चरणाष्टकस्या इहावसेया इति विभाव-नीयम्। (E).

१४६। दोहेति॥ दोहालक्षणं प्रथमं पठ काव्येनार्द्धं निरुक्तं॥ कुंडलिकां बुधजना जानीत उल्लालेन संयुक्तं॥ उल्लालेन संयुक्तं यमकं शुद्धं श्लाघ्यते॥ चतुश्चत्वारिंशत् शतं मात्राः सुकविना दृढबंधाः क्रियंते, चतुश्चत्वारिंशन्मात्रा यत्र तनुभूषणशोभा॥ एवं कुंडलिकां जानीत प्रथमं पठ्यते यत्र दोहा॥ उल्लालेन परावृत्त्या

जहा,

ढोल्ला[1] मारिअ ढिल्लि[2]मह[3] मुच्छिअ मेच्छ[4] सरीर ।
पुर जज्जल्ला[5] मंतिबर[6] चलिअ[7] बीर हम्मीर[8] ॥
चलिअ[7] बीर हम्मीर[8] पाअभर मेइणि[9] कंपइ
दिग मग णह अंधार धूलि सूरह रह[10] झंपइ ।
दिग मग णह[11] अंधार आणु[12] खुरसाणक[13] ओल्ला[14]
दरमरि दमसि[15] बिपक्ख मारुअ[16] ढिल्लि[17]मह ढोल्ला ॥
१४७[18] ॥ कुंडलिआ ।

स्वर[स]विशेषेण च दोहाकाव्याभ्यां कुंडलिका छंदः उल्लालयमकाभ्यां युक्ता श्लाघ्या भवति । प्रतिमात्रं संघट्टनादिगुणैरलंकारैश्च संयुक्ता चेत्प्रशस्ततरेति निष्कर्षः ॥ उल्लालेत्यादि पादपूर्त्यर्थमिति केचित् ॥ उल्लालः पदावृत्तिः, स्वरसविशेषश्च ॥ ४७ ॥ (G).

१४७ । उदाहरति । ढोल्लं मारयित्वा ढिल्लीमध्ये मूर्च्छितम्लेच्छशरीरः पुरोजुज्जुल्लामल्लवरश्चलितः वीरः हम्बीरः । चलितवीरहम्बीरपदभरेण मेदिनी कम्पते, दिङ्मार्गनभांस्यन्धकारः धूलिः

---

१४७ । १ सेल्ला (D). २ ढिल्लि (B). ३ महि (F). ४ मच्छ (F). ५ जुज्जुल्ला (C), किय जज्जल (F). ६ मल्लवर (A, B & C). ७ चल्लि (A). ८ हमीर (A), हम्बीर (B & C), no repetition in (F). ९ मेचणि (F). १० सूराहर (A), सूरहर (B), सूरज रह (D & E), the pāda ending in झंपइ dropt in (C). ११ दिगगमण (F). १२ आण (E), अणु (F). १३ खुरसाणक (A), खुरसाणुक (D). १४ ढोला (F). १५ दलमलिय दमसि (A), दरवलि दमसु (B & C), वर दमिय (F). १६ मारु (A, B, D & E), मरु (C). १७ डिल्लि (F). १८ ४९ (A), ४८ (F).

सूर्य्यस्य रथं झम्पयति । दिङ्मार्गनभोऽन्धकारे आनीतः खुरशानस्य ओल्लः दलयित्वा दृष्ट्वा पच्चं मारितो ढिल्लीमध्ये ढोल्लः ॥ ढोल्लं वाद्यविशेषं मारयित्वा संताड्य, ढिल्लीति इन्द्रप्रस्थस्य संज्ञा, मूर्च्छितानि म्लेच्छशरीराणि येन स तथा, जुज्जुल्ला नाम सेनापतिः स एव मल्लवरः सः [पुरो यस्य स] तथा, दिङ्मार्गनभांसि झम्पयत्याच्छादयति । ओल्लशब्दः पतिवाचकः । (C).

१४७। अथ कुंडलिकामुदाहरति ढोल्लेति । पुर जज्जल्ला मंतिवर—पुरोजज्जल्लमंत्रिवरः पुरोऽग्रे जज्जल्लनामा मंत्रिवरो यस्य स तादृश इत्यर्थः वीरहंमीरः चलित इति यदा ढिल्ली मह—डिल्लीमध्ये ढोल्ला—आनकः डिंडीरवार्थमिति भावः मारिअ—मारितस्ताडित इत्यर्थः, तदा मेच्छ सरीर—म्लेच्छशरीराणि मुच्छिअ—मूर्च्छितानि । अग्रेसरजज्जल्लाख्यमंत्रिवरो हंमीरनामा स्वनगराच्चलित इति फुत्कृत्य सर्वजनानां सावधानतासंपादनाय डिल्लीमध्ये यदा डिंडीरवार्थं पटहस्ताडितः तदा तच्छ्रुत्वा हंमीरागमनत्रस्ता म्लेच्छा मूर्च्छिता इति भावः ॥ चलिअ वीर हंमीर पाअभर—* * पादभरेण मेदिनी पृथ्वी कंपइ—कंपते, धूलि—धूलिभिः सैन्यपादाघातोत्थरजोभिरित्यर्थः सूरज—सूर्यस्य [रह—] रथः झंपइ—आच्छाद्यते, ततश्च दिग मग णह—दिङ्नभोमार्गे अंधार—अंधकारः जात इति शेषः । दिग मग णह—दिङ्नभोमार्गे अंधार—अंधकारे सति खुरसाणक—खुराशानस्य देशस्य ओल्ला—दंडप्रतिनिधिभूताः पुरुषा आण—आनीता इति यद्यपि, तथापि हे वीर सुरत्राणेति संबोधनमध्याहर्त्तव्यं, त्वं दरमरि—

पढमहि दोहा चारि पत्र चउ[1]पत्र कव्वह[2] देहु[3] ।
एम[4] कुंडलिआ अट्ठपअ पअपअ जम कुणेहु[5] ॥१४८[6] ॥
दोहा । [इति] कुंडलिआ । (A).

चरणतलैर्विमर्द्य विपक्ख—विपक्षान् [दमसि—] दमयसि, अतः दिल्ली मह—दिल्ल्या मध्ये ढोल्ला—पटहं मारु—ताड़य । यद्यपि हंमीरस्खलित इति श्रुत्वा अन्ये म्लेच्छा मूर्च्छिताः खुरासानदेशीयैश्च दंडप्रतिनिधिभूता मनुष्याः समर्पिताः, तथापि त्वया न भेतव्यं किंतु योद्धृणां रणसज्जीभावाय पुनर्द्वितीयो डिंडीरवः त्वया कारणीय-इति किंचिदायस्तधैर्य्यं सुरत्राणं प्रति कस्यचिन्मंत्रिण उक्तिः । (E).

१४७ । यथा ॥ ढोल्लाख्यो देशो मारितः, शिथिला मही, मूर्च्छितं म्लेच्छशरीरम्, अत इति शेषः पुरः कृत्वा जज्जलं मंत्रिवरं चलिते वीरहम्मीरे चलितानां वीराणामहमहमिकया पादभरेण मेदिनी कंपते दिग्गगनमंधकारयंत्या धूल्या सूर्यस्य रथ आच्छाद्यते ॥ दिग्मार्गेष्वंधकारेऽन्यत् खुर[शा]णः कंपितो दरेण वरं कंपितो विपक्षस्ताड़ितो दिल्लीमध्ये दुंदुभिः ॥ ४८ ॥ (G).

१४८ । अथ दो[हा]च्छन्दसः पादचतुष्टयेन काव्यच्छन्दःपाद-चतुष्टयेन च कुण्डलिकाष्टपदा भवतीति सिद्धम् । तदेव स्पष्ट-यति । प्रथमतो दोहायाश्चत्वारि पदानि [चतुष्पदानि] काव्यस्य देहि, एवं कुंडलिकाष्टपदा पदे पदे यमकं कुरु ॥ (C).

---

१४८ । १ चौ (E & F). २ कव्वर (A), कव्वउ (C), काव्वह (E), कव्वद (F). ३ देहि (E), देइ (F). ४ एव (C). ५ कुणेह (E), कुणेहि (F). ६ ४१ (A), ४९ (F). This verse is not found in (B).

अथ गगनांगच्छंदः । (D).

पत्र पत्र ठबहु जाणि[1] गगणंगउ[2] मत्त[3] विहूसिणा[4]
भाबउ[5] बीस[6] कलत्र[7] सर अग्गल[8] लहु गुरु सेसिणा[9] ।
पढमहि मत्त चारि गण[10] किज्जहु[11] गणह[12] पत्रासित्रो[13]
बीसक्खर सत्रल[14] पत्रह[15] पित्र[16] गुरु अंत पत्रासित्रो[17]॥
१४९[18] ॥

---

१४८ । अथ दोहावृत्तेन पुनः स्पष्टीकृत्य कुंडलिकालक्षणमाह पढमहि इति । पढमहि—प्रथमे अर्द्धे इति भावः दोहा चारि पत्र—दोहायाश्चत्वारि पदानि ततो द्वितीयार्द्धे कब्बह—काव्यस्य चउपत्र—चत्वारि पदानि देहि, एवं कुंडलिका अष्टपदी, तत्र पादे पादे यमकानि क्रियन्तां ॥ यमकानीति उल्लालाना-मप्युपलक्षकम् । इदं चोदाहरणानंतरं लक्षणकथनमनौचित्यमावह-तीति क्षेपकमिवाभाति इति बोध्यम् । (E).

१४८ ॥ पढेति ॥ प्रथमेषु दोहां चतुःपदेषु, चतुःपदेषु काव्यं देहि ॥ एवं कुंडलिकाष्टपदा पदे पदे यमकं कुरु ॥ ४९ ॥ इति कुंडलिका ॥ (G).

---

१४९ । १ जान (B). २ मगणंक (C). ३ मम (C). ४ विभूसिणा (B & C), विडसिणा (E). ५ तावउ (A), भावउ (B & C), भावइ (E). ६ बीसइ (D & F). ७ कल (D & F), कइस (E). ८ अग्गा (E). ९ सोहिणा (C). १० गण चारि मत्त (B & C), मत्त दारि गण (D), चारि मत्त गण (E). ११ किज्जइ (D & E), दिज्जइ (F). १२ गणह (A & C), गणऊ (B). १३ पत्रासि (C). १४ स लत्र (B & C), समहँ (D), सम (E), सर सत्र (F). १५ बत्रह (E). १६ पि (F). १७ पत्रइत्रो (B). १८ ४४ (A), ५० (F).

१४९ । अथ गगनाङ्कः ॥ पदे पदे स्थापय ज्ञात्वा गगनाङ्कं मात्राविभूषणं भागो विंशतिकलाः प[श]राधिकाः लघुगुरुशोभिताः । प्रथमे चतुर्मात्रो गणः क्रियतां गणाः प्रकाशिताः विंशत्यक्षराणि स लभते पदे प्रिये गुरुरन्ते प्रकाशितः ॥ मात्राविभूषणादिकमित्यनेन मात्रानियम एव नलत्र गणनियमइत्युक्तं भवति । विशेषमाह, भागः पादः, शराधिकाः पञ्चाधिकात्वेन पञ्चविंशतिकलाः पादाः लघुगुरुलक्षिता लघुगुरुविशोधि-[भि]ताः, लघवो गुरवश्च यथेच्छं देया इति भावः, लघुयुक्तो गुरुरन्ते देय इत्यपरे । (C).

१४८ । अथ गगनांगनामकवृत्तं लक्षयति पअ पअ इति । हे पिअ — प्रियाः शिष्याः यत्र पढमहि — प्रथमपादादाविति यावत् चारि मत्त गण — चतुर्मात्रकः गणः किज्जइ — क्रियते, ततो यथेच्छं चतुष्कलैर्वत्यध्याहारः, गणह — गणैः, यत् पआसिओ — प्रकाशितं, यत्र च गुरु अंत पआसिओ — अंतप्रकाशितगुरुणि अंते समाप्तौ प्रकाशितो गुरुर्येषु तादृशानीत्यर्थः, तथाच कर्त्तव्येषु विंशतितममक्षरं गुरुरूपमेव कार्यमिति भावः, बीसक्खर — विंशत्यक्षराणि, सभ पअह — सर्वेषु पादेषु प्रत्येकं पतन्तीति शेषः, तत् पअ पअ — पादे पादे प्रतिचरणमित्यर्थः, मत्त विहूसिआ — मात्राविभूषितं गअणंगउ — गगनांगं गगनांगनामकं वृत्तं जाणि — ज्ञात्वा ठवहु — स्थापयत । कियतीभिर्मात्राभिर्विभूषितमित्यपेक्षा[या]माह भावउ इति । अत्र लहु गुरु सेहिआ — लघुगुरुशेषिता लघुगुरुभ्यां समाप्तिं नीता इत्यर्थः सर अग्ग — शराधिकाः

पढमहि[1] चक्कलु[2] होइ गण अंतहि[3] दिज्जहु[4] हारु[5]।
बीसक्खर गअणंग[6] भणु[7] मत्त पचीस[8] विआरु॥
१५०[9]। दोहा।

शराः पंच तथाच पंचाधिका इत्यर्थः, बीसइ कल—विंशतिरेव कलाः भावउ—भावयत, तथाच पंचविंशतिर्मात्रा अत्र प्रतिचरणं पतंति, तास्वेव चांतिमं मात्रात्रयं लघुगुरुरूपं कार्यमित्यर्थः। अत्र च चतुर्ष्वपि चरणेषु पादादौ चतुष्कल एव गणः कार्यः, अनंतरं च चतुष्कलैः पंचकलैर्वा, यथा चरणे विंशत्यक्षराणि पंचविंशतिर्मात्राश्च पतंति, पादान्ते चावश्यं क्रमेण लघुर्गुरुश्चायाति तथैव गणा देया इति तात्पर्यार्थः। (E).

१४९। पअ इति॥ पदे पदे स्थापय ज्ञात्वा गगनांगणे मात्राविभूषिते भाव्यंतां विंशतिकलाः शराधिका लघुगुरुमिश्रिताः॥ प्रथमं मात्राचतुष्टयरूपो गणो दीयतां॥ गणाः प्रकाशमानाः अन्ये इति शेषः॥ विंशतिरक्षराणि शराः [?] सर्वाणि पादे प्रिये गुरुरंते प्रकाशितः॥ आदौ लघुचतुष्टयमंते गुरुः शेषाणि विंशतिरक्षराणि[?] यथेच्छं कार्याणीति भावः॥ ५०॥ (G).

१५०। विशेषान्तरमाह प्रथम इति। प्रथमे चतुष्कलो भवति गणोऽन्ते क्रि[दी]यते हारः। विंशत्यक्षरं गणं(ग)नाङ्कं भण मात्राः

१५०। १ पढमङ्क (B & C). २ चक्कल (A & D). ३ अंतङ्क (C), अंतइ (F). ४ दिज्जउ (C), ङिज्जइ (D), दिज्जइ (E & F). ५ हार (A), तारु (D). ६ गगणंग (B), खनंग (C), खअणगण (F). ७ भन (A). ८ चौस (F). ९ ४५ (A).

जहा,

भंजिअ मलअ चोल वइ णिवलिअ[1] गंजिअ गुज्जरा[2]
मालव राअ[3] मलअगिरि लुक्किअ परिहरि[4] कुंजरा ।
खुरासाण[5] खुहिअ रण मह मुहिअ[6] लंघिअ[7] साअरा
हम्मीर[8] चलिअ हारव[9] पलिअ[10] रिउगणह[11] काअरा[12] ॥

१५१[13] ॥ गगणांग[14] । (B).

पञ्चविंशतिं विचारय ॥ पदे प्राथमिको गणश्चतुर्मात्रः, परे गणाः प्रकाशिताः प्रकटा यथेच्छं कार्य्या इत्यर्थः । स ग[ग]नाङ्कपादो विंशत्यक्षराणि लभते, तेनात्र पञ्च गुरवः पञ्चदश लघवो भवन्ति, प्रिय सम्बोधनं, अन्ते च गुरुः कार्य्यः। तमेवार्थं निष्कृष्याह पढमेति। हारो गुरुः, पञ्चविंशतिमात्राः प्रतिपादं देयाः । (C).

१५० । अथैनमेवार्थं द्विपदिकया स्पष्टीकृत्याह पढम इति । यत्र पढमहि—प्रथमं पादादौ चक्कलु गण—चतुष्कलो गणः होइ —भवति, अंतहि—अंते पादांते दिज्जइ हार—दीयते हारः गुरुः, तत् गअणंग—गगनांगं भण—कथय, अत्र च बीसक्खर—विंशत्यक्षराणि, पचीस मत्त—पंचविंशतिर्मात्राः, बिआरु—विचारय ॥ (E).

---

१५१ । च वलिअ (B & C). २ गुंजरा (B, C & E). ३ राउ (F). ४ परिहरिअ (D), परिहर (F). ५ खुरसाण (A & E), खुरसाणा (B & C), खुरासाणा (D). ६ मह चहिअ (D & F), मुहि चहिअ (E). ७ लम्भिअ (C). ८ हम्मीर (C). ९ हार (A), हाराव (E). १० वलिअ (F). ११ रिउसअल (A), रिउगण (B), अरिगण (C). १२ कादरा (F). १३ ४६ (A), ५२ (F). १४ गगणंग (A).

१५० । पुनः प्रकारांतरेणाह ॥ पढमेति ॥ प्रथमं चतुष्कलो भवति गणः अंते दीयतां हारः । विंशत्यक्षराणि गगनांगणे भण मात्राः पंचविंशतिं विचार्य ॥ ५१ ॥ (G).

१५१ । उदाहरति । भग्नो मलयश्चोलपतिश्च पलितः, गञ्जित-गुञ्जरमालवराजो मलयगिरौ लुक्कायितः परिहृत्य कुञ्जरान् । खुरसाणाः चुभिताः रणमध्ये मोहं प्राप्ता लम्बितसागराः हम्बीर-स्खलितः हारवः पतितः अरिगणाः कातराः ॥ (C).

१५१ । अथ गगनांगमुदाहरति भंजिअ इति । अहिअ लंघिअ साअरा — लंघितसागराहिते लंघितः सागरो येस्तादृशा-अहिता यस्य तादृशे इत्यर्थः हंमीर चलिअ — हंमीरे चलिते सति, मलअ चोल वइ — मलयचोलपती मलयाधिपश्चोलदेशाधि-पश्चेति द्वावित्यर्थः भंजिअ — भग्नौ, गुज्जरा — गुर्जराः गुर्जरदेशीयाः राजानः णिवलिअ — निर्बलीकृत्य गंजिअ — गंजिताः, मालव राअ — मालवराजः परिहरि कुंजरा — परिहृत्य कुंजरान् मलअगिरि — मलयगिरौ लुक्किअ — निलीनः, खुरसाण — खुर-सानः खुरसानदेशीयः राजा रण मुहि — रणे मुग्धीभूय खुहिअ — चुभितः, काअरा — कातरे पलायितुमप्यसमर्थे तस्मिन्नित्यर्थः रिउगण — रिपुगणे हारवः पतितः ॥ (E).

१५१ । यथा ॥ भंजिअ इति ॥ भग्नो मलयश्चोलपतिर्निवृत्तो गंजितो गुर्जरः । मालवराजो मलयगिरौ निलीनः परिहृत्य कुंजरान् ॥ खुरासानः चुभिला रणमध्येऽभितो लंघितः सागरं, हम्मीरे चलिते हा रवन्तो[रवो] रिपुगणेषु कातरेषु ॥ ५२ ॥

इति गगनांगणम् ॥ (G).

अथ द्विपदीच्छंदः। (D).

आइग[१] इंदु जत्थ[२] हो[३] पढमहि[४]
दिज्जइ[५] बेवि[६] धणुहरं[७]।
तह पाइक्क[८] जुअल परिसंठवहु[९]
विविह[१०] चित्त[११] सुंदरं ॥ १५२ ॥
सरसइ[१२] लइ[१३] पसाउ[१४] तहि[१५] पुहविहि[१६]
करहि[१७] कइत्त[१८] कइअणा[१९]।
महुअर[२०]चरण अंत लइ[२१] दिज्जहु[२२]
दोअइ[२३] भणहु[२४] बुहअणा ॥ १५३[२५] ॥

१५२—१५३। अथ द्विपदीच्छन्दः। आदाविन्द्रो यत्र भवति प्रथमं दीयेते द्वावपि धनुर्द्ध[रौ], तथा पदातिकयुगलं परिस्थापय विविधविचित्रसुन्दरं ॥ सरस्वत्याः लब्ध्वा प्रसादं तर्हि पृथिव्यां कवित्वं कुरुत कविजनाः। मधुकरचरणोऽन्ते गृहीत्वा दीयतां द्विपदीं

१५२—१५३। १ पइहि (A), आइगइ (E). २ जतह (A). ३ Non est (C). ४ पढम (F). ५ दिज्जिय (A), दिज्जहि (C). ६ तिणि (D & F). ७ धणूहरं (D & E). ८ ताइक्क (B). ९ परिसंठउ (A). १० विधि (D & F). ११ विचित्त (A, C & D), विचित्र (B), विंहित्त (F). १२ सरइ (E). १३ Non est (B), लुइ (E). १४ पसाइ (A). १५ तहँ (D), तह (F). १६ पुहविह (A), पुहमी (D), पुहवी (F). १७ वर (A), करह (D & F), करउ (E). १८ कवित्त (A & D), कवित (F). १९ कइयाण (F). २० मउर (D & F). २१ ले (E), लेइ (F). २२ दिज्जइ (E), दिज्जउ (F). २३ दोइवइ (E). २४ भणइ (B), सुणउ (D & F), सुणह (E). २५ ४७ (A), ५१ (F).

भणत बुधजनाः ॥ इन्द्रशब्दो मध्यद्विलघुषट्कलवाची, धनुर्द्धरश्चतु-ष्कलः, पदातिकोऽपि चतुष्कलः, मधुकरचरणः षट्कलः । (C).

१५२—१५३ । अथ[द्वि]पदीनामकं वृत्तं लक्षयति आइगेति । हे बुहश्रणा — बुधजनाः, जत्थ — यत्र पढम[हि]—[प्रथमे] चरणे, इदं चोपलक्षणं द्वितीयेऽपि बोध्यम्, आइग — आदिगः आदिस्थः पादाद्य-इति यावत् इंदुः — षट्कलो भवति, ततश्च बेवि धणूहरं — द्वौ धनुर्द्धरौ चतुष्कलाविति यावत् दिज्जइ — दीयेते, तथा पाइक्क जुअल — पदातियुगलं पुनरपि चतुष्कलयुगलमेवेत्यर्थः परिसं-ठवहु — परिस्थापयत, अंत — अंते पादांते मडुअरचरण — मधु-करचरणः षट्कल इत्यर्थः दिज्जइ — दीयते, एवं दोवइ — द्विपदीं भणत, तहि — तथा हे कइअणा — कविजनाः, सरसइ ले[सु]इ पसाअ[उ] — सरस्वत्याः सकाशाद्गृहीत्वा प्रसादं पुहविहि — पृथिव्यां विविह चित्त सुंदरं — विविधचित्तसुंदरं विविधानि अनेकप्रकाराणि यानि चित्तानि तेषां रमणीयं सर्वलोकमनोहर-मित्यर्थः कइत्त — कवि[वि]त्वं अनेन च वृत्तेनेति शेषः करहु — कुरुत, अनेन छंदसा निर्मितं कवित्वं सर्वजनमनोहरं भवतीति भाव इति योजना ।

अत्र यद्यपि इंदुशब्दः लघुद्वयोत्तरगुरुद्वयात्मक-षट्कलवाची, तथाप्यत्र षट्कलसामान्यपरोऽवसेयः, उदाहरणे तथैव दर्शनात् । मधुकरचरणशब्दस्य यद्यपि षट्कलनामसु पूर्वं नोपात्तस्तथापि मधुकरचरणानां षट्लसंख्यासत्त्वाद्यापि तत्पुरस्कारेणैव षट्कल-परो बोध्यः । क्वचित्तु दिज्जइ तिण्णि धणुहरमिति पाठः, सः

छक्कलु मुह[1] संठावि[2]कहु[3] चक्कलु पंच ठवेहु[4] ।
अंतहि एक्कइ[5] हार दइ[6] दोअइ[7] छंद[8] कहेहु[9] ॥
१५४[10] ॥ दोहा ।

प्रामादिकः, एवं सति पादांते षट्कलगणालाभेन मऊअर चरण अंत लेइ दिज्जसु इत्ययेतनेन विरोधात् । एतत्पाठानुसारेणैव केश्चिदग्रे मऊर चरणेति पाठं प्रकल्प्य तस्य च मुग्धशब्दस्य गुरु-नामसूपात्तत्वात्तत्पर्यायत्वान्मधुरोगुरुस्तथाच मधुरो गुरुः अंत—चरणांते दीयतामित्यर्थः कृतस्तदपि भ्रमविलसितं, लक्षणस्यापि लक्ष्यतायां मऊर चरणेति पाठे कल्प्यमाने एकमात्रान्यूनतया लक्षणासंगतेः । (E).

१५२—१५३ । अथ द्विपदीमाह ॥ आईति ॥ आदिगुरुरिंदुर्यत्र भवति प्रथमं दीयते त्रयो धनुर्द्धराः ॥ ततः पदातियुगलं परि-संस्थापय विधिना विहितं सुंदरं ॥ सरसेति ॥ सरस्वत्या गृहीला प्रसादं ततः पृथिव्यां कुरुत कवित्वं कविजनाः । मधुरं चरणमंते गृहीला दीयतां द्विपदीं जानीत बुधजनाः ॥ मधुरो गुरुः ॥ (G).

१५४ । उक्तार्थमेव स्पष्टीकुर्व्वन् विशेषान्तरमाह षट्कलमिति । षट्कलं मुखे संस्थाप्य चतुष्कलान् पञ्च स्थापय । अन्ते एकं हारं

---

१५४ । १ छक्कल मुह (A), छक्कलुअ मुह (B), छघलु मुअ (D). २ संठावि (F). ३ कर (D), कइ (E), चवि (F). ४ करेऊ (D & F), कारेवि (E). ५ धरेइ (A), धक्कवि (B & C). ६ देइ (A, D & E). ७ दोवइ (D). ८ छंतु (B). ९ करऊ (A, B & C). १० ४८ (A), ५४ (F).

जहा,

दाणव[1] देव बेवि ढुक्कंतउ[2] गिरिवर[3] सिहर कंपिओ[4] ।
हअ गअ पाअ[5] घाअ उट्ठंतउ धूलिहि गअण[6] झंपिओ[7] ॥
१५५[8] ॥ दोअइ । (A, B, C & F).

दत्त्वा द्विपदीच्छन्दः कथय ॥ मुखे आदौ, हारं गुरुं, पूर्व्वं यः षट्कलः अन्ते दातव्यत्वेनोक्तः तत्रायं विशेषः चतुष्कलान्ते गुरुरेक इति । (C).

१५४ । अथ उट्टवनिकांतरं मनसि विधाय दोहावृत्तेन पुनर्द्विपदीं लक्षयति छक्कलु इति । छक्कलु — षट्कलं मुह संठाविकइ — मुखे आदौ संस्थाप्य, पंच चक्कलु — चतुष्कलान् करेहु — कुरुत, अंतहि — पादांते एक्कहि — एकमेव हारं गुरुं देइ — दत्त्वा, दोवइ छंद कहेहु — द्विपदीच्छंदः कथयत । पूर्वं षट्कलानंतरं चत्वारश्चतुष्कलास्तदनंतरं च पुनः षट्कल इत्युक्तम्, इदानीं तु पादांतस्थषट्कलांतर्गतं चतुष्कलं चित्ते कृत्वा षट्कलानंतरं पंच चतुष्कला उक्तास्तदनंतरं च षट्कलांतर्गतस्य मात्रायुगस्योर्वरितत्वात्तस्यैवैको गुरुर्देय इत्युक्तमित्युट्टवनिकाकृतः एवं पूर्वापरयोर्भेदः । इदं च वृत्तं द्विपादमेव न [च]तुष्पादं, उदाहरणानुरोधादिति केचित् । अन्ये तु यदीदं द्विपादमेव, तर्हि लक्षणं पादचतुष्टयेन कथं कृतमिति इदं चतुष्पादमेव, न चोदाहरणविरोधस्तस्य चरणद्वयेनापि संभवात्, न चैतादृशमन्यत्र न दृष्टमिति वाच्यं, षोडशचरणायाश्चतुःपादिकाया एकस्यैव चरणस्योदाहृतत्वादित्याहुः ।

१५५ । १ दाणच (E). २ ढुक्कंतुउ (D). ३ गिरिवङ्ग (D). ४ कंपचो (C). ५ पच्च (D). ६ गच्चण (D). ७ चोपिच्चो (F). ८ ४९ (A), ५५ (F).

अथ झुल्लणा छंदः। (D).

पढम दह दिज्जिआ, पुणवि तह किज्जिआ,
पुणवि दहसत्त तह[1] विरइ जाआ।
एम परि विविहु दल[2], मत्त सततीस पल[3],
एहु कह[4] झुल्लणा[5] णाअराआ[6]॥ १५६ ॥*

परे तु लक्षणं वृत्तद्वयेन कृतमितीदमुदाहरणानुरोधाद्विपाद-मित्याहुः। (E).

१५४। दोहया पुनस्तत् प्रकारांतरेणाह॥ छक्केति॥ षट्कल-मादौ स्थापयित्वा चतुष्कलान् पं[च] कुरु। अंते एकं हारं दत्त्वा द्विपदीच्छंदः कथय ॥ ५४ ॥ (G).

१५५। उदाहरति। देवदानवाभ्यां द्वाभ्यामपि ढौक्यमानं गिरिशिखरं कम्पितं, हयगजपदघातादुत्तिष्ठन्तीभिर्धूलिभिर्गगनं झम्पितं॥ ढौक्यमानं गम्यमानं, झम्पितमाच्छादितम्। (C).

१५५। अथ द्विपदीमुदाहरति दा (E). [Here evidently something has been left out by the scribe.—Ed.]

१५५। यथा॥ दाणेति॥ दानवदेवौ द्वावपि मिलितौ गिरिवरशिखरं कंपितं। हयगजपादघातैरुत्थिताभिर्धूलिभिर्गगन-माच्छादितम्॥ ५५॥ इति द्विपदी॥ (G).

१५६। अथ झुल्लणानामकं वृत्तं लक्षयति पढम दहेति। जह—यत्र, विरइ—विरतिः पढम—प्रथमम् आदौ दह—

१५६। १ जह (E). २ दल (E). ३ ल (D). ४ Dropt in (E). ५ भल्लउ (F). ६ रा dropt in (F). * This śloka and the next are not found in (A, B & C).

जहा, सहस मअमत्त[1] गअ, लाख[2] लख[2] पक्खरिअ,
साहि दुइ साजि खेलंत गिंदु[3] ।
कोप्पि[4] पिअ जाहि तहि, थप्पि[5] जसु बिमल महि,
जिणइ[6] णहि[7] कोइ[8] तुअ तुलक हिंदु ॥ १५७॥

दश्मसु मात्रास्विति शेषोऽत्रापि योजनीयः, दिज्जिआ — दत्ता पुणवि — पुनरपि तह — तथा तेनैव प्रकारेण दशखेव मात्रास्वित्यर्थः किज्जिआ — कृता, पुणवि — पुनरपि दहसत्त — सप्तदशसु मात्रासु जाआ — जाता, एम परि — एवं परिपाट्या बिबिङ्ग दल — द्वयोर्दलयोः प्रत्येकमिति शेषः, सततीस — सप्तत्रिंशत् मत्त — मात्राः पल — पतंति, एङ्ग — एनां [णाअराआ]— नागराजः झुल्लणा कह — कथयति ॥ (E).

१५६ । अथोल्लणा ॥ पढमेति ॥ प्रथमं दश दत्ताः, पुनरपि तथा कृताः, पुनरपि सप्तदश तथा विरतिर्जाता ॥ एवं प्रकारेणापि द्वितीये दले मात्राः सप्तविं[चं]शत्पतंति, एनां कथयत्युल्लणां नागराजः ॥ उल्लणा झुल्लणा उल्पणेति पाठत्रयम् ॥ ५६ ॥ (G).

१५७। अथ झुल्लणामुदाहरति सहसेति। सहस मअमत्त गअ — सहस्रं मदोन्मत्तगजान् लक्ख लक्ख — लक्षं लक्षम् अश्वांश्चेति शेषः पक्खरिअ — वारवाणेनावगुंठ्य साजि — सज्जीभूय साहि दुइ — सार्वभौमद्वयं गिंदु — कंदुकं खेलंत — क्रीडतः, हे प्रिय, तहि — तत्र

१५७। १ मअमर (D). २ लक्ख (E). ३ This part non est (F).
४ कोप्पी (E). ५ कप्पि (D), थप्पु (E). ६ जिणइ (D). ७ णिअर (F).
८ कोवि (E).

अथ खंजच्छंदः । (D).

धुअ[1] धरिअ[2] दिअवर[3] णवगण[4] कमलणअणि
बुहअण[5] मण सुहइ[6] जु जिम[7] ससि रअणि सोहए ।
पुणविअ[8] विरइ बिहु पअ[9] गअवरगमणि
रगणपर[10] फणिवइ[11] भण[12] सुमरु[13] बुहअण[14] मोहए ॥
१५८[15] ॥

कोप्पि — प्रकुप्य जाहि — गच्छ, विमलं जसु — यशः महि — मह्यां [ह्मां] थप्पु — स्थापय, तुअ — त्वां कोइ — कोऽपि तुलुक — तुरुष्कः हिंदु — [हिन्दु]को वा णहि जिणइ — नहि जेष्यति ॥ (E).

१५७ । यथा ॥ सहसेति ॥ सहस्रं मदमत्तान् गजान् लक्षम् अश्वान् कृतपल्ययनान् स्वामिदयं सज्जीकृत्य खेलति गेंदुकं । कुपिता प्रिय याहि तत्र स्थापय यशो विमलं मह्यां जेष्यति न कोऽपि त्वां तुरुष्को हिंदुकः ॥ ५७ ॥ (G).

१५८ । अथ खञ्जा ॥ ध्रुवं धारय द्विजवरनवगणान् कमलनयने बुधजनमनसि शोभते यथा शशिरजनी शोभते, पुनरपि विरतिर्द्वयोः पदयोः गजवरगमने रगणपरा भणति फणिपतिः

---

१५८ । १ धुव (B). २ धरि (D & F). ३ दिअवर (A). ४ णवगण (A), dropt in (B), गण (D). ५ बुहअण (C), विबुह (D & F), विबुहअण (E). ६ सुहइ (C). ७ जिमि (D & F). ८ पुणवि (C). ९ पअ (A), पुअ (B), ऋअ (E), दअ (F). १० रगण वर (D, E & F). ११ फणिवइ (D & E). १२ भणु (D & F). १३ भुव (E). १४ मणु (D & F). १५ ५० (A), ५८ (F).

स्मर बुधमनो मोहयति ॥ ध्रुवं निश्चितं धारय, द्विजवरः सर्व्वलघुः चतुष्कलस्तादृशान् नव गणान्, शशियुक्ता रजनी शशिरजनी। पुनर्विशेषः द्वयोरपि पादयोर्विरती रगणपरा रगणः ऽ।ऽ परो-ऽन्तो यस्याः सा तथापरेति स्मर्त्तव्यमेतदिति भावः। (C).

१५८। अथ खंजानामकं वृत्तं लक्षयति धुअ धरिअ इति। हे कमलणअणि — हे कमलनयने, यत्र विड पअ — पादद्वये प्रत्येकमिति शेषः दिअवर णवगण — द्विजवरनवगणान् षट्त्रिंश-ल्लघूनित्यर्थः धरिअ — धृत्वा अवलंब्येति यावत् विरइ — विरति-र्भवतीति शेषः, पुणविअ — पुनरपि च तदनन्तरं चेत्यर्थः रअण — रगणः मध्यलघुर्गण इत्यर्थः बुहअण मोहए — बुधजनं मोहय-तीति भावः, जु — यतः बुहअण मण सुहइ — बुधजनमनः सुख-यति, यथा रजन्यां शशी सोहए — शोभते, तत् खंजावृत्तमिति शेषः, हे गजवरगमने त्वं सुमरु — स्मर पौनःपुन्येन भावयेत्यर्थः, इति वर फणिवइ — वरः फणिपतिः पिंगलः भणइ — भणति इति योजना ॥ यत्र षट्त्रिंशल्लघ्वनन्तरं रगणः प्रतिचरणं पतति तत् खंजानामकं वृत्तमिति फलितोऽर्थः। इदं च द्विपदमेवेति ध्येयम्। (E).

१५८। धुअ इति ॥ ध्रुवं धृत्वा द्विजवरान् नवगणान् कमल-नयने विबुधजनमनः सुखयति यद्यथा शशी रजन्यां शोभते। पुनरपि च विरतिर्द्वयोर्दलयोर्गजगमने रगणो वरः फणिपति-र्भणति स्मरणं बुधमनो मोहयति ॥ षट्त्रिंशल्लघूत्तरं रगणः कार्य इत्यर्थः, सा खंजेति भावः ॥ (G).

बिहु[1]दल णव पल बिप्पगण जोहल[2] अंत ठवेहु[3] ।
मत्त इआलिस[4] खंज पअ दहगण[5] तत्थ[6] मुणेहु ॥
१५९[7] ॥ दोहा ।

---

१५९ । एतदेव स्पष्टयन् विशेषान्तरमाह। द्वयोर्द्वयोर्नव पतन्ति विप्रगणा जोहलमन्ते स्थापय । मात्रा एकचत्वारिंशत् खञ्जायां पदे पदे यमकं कुरुत ॥ द्वयोरिति पूर्व्वपदेऽपि तथेत्यर्थः, जोहलो मध्यलघुः पञ्चकलः । एवं क्रमेण खञ्जायां प्रतिपादमेकचत्वारिंशन्मात्रा भवन्ति । यमकमनुप्रासः । (C).

१५९ । अथ दोहावृत्तेन स्पष्टीकृत्य खंजां लक्षयति बिहु दलेति । बिहु दल — द्वयोर्द्दलयोः प्रत्येकमिति शेषः णव बिप्पगण — [नव] विप्रगणान् पल — प्रकटयत, अंत — पादांते जोहलु — योद्धारं मध्यलघुं रगणमित्यर्थः ठवेहु — स्थापयत, एवं खंज पअ — खंजापादे खंजानामकस्य वृत्तस्य चरणे इत्यर्थः एआलिस मत्त — एकचत्वारिंशन्मात्राः, दहगण — दश गणान् तत्थ — तथ्यं मुणेहु — जानीत ॥ (E).

१५९ । लक्षणांतरमाह ॥ बिउइति ॥ द्वयोर्द्दलयोर्नव पतंति विप्रगणाः जोहलमंते स्थापय । मात्रा एकचत्वारिंशत्, खंजापादे दश गणान् तथा जानीत ॥ ५९ । (G).

---

१५९ । १ बिउ (F). २ जोहलु (B, C & E). ३ ठवेहु (D). ४ एआरिस (A), एआलिस (B, C & E). ५ पअ जमअ (C). ६ तण्हि (A), तन्नि (C). ७ ५१ (A).

This is different from the metre of the same name in the Sanskrit treatise of Pingala. Vide Ghosha's Compendium, p. 56.

जहा,

अहि[१] ललइ महि[२] चलइ[३] गिरि खसइ[४] हर खलइ
ससि घुमइ अमिअ वमइ[५] मुअल जिवि[६] उट्ठए ।
पुणु[७] धसइ पुणु[७] खसइ पुणु[७] ललइ[८] पुणु[७] घुमइ[९]
पुणु[१०] वमइ जिविअ[११] विविह परि समर[१२] दिट्ठए ॥

१६०[१३] ॥ खंजा (A, B & C).

---

१६० । उदाहरति । मही लोलते, अहिश्चलति, गिरिः पतति, हरः स्खलति, शशी घूर्णते, अमृतं वमति, भटा जीविलोत्तिष्ठन्ते । पुनर्द्रवति, पुनः स्खलति, पुनर्लोलते, पुनश्चलति, पुनर्घूर्णते, अमृतं वमति, विविधप्रकारो रणो दृश्यते ॥ कस्यचिद्युद्धं वर्ण्यते, तत्र युद्धे भूकम्पादयो वर्ण्यन्ते । (C).

१६० । अथ खंजामुदाहरति अहीति । अहि ललइ — अहिः शेषः लल[य]ति स्थानच्युतो भवतीत्यर्थः, योद्धॄणां पादाघातेनेति भावः । अतएव महि — मही पृथ्वी चलइ — चलति, अतएव मह्याश्रितः गिरिः कैलासः खसइ — पतति, ततश्च तदाश्रितो हरः खलइ — स्खलति, ततश्च तदा[ङ्गा]लस्थः शशी घुमइ — घू[घू]र्णते, अतएव अमिअ वमइ — अमृतं वमति, ततश्चामृतसंपर्कात्

---

१६० । १ महि (A, B & C). २ अहि (A, B & C). ३ पलइ (A & B). ४ चलइ (A, B & C), रपल (F). ५ Dropt in (A), चमइ (F). ६ पुणु जिवइ (A), भल जिविअ (B), भड जिविअ (C), मुअल जिविअ (E). ७ पुण (E & F). ८ चलइ (C). ९ पुणु चलइ (A). १० अमिअ (A, B & C), पुण (E & F). ११ Non est (A, B & C), जीविअ (E), विजिअ (F). १२ रण (A, B & C). १३ ५२ (A), ९० (F).

अथ सिखा छंद । (D).

ससिबअणि गअगमणि पअ पअ
दिअ छगण[1] पअहर[2] सह[3] सिक्ख ।
पढ पढम वि विहलहु[4] पअलि दिअगण
सहिउ[5] जुअल[6] दल भणइ[7] स सिक्ख ॥ १६१[8] ॥

मुअल — मृताः जिविअ — जीविता उट्ठए — उत्तिष्ठंति, ततश्च जीवितानान्तेषां चरणाघातेन पुणु धसइ — पुनरधो गच्छति मही, पुणु खसइ — पुनः स्खलति कैलासः, पुणु ललइ — पुनर्लल[य]ति स्थानच्युतो भवति शिवः, ततश्च पुण घुमइ — पुनर्घूर्णते शशी, पुण बमइ — पुनर्वमत्यमृतं, पुनश्च जिविअ — जीविता उत्थिता मृताः इति समरे विविधकौतुकं परिदिट्ठए — परिदृश्यते ॥ (E).

१६० ॥ यथा अहीति ॥ अहिर्लल[य]ति, मही चलइ[ति], गिरिः पतति, हरः स्खलति, शशी घूर्णते, अमृतं वमति, मृताः जीवंतो भवंति ॥ एवं सतीति शेषः पुन * * ति, पुनः स्खलति, पुनर्लल[य]ति, पुनः घूर्णति, पुनर्वमति, जीविता विविधाः, एवं प्रकारेण समरो दृश्यते ॥ ६० ॥ (G).

---

१६१ । १ छ गण (A), च्छ गण (B & C), गण छ (E) २ पओहर (D). ३ स (B & F), ह स (C, D & E). ४ लड विविह (D), ल dropt in (F). ५ चहिअ (B & C), लहिउ (D), सहिअ (E), लहिज (F). ६ जुअर (D & E). ७ भजरवि (B). ८ ५१ (A), ६१ (F). Vide metre of the same name, but of a different character, in the Sanskrit treatise of Pingala. Ghosha's Compendium, pp. 26 and 56.

१६१ । अथ शिखाच्छन्दः ॥ शशिवदने गजगमने पदे पदे द्विजाः षड्गणाः पयोधरसशिखाः । पठ प्रथमं विविधलघुकं प्रकाश्य द्विजवरगणमधिकं भण शिचस्व ॥ द्विजः सर्व्वलघुश्चतुष्कलः, तादृशाः षड्गणाः आदौ यत्र पयोधरः जगणः, तत्र शिखा । द्वितीयदले द्विद्विलघून् पूर्व्वोक्तान् प्रकाश्य पठत, तत्र द्विजवरगणं सर्व्वलघुचतुष्कलमधिकं भण, तेन द्वितीयदले सप्तद्विजवरगणा अन्तर[अन्ते] जगण इति विशेषः, एवं शिखाच्छन्दः शिचस्वेत्यर्थः ॥ (C).

१६१ । अथ शिखां लचयति ससिवअणीति । हे शशिवदने गजगमने पअ पअ—पदे पदे प्रतिचरणमित्यर्थः पअहरह ससिक्ख—सपयोधरशिखान् पयोधरो मध्यगुरुर्जगणस्तथा च सपयोधरा सजगणा शिखा अग्रभागो येषां तादृशान् अंतस्थितजगणानित्यर्थः दिअगण क—द्विजगणान् चतुर्लघ्वात्मकगणान् षट् पढ—पठ द्वयोरपि दलयोः षड्द्विजगणानंतरं जगणं स्थापयेत्यर्थः । परंतु जुअह दल—द्वितीयदलं पढम—प्रथमम् आदौ वि विलक्ष—द्वौ द्विलघू द्वौ द्विलघ्वात्मकगणावित्यर्थः पअलि—प्रकटीकृत्य अपरमेकं द्विजगणं प्रकटीकृत्येत्यर्थः, दिअगण सहिअ—जगणसहितं द्विजगणैः पूर्वोक्तप्रकारेणाग्रस्थितजगणैः षड्भिर्युक्तमिति भावः, पठ इत्यनुषंगः । प्रथमं लघुद्वयात्मकगणद्वयं संस्थाप्य अनंतरमंतस्थितजगणैः षड्द्विजगणैः सहितं द्वितीयं दलं पठेत्यर्थः, तथाच प्रथमदले अंतस्थजगणाः षडेव द्विजगणाः पतंति, द्वितीयदले तु अंत्यजगणाः सप्त द्विजगणाः पतंतीति

मत्त अठाइस[1] पढमो[2] बीए बत्तीस मत्ताइँ।
पअ पअ अंते लहुआ सुद्धा सिक्खा विआणेहु[3] ॥१६२[4]॥
गाह्न।

भावः, सिक्ख — शिखां विद्धि इति शेषः, इति स प्रसिद्धः पिंगलः भणइ — भणति ॥ (E).

१६१। अथ शिखा॥ ससीति॥ शशिवदने गजगमने पदे पदे द्विजाः षड्गणाः पयोधरसशिखाः। पठ प्रथमं द्वितीये खलु प्रपतति द्विजगणो लघुर्द्वयो युगलदलयोर्भण्यते सा शिखा॥ सशिखाः सहिताः॥ द्विजश्चतुर्लघुः॥ पयोधरः य[ज]गणः॥ प्रथमे षड्द्विजा अंते जगणः, द्वितीये सप्त द्विजा अंते जगणः इति भावः॥ ६१॥ (G).

१६२। उक्तार्थं स्पष्टयन्नाह। मात्रा अष्टाविंशतिः प्रथमे, द्वितीये द्वाविं[त्रिं]शन्मात्राः। पदे पदे जगणोऽन्तेलघुकां शुद्धां जानीहि शिखाम्॥ (C).

१६२। अथ गाह्नच्छंदसा प्रकटीकृत्य पुनः शिखां लक्षयति मत्त अठाइसेति। यत्र पढम[म्हि] — प्रथमे पअ — पदे मत्त अठाइस — मात्रा अष्टाविंशतिः पतंतीति शेषः, बीए — द्वितीये पअ — पदे बत्तीस — द्वात्रिंशत् मत्ताइँ — मात्राः पतंति, अंते — पादांते लहुआ — लघुः जगणस्येति भावः नियमेन पतति, तां शुद्धां शिखां विजानीत॥ अत्र अंते लहुआ इति दलद्वयेऽप्यंते

१६२। १ अठाइस (A). २ पढमे (A), पढमम्हि (E), पढम (F). ३ विआण (E). ४ ५४ (A), ६२ (F).

जहा, फुल्लिअ[१] महु[२] भमर[३] बहु[४] रअणि पहु
किरण लहु[५] अवअरु[६] बसंत ।
मलअगिरि कुहर[७] धरि पवण[८] वह
सहब[९] कह[१०] सुणु[११] सहि णिअल णहि कंत ॥
१६३[१२] ॥ सिक्खा । (A, B & C).

जगणोऽवश्यं देय इति सूचनीयं, षड्द्विजगणानां चतुर्विंशतिर्मात्रा अंत्यजगणस्य च मात्राचतुष्टयमेवमष्टाविंशतिर्मात्राः प्रथमचरणे, सप्तद्विजगणानामष्टाविंशतिर्मात्रा अंत्यजगणस्य च मात्राचतुष्टयमेवं द्वात्रिंशन्मात्रा द्वितीयचरणे पतंति यत्र, तत् शिखानामकं वृत्तमिति फलितार्थः । (E).

१६२ । तदेव गाहच्छंदसाह ॥ मत्तेति ॥ मात्रा अष्टाविंशतिः प्रथमे, द्वितीये द्वात्रिंशन्मात्राः । पदपदयोरंते लघुः, शुद्धां शिखां विजानीत ॥ ६२ ॥ (G).

१६३ । उदाहरति ॥ फुल्लति मधुके भ्रमरा बहवः रजनिप्रभुकिरणा मलयावतीर्णो वसन्तः । मलयगिरिकुसुमं धृत्वा पवनो वहति, सोढव्यः कथं शृणु भण सखि निकटे न हि कान्तः ॥ धृत्वा स्पृष्ट्वा । (C).

---

१६३ । १ फुल्लिअ (A & F). २ मह (A). ३ भमर (E). ४ रङ्ग (D). ५ लु (C), वपङ्ग (D), वङ्ग (F). ६ अवर (A), dropt in (F). ७ कुसुम (C). ८ पुवण (B). ९ Dropt in (C), सवह (F). १० कत (D). ११ सुण (A), भण (C, D & F). १२ ५५ (A), ६२ (F).

अथ मालाच्छंदः । (D).

पढम चरण ससिवअणि मिअणअणि[1] णव दिअगण[2]
पअल पुणवि तह[3] रअण[4] ठवहु[5] अंतए कण्णो ।
पिंगल णाअ भणंता[6] माला सेसम्मि[7] गाहस्स[8] ॥१६४[9]॥

१६३ । अथ शिखामुदाहरति फुल्लिअ इति । भमरु वहु—वहुभ्रमराः मडु—मधूका मधूकवृक्षाः फुल्लिअ—पुष्पिताः, रअणि पहु—रजनीप्रभुश्चंद्रः किरण लहु—लघुकिरणः, वसंतः अवअरु—अवतीर्णः । मलयगिरिगह्वरं धृत्वा स्पृष्टेति यावत् पवण वह—[पवनः] वहति, सहव कह—सहिष्ये कथं भणु सखि निकटे नास्ति कांतः ॥ (E).

१६३ ॥ यथा फुल्लीति ॥ पुष्पितो मधूको भ्रमरा बहवो रजनीपतेः किरणा बहव आयातोऽन्यद्वसंतः। मलयगिरिकुहरं धृत्वा पवनो वहति, सोढव्यं कथं भण सखि निकटे नास्ति कांतः ॥ ६३ ॥ इति शिखा ॥ (G).

१६४ । अथ मालाच्छन्दः ॥ प्रथमचरणे शशिवदने मृगनयने नव द्विजगणाः प्रकटाः, पुनरपि तथा रगणः स्थाप्यतामन्ते कर्णः । पिङ्गलनागो भणति मालां शेषमपि गाहायाः ॥ सर्व्वलघुचतुष्कल-नवगणानन्तरं रगणस्ततः कर्णो गुरुयुगमेवं पञ्चचत्वारिंशन्मात्रः प्रथमः पादः, गाहाशेषार्द्धं शेषं इत्यर्थः । (C).

---

१६४ । १ गअगमणि (A). २ दिअपण (F). ३ गह (A), पुण (B), तरह (C). ४ गण (C). ५ ठव (E), ठवहि (F). ६ भणन्ता (D). ७ सेसंपि (D), सेसंवि (F). ८ गाहस (A), म्गाहस्स (F). ९ ५६ (A), ६४ (F).

पढम होइ णव बिप्पगण जोहल[1] कस ठवेहु ।
गाहा[2] अद्धा अंत दइ[3] माला छंद कहेहु[4] ॥ १६५[5] ॥
दोहा ।

---

१६४ । अथ मालावृत्तं लक्षयति पढमेति । हे शशिवदने मृगनयने यत्र पढम चरण—प्रथमचरणे णव दिअगण—नव द्विजगणाः नव चतुर्लघ्वा[त्मि]त्मका गणाः पअल—पतंति, पुणवि—पुनरपि नवद्विजगणानंतरमित्यर्थः तह—तथा रअण ठव—रगणं मध्यलघुगणं स्थापय, अंतए—अंते रगणांते पादांते वा कण्णो—कर्णो गुरुद्वयात्मको गणः पतति इति शेषः, ततः गाहस्स—गाथायाः सेसम्मि—शेष उत्तरार्द्धमिति यावत् पततीत्यनुषंगः, सा माला हि—तन्मालानामकं वृत्तमिति पिंगल णाअ—पिंगलनागः भणंता भणति ॥ (E).

१६४ । अथ मालामाह ॥ पढमेति ॥ प्रथमे चरणे शशिवदने मृगनयने नव द्विजाः पतंति, पुनरपि ततो रगणः स्थाप्योऽंते कर्णः । पिंगलनागो भणति मालां शेषं विगाथायाः ॥ द्विजश्चतुर्लघुः, द्वितीये सप्तविंशतिर्मात्रा इत्यर्थः ॥ ५४ ॥ (G).

१६५ । अमुमेवार्थं स्पष्टयति । प्रथमतो भवन्ति नव विप्रगणाः जोहलकर्णं स्थापय । गाहाया अर्द्धमन्तपदं मालाच्छन्दो जानीहि ॥ जोहलो रगणः । (C).

---

१६५ । १ जोहलु (B & C). २ गाह (A). ३ देइ (A & E), देआ (F). ४ करेडु (A). ५ ५७ (A); ६५ (F).

जहा,

बरिस जल भमइ घण गअण सिअल[1] पवण मणहरण
कणअ पिअरि णचइ[2] बिजुरि[3] फुल्लिआ णीवा[4] ।
पत्थर[5] वित्थर[6] हिअला[7] पिअला[8] णिअलं[9] ण आवेइ[10] ॥
१९९[11] ॥ माला (A, B & C).

१९५। अथ दोहावृत्तेन स्पष्टीकृत्य पुनर्मालां लक्षयति पढमेति। पढम—प्रथमे चरणे णव विप्पगण—नव विप्रगणाश्चतुर्लघ्वात्मकगणाः होइ—भवंति, ततश्च जोहलु कण—योद्धृकर्णौ रगणगुरुद्वयात्मकगणौ ठवेहु—स्थापयत। ततः गाहा—गाथायाः अंत—अंत्यम् अद्धा—अर्द्धम् उत्तरार्द्धमित्यर्थः देइ—दत्त्वा, मालाच्छंदः कहेहु—कथयत ॥ अत्र देइ इत्येकारो ह्रस्वो ज्ञेयः। यत्र प्रथमचरणे नवचतुर्लघ्वात्मकगण-रगण-गुरुद्वयात्मकगणाः पतंति द्वितीयदलं च गाथोत्तरार्द्धस्वरूपं भवति, तन्मालानामकं वृत्तमिति फलितार्थः। (E).

१९५। पढेति॥ प्रथमं भवंति नवविप्रगणा जोहलकर्णं स्थापय। गाथार्द्धमंतिमे मालाच्छंदः कथ्यताम्॥ जोहलो रगणः, कर्णो द्विगुरुः॥ ९५॥ (G).

१९९। १ सलच (A, B & C). २ णचइ (A). ३ विजुरी (F). ४ णीआ (F). ५ पत्थर (A). ६ वित्थर (A). ७ हिअआ (B & C), हिअणा (E). ८ पिअणा (C & F). ९ णिलअं (B & C), णिअला (D & F). १० आवेइ (A & E). ११ ५८ (A), ९९ (F).

अथ चुलिआला छंद । (D).

चुलिआला जइ देह[1] किमु[2]
दोहा उप्पर[3] मत्तह[4] पंचइ ।
पअ पअ उप्पर संठवहु
सुद्ध कुसुमगण अंतह[5] दिज्जइ[6] ॥ १६७[०] ॥

१६६ । उदाहरति । वर्षति जलं भ्रमति घनः गगने, मलय-पवनो मनोहरणः, कनकपीता नृत्यति विद्युत्, फुल्लिता नीपाः । प्रस्तरविस्तारहृदयः प्रियो निकटं नायाति ॥ प्रस्तरविस्तार इति काठिन्यद्योतनार्थम् । (C).

१६६ । मालामुदाहरति वरिसेति । घण — घनः मेघः गअण — गगने भमइ — भ्रमति, जल — जलं वरिस — वर्षति, मण-हरण — मनोहरः सिअल — शीतलः पवण — पवनः वातः वातीति शेषः, कणअ पिअरि — कनकपीता बिजुरि — विद्युत् णचइ — नृत्यति, णीवा — नीपाः कदम्बाः फुल्लिआ — पुष्पिताः । पत्थर बित्थर हिअआ — प्रस्तरविस्तीर्णहृदयः पिअआ — प्रियः णिअलं — निकटे ण आवेइ — नायाति ॥ (E).

१६६ । यथा ॥ बरीति ॥ वर्षति जलं भ्रमति घनो गगने, शीतलः पवनो मनोहरः, कनकपीता नृत्यति विद्युत्, पुष्पिता नीपाः । प्रस्तरविस्तृतहृदयः प्रियो निकटे नायाति ॥ ६६ ॥ इति माला ॥ (G).

१६७ । १ देहि (B & C). २ किम (A), किम (B & C). ३ उप्परि (A). ४ मत्तहि (E & F). ५ अन्तत (A), अन्तत (B), अंतहि (C & F). ६ दिज्जइ (A), दिज्जइ (B), पअहि (C). ७ ५८ (A), ६० (F).

१६७। चूतिकाला यदि ददासि किमु दोहोपरि [मात्राः] पञ्च। पदे पदेऽन्ते संस्थापय अर्द्धं कुसुमगणमन्तेऽपि॥ संपूर्णदोहानन्तरं मात्रापञ्चकमिति। इयं हि द्विपदी, तत्र दोहापूर्व्वार्द्धानन्तरं मात्रापञ्चकदाने एकः पादः, एवं द्वितीयेऽपि पञ्चकलः। कीदृश इत्यत्राह कुसुमगण इति। लघ्वादिलघुद्वयान्तो गुरुरित्यर्थः। (C).

१६७। अथ चुलिआलानामकं वृत्तं लक्षयति, चुलिआलेति। दोहा उप्पर—दोहोपरि दोहायामिति यावत् मत्तहि पंचइ—मात्राः पंच यदि देइ—दीयते, तदा चुलिआला कह[?]—चुलिआलां कथय। ननु[नु] दोहायां किं प्रतिचरणे उत प्रतिदले वा क देयाः पंचमात्रा इत्यत आह, पअ पअ उप्परेति,—पदपदोपरि, अत्र पदशब्दो दलवाची उदाहरणानुरोधात्, तथाच एकैकदले इत्यर्थः, संठवउ—संस्थापयत पंचमात्रा इत्यनुषंगः। ननु सर्वलघुरूपा उत गुरुलघुरूपा चेति कीदृश्य एकैकदलेऽन्ते आदौ वा स्थाप्या इत्यत आह, सुद्धेति,—शुद्धः कुसुमगण आदौ एको लघुस्तत एको गुरुस्ततो लघुद्वयमेतादृशो गण इत्यर्थः। अंतह—अंते दिज्जइ—दीयते॥ एवं च दोहाया एकदलांते यदि पंचमात्राः कुसुमगणस्वरूपा दीयंते, तदा चुलिआलानामकं वृत्तं भवतीति फलितार्थः। (E).

१६७। अथ चूलिका॥ चुलीति॥ चुलिआला[?] यदि दीयते किं दोहाया उपरि मात्राः पंच। पदे पदे उपरि संस्थापय शुद्धं कुसुमगण[?]मंते दीयते॥ एकोनत्रिंशन्मात्राः पदे पदे कार्यास्तन्मध्ये

दोहा संखा[1] संठवहु उप्परि[2] पंचइ[3] मत्त ।
अट्ठदहुप्परि[4] बीसदुइ[5] चुलिआला उक्खित्त[6] ॥ १६८[7] ।
दोहा ।

अंतिमाः पंचमात्राः कुसुमगणरूपा इति ॥ कुसुमं लघुगुरुद्विलघुरूपं ।ऽ॥ बोध्यम् ॥ ६७ ॥ (G).

१६८ । उक्तार्थं स्पष्टयति । दोहासंख्यां [संस्था]पय उपरि पञ्चकमात्राः । अष्टादशोपरि विंशतिद्वयं चुलिआला उत्क्षिप्ता ॥ दोहासंख्या दोहार्द्धमात्रासंख्या, तथाच दोहार्द्धे चतुर्विंशतिमात्रास्तत्र मात्रापञ्चकदाने ऊनत्रिंशन्मात्रा भवन्ति, एतद्द्विगुणे अष्टपञ्चाशन्मात्रा भवन्ति । एतदेवोत्तरार्द्धेनाह । उत्क्षिप्ता उक्तिता । (C).

१६८ । अथैनमेवार्थं दोहावृत्तेन पुनराह, दोहालक्खणेति । आदौ दोहालक्खण—दोहालक्षणम् उप्परि—उपरि तदनंतरमित्यर्थः पंचइ मत्त—पंचैव मात्राः संठवहु—[सं]स्थापयत, एवं अट्ठदहुप्परि बीसदुइ—अष्टादशोपरि विंशतिद्वयेन मात्राणामिति शेषः, अष्टपंचाशन्मात्राभिरित्यर्थः, चुलिआला उक्खित्त—उक्ता ।

---

१६८ । १ सक्खा (C), लचण (E). २ उप्पर (A, B & C). ३ पंचइ (C). ४ अट्ठदहुपरि (A), अट्ठद उप्परि (C), अट्ठदुउप्परि (D). ५ बीसदइ (B), बिसदुइ (C). ६ उक्खिउ (A), उक्खित्थु (B). ७ ६० (A), ६८ (F).

जहा, रात्रा लुद्ध[1] समाज खल[2]
बहु कलहारिणी[णि][3] सेवक धुत्तउ ।
जीवण[4] चाहसि सुक्ख जइ[5]
परिहर[6] घर जइ[7] बहुगुणजुत्तउ ॥ १६६[8] ॥
चुलिआला । (A, B & C).

कचिद्दोहासंखा मंठवऊ इति पाठस्तत्र आदौ दोहासंखा — दोहा-संख्यां दोहामात्रासंख्याकमात्रामिति यावत् इति व्याख्येयम् । (E).

१६८ । दोहेति ॥ दोहासंख्यां स्थापयोपरि पंचमात्राः । अष्टादशोपरि विंशतिद्वयं चुलिआलायां व्याख्यातम् ॥ अष्ट-पंचाशन्मात्राः कार्या इत्यर्थः ॥ ६८ ॥ (G).

१६६ । उदाहरति । राजा लुब्धः, समाजः खलः, वधूः कलह-कारिणी, सेवको धूर्त्तः । जीवने चाहसि [?] सुखं यदि, परिहर गृहं यदि बहुगुणयुक्तम् ॥ वधूः स्त्री, परिहर त्यज, बहुतरानर्थ-सम्भवादित्यर्थः । (C).

१६६ । चुलिआलामुदाहरति रात्रा लुद्धेति । राजा लुब्धः, समाजः खलः, वधूः कलहकारिणी, सेवको धूर्त्तः । अतः जइ — यदि बहुगुणजुत्तउ — बहुगुणयुक्तमपि बहुभिः कीर्त्तिप्रतिष्ठा-

---

१६६ । १ लुब्ध (F). २ ख dropt in (A). ३ कारिणापि (A, D & E). ४ जिवण (A). ५ जउ (A), दइ (B), चजइ (F). ६ परिहव (E & F). ७ यमु रइं (D). ८ ६१ (A), ६६ (F).

अथ सोरट्ठा छंद । (D).

सो सोरट्ठउ[१] जाण[२] जं[३] दोहा बिबरीअ[४] ठिअ[५] ।
पअ पअ जमक[६] बखाण णाअराअ पिंगल[७] कहिअ[८] ॥
१७०[९] ॥

प्रमुखैर्गुणैः सहितमपीत्यर्थः जीवंतः[वनं] अथच सुखं चाहसि—वांछसि, तइ—तदा घर—गृहं परिहरु—त्यजेत्यर्थः ॥ (E).

१६९ । यथा ॥ राआ इति ॥ राजा लुब्धः, समाजः खलः, वधूः कलहकारिणी, से[व]को धूर्त्तः । जीवनं वांछसि सुखं च यदि, परिहर गृहं, तर्हि वक्रगुणयुक्तः ॥ ६९ ॥ (G).

१७० । अथ सौराष्ट्रम् । तत् सौराष्ट्रं जानीहि यद्दोहाविपरीतं स्थितं । पदे पदे यमकं नागराजपिंगलेन कथितम् ॥ प्रथमतृतीयपादयोरेकादशमात्रात्वं, द्वितीयचतुर्थयोस्त्रयोदशमात्रात्वमिति दोहावैपरीत्यं, पदे पदे इति प्रथमतृतीयपादयोरन्ते द्वितीयचतुर्थयोरन्ते च, यमकमनुप्रासं व्याचक्ष्व कथय कुर्व्विति यावत् । (C).

१७० । अथ सौराष्ट्रनामकं वृत्तं लक्षयति सो सोरट्ठउ इति । जं—यत् दोहा बिबरीअ ठिअ—दोहाविपरीतस्थिति दोहातो

---

१७० । १ सोरट्ठउ (A). २ जाणु (E). ३ जइ (A). ४ विवरिअ (A), विपरिअ (B), विपरीआ (C), विररी (E). ५ Non est (C), दिअ (E), ठिइ (F). ६ जमअ (D). ७ पिंगलु (D), विसं (E). ८ कहइ (D & F), कुणइ (E). ९ ६२ (A), ७० (F).

जहा,

सो माणिअ पुणबंत[1] जासु भत्त पंडिअ तणअ ।
जासु घरिणि[2] गुणबंति[3] सो[4] बि[5] पुहवि सग्गह[6] णिलअ ॥

१७१[7] ॥ सोरट्ठा । (A, B & C).

विपरीता स्थितिश्चरणानां स्थापनं यस्य तादृशमित्यर्थः, सो — तत् सोरट्ठउ — सौराष्ट्रं सौराष्ट्रनामकं वृत्तं जाणु — जानीहि, तत्र च पअ पअ — पादे पादे प्रतिचरणमित्यर्थः जमक बखाण — यमकं श्लाघय इति णाअराअ पिंगल — नागराजपिंगलः भणइ — भणति ॥ अयं भावः — दोहायाः प्रथमतृतीयचरणयोस्त्रयोदशमात्राः द्वितीयचतुर्थयोश्चैकादशमात्रा देया इति दोहालक्षणेनोक्तं, तद्वैपरीत्येनात्र द्वितीयचतुर्थचरणयोस्त्रयोदशमात्राः प्रथमतृतीययो-श्चैकादशमात्रा देया इति । (E).

१७० । सो इति ॥ तत्सौराष्ट्रं जानीहि यद्विपरीतं दोहा-स्थिति । पदे पदे यमकं व्याख्याहि नागराजः पिंगलः कथयति ॥ यमकमनुप्रासः ॥ विपरीतेति ॥ एकादश त्रयोदशेति भावः ॥ ७० ॥ (G).

१७१ । उदाहरति । स मन्यते पुण्यवान् यस्य भक्तः पण्डित-स्तनयः । यस्य गृहिणी गुणवती तस्य पृथिवी स्वर्गनिलयः ॥ (C).

---

१७१ । १ पुणभंत (A), पुणमन्ति (B), पुणमंत (C & E). २ घरणि (E & F). ३ गुणमन्ति (B), गुणबन्त (C), गुणमत्ति (D), गुणमंत (F). ४ से (E & F). ५ विश्व (F). ६ सग्ग (C & F). ७ ६२ (A), ७१ (F).

अथ हाकलि छंद । (D).

सगणा भगणा दिअगणा ई[1] मत्त चउद्दह[2] पअ पलई[3] ।
संठइ[4] बंको बिरइ[5] तहा[6] हाकलि[7] रूअउ[8] एम[9] कहा ॥ १७२[10] ॥

---

१७१ । अथ सौराष्ट्रमुदाहरति सो माणिअ इति । स मान्यः पुण्यः गुणवंत—गुणवान् यस्य भक्तः पंडित[स्त]नयः, यस्य गृहिणी गुणवती, से बि—अस्यापि पुहबि—पृथ्वी सग्गह णिलअ—स्वर्गनिलयः स्वर्गवास इत्यर्थः ॥ (E).

१७१ । सो माणीति ॥ स मान्यः पुण्यवान् यस्य भक्तः पंडितस्तनयः । यस्य गृहिणी गुणवती तस्यैव पृथिव्यां स्वर्गनिलयः ॥ [स्वर्ग] निवासः ॥ ७१ ॥ सौराष्ट्रम् ॥ (G).

१७२ । अथ हाकलीच्छन्दः । सगण-भगण-द्विजगणा मात्राश्चतुर्दश पदे पतन्ति । संस्थाप्य विरतौ वक्रं तथा हाकलीरूपम् एतत् कथितम् ॥ अर्थात् पिङ्गलेन । अयमर्थः । सगण-भगण-द्विजगणाः स्थाप्याः, नत्वेषां स्थाने नियमः, किन्तु पदानामन्तगुरुत्वं नियतं, सगणद्वयान्ते भगणद्वयान्ते द्विजगणास्ततो गुरुरेवं क्रमेण एकादशाक्षराणि भवन्ति । यदि द्विजगणं विहाय सगणभगणाभ्यां यथेच्छं गणत्रयं कृत्वाप्यन्ते गुरुर्दीयते तदा

---

१७२ । १ भागण अ दिअगणइ (D). २ चउदह (D). ३ पलइ (B & D). ४ संठ (C). ५ विरई वक्क (B & C), संका चंत (F). ६ जहा (D). ७ हाकलिअ (B). ८ रूअह (E & F). ९ एऊ (D). १० ६४ (A), ७२ (F).

दशाक्षराणि भवन्ति, किन्त्वन्तिमगुरोः पूर्व्वं सगणो न देय इति सम्प्रदायः। (C).

१७२। अथ छाकलीनामकं वृत्तं लक्षयति सगणेति। जहा—यत्र सगणा—सगणो गुर्वंतश्चतुष्कल इत्यर्थः, भगणा—भगणो गुर्वादिश्चतुष्कल इत्यर्थः, दिअगण—द्विजगणश्चतुर्लघ्वात्मको गण इत्यर्थः, ई—एते गणा इत्यर्थः, अथच मत्त चउद्दह—मात्राश्चतुर्दश पञ्च पलई—पादे पतंति पादांते चेति शेषः, वंको—वक्रमेकं गुरुं संठइ—संस्थाप्य, विरइ—विरतिर्भवति, अंतिमगुरोः प्रागेव विरतिरित्यर्थः। एङ—एतत् छाकलिरूअह—छाकलीरूपं छाकलिनामकवृत्तस्य स्वरूपमित्यर्थः कहा—कथितम्। अत्र सगण-भगण-द्विजगणातिरिक्तो गणो [न] भवतीति, एते एव च स[म]स्ता व्यस्ता वा पतंतीति नियमस्तथाच यदि सगणत्रयानंतरं भगणत्रयानंतरं द्विजगणत्रयानंतरं वा एको गुरुः स्थाप्यते प्रतिचरणं, तथापि छाकलीवृत्तं भवति। अथ एकस्मिंश्चरणे सगणत्रयानंतरमेकं गुरुं [सं]स्थाप्य तदितरचरणेषु भगणत्रयानंतरं द्विजगणत्रयानंतरं परस्परसंसृष्टैतद्वयानंतरं वा गुरुः स्थाप्यते, तदाप्येतद्वृत्तं भवति। अथ एकस्मिंश्चरणे भगणत्रयानंतरं द्विजगणत्रयानंतरं वा एकं गुरुं संस्थाप्य तदितरेषु परस्परसंसृष्टैतत्त्रयानंतरं गुरुः स्थाप्यते तथाप्येतद्वृत्तं भवतीति न विभावनीयम्। (E).

१७२। सगणो भगणो द्विजगणो मात्राश्चतुर्दश पदे पतंति। संस्थापय वक्रमंते तथा छाकलिरूपमेवं कथय॥ वक्रो गुरुः॥ ७२॥ (G).

मत्त चउद्दह पढम दल[1] एआरह[2] बखेहि[3]।
दह अक्खर उत्तर दलहि[4] हाकलि[5]छंद[6] कहेहि॥*
१७३[7]॥ दोहा।

१७३। मात्राश्चतुर्दश पदे पदे पतन्ति, एकादशवर्णैः। दशाक्षराण्युत्तरदले हाकलिच्छन्दः कथय॥ (C).

१७३। अथ नियमांतरमंगीकृत्य पुनर्हाकलीवृत्तं लक्षयति, मत्त चउद्दहेति। पढम दल—प्रथमदले पूर्वार्द्धे इति यावत् प्रतिचरणमिति शेषः, क्वचित्तु पअह पअ इति पाठस्तत्र पादे पादे अर्थात्पूर्वार्द्धस्य, उत्तरदले इत्यग्रे उक्तत्वादिति बोध्यम्, एग्गारह बखेहि—एकादशवर्णैः कृत्वा मत्त चउद्दह—मात्राश्चतुर्दश, उत्तर दलहि—उत्तरदले उत्तरार्द्धे इत्यर्थः प्रतिचरणम् इत्यनुषंगः, दह अक्खर—दशाक्षरैश्चतुर्दशमात्राः इत्यनुषंगः यत्र पतंतीति शेषः, तत् हाकलि छंद कहेहि—हाकलीनामकं छंदः कथय॥ अत्र च प्रथमद्वितीयचरणयोर्द्विजगणैर्देय एव, अन्यथा एकादशाक्षरोक्त्यसंभवापत्तिः। तृतीयचतुर्थयोश्च द्विजगणेनैव देयः अन्यथा दशाक्षरोक्त्यसंभवापत्तिः, इति नियमे तात्पर्यमुन्नीयते। तथाहि क्रमेण विपर्ययेण वा सगण-भगणौ अथवा सगणद्वयमेव

१७३। १ पढम पअ (C), पअ पअहि (F). २ इग्गारह (C), एगारह (D), एग्गारह (E). ३ वखेति (E). ४ दलह (B & C). ५ हालि (C), काकलि (F). ६ छन्द (B & C), छंदु (E). * This śloka is not found in (A). ७ ७३ (F).

जहा,

उच्चउ छाअण[1] बिमल घरा[2] तरुणी घरिणी[3] बिणअपरा[4]।
बित्तक पूरल[5] मुद्दहरा[6] बरिसा[7] समआ सुक्खकरा॥
१७४[8]॥ हाकलि। (A, B, C & F.)

भगणद्वयमेव वा [सं]स्थाप्य यदि द्विजगणो दीयते अंते च गुरुर्दीयते, तदैवाक्षरषट्कं सगणभगणयोरक्षरचतुष्टयं च द्विजग[ण]स्य एकमक्षरं च गुरोरेवमेकादशाक्षराणि पूर्वार्द्धे प्रतिचरणं पतंति, उत्तरार्द्धेऽपि चेदेवं द्विजगणः स्थाप्यते तत्राप्येकादशाक्षराणि स्युः, तस्मादुत्तरार्द्धे सगणत्रयोत्तरं भगणत्रयानंतरं वा परस्परसंसृष्टैतत्त्रयानंतरं वा गुरुः प्रतिचरणं स्थाप्यते तदैवोत्तरार्द्धे दशाक्षराणि पतंति, एवं च प्रथमद्वितीयचरणयोर्द्विजगणदानमंगीकृतपूर्वं लक्षणकृता,**तदनंगीकारेण चैतल्लक्षणमित्यस्मत्तातचरणोपदिष्टः पंथाः सुधीभिर्विभाव्यः। (E).

१७३। मत्तेति॥ मात्राश्चतुर्दश पदे पदे एकादशवर्णाः। दशाक्षराण्युत्तरदले हाकलिच्छंदः कथय॥ ७३॥ (G).

१७४। उदाहरति। उच्चोठानकं विमलं गृहं, तरुणी गृहिणी विनयपरा। वित्तेन पूर्णं मुद्रागृहं, वर्षासमयः सुखकरः॥ उठानशब्दोऽङ्गनवाची, मुद्रागृहं कोषागारम्। अत्र च यदि तदेत्यध्याहार्य्यम्। (C).

१७४। १ उच्चउ छावण (A), उच्च उठाछण (C), उच्चउ च्छावणि (D & F). २ हरा (A). ३ घरणी (A), घरणी (F). ४ विणअकरा (B & C). ५ पूरण (B & C). ६ मुदंहरा (D), मूलघरा (F). ७ वरिखा (A), वरीसा (D). ८ ६५ (A), ७२ (F).

अथ मधुभारच्छंदः । (D).

जसु पलइ[1] सेक्ख[2] पअहरह[3] एक्क[4] ।
चउमत्त[5] बेबि[6] महुभार[7] एबि[8] ॥ १७५[9] ॥

---

१७४ । अथोत्तरलक्षणाभिप्रायेण हाकलीमुदाहरति उच्चेति । यस्य उत्तमाच्छादितं विमलं गृहं, तरुणी विनयपरा गृहिणी कांता, वित्तपूर्णं मुद्रागृहं के[को]शभांडमित्यर्थः, तस्य वर्षासमयः सुखकरः ॥ (E).

१७४ । यथा ॥ उच्चेति ॥ उच्चमाच्छादनं विमलगृहं, तरुणी गृहिणी विनयपरा । वित्तपूर्णं कोशगृहं, वर्षासमयः सौख्यकरः ॥ तस्येति शेषः ॥ ७४ ॥ हाकलीति ॥ (G).

१७५ । अथ मधुभारच्छन्दः ॥ यस्य पतति शेषे पयोधर[एकः]। चतुर्मात्रिकौ द्वौ मधुभार एवं ॥ एकचातुर्मात्रिकानन्तरं पयोधरो जगणः मिलित्वा द्वौ चातुर्मात्रिकौ । (C).

१७५ । अथ मधुभारनामकं वृत्तं लक्षयति जसु पलईति । जसु — यस्य चरणे इति शेषः चउमत्त बेबि — चतुर्मात्रिकौ द्वौ पततः, सेख — शेषे पादांते इत्यर्थः एक्क — एकः चतुर्मात्रिक-इत्यर्थः [पल]इ — पतति, कर्त्तव्ययोर्द्वयोश्चतुर्मात्रिकयोश्चांतिम-

---

१७५ । १ पलई (F). २ सेख (A & E), सेस (F). ३ पअहरअ (B & C), पअरहअ (E), पओहर (F). ४ एक (F). ५ चामत्त (D), चोमत्त (F). ६ वेखि (A), तेअ (D), तीअ (F). ७ मऊहार (B & C), मधुभार (E). ८ आवि (D), अवि (F). ९ ११ (A), ७५ (F).

जहा, जसु चंद[1] सीस पिंधणह[2] दीस ।
सो संभु एउ[3] तुह[4] सुभ[5] देउ ॥ १७६[6] ॥
मधुभार[7] । (A & F).

अथाभीरच्छंदः । (D).

गारह[1] मत्त करीज अंत पओहर दीज ।
एहु[2] सुछंद[3] अहीर[4] जंपइ[5] पिंगल धीर[6] ॥ १७७[7] ॥

स्तुर्मात्रिको जगणस्वरूप एव पततीत्यर्थः, एवि — एतत्, मधु-भारनामकमेतद्वृत्तमित्यर्थः । (E).

१७५ । जसु इति ॥ यस्य पतति शेषे पयोधर एकः । चतु-र्मात्रास्त्रयो मधुभारमेतत् ॥ शेषे अर्द्धांते ॥ ७५ ॥ (G).

१७६ । उदाहरति । यस्य चन्द्रः शीर्षे परिधानं दिशः । स शम्भुदेवः तुभ्यं सुखं ददातु ॥ (C).

१७६ । मधुभारमुदाहरति । जस्विति । यस्य शीर्षे चंद्रः पिंधनं दिक् । स देवः शम्भुः मह्यं सुखं ददातु ॥ (E).

१७६ । यथा जसु इति ॥ यस्य चंद्रः शीर्षे वस्त्रं दिशः । स शंभुरयं युष्माकं शुभं ददातु ॥ ७६ ॥ इति मधुभारम् ॥ (G).

---

१७६ । १ चंदु (A). २ पीन्धस (B), पिन्धण (C), पिंधण (F). ३ देउ (B & C). ४ तुह्म (A), तुम्ह (D), मज्झ (E). ५ सुक्खु (A & E), सुःभ (B & C), सुभ (F). ६ ६० (A), ७६ (F). ७ मधुहार (B), मऊहार (C).

१७७ । १ एगारह (B), इग्गारह (C). २ एह (F). ३ सुच्छन्द (C), सुछंदु (E). ४ श्रहीव (B & C), अहिर (E). ५ जम्पइ (B), जम्पइ (C). ६ बीर (A & D), धीव (B), बीव (C). ७ ६८ (A), ७७ (F).

जहा, सुंदरि गुज्जरि[1] णारि[2] लोअण दीह बिसारि[3] ।
पीण पओहर भार लोलइ[4] मोत्तिअ[5] हार ॥
१७८[6] ॥ अहीर । (A).

१७७ । अथाभीरच्छन्दः ॥ एकादशमात्राः क्रियन्ते अन्ते पयोधरो दीयते । एतच्छन्दः अभीरं जल्पति पिंगलधीरः ॥ पयोधरो जगणः, स चैकादशमात्रान्तःपाती, प्राथमिकमात्रासप्तकन्तु यथेच्छं, न तु सूत्रोदाहरणाद्भवति । आभीरनामकं छंद इति केचित् । (C).

१७७ । अथाभीरनामकं वृत्तं लक्षयति गारहेति । यत्र गारह मत्त—एकादशमात्राः क्रियंते, पयोधरः दीयते, कर्त्तव्यास्वेकादशमात्रासु अंतिममात्राचतुष्टयं जगणस्वरूपमेव स्थाप्यते इत्यर्थः, [एक]—एतत् आभीर सुछंदु—आभीरः सुच्छंदः इति पिंगलधीरः जल्पति ॥ (E).

१७७ । गारेति । एकादशमात्राः क्रियंते अंते पयोधरो दीयते । एतत् सुच्छंदः अभीरं जल्पति पिंगलो धीरः ॥ एकादशमात्रामध्ये अंते मात्राचतुष्टयं जगणरूपं कार्यमित्यर्थः ॥७७॥ (G).

१७८ । उदाहरति । सुन्दरी गुज्जरी नारी, लोचनं दीर्घविशारि । पीनपयोधरभारे लोलते मौक्तिकहारः ॥ (C).

१७८ । आभीरमुदाहरति । यस्याः पीनपयोधरभारे मौक्तिकः

१७८ । १ गुज्जर (F). २ Dropt in (F). ३ विचारि (B). ४ लूलइ (A), लोटइ (E), लोलिअ (F). ५ मोतिम (B & C), मोतिअ (D). ६ ९९ (A), ७८ (F).

अथ दण्डकलच्छंदः । (D).

कुंत[1]अरु[2] धणुद्धरु[3] हअबर[4] गअबरु
छक्कलु[5] बिबि[6] पाइक्क दले
बत्तीसह[7] मत्तह[8] पअ[9] सुपसिद्धउ[10]
जाणह[11] बुहअण हिअअतले[12] ।
सउबीस अठग्गल[13] कल संपुण्णउ
रूअउ[14] फणि[15] भासिअ भुअणे
दंडअल णिरुत्तउ गुरु संजुत्तउ[16]
पिंगलिअं[17] जंपंत[18] मणे ॥ १७९[19] ॥

हारः लोटइ—लुठति, दीर्घविशाललोचना सा सुंदरी गुर्ज[री] नारी ॥ (E).

१७८ । सुंदेति ॥ सुंदरी गुर्जरी नारी लोचने दीर्घे विशाले । पीनः पयोधरभारो लोलते मौक्तिकहारः ॥ ७८ ॥

इत्यधी[भी]रम् ॥ (G).

१७९ । १ ता कुंत (A), कणु (B). २ Dropt in (A), हर (B & C), इर (E). ३ धणुद्धर (A & C). ४ हअअर (A). ५ छप्पउ (A, B, C & D). ६ वेवि (B & C). ७ वत्तीस (A, B, E & F). ८ मत्त (A & B), मत्तउ (F). ९ पअ पअ (A & B). १० सुपसिद्धह (D). ११ जाणउ (B & C). १२ हिअअरए (A & C), हिअअहरे (B), हिअअअले (F). १३ पअअगल (A, B & C), विहट्ठगल (D), अट्ठगल (F). १४ रूअं (A & E), अरउ (D), वुत्तउ (F). १५ भणि (B). १६ संजुत्तअ (F). १७ पिंगलआ (A), पिंगलअं (D), पिंगलीआ (E), पिंगल (F). १८ जप्पत (B), पढ्अ (F). १९ ७० (A), ७९ (F).

१७८। अथ दण्डकलच्छन्दः। कुन्तधरो धनुर्द्धरो हयवरः गजवरः षट्पदोऽपि द्वौ दले, द्वात्रिंशन्मात्रिकं पदं सुप्रसिद्धं जानीहि बुधजनहृदयहरं। शतविंशतिकपदाधिककलासंपूर्णं रूपकं फणिभाषितं भुवने दण्डकलं निरुक्तं गुरुसंयुक्तं पैङ्गलिका जपत मनसा॥ कुन्तधरादयश्चत्वारश्चतुष्कलवाचकाः, तेनादौ चतुष्कलगणाः, षट्पदः षट्कलगणः, दले चरणे, पदम् अष्टकलं द्वात्रिंशन्मात्रोऽत्र पादस्तस्य चतुर्थांशः पदं तेनाष्टौ मात्रा लभ्यन्ते, तेनाष्टाविंशत्यधिकशतकलासम्पूर्णमित्यर्थः। अन्ते गुरुसंयुक्तं, पैङ्गलिकाः पिङ्गलाध्ययनवन्तः। (C).

१७८। अथ दंडकलं लचयति कुंतहर इति। कुंतधरः धनुर्द्धरः हयवरः गजवरः एतच्चतुष्कलचतुष्टयं, ततः छक्कलु—षट्कलः, ततश्च गुरुसंजुत्तउ—गुरुसंयुक्तम् अंतस्थितैकगुरुकमित्यर्थः, बिबि पाइक—पदातिद्वयं चतुष्कलद्वयमित्यर्थः, एवं दले—पूर्वार्द्धे उत्तरार्द्धे चेत्यर्थः, बत्तीस मत्तह—द्वात्रिंशन्मात्राः पअ—पादे पतंति प्रत्येकमिति शेषः, संपुण्ण[उ]—चरणचतुष्टयस्य इत्यर्थः, बीस अठग्गलु[ल]—अष्टाविंशत्यधिकाः सउकल—शतं कला भवंति, तत् सुपसिद्धउ—सुप्रसिद्धं फणि भासिअ रूअउ—फणिभाषितरूपं, भुअणे—भुवने दंडकल णिरुत्तउ—दंडकलः निरुक्तः इति पैंगलिका मनसि जल्पंति हे बुधजनाः यूयं हिअअतले—हृदयतले जाणहु[हु]—जानीत॥ यत्र प्रथमं चतुष्कलचतुष्टयं तत एकः षट्कलः ततश्च पुनश्चतुष्कलद्वयं तत एको गुरुः प्रतिचरणं पतति, तद्दंडकलनामकं वृत्तमिति फलितार्थः। (E).

जहा, राअह[1] भग्गंता[2] दिग[3] लग्गंता[4]
परिहरि हअ गअ[5] घर[6] घरिणी
लोरहि[7] भरु सरवरु[8] पअ परु[9] परिकरु[10]
लोट्टइ पिट्टइ[11] तणु[12] धरणी ।
पुणु[13] उट्ठइ[14] संभलि कर[15] दंतंगुलि[16]
बाल[17] तणअ कर जमलकरे[18]
कासीसर[19] राआ णेहलु[20] काआ
करु[21] माआ[22] पुणु[23] थप्पि[24] धरे ॥
१८०[25] ॥ दंडकल[26] । (A & F).

---

१७९ । अथ दंडकलं ॥ कुंतेति ॥ कुंतकरो धनुर्द्धरो हयवरो गजवरः षट्कलो द्वौ पदाती दले, द्वात्रिंशन्मात्राः पादे सुप्रसिद्धा जानीत बुधजना हृदयतले । अतं विंशतिरष्टाधिका कलाः १२८ संपूर्णे वृत्ते फणिभाषिते भुवने, दंडकलं निरुक्तं

---

१८० । १ राग (C). २ भग्गंजा (E). ३ दिअ (D & F). ४ लगन्ता (C). ५ ठाअ (D). ६ Dropt in (B). ७ रोलह (A), लोरहि (B), लोरभि (F). ८ सक्कलु (A), सरवर (B). ९ रअ वर (A), dropt in (B), रिउजण (C), रअद्दअ (D), पअ पूर (F). १० Dropt in (B), रअवर (D). ११ Dropt in (C). १२ तणो (E). १३ पुणि (E), पुण (F). १४ उट्ठइ (B & C), वट्टइ (E). १५ करि (A). १६ दत्तेगुलि (D). १७ बाल (E). १८ जवलकरे (A). १९ कसीसर (A), कासीसर (E). २० लेहणु (C). २१ करि (E), कर (F). २२ मादा (B). २३ पुण (E & F). २४ थप्प (D). २५ ७१ (A), ८० (F). २६ दंडअल (B & C).

LIBRARY OF THE

गुरुसंयुक्तं पिंगलो जल्पति आत्ममनसि ॥ कुंतेति चत्वारश्चतुष्कलाः, पदातिश्चतुष्कलः ॥ ७९ ॥ (G).

१८० । उदाहरति । राजानो भग्ना दिक्षु लग्नाः परिहृत्य हयगजगृहगृहिणीः, नेत्रैर्भूतं सरोवरं रिपुजनपरिकरः पीडयति लोटयति तनुं धरण्यां । पुनरुत्थाय संभाष्य करोति दन्ताङ्गुलीः बालतनयाः करं यमलं कुर्व्वन्ति, काशीश्वरो राजा स्नेहलकायः कृत्वा मायां पुनः स्थापयति ॥ नेत्रैरश्रुभिः, परिकरो भार्य्या, सम्भाष्य धैर्य्यं कृत्वा, दन्ताङ्गुलिकरणमत्यद्भुते, यमलं जोडिः । एतादृशीं दशां दृष्ट्वा शत्रुपरिजनेष्वपि स्नेहयुक्तशरीरो भूत्वा पुनः स्वस्थाने स्थापयित्वा धा[र]यति पालयति । (C).

१८० । दंडकलमुदाहरति राअह इति । हअ गअ घर घरिणी — हयगज[गृह]गृहिणीः परिहरि — परित्यज्य भग्गंता — पलायमानाः केचन राअह — राजानः दिश लग्गंता — दिक्षु लग्नाः दिगन्तं गता इत्यर्थः, तेषां चेति शेषः लोरहि — अश्रुभिः भरु सरवरु — भृताः सरोवराः, कश्चिच्च पअ परु परिकरु — पादपतितनिगड़ः धरणी — धरण्यां लोट्टइ — विचेष्टते, तनुं शरीरं च पिट्टइ — ताडयति, कर दंतंगुलि — कृतदंतांगुलिः सन् पुण उट्टइ संभलि — पुनरुत्तिष्ठते सावधानीभूय, बाल तणअ कर जमलकरे — बालतनयकरेण नमस्कारं कारयति । इदं च जातिवर्णनं । तथावस्थं च दृष्ट्वा तं णेहलु काअ — स्नेहलकायः कासीसर राआ — काशीश्वरराजः माआ — मायां दयां करि — कृत्वा पुनः थप्पि धरे — संस्थाप्य धृतवान् स्वराज्ये रचितवानित्यर्थः ॥ (E).

अथ दीपकच्छंदः। (D).

सिर देह[1] चउ[2] मत्त लहु एक्क कर[3] अंत।
कुंतेक्क[4] तसु[5] मज्झ[6] दीपक्क सो[7] बुज्झ ॥ १८१[8] ॥

१८०। यथा॥ राआ इति॥ राजानो भग्ना दिक्षु लग्नाः परित्यज्य हयगज[गृह]गृहिणीः। अश्रुभिर्भृत्वा सरोवरान् पदपतितः परिकरो लुटति ताडयति तनुं धरण्यां। पुनरुत्तिष्ठत्यवधार्य कृतदंतांगुलिर्बालतनयैः कृत्वा नमस्कारं कारयति, काशीश्वरो राजा स्नेहालुकायः कृत्वा मायां पुनः [सं]स्थाप्य धृतवान्॥ परिकरः स्त्रीजनः ॥ ८० ॥ इति दंडकलम् ॥ (G).

१८१। अथ दीपकच्छन्दः॥ शिरसि देहि चतुर्मात्रं लघुमेकमन्ते। कुन्त एको यस्य मध्ये दीपकं तद्बुध्यस्व॥ शिरसि आदौ, कुन्तः पञ्चकलो गणः। (C).

१८१। अथ दीपकनामकं वृत्तं लक्षयति सिर देहेति। सिर—शिरसि आदावित्यर्थः चउ मत्त—चतुर्मात्रिकं गणं देह—स्थापय, अंत—अंते पादांते लहु एक्क—लघुमेकं करु—कुरु, तसु—तयोः चतुर्मात्रिकैकलघुकगणयोरित्यर्थः मज्झ—मध्ये कुंतेक्क—कुंतमेकं पंचकलमेकमित्यर्थः कुरु इति पश्चात्तनेनान्वयः, दीपक्क सोउ बुज्झ—दीपकनामकं [तत्] वृत्तं जानीहीत्यर्थः॥ यत्र

१८१। १ देथ (B), देउ (C). २ चौ (D). ३ तसु (D), कर (E). ४ कुंतक्क (A), दंतेक्क (B & C). ५ जसु (C). ६ चंत (A). ७ सउ (B & F), सइ (C), सोइ (D & E). ८ ७१ (A), ८१ (F).

जहा, जसु हत्थ[1] करवाल[2] बीपक्ख[3] कुल काल ।
सिर सोह[4] वर छत्त संपुस ससि मत्त[5] ॥ १८२[6] ॥
दीपक । (A, B, C & F).

प्रथमं चतुष्कलस्ततः पंचकलस्तत एको लघुः प्रतिचरणं पतति, तद्दीपकनामकं वृत्तमिति फलितार्थः । क्वचित् कुंतत्ति तसु मज्झेति पाठस्तत्र अंते दलांते एकं लघुं कुरु, कुंतत्ति—कुंतत्रयं, तसु—तयोश्चतुर्मात्रिकैकलघुकगणयोः मज्झ—मध्ये कुरु इत्यर्थः । इदं च एकैकदलाभिप्रायेण, अन्यथैकैकपादे चतुष्कलत्रयस्याभावादसंभवापत्तिरिति द्रष्टव्यं । प्रथमं यत्र चतुर्मात्रिकस्ततः पंचकलत्रयं ततो लघुः प्रतिदलं पतंति, तदा [दी]पकं वांछ इति द्वितीयपाठे निर्गलितार्थः ॥ (E).

१८१ । सिर इति ॥ शिरसि देहि चतुर्मात्राः लघुमेकं कुर्व्वंते । कुंतमेकं तस्य मध्ये दीपकं बुध्यस्व ॥ शिरस्यादौ, कुंतः पंचकलः ॥ ८१ ॥ (G).

१८२ । उदाहरति । यस्य हस्ते करवालः प्रति[वि]पक्षकुलकालः । शिरसि शोभते वरच्छत्रं सम्पूर्णशशिवत् ॥ (C).

१८२ । अथ दीपकमुदाहरति जसु हत्थ इति । विपक्ख कुलकाल—विपक्षकुलकालः करवालः खड्गः जसु हत्थ—यस्य हस्ते,

---

१८२ । १ हच्छ (A). २ करवालु (F). ३ बिपख (A), विप्पक्ख (D), विप्पक्ख (E), बिपक्ख (F). ४ सेह (A & B), सोभ (C). ५ मित्त (B), मत्त (D & F). ६ ७३ (A), ८२ (F).

अथ सिंहावलोकच्छंदः । (D).

गण विप्प[1] सगण धरि पअह पअं[2]
भण[3] सिंहअ[4]लोअण[5] छंद[6]वरं[7] ।
गुणि गण[8] मण बुज्झहु[9] णाअ[10] भणा[11]
णहि[12] जगणु[13] ण भगणु ण कण्ण[14]गणा[15] ॥ १८३[16] ।

सोह—शोभते, यस्य सिर—[शिर]सि वर छत्त—वरच्छत्रं, संपुण्ण ससि मत्त—संपूर्णशशिवत्, अथवा संपूर्णशशिमात्रं पौर्णिमचंद्रमंडलप्रमाणमित्यर्थः शोभते इति पूर्वेणैवान्वयः ॥ (E).

१८२ । यथा जसु इति ॥ यस्य हस्ते करवालो विपक्षकुलकालः । शिरसि वरं छत्रं पूर्णशशिवत् ॥ ८२ ॥ इति दीपकम् ॥ (G).

१८३ । अथ सिंहावलोकः ॥ विप्रगणं सगणं कृत्वा पदे पदे भण सिंहावलोकं छन्दोवरं । गुणिगणा मनसा बुध्यध्वं नागो भणति, यस्मिन्[न्न] य[ज]गण-भगणौ न कर्णगणः ॥ पदे पदे प्र[ति]पादं, विप्रगणं चतुष्कलं, सगणमन्तेगुरु चतुष्कलं, कृत्वा स्थापयित्वा, नागः पिङ्गलः । तथाच विप्रगणसगणाभ्यामेव छन्दो-

---

१८३ । १ विप्प गण (F). २ मत्तकअं (D). ३ भणु (B, C & F). ४ सिंहव (A & D). ५ लोअ (B), non est (C), लोवअ (D), लोवह (F). ६ छन्द (C), छुछंदु (D). ७ भुवं (D), वुरम् (E). ८ जण (B), षण (C & E). ९ Dropt in (B), षुजझउ (C). १० कइअ (A). ११ षण (A), मषा (D), मूण (F). १२ Dropt in (A & B), पअ (C), पाहु (D), जसु प (E). १३ जमण (B). १४ कण (E). १५ षणा (C). १६ ७४ (A), ८३ (F).

निर्व्वाहः कार्य्यः । एतदेव स्पष्टयितुमाह यस्मिन्निति, एतच्छन्दसि जगणभगणकर्णगणा न पतन्ति । जगणो मध्यगुरुः, भगण आदि-गुरुः, कर्णो द्विगुरुः, एतेषां निषेधाच्चतुष्कलेषु सगणविप्रगणाव-[व]शिष्येते । (C).

१८३ । अथ सिंहावलोकनामकं वृत्तं लक्षयति गण विप्पेति । पअइ पअं—पादे पादे गण विप्प सगण—विप्रगणसगणौ धरि —धृत्वा, छंदवरं—छंदःश्रेष्ठं सिंहअ लोअइ—सिंहावलोकं भण, तसु—तस्मिन्, न जगणः न भगणः न कर्णगणः । जगणो मध्य-गुरुर्गणः, भगणो गुर्वादिर्गणः, कर्णो गुरुद्वयात्मको गणः, एते तत्र न पतंतीत्यर्थः, इति णाअ भणा—नागः भणति । हे गुणि अण—गुणिजनाः यूयमिति [शेषः] मण बुज्झहु—मनसि बुध्यध्वम् ॥ अत्र विप्रसगणयोः क्रमिकयोः समुदितयोर्वा स्थापने न नियमः, किंतु एताभ्यामेव व्यस्तसमस्ताभ्यां पादे षोड़शकलाः पूरणीयाः, एताभ्या-मतिरिक्तस्तु गणो न देयः । अतएवोदाहरणे प्रथमपादे ज[स]गण-चतुष्टयेनैव षोड़शमात्राः पूरिताः, द्वितीयचरणे च प्रथम-विप्रद्वयमनंतरं सगणद्वयमित्युभाभ्यामेव षोड़शकलाः पूरिताः, तृतीये च पुनः सगणचतुष्टयेनैव पूरिताः, * * * न लन्यो गणो दत्तः, न लेतावेव क्रमिकसमुदिताविति द्रष्टव्यम् । (E).

१८३ । विप्पेति ॥ विप्रगणं सगणं धृत्वा पदे पदे, भण सिंहा-वलोकितं[कनं] छंदोवरं । गुणिगणा मनसि जानीत, नागभणितं, नास्ति जगणो न भगणो न कर्णगणः ॥ विप्राश्चतस्रो मात्रास्सगणोऽपि, ताभ्यां षोड़शमात्राः प्रतिपादं कार्या इति तात्पर्यम् ॥ ८३ ॥ (G).

बिप्प सगण पश्र बेबि गण अंत[1] बिसज्जहि[2] हार[3]।
पच्छा हेरि कइत्त[4] करु[5] सोलह कल[6] पत्थार[7]॥ १८४[8]॥
दोहा।

१८४। विशेषान्तरमाह। विप्रगणसगणौ पदे द्वावपि, अन्ते विसर्ज्जय हारं। पश्चाद्दृष्ट्वा कवित्वं कुरु षोड़शक[ल]प्रस्तारः॥ द्वावपि द्वावेव, अत्र चान्ते विप्रगणो न देय इति। हारं गुरुमन्ते यथा गुरुः पतति तथा कार्य्यं, तेनान्ते सगणो देय इति पर्य्यवस्यति। (C).

१८४। अथैनमेवार्थं विशदीकृत्य द्विपदिकयाह बिप्प सगणेति। बिप्प सगण पश्र बेबि गण—विप्रसगणौ पादे द्वावेव गणौ अंत—अंते पादांते हार—हारं गुरुं बिसज्जहि—विसर्जय, पादांते सगणान्तःपतितं गुरुं विसर्जय न लब्ध्यमित्यर्थः, तथा च पादांते सगण एव देय इति नियमो लभ्यते इति। हेरि—निरीक्ष्य विभाव्य, पच्छा—पश्चात् सोलह कल पत्थार—षोड़शकलप्रस्तारं षोड़शकलाः प्रस्तार्य्यंते अस्मिन्नेतादृशमित्यर्थः कइत्त—कवित्वं कुरु, एतल्लक्षणं विभाव्य पश्चादेतच्छंदसा कवित्वं कुरु इत्यर्थः। (E).

१८४। दोहया पुनर्द्रढ़यति, बिप्प सेति॥ विप्रसगणौ पदे

१८४। १ अन्तह (B). २ बिसजऊ (A), बिजऊ (B), बिसज्जहिँ (D). ३ हाव (A). ४ कवित्त (D). ५ कर (C), करि (F). ६ कव (F). ७ पच्छाव (A). ८ ७५ (A), ८४ (F).

जहा, हणु उज्जर[1] गुज्जर[2] राअ[3] दलं[4],
दल[5] दलिअ[6] चलिअ[7] मरहट्ठ[8] बलं[9] ।
बल मोलिअ[10] मालव राअ[11] कुला,
कुल उज्जल[12] कल[13] चुलि[14] कस फुला[15] ॥१८५[16]॥
सिंहावलोक[17] । (A, B & C).

द्वावेव गणौ अंते विसर्जय हारं । पश्चाद्दृष्ट्वा कवित्वं कुरु, षोड़शकलः प्रस्तारः ॥ अत्र सिंहावलोकने प्रतिचरणं षोड़शमात्रास्तन्मध्ये मात्राद्वयमंतिमं गुरुरूपं कार्यमित्यर्थः ॥ ८४ ॥ (G).

१८५ । उदाहरति । हतमुज्ज्वल-गुज्ज्वल-राजकुलं, दल-मलितमहाराष्ट्रकुलं, बलमोटितमालवराजकुलं, कुलेनोज्ज्वलकर-चूलीकर्णपुष्पं ॥ कुलं सैन्यं, दलमलितं मर्द्दितं, मोटितं प्रमर्द्दितं येन, करचूलीवंशावतंसो जयति, करचूली क्षत्रियान्तरवाची, कर्णपुष्पम् अवतंसः ॥ (C).

१८५ । अथ सिंहावलोकमुदाहरति हणु इति । हतोज्ज्वल-गुर्जरराजदलः, दरदलित — चालित-महाराष्ट्रबलः, बलमोदित-

---

१८५ । १ उज्जर (D), उज्जल (F). २ Dropt in (A), र non est (C), गुज्जर (D), गुज्जल (F). ३ राउ (F). ४ कुलं (B & C), कुला (F). ५ दर (A), बल (B). ६ मलिअ (C). ७ सअण (C), dropt in (F). ८ मरहट्ट (A), मरहट्ट (B & C). ९ बला (F). १० मोडिअ (F). ११ लाउ (C). १२ तज्जल (A). १३ कअ (A), कर (C & E). १४ चुरि (A & B). १५ फुरा (A & E). १६ ७६ (A), ८५ (F). १७ सिंहावलोअण (F).

अथ प्लवंगमच्छंदः । (D).

जत्थ[1] पढम छत्र[2] मत्त पत्रप्पत्र[3] दिज्जए[4]
पंचमत्त चउमत्त गणा णहि[5] किज्जए[6] ।
संभलि[7] अंत लहू[8] गुरु[9] एक्कक[10] चाहए[11]
मुद्धि पत्रंगम[12] छंद[13] विअक्खण सोहए ॥ १८६[14] ॥

मालवराजकुलः, एतादृशः कुल उज्जल — उज्ज्वलकुलः, करचुलि-[कण्ण] — करचुलिवंशोद्भवः कर्णः फुरा — स्फुरति ॥ (E).

१८५ । यथा ॥ हणु इति । हतोज्ज्वलगुर्जरराजदलो दलदलित-महाराष्ट्रबलः । बलत्रोटितमालवराजकुलः, कुलोज्ज्वलः कर-चुलिकर्णः स्फुरति ॥ करेति करचुलिवंशोत्पन्नः कर्ण इत्यर्थः ॥ ८५ ॥ इति सिंहावलोकनम् ॥ (G).

१८६ । यत्र प्रथमं षण्मात्रः पदे पदे दृश्यते, पञ्चमात्र-चतुर्मात्रगणौ न हि क्रियेते । संभणान्ते लघुर्गुरुरेकः स्थाप्यतां मुग्धे प्लवङ्गमच्छन्दो विलक्षणं शोभते ॥ विलक्षणं प्रकृष्टं, विचक्षण इति सम्बोधनं वा । आदौ षट्कलो गण इत्युक्तम् । (C).

---

१८६ । १ जच्छ (A). २ छक्क (C). ३ पत्रंपत्र (A). ४ दीसए (D & F). ५ णहि (F). ६ दिज्जए (A), दिक्खिए (C & E). ७ सम्बलि (A), संभणि (B & C), संभलिच (F). ८ लक्ष देइ (A), हि लक्ष (B), लक्ष (C & F). लहु (E). ९ गुरू (F). १० कइ (A), एक्क (F). ११ रेहए (A). १२ पवंगम (D, E & F). १३ च्छन्द (C). १४ ७७ (A), ८६ (F).

पत्र पत्र[1] आइहि गुरुआ[2]
पिंगल पभणेइ[3] सअल[4] णिब्भंती[5] ।
छंद पवंगम[6] दिट्ठो[7]
मत्ताणं एक[8] बीसंती[9] ॥ १८७[10] ॥ गाहा ।

---

१८६ । अथ प्लवंगमना[म]कं वृत्तं लक्षयति जत्थेति । जत्थ—यत्र पढम—प्रथमं पादादावित्यर्थः छअ मत्त—षण्मात्राकः पअप्पअ—पादे पा[दे] दिज्जए—दीयते, ततश्च चउमत्त गणा—चतुर्मात्राका गणा दिज्जए—दीयंते इति पूर्वेणैवान्वयः, पंचमत्त—पंचमात्राकगणः णहि किज्जए—न क्रियते । षट्कलानंतरं चतुर्मात्रकगणेनैव पादपूरणं कर्त्तव्यं न तु पंचमात्रकगणेनेत्यर्थः । अंते—पादांत इत्यर्थः संभलि—संस्मृत्य एक्कक—एकैकः लहु गुरु—लघुर्गुरुः चाहए—अपेक्ष्यते पादांते लघुगुरू अवश्यक्रमेण स्थापनीयावित्यर्थः, हे मुद्धि—मुग्धे, तत् प्लवंगमच्छंदो विलक्षणं शोभते ॥ अत्र षट्कलोत्तरं यथासंभवं पतितैश्चतुर्मात्राकैः न तु पंचमात्राकैः पादांते अवश्यापेक्षणीयाभ्यां च लघुगुरुभ्यां प्रतिचरणमेकविंशतिः कलाः पूरणीया इति संप्रदायः ।

---

१८७ । १ Dropt in (E). २ गुरुआ (C). ३ पभणइ (B), भणेइ (D), भणइ (F). ४ सअण (C), सकल (D & F). ५ णिब्भंती (B & C), णिब्भंता (D), णिब्भंति (E), णिभंता (F). ६ पवंगम (A & C). ७ दिट्ठो (B & C). ८ एक्क (B & C), एच (D & F). ९ बीसंति (A & E), बीसत्ता (D), बीसता (F). १० ७८ (A), ८७ (F).

तिक्कलु[1] चउकल पंचकल तिस्र गण दूर करेहु ।
छक्कलु[2] तिणि[3] पलंत[4] जेहि लहु गुरु[5] अंत मुणेहु[6] ॥
१८७[7](क) ॥ दोहा ।*

तथाच प्रथममेकः षट्कलस्ततश्चतुष्कलत्रयं ततो लघ्वादिस्त्रिकलः यत्र प्रतिचरणं पतति, तत् प्लवंग[म]नामकं वृत्तमिति फलितार्थः । (E).

१८६ । जत्थेति ॥ यत्र प्रथमं षण्मात्रः पदे पदे दीयते; पंचमात्रश्चतुर्मात्रो गणोऽहिः क्रियते । अवधृत्यांते लघुर्गुरुरेकोऽपेक्ष्यते, मुग्धं प्लवंगमं छंदो विचक्षणमोह[शोभ]नं ॥ अहिः षट्कलः ॥ ८६ ॥ (G).

१८७ । तत्र विशेषमाह । पदे पदे आदौ गुरुकं पिङ्गलः प्रभणति सकलं निर्भ्रान्तः । प्लवङ्गमच्छन्दसि दृष्टा मात्राणामेकविंशतिः ॥ प्राथमिकः षट्कल आदिगुरुरिति । (C).

१८७ । [The gloss (E) is wanting here.—Ed.]

१८७ । पुनः स्पष्टमाह ॥ पअ इति ॥ पदे पदे आदौ गुरुः पिंगलो भणति सकलं निर्भ्रान्तिः । छंदः प्लवंगमं दृष्टं मात्राणामेकविंशत्या ॥ ८७ ॥ (G).

---

१८७ (क) । १ तिकल (A). २ छकल (A). ३ तिणि (A). ४ पलअंत (A). ५ गुरुआ (A). ६ मुणे (A), मुणेह (E). ७ ७८ (A). * N. B. This śloka is found in (A) and (E), but not in the others. The Commentary of (E) is silent also.—Ed.

जहा, णच्चइ चंचल विज्जुलिआ[१] सहि जाणए
मम्मह[२] खग्ग[३] किणीसइ[४] जलहर साणए।
*फुल्ल[५]कअंबअ[६] अंबर[७] डंबर[८] दीसए[९]
*पाउस पाउ[१०] घणाघण[११] सुमुहि बरीसए॥
१८८[१२]॥ प्लवंगम[१३]।

१८८। उदाहरति। नृत्यति चञ्चला विद्युल्लता सखि ज्ञायते, मन्मथेन खड्गः किं निश्यते[?] जलधरशाणके। फुल्लकदम्बस्याम्बरे डम्बरो दृश्यते प्रावृषं प्राप्य घनाघनः सुमुखि वर्षति॥ निश्यते[?] निशाहः[तः] क्रियते। (C).

१८८। अथ प्लवंगममुदाहरति, हे सहि—सखि, यत् चंचल विज्जुलिआ—चंचला विद्युत् णच्चइ—नृत्यति, एत[अतो] मम्मह—मन्मथः जलहर साणए—जलधरशाणके मेघस्वरूपशस्त्रोल्लेखने यंत्रे इत्यर्थः खग्ग किणीसइ—ख[ख]ड्गं तीक्ष्णयति इति जाणए—ज्ञायते। फुल्ल कदंबअ—पुष्पिताः कदम्बकाः, अंबराडंबरः दृश्यते, घनाघनः बरीसए—वर्षति, अतः हे सुमुखि पाउस पाउ—प्रावृट् प्राप्ता न तु कांत इति भावः॥ (E).

१८८। १ विज्जुलआ (B & C), विज्जुलिये (E). २ वम्मह (A & F), कम्मच (D). ३ खग्गा (E). ४ किलीसइ (A), कणीसइ (F). * 3rd and 4th quadrants transposed in (E). ५ फुल्ल (A, D & E). ६ कदंब (A), कअम्बअ (D), कदम्बअ (E), कलंबअ (F). ७ & ८ अम्बअ डम्बअ (C). ९ दीसइ (E). १० समअ (A). ११ घणघण (E). १२ ७९ (A), ८८ (F). १३ प्लवंगम (A), प्रवंगम (B).

अथ लीलावतीच्छंदः । (D).

गुरु[1] लहु[2] णहि[3] णिम्म[4] णिम्म णहि

अक्खर पलइ पओहर बिसम समं

जहि[5] कहुँ णहि णिम्मह[6] तरल तुरअ[7] जिमि[8]

पसर[9] बिदिस[10] दिस[11] अगम गमं[12] ।

गण पंच[13] चउक्कल[14] पलइ णिरंतर

अंत सगण धुअ[15] कंत[16] गणं[17]

परिचलइ[18] सुपरि[19] परि[20] लील[21] लिलावइ[22]

कल[23] बत्तीस बिसामकरं[24] ॥ १८९[25] ।

---

१८८ । यथा ॥ णच्चेति ॥ नृत्यति चंचला विद्युत् सखि जानासि मन्मथस्य खड्गकणिशमियं, जलधरः शाणः । पुष्पितः कलंवः, अंबरे आडंबरो दृश्यते, प्रावृट् प्राप्ता, घनाघनः सुमुखि वर्षति ॥ ८८ ॥ इति प्लवंगमम् ॥ (G).

---

१८९ । १ & २ Transposed in (A). ३ & ४ Dropt in (A). ५ जङ्ग (C). ६ णिम्म (A, D, E & F). ७ तुरआ (A), तुरग (F). ८ जिम (B, C & E). ९ पसइ (B), पसरइ (C). १० दिस (A & B), दिसि (E). ११ दिसि (B & E). १२ जमं (E). १३ मत्त (F). १४ मउक्कल (B), छउपअ (E), चउकल (F). १५ वुह (F). १६ कण (A & D). १७ गुणं (F). १८ चउ चरण (C). १९ धरि (C). २० Non est (F). २१ णील (A, B & C). २२ णिलावइ (A, B & C), लीलावइ (F). २३ परि (A), पअ (B & C). २४ विसामकरे (E), वीसामकरं (F). २५ ८० (A), ८९ (F).

१८९। अथ लीलावती। गुरुलघ्वोर्नहि नियमः नियमो नहि अक्षरस्य पतति पयोधरो विषमसमयोः, यत्र क्वापि नहि नियमः तरलतुरगो यथा प्रसरति दिशि विदिशि अगम्ये गम्ये। गणाः पञ्च चतुष्कलाः पतन्ति निरन्तरम् अन्ते सगणो ध्रुवः कान्तो गम्यते, चत्वारि चरणानि धृत्वा परिलील-लीलावती-पदं द्वात्रिंशद्विरामकरं॥ कियन्तो गुरवः कियन्तो लघव इति नियमो नास्ति, कियदक्षरः पाद इति नियमो नास्ति, पयोधरो जगणो विषमे समे च, दृष्टान्तो यथा चपलोऽश्वः दिग्विदिक्प्रसरणे यत्र क्वापि न नियममङ्गीकरोति तथैवेत्यर्थः। चतुष्कलगणाः पञ्चविधा द्विगुर्व्वादयस्ते यथेच्छं पुनः पुनर्निवेशनीयाः, न तु पञ्चसंख्यका इत्यर्थः, द्वात्रिंशत्कले पादे चतुष्कलगणान्तलस्यावश्यकत्वात्, अयञ्च विशेषः, सप्तगणा यथेच्छं चतुष्कला देयाः, अन्ते सगणो ध्रुवो नियतः, कान्तः कमनीय इति। केचित् कर्णगणं पठित्वा सगणकर्णगणयोरन्ते विकल्पमाहुः। परिलीलेति परितः सर्व्वतो लीला यस्य। परे तु चतुष्कलगणपञ्चकलानन्तरं मात्राष्टकनियममित्याहुः, साम्प्रदायिकास्त[त्व]नुमन्यन्ते पदस्य द्वात्रिंशन्मात्रासु विरामोऽवसानं द्वात्रिंशन्मात्रकं पदमित्यर्थः। (C).

१८९। अथ लीलावतीनामकं वृत्तं लक्षयति गुरु लहु इति। जहि—यत्र गुरु लहु णहि णिम—गुरोर्लघोर्नास्ति नियमः, एतावंतो गुरव एतावंतो लघवश्च यत्र पतंतीति नियमो नास्तीत्यर्थः; अक्खर—अक्षरेऽपि णिम णहि—नियमो नास्ति, एतावंत्यक्षराणि पतंतीत्यपि यत्र न नियम इत्यर्थः, विसम समं—

विषमे [समे] पयोधरः जगणः पलइ—पतति इत्यपि कऊ णहि णिम—कुत्रापि चरणे नास्ति नियमः, किन्तु गण पंच चउकल—गणाः पंच चतुष्कलाः चतुष्कलभेदात्मकाः पंचगणा इत्यर्थः, प्रस्तार-क्रियया चतुष्कलस्य पंच भेदाः ये भवंति ते सर्वेऽपि व्यस्ताः समस्ताः विपर्यस्ता इति हृदयं । ते कियंतः पतंति इत्यत्र हेतुः कल बत्तीसेति, तथा च द्वात्रिंशन्मात्राः पूरका अष्टौ चतुष्कलभेदा इति भावः, निरंतरमितरगणांतराव्यवहितमित्यर्थः पलइ—पतंति, अंत—अंते पादांते इत्यर्थः, कंत गण कांतगणः सगण-इत्यर्थः, ध्रुवं निश्चितं पत[ती]ति पूर्वेणान्वयः, यत्र छंदः जेम—यथा तरल तुरअ—तरलतुरगः, तथा विदिशि दिशि अगम गमं—अगम्ये गम्ये पसरइ—प्रसरति, सुपरि—पादे [?] परि-लील—परितः लीलया, परिचलइ—परिचलति, सा लीला-वती तत् लीलावतीनामकं वृत्तं, कल बत्तीस—कलासु द्वात्रिं-शत्सु विसाम करे—विश्रामं करोति इति योजना ॥ यत्र सप्त-चतुष्कलानंतरं सगणः प्रतिचरणं पतति, सा लीलावतीति फलि-तार्थः । (E).

१८९ । गुरु इति ॥ गुरोर्लघोर्नास्ति नियमो नियमो नास्त्य-क्षरे पतति पयोधरो विषमसमयोः, यत्र कोऽपि नास्ति नियमः तरलतुरंगो यथा प्रसरति विदिक्षु दिक्षु अगम्यगम्ययोः । गणाः सप्त चतुष्कलाः पतंति निरंतरमंते सगणो बुधकांतगुणः, परि-चलति सुपरिलीलया लीलावती कला द्वात्रिंशद्विश्रामकरा ॥ पयोधरो जगणः ॥ ८९ ॥ (G).

जहा, घर[१] लग्गइ[२] अग्गि[३] जलइ[४] धह[५] धह[५]
कइ[६] दिग मग[७] णह पह अणलभरे
सब दीस[८] पसरि[९] पाइक्क लुलइ[१०] धणि[११]
थणहर[१२] जहण[१३] दिआव[१४] करे ।
भअ[१५] लुक्किअ[१६] थक्किअ[१७] बइरि[१८]
तरुणि जण[१९] भइरव[२०] भेरिअ[२१] सद्द[२२] पले
महि लोट्टइ[२३] पिट्टइ रिउ सिर[२४]
टुट्टइ जक्खण[२५] बीर हमीर[२६] चले ॥
१९०[२७] ॥ लीलावती । (A, B, C & F).

१९० । उदाहरति । गृहे लगिला अग्निर्ज्वलति धगधगिति कृत्वा दिङ्मार्गनभःपथा अनलैर्भृताः सर्व्वदिक्षु पदातिकाः प्रसृत्य लुठन्ति धनं, स्तनभारजघने दत्त्वा करं । भयेन शुष्यति गुप्ता तिष्ठति

१९० । १ नव (E), घव (F). २ लग्गिअ (B), लइ (C), अरिघर (E), रिउघर (F). ३ लगि (E). ४ लगइ (F). ५ दह दिह (A), दह दह (B & C). ६ कहि (B). ७ दिगम (B), राहि पह दिगमग (D), णहि पह दिगम (F). ८ दिस (A), देस (D & F). ९ पसरिअ (A). १० लुरइ (D & E). ११ धण (A, B & C). १२ पुणथण (A), थण (B). १३ जुव्वण (A), जघण (B, C & E). १४ दषाव (A), देखाव (B & C), दुहाव (F). १५ भए (B & C). १६ & १७ Transposed in (A, B & C). १७ चक्किअ (A), त्थक्किअ (B). १८ बहीर (B), वैरि (D, E & F). १९ गण (D & F), चण (E). २० भरवह (D), भेरव (E), भैरव (F). २१ भेरीअ (A, B & C), रिअ (D). २२ सक्कु (C). २३ लुट्टइ (D & F). २४ दिह (F). २५ जंखण (A), जख (B, C & E). २६ हम्बीर (B & C). २७ ८१ (A), ९० (F).

वैरितरुणी यदा भैरवो भैरवीवर:[भेरीरव:] पतति मह्यां लुठति पीड्यते रिपुशिरस्त्रुट्यति यदा वीरहम्मीरश्चलति॥ ग्टह-द्रत्यादौ शत्रूणामित्यर्थ:। (C).

१९०। अथ लीलावतीमुदाहरति, सब अरि घरेति। जखण बीर हमीर चले—यस्मिन् क्षणे वीरहम्मीरश्चलित:, तस्मिन् क्षणे इति शेष: सर्व[ब] अरि घर—सर्वारिगृहेषु अगि—अग्नि: धह धहेत्यज[नु]करणं [कद—] कृत्वा जलद—ज्वलति, दिग मग णह पह—दिङ्मार्ग: नभ:पथ: अणलभरे—अनलभृत: अग्निना परिपूर्ण इत्यर्थ: जात इति शेष:, थण थण हर जघण दिश्राव करे—धनिस्तनभरजघनदत्तकर: धनिनीनाम् अरिविबङ्कानां स्तनभरे जघने च दत्त: करो येन स तादृश इत्यर्थ: पाइक्क—पदाति: सब दीस पसरि—सर्वदिक्षु प्रसृत्य लुरइ—चलति, भेरव भेरिश्र सद्द पले—भैरवभेरीशब्द: पतति, भग्र लुक्किश्र थक्किश्र—भयनिलीनस्थगित: बेरि तरुणि अण—वैरितरुणी-जन: महि लुट्टइ—मह्यां विचेष्टते, पिट्टइ—ताड़यति खेद-यतीति भाव:, रिउ सिर टुट्टिश्र—रिपुशिरांसि त्रुटति॥ (E).

१९०। सबेति॥ सर्वरिपुगृहेषु अग्निर्लगति धगधगशब्दं कृत्वा, नास्ति पंथा दिग्मार्गेषु अनलो भृत:, सर्व्वदेशे प्रसरंति पदातय:, लुठंतीनां रिपुगृहिणीनां स्तनभरो जघनं द्विधा करोति॥ भयेन निलीन: स्थगितो वैरितरुणीगणो भैरवे भेर्य्या: शब्दे पतिते मह्यां लुटति पिट्टयति देहं शिरस्त्रुटति यत् क्षणे वीरो हंमीरश्चलित:॥ ९०॥ इति लीलावती॥ (G).

अथ हरिगीताच्छंदः । (D).

गण चारि पंच कल[१] ठविज्जसु बीअ[२] ठामहि[३] छ[च्छ]क्कलो
पअ पअह[४] अंतहि[५] गुरु करिज्जसु बखरोण[६] सुसब्बलो[७] ।
दह[८] चारि[९] दुक्कइ[१०] दह दु माणहु[११] मत्त ठाइस[१२] पाअओ[१३]
हरिगीअ छंद पसिद्ध जाणहु[१४] पिंगलेण पआसिओ[१५] ॥
१९१[१६] ॥

---

१९१ । अथ हरिगीताच्छन्दः । गणाश्चत्वारः पञ्चकलाः स्थाप्यन्तां द्वितीये स्थाने षट्कलः, पदे पदे अन्ते गुरुः क्रियतां वर्णनेन सुशबलं । दश स्थापयित्वा तत्प्रतिदेश द्वौ मानय मात्रा-अष्टाविंशतिर्मानय पिङ्गलेन व्याख्यातम् ॥ अयमर्थः — चत्वारः पञ्चकलाः कर्त्तव्याः, तत्र प्रथमगणानन्तरं षट्कलः, तदनन्तरं त्रयः पञ्चकलास्ततश्चैको गुरुरेवं क्रमेण प्रतिपादमष्टाविंशतिर्मात्राः भवन्ति, वर्णनेन समीचीनवर्णनेन सुशबलं मिश्रितं, [यद्वा] वर्णनेन महाप्राणाचरेण सुसबलं बलवदित्यर्थः, दशाङ्कः स्थापनीयः दशाङ्केन च पूरणीयमिति तत्प्रतिशब्दार्थः, तेन तस्य गुणनं

---

१९१ । १ कल (A, C & E), कलु (B), कलं (D). २ विश्च (E). ३ ठामइ (B & C). ४ ह non est (B & C). ५ अंतह (A), अन्तेह (D). ६ Dropt in (E). ७ सुसद्दलो (A), चसब्बलो (F). ८ देह (C). ९ ठाइहि (C). १० तक्कइ (A), करइ (B & C), दुइ (E). ११ दुमाणह (B & C), उमाणड (D), दुइ पमाणड (E). १२ अट्ठाईस (A, B, C & E). १३ पाओ (A), पओ (B), पअओ (C), ओ (E). १४ माणड (A, B & C), जाणह (D). १५ वआणिओ (A, B & C), पआसि (E). १६ ८२ (A), ९१ (F).

हृतिरिति ज्योतिःशास्त्रं। इत्यच्च शताङ्के निष्पन्ने दश द्वावित्यनेन द्वादशाधिकं शतमात्रं छन्द इत्यर्थः। इदमेव कृतमि[द]त्युक्तम्, अट्ठाइसेति, पादस्याष्टादश[विंशति]मात्रत्वादिदं सिद्धमित्यर्थः। षट्-दश[?]दश द्वादश-द्वावि[?]त्येषां योजनेऽष्टाविंशतिसंख्या-भवन्ति। (C).

१९१। अथ हरिगीतनामकं वृत्तं लक्षयति, गण चारि[रो]ति। पञ्च पञ्चहि[ह]—पादे पादे प्रतिचरणमित्यर्थः प्रथमं गण चारि—गणांश्चतुरः पंचकलान् ठविज्जसु—स्थापयत, बीअ ठामहि—द्वितीये स्थाने प्रथमपंचकलगणानंतरमिति यावत् छक्कलो—षट्कलान् स्थापयतेति पूर्वेणान्वयः, तथाच कर्त्तव्येषु चतुः-पंचकलेषु प्रथमपंचकलानंतरमेकं षट्कलं संस्थाप्य अनंतरमुर्वरितास्त्रयः पंचकला गणाः कार्या इति पर्यवसितोऽर्थः। अंतहि—अंते पादांते इत्यर्थः गुरु करिज्जसु—गुरुमेकं कुरुत, दह चारि दुइ दह दुइ—दश चतस्रः द्वे दश द्वे एवं मत्त अट्ठाईसओ—मात्रा अष्टाविंशतिः पमाणहु—प्रमाणयत पिंगलेण पआसिओ—पिंगलेन प्रकाशितं, वण्णेण सुसव्वलो—वर्णेन सुसबलं सुतरां सबलं समीचीनमित्यर्थः पसिद्ध—प्रसिद्धं हरिगीअ छंद—हरिगीतं छंदः जाणहु—जानीत॥ प्रथममेकः पंचकलस्तत एकः षट्कलस्ततस्त्रयः पंचकलास्तत एको गुरुः यत्र पतंति, तदष्टाविंशतिमात्राकचरणं हरिगीतनामकं वृत्तमिति फलितार्थः। (E).

१९१। गणेति॥ गणाश्चत्वारः पंचकलाः स्थाप्यंतां द्वितीये

बीए[1] छक्कलु[2] ठावि[3] कहु[4] चारि पंचकल[5] देहु ।
बारह उत्तर मत्त[6] सउ माणसु[7] अंत ठवेहु ॥ १९२[8] ॥
दोहा ।

स्थाने षट्कलः पदे पदे अंते गुरुः क्रियतां वर्णनेन च सबलं । पुनः प्रकारेणैतदाह ॥ दहेति ॥ दश १० चत्वारि ४ द्वि २ कलः दश १० द्वौ २ मानय मात्रा अष्टाविंशतिः पादे ॥ हरिगीतं छंदः प्रसिद्धं जानीत पिंगलेन प्रकाशितम् ॥ ९१ ॥ (G).

१९२ । इदमेव स्पष्टयति । द्वितीये षट्कलं स्थापयित्वा चतुरः पञ्चकलान् देहि । द्वादशोत्तरमात्राशतकं मानसमन्ते कुरु ॥ शतकमित्य[न]न्तरं छन्दो भवतीति पूरणीयं, मानसशब्दो गुरुवाची । (C).

१९२ । अथैनमेवार्थं दोहावृत्तेनाह, बीए छक्कलु इति । अत्र हरिगीतच्छंदसीत्यध्याहरणीयं, चारि पंचकल — चतुरः पंचकलान् देहु — दत्त । बीए — द्वितीये स्थाने प्रथमपंचकलानंतरमित्यर्थः छक्कलु एक्क कहु — षट्कलमेकं कथयत, अंते — पादांते माणस — मानसमेकं गुरुमित्यर्थः ठवेहु — स्थापयत, बारह उत्तर — द्वादशोत्तराः मत्त सउ — मात्राः शतं चतुश्चरणसमुदिता जानीतेति शेषः ॥ (E).

---

१९२ । १ विश ठाइ (F). २ छक्कल (A). ३ एक्क (E), एक (F). ४ कलु (C). ५ पंचकलु (B), पंचकलु (F). ६ Dropt in (C). ७ माणस (E). ८ ८१ (A), ९२ (F).

जहा, गअ गअहि ढुक्किअ तरणि[1]

लुक्किअ तुरअ तुरअहि[2] जुज्झिआ[3]

रह रहहि मीलिअ[4] धरणि पीलिअ

अप्पपर[5] णहि बुज्झिआ[6] ।

बल मिलिअ[7] आइअ[8] पत्ति जाइउ[9]

कंप[10] गिरिवर[11] सीहरा[12]

उच्छलइ[13] साअर दीण[14] काअर

वइर[15] वड्ढिअ[16] दीहरा[17] ॥ १९३[18] ॥

हरिगीता[19] । (A, B & F).

---

१९२ । द्वितीये स्थाने षट्कलमेकं कथय, चतुरः पंचकलान् देहि । द्वादशोत्तरं मात्राणां शतं मानसमंते स्थापय ॥ मानसं गुरुः ॥ ९२ ॥ (G).

१९३ । उदाहरति । गजा गजैर्ढौकितास्तरणिर्लुप्तः, तुरगा-

---

१९३ । १ तरणि (B), dropt in (C). २ तुरहि (B). ३ जुज्झिअ (B & C), जुज्झि (D & F). ४ भौलिअ (B & F), dropt in (C). ५ पिअ अपर (A & C), पेअ पर (B). ६ बुज्झि (A & D). ७ मिलइ (A), मिअ (B & C), मिलिअ (F). ८ पत्ति उ (B & C), आएउ (D, E & F) (here ए short). ९ जाइअ (A), धाएउ (D & E), धावउ (F). १० कम्पि (B & C). ११ Non est (B), गिरवर (D). १२ सिंहरा (F). १३ उउत्थलइ (A); उच्छलइ (B), उच्चरइ (D), उच्छलिअ (E). १४ दिअ (D & F). १५ वइरि (C), वैर (D & E), वैरि (F). १६ वड्डिअ (B), वड्ढिअ (C), वड्डिअ (F). १७ दीहरो (E). १८ ८४ (A), ९३ (F). १९ हरिगीआ (C).

LIBRARY

स्तुरायुक्तै रथैः पीडिता धरणौ पतिताः, निजाः परे नहि बुद्धाः। बलेन भीताः आगताः पत्तयो धाविताः कम्पते गिरिवरशिखरम्, उच्छलितः सागरः दीनाः कातरा वैरं वर्द्धितं दीर्घम् ॥ ढौकिताः संलग्नास्तरणिर्लुप्तः समरभूमिसमुत्थितधूलिभिरित्यर्थः, वैरं वैरिणां कर्म्म युद्धमित्यर्थः। वैरीति पाठे वैरिणो वर्द्धिता इत्यर्थः। तथा च दीर्घं चिरकालं भोजनादिना वर्द्धिता ये वैरिणस्तेऽपि दीनाः कातरा वा इति लभ्यते। (C).

१९२। अथ हरिगीतमुदाहरति गअ गअहीति। गजा गजैः सह ढुक्किअ—ढौकिता युद्धार्थं मिलिता इत्यर्थः, तुरअ तुरअहि—तुरगास्तुरगैः सह जुज्झिआ—अयुध्यन्[न्त], रह रहहि—रथा रथैः सह मीलिअ—संयुक्ताः युद्धाय मिलिता इत्यर्थः, धरणि पीलिअ—धरणिः पीडिता, तरणि—तरणिः सूर्यः लुक्किअ—आच्छन्नः हयगजपादोद्भूतधूलिभिरिति भावः, अतएव अप्प पर—आत्मीयाः एते परकीया इति न वि[वे]कआसीदित्यर्थः, बल—बलानि सैन्यानि मिलिअ—एकीभूय आएउ—आगतानि, पत्ति—पत्तव[यः] धाएउ—धाविताः, गिरिवर सीहरो—गिरिवरशिखराणि कंप—कंपितानि, साअर—सागराः उच्छलिअ—उच्छलिताः, काअर—कातराः रणभीरवो वा इत्यर्थः दीण—दीना जाता इति शेषः, दैन्यमाश्रिता इत्यर्थः, दीहरा—दीर्घं वैर वड्डिअ—वैरं वर्द्धितं, कर्णे युध्यमाने सती[ति] शेषः ॥ (E).

१९३। यथा ॥ गअ इति ॥ कश्चिद्युद्धं वर्णयति। गजा गजै-

अथ त्रिभंगीच्छंदः । (D).

पढमं दह रहणं[1] अट्ठवि[2] रहणं
पुणु बसु[3] रहणं रसरहणं
अंते गुरु सोहइ महिअल[4] मोहइ
सिद्धि[5] सरो[6] हइ बरतरुणं ।
जइ पलइ[7] पओहर[8] किमइ[9] मणोहर[10]
हणइ[11] कलेवर[12] तासु कई
तिभंगी[13] छंदं सुक्खा[14] णंदं
भणइ[15] फणिंदो[16] बिमलमई ॥ १९४[17] ॥

मिलितास्तरणिराच्छादितस्तुरगास्तुरगैर्युध्यंते, रथा रथैर्मिलिताः धरणिः पीडिता आत्मीयः परो न बुध्यते । बलान्येकीभूयागतानि पत्तयो धावंति कंपंते गिरिवरशिखराणि, उच्छलति सागरो दीनाः कातरा वैरिणो वृद्धा दिवसाः ॥ इति हरिगीतं छंदः ॥ (G).

---

१९४ । १ रणं (B). २ चइह (A & E), चइहि (B), dropt in (C), र too many in (D). ३ Dropt in (B), रसु हरणं (D). ४ तिहुअण (D), तिहुवण (F). ५ सिद्ध (D, E & F). ६ सरा (E & F). ७ लइ (B). ८ पओहर (B & C). ९ किमह (A). १० मणोहर (B & C), णोहर (E). ११ हरइ (D), करइ (F). १२ कलेवर (B & C). १३ तिभङ्गी (B & C), तिभंगी (F). १४ जणिच्चा (D), जणच्चा (F). १५ भण (B). १६ भणीन्दं (B). १७ ८५ (A), ९४ (F).

१९४। अथ त्रिभङ्गी। प्रथमं दशसु रहणं, अष्टस्वपि रहणं, पुनर्व्वसुरहणं रसेषु रहणम् अंते गुरुः शोभते, महि[ही]तलं मोहयति सिद्धः सरो भवति वरतर[रु]णं। यदि पतति पयोधरः किमिदं मनोहरं हन्ति कलेवरं तस्य कवेः त्रिभङ्गीच्छन्दः सुखानन्दं भणति फणीन्द्रो विमलमतिः॥ दशसु मात्रासु रहणं विश्रामः, एवमग्रेऽपि, इत्यञ्च द्वात्रिंशन्मात्रः पादो भवति। अन्तिमो गुरुरपि तदन्तःपाती, सिद्धेर्द्धनादिसिद्धेरिव[वर]तरुणं सरो भवति छन्दसो विशेषणम्। अत्र जगणो न देय इति। सुखेन दुःखासंभेदेनानन्दयति इति सुखानन्दम्। अत्र सर्व्वेऽपि चतुष्कलाः कार्य्या इति सम्प्रदायः। (C).

१९४। अथ त्रिभंगीनामकं वृत्तं लक्षयति पढममिति। पढमं —प्रथममादौ दह—दशसु मात्रास्विति शेषः, अग्रेऽपि यथायोग्यं योजनीयं, रहणं—विश्रामः, ततः अट्ठह—अष्टसु मात्रास्वित्यर्थः विश्रामः, ततः रसरहणं—रसेषु षट्सु तथाच रससंख्योपलक्षितासु षट्सु मात्रासु इत्यर्थः रहणं—विश्रामः, एवं द्वात्रिंशन्मात्राः प्रतिचरणं पतंती[ति] शेषः, अंते—पदांते गुरुः सोहइ—शोभते, कर्त्तव्यासु द्वात्रिंशन्मात्रासु अंतिममात्राद्वयमेकगुरुस्वरूपं कार्यमित्यर्थः, तत् तिभ्भंगीछंदं—त्रिभंगीच्छंदः तिहुवण मोहइ—त्रिभुवनं मोहयति, महि अल इति पाठे महीतलमित्यर्थः, असौ सिद्धः वरतरुणं—तरुणवरः लोकस्येत्यर्थः सराहइ—श्लाघते। अत्र यदि पओहरु—पयोधरः मध्यगुरुर्जगण इत्यर्थः पलइ—पतति, तदा किमइ मणोहरु—किमपि मनो-

जहा, सिर किज्जिअ[1] गंगं गोरि अधंगं
हणिअ अणंगं पुर दहणं[2]
किअ फणिवइ[3] हारं तिहुअण[4] सारं
वंदिअ छारं रिउ महणं[5]।
सुरसेविअ चरणं मुणिगण[6] सरणं
भवभअ[7] हरणं सूलधरं[8]
साणंदिअ[9] बअणं सुंदर णअणं[10]
गिरिवर सअणं[11] णमह हरं॥
१९५[12]॥ त्रिभंगी। (A, B, C & F).

हरं न भवतीति शेषः, किंतु येन तच्छंदसा कवित्वं क्रियते तासु कई—तस्य कवेः कलेवरं शरीरं हणइ—हंति, इति विमलमई—विमलमतिः, जणिआणंदं—जनितानंदः, क्वचित्सुक्खाणंदं इति पाठः सुखी आनंदीत्यर्थः, फणिंदो—फणींद्रः पिंगलः भणइ—भणति। अत्र चतुर्मात्रिका अष्टौ गणाः प्रतिचरणं देयाः, तेष्वेवांतिमो गणो गुर्वंतः कर्त्तव्यः, पूर्वोक्तमात्रासु विश्रामः कर्त्तव्य इति फलितार्थः। (E).

१९५। १ किज्जइ (C), किज्जिअ (D). २ हरणं (B). ३ दनिवनि (B), फणिवइ (D). ४ तिहुअण (E). ५ दहण (B & C). ६ सुणिअण (D & F). ७ भअ भअ (A). ८ सूलहरं (B & C), सलधरं (E). ९ आणंदिअ (F). १० णअ (B). ११ सरणं (A & B), dropt in (C). १२ ८६ (A), ९५ (F).

१९४। दुर्मिलामाह [त्रिभंगीमाह] ॥ पढमं इति ॥ प्रथमं दशविरतिरष्टस्वपि विरतिः पुनर्वसुविरतिः, अंते गुरुः शोभते, त्रिभुवनं मोहयति सिद्धाः श्लाघयंति वरतरुणम्। यदि पतति पयोधरः किमपि मनोहरो हरति कलेवरं तसु—[तस्य] कवेः, त्रिभंगीच्छंदो जनितानंदं भणति फणींद्रो विमलमतिः ॥ वसवोऽष्टौ, रसाः षट्, यदीति जगणः कविनाशकः, तस्मान्न कार्य-मिति भावः ॥ ९४ ॥ (G).

१९५। उदाहरति। शिरःकृत[गंगं] गौर्य्यर्द्धाङ्गं हतानङ्गं पुरदहनं कृतफणिपतिहारं त्रिभुवनसारं वन्दितभस्मानं रिपु-दहनं। सुरसेवितचरणं मुनिगणशरणं भवभयहरणं शूलधरं सान-न्दितवदनं सुन्दरनयनं गिरिवरशयनं नमत हरम् ॥ वंदित हारं तिलकीकृतभस्मानमित्यर्थः। (C).

१९५। अथ त्रिभंगीमुदाहरति सिर किज्जिअ इति। शिरः-कृतगंगं गौर्यर्द्धांगं हतानंगं त्रि[?]पुर[द]हनं कृतफणिपतिहारं त्रिभु-वनसारं वंदितभस्मानं रिपुप्र[?]मथनं। सुरसेवितचरणं मुनिगणशरणं भवभयहरं त्रिभु[शू]लधरं, सानंदितवदनं सुंदरनयनं गिरिवर-शयनं नमत हरम् ॥ (E).

१९५। यथा ॥ सिरेति। शिरःकृतगंगं गौर्यर्द्धांगं हतानंगं पुरदहनं कृतफणिपतिहारं त्रिभुवनसारं वंदितभस्मानं रिपु-मथनं। सुरसेवितचरणं मुनिजनशरणं भवभयहरणं शूलधरम्, आनंदितवदनं सुंदरनयनं गिरिवरशयनं नमत हरम् ॥ ९५ ॥ इति त्रिभंगी ॥ (G).

अथ दुम्मिलाच्छंदः । (D).

तीस दुइ[1] मत्ते[2] एरिसं[3] जुत्ते[4]
बुहअण राअ[5] भणंति[6] णरा
विसम त्तिअ[7] ठामहि[8] एरिस[9] भाअहि[10]
पअ पअ दीसइ[11] कस घरा[12] ।
ता[13] दह[14] पढमं वे[15] अट्ठ ट्ठाअं[16]
तीअ[17] चउद्दह[17] किअ[18] णिलओ
जो एरिसि[19] छंदे तिहुअण वंदे
सो जण[20] बुज्झउ[21] दुम्मिलओ ॥ १९९[22] ॥

---

१९९ । द्वात्रिंशन्मात्राभिरेतादृशीभिर्युक्ता बुधजनराज चरन्ति नराः, विश्रामस्त्रिषु स्थानेषु एतादृशभागः पदे पदे दृश्यते कर्णग्टहं । तत् दशसु रहणं प्रथममेव, अष्टसु द्वितीय एव, चतुर्दशसु

---

१९९ । १ दु (A, D & E). २ मत्तह (D), मत्तहि (F). ३ एरिसि (A, C & F), एरसि (B), परिसं (D & E). ४ जुत्तह (D), जुत्तहि (F). ५ राउ (A, B & C). ६ चवंति (A), बलन्ति (B), चरन्ति (C), भणइ (F). ७ विसमं तिअ (E & F). ८ ठावहि (A), थाइ (B & C), ठाएहि (D), ठाअहि (E). ९ एरिसि (B & C), दिसि (F). १० भावहिँ (A), भाअइ (B & C), भाएहिँ (D), भाए (F). ११ दीसहिँ (D). १२ धरा (A, D & F). १३ जा (E). १४ दहवइ (C). १५ वे (A & B), व (C). १६ अट्ठ दीअ वे (A), dropt in (B), अट्ठ दीअ (C), अठ ठाअ तहँ (D & F). १७ Transposed in (B & C), चौद्दह तीअहिँ (D), चौद्दह तीअं (E), dropt in (F). १८ किए (A & C). १९ एरिस (A & E). २० जग (A), जइ (B & C). २१ बुज्झइ (A, B & C), बुज्झऊ (D). २२ ८० (A), ९९ (F).

तृतीये कृतनिलयः, यत्र एतादृशश्छन्दस्त्रिभुवनवन्द्यः[न्द्यं] स तत्] यदि बुध्यते दुर्म्मिलकं ॥ एतादृशीभिस्त्रिभङ्गुरुलचणयुक्ताभिस्तेन जगणव्युदासः। बुधजनराजेति सम्बोधनं। चरन्ति वदन्ति, एतादृशभागैर्व्वच्यमाणभागैः, कर्ण एव गृहं स्थानं यस्य, तेन कुण्डलं लभ्यते, तेन गुरुरायाति, तेन चान्ते गुरुरिति फलितार्थः। गुरुर्गणान्तर्गत इति बोध्यं, विश्रामस्थानं दर्शयति तदिति, दशसु मात्रासु, एवमग्रेऽपि कृतविश्रामः। (C).

१९६। अथ दुर्म्मिलां लचयति, तीस दुइ मत्त इति। हे नराः एतत् तीस दुइ मत्ते—द्वात्रिंशन्मात्राभिः परिसंजुत्ते—परिसंयुक्ते यत्र च एरिस भाअहि—एतादृशभागैः एतादृशैः अनुपदमे[व] वच्यमाणैः भागैः कलांशैरित्यर्थः, तिअ ठामहि—त्रिषु स्थानेषु बिसमं—विश्रामः दीसइ—दृश्यते, यत्र च पअ पअ—पादे पादे कस धरा—कर्णगृहं कर्णो द्विगुरुको गणस्तस्य गृहं स्थापनमित्यर्थः, दृश्यते इति पूर्व्वेणैवान्वयः। कुत्र स्थानत्रये विश्रामो दृश्यते इत्यत आह पढममिति। यत्र च पढमं—प्रथमं दह—दशसु मात्रास्वित्यर्थः णिलओ—निलयः विश्रामः इति यावत् किअ—[कृ]त इदं चाग्रेऽपि योज्यं, बे—द्वितीयः अट्ट ठाअं—अष्टमस्थाने अष्टसु मात्रास्वित्यर्थः निलयः कृत इति पूर्व्वानुषंगः, तीअं—तृतीयः चउदह—चतुर्दशसु मात्रास्वित्यर्थः निलयः कृतः, जो एरिसं छंदे—यत् एतादृशं छंदस्त्रिभुवनवंद्यं तत् न जनाः जा[नी]त दुर्म्मिलकम् इति बुधजनराजः पिंगलः भणति—भणति ॥ (E).

दह[1] बसु चउदह[2] बिरइ करु बिसम कस्रगण देहु[3]।
अंतर बिप्प पइक्क गण[4] दुम्मिल छंद कहेहु[5] ॥ १९७[6] ॥
दोहा।*

१९६। [दुर्मिलामाह] तीसेति॥ त्रिंशद्विद्वाभ्यां परिसंयुक्तं बुधजनराजो भणति नराः, विश्रामस्त्रिषु स्थानेषु एतादृशं भाति पदे पदे दृश्यते कर्णधरः। तत् दशसु प्रथमो द्वितीयोऽष्टमे स्थाने तथा तृतीयः कृतनिलये, यदेतादृशं छंदस्त्रिभुवनवंदितं तज्जनो बुध्यतु[तां] दुर्मिलां॥ द्वात्रिंशन्मात्रा[भि]रित्यर्थः, कर्णधरो द्विगुरुः, निलयेऽवसाने॥ ९६॥ (G).

१९७। अथैनमेवार्थं दोहावृत्तेन स्पष्टयति दहेति। दशसु बसु—अष्टसु चतुर्दशसु मात्रास्विति शेषः बिरइ करु—विरतिं कुरु बिसम—विषमे स्थाने कस्रगण देहु—कर्णगणं देहि। पद-मध्ये विषमे स्थाने यथाशक्यं द्विगुरुकं गणं देहीत्यर्थः। अंतर—मध्ये बिप्प पइक्क—विप्रं चतुर्लघुकं गणं पदातिं सामान्यचतुष्कलं भण दुर्मिलाच्छंदः कथय॥ अत्र प्रतिचरणं विषमस्थाने यथाशक्यं प्राचुर्येण कर्णो देयः समे चेत्तत्पतति तदा न बाधकमिति द्रष्टव्यम्। (E).

१९७। १ तह (F). २ चोदह (F). ३ देहा (D), देह (F). ४ मल (A), भण (D & E). ५ सुणेज्ज (A), कहेह (D & F). ६ ८८ (A), ९७ (F)

* This is not found in (B & C).—Ed.

जहा, जे[१] किज्जिअ धाला जिसु[२] णिबाला[३]
भोट्टंता[४] पिट्टंत[५] चले
भंजाबिअ[६] चीणा दप्पहि हीणा
लोहाबल[७] हाकंद पले ।
ओड्डा[८] उड्डाबिअ[९] कित्ती[१०] पाबिअ
मोलिअ[११] मालब[१२] राअ[१३] बले[१४]
तेलंगा भग्गिअ[१५] पुणबि[१६] ण लग्गिअ[१७]
कासीराआ[१८] जखण चले ॥
१९८[१९] ॥ दुम्मिला[२०] । (A).

---

१९७ । दोहेन[हया] प्रकारांतरमाह ॥ दहेति ॥ दशसु वसुषु चतुर्दशसु विरतिं कुरु, विश्रामे कर्णगणान् देहि । अंतरा विप्रं पदातिगणं दुर्मिलां छंदः कथय ॥ वसवोऽष्टौ, कर्णो द्विगुरुः, विप्रश्चतुर्लघुः, पदातिः मात्राचतुष्टयरूपः ॥ ९७ ॥ (G).

१९८ । उदाहरति । ये कृतधाटिका जितनेपाला भोटान्ताः

---

१९८ । १ जेइ (D), जइ (F). २ जिणु (A), जिणि (C). ३ णेपाला (A, B, C & E). ४ भोटंता (E & F). ५ पिट्ट (C). ६ भग्गाविअ (A), भग्गारिअ (D), जंभारिअ (F). ७ लोहावर (A). ८ ओड्डा (B), ओड्डुर (D). ९ ओड्डाविअ (A), ओड्डारइ (B). १० कीत्ती (B & C). ११ Dropt in (B & F). १२ माला (D), लउ (F). १३ राउ (C & F), रउ (D). १४ कुले (C & E). १५ भग्गा (A). १६ अवड्ड (A & B), वहरि (D), वड्डलि (E), वड्डलि (F). १७ लग्गा (A). १८ सुरवरराअ (B), कासीसरराअ (C), कासीसरराअ (D & F), कासीसरराआ (E). १९ ८९ (A), ९८ (F). २० दुम्मिलक (B & C), दुम्मिलग (F).

अथ हीरः । (D).

णाउ[1] पभण तिण्णि[2] छगण अंत करहि[3] जोहलं
हार[4] ठविअ जंपु[5] सुपिअ[6] विप्प गणहि सव्वलं ।
तिण्णि[7] धरहि[8] बेवि करहि[9] मत्त पअहि[10] लेक्खए
कोइ[11] जणइ[12] दप्प[13] भणइ हीर सुकइ[14] पेक्खए[15] ॥
१९९[16] ॥

पीड्यमानास्खलन्ति भग्नचीना दर्पहीनाः लौहवलेन[?] हाक्रन्दः । ओड्रान् ओञ्जरिला कीर्त्तिः प्राप्ता मोटितो मालवराजः तेलङ्गा भग्नाः पुनर्न लग्नाः काशीश्वरराजो यदा चलति ॥ कृतधाटिकाः कृतश्रेणीका ये नेपालास्ते जिता इत्यर्थः । (C).

१९८ । अथ दुर्मिलामुदाहरति जे किज्जिअ इति । येन कृता धाटी पाविअ कित्ती—प्राप्ता कीर्त्तिः स काशीश्वरराजः जखण—यस्मिन् क्षणे, जितः नेपालः भोटांताः स्वदेहं ताडयन्तःस्खलिताः, दर्पहीनाः चीनाः भग्नीकृताः लोहावलेहाक्रन्दुः पतितः । ओड्डावितः अंतरिक्षं प्रापितः ओड्डः, मोटितं मालवराजकुलं, तैलंगाः पलायिताः परावृत्य नागताः ॥ (E).

---

१९९ । १ णाअ (F). २ तिणि (A). ३ करि (A). ४ हाव (A). ५ जासु (A), जप्पु (B), जम्प (C), पुणवि (D), पुसवि (F). ६ सुविअ (C). ७ तिणु (B). ८ धरणि (A), धरह (B & C). ९ करह (B & C). १० पअह (B & C), अंत रगण (D & F). ११ कोण (A), कमण (D & E). १२ जणउ (E). ११ & १२ after सप्प भणइ (C). १३ सप्प (A, B & C). १४ सुकवि (F). १५ पेक्खण (A), ईक्खए (B & C), लेक्खए (E). १६ ९० (A), १०० (F).

१९८। यथा ॥ जईति ॥ यत् कृतधारा जिता नृपालाः भोटांताः पीड्यंत[ड्यमाना]श्चालिताः, भग्नाश्चीना दर्पेण हीना लोहावले हाक्रंदः पतितः। उत्कलदेश उड्डायितः कीर्त्तिः प्राप्ता मालवराजबले, तैलिंगा भग्ना वङ्कहणलग्नाः काशीश्वरराजो यत्चरणे चलितः ॥ ९८ ॥ इति दुर्मिला ॥ (G).

१९९। अथ हीरकच्छन्दः। नागः प्रभणति त्रीन् छगणान् अन्ते कुरु जोहलं हारं धृत्वा जल्प सुप्रियं विप्रगणेन प्रबलं। त्रयं धृत्वा द्वयं कुरु मात्राः पदे लिख्यन्तां, सर्पो भणति को जानाति हीरं सुकविर्दृश्यते ॥ छगणः षट्कलगणः, जोहलो मध्यलघुः पञ्चकलः। षट्कले विशेषमाह हारेत्यादिना, हारो गुरुः, सुप्रियो द्विलघुः, विप्रगणश्चतुर्लघुः आवश्यकः, हारसुप्रिययोर्वैकल्पिकमुपादानं, तथा चादिगुरुः सर्व्वलघुर्वा षट्कल इति पर्य्यवसानं, तदिदमुक्तं त्रयमित्यादिना। अयमर्थः—हारसुप्रियविप्राणामेवात्र प्रवेशः, तत्र च हारविप्र-सुप्रियविप्रयोर्यथेच्छमुपादानं, यद्वा त्रयं द्वयमित्यक्षरस्य वामगतिक्रमेण त्रयोविंशत्यङ्क आयातः, तथा च त्रयोविंशतिमात्राः पदे क्रियन्तामित्यर्थः। कीदृशो जनो गर्व्वेण वदति अभिभाव्यैवं वदति, स दृश्यते तादृशो दुर्म्मिलक [?] इत्यर्थः ॥ (C).

१९९। अथ हीरनामकवृत्तं लक्षयति, णाउ पभणेति। हे सुप्रिय शिष्य आदौ तिण्णि छगण—त्रीन् छगणान् षट्कल-गणानित्यर्थः जंपु—जल्प कथयेत्यर्थः, अंते—षट्कलत्रयांते जोहलं—योद्धारं गणमिति यावत् करहि—कुरुष्व, तिण्णि धरहि

हार सुपिअ भण[1] बिप्पगण तीए[2] भिसु[3] सरीर।
जोहल अंते संठवहु तेइस मत्तअ[4] हीर[5]॥ २००[6]॥ दोहा।

बेबि करहि—चीन् स्थापय द्वौ कुरुष्व, एवं पअहि—पादेषु मत्त—माचा: लेक्खए—लेखय, अंकानां वामतो गत्या चीन् द्वौ मिलित्वा चयोविंशतिर्माचा: प्रतिचरणं स्थापयेत्यर्थः। एत[?]-हार ठविअ विप्प ग[ण]हि सब्बलं—हारं गुरुं संस्थाप्य विप्रगणै-श्चतुर्लघुकगणैः सबलं प्रचुरं हीर—हीरं पेक्खए—प्रेचस्व, एवं तत् सुकविः दर्पण [भण]ति, एतत् कमण जणइ—कः जानाति न कोऽपीत्यर्थः, इति नागः प्रभणति॥ अत्र चीन् षट्कलान् देही-त्युक्त्या षट्कलस्य चयोदशापि भेदाः प्राप्ताः, तत्र द्वादशतम- [Vide p. 22—Ed.] एव भेदो वारचयं देशो[यो] नान्य इति ज्ञापयितुं हारं संस्थाप्य, विप्रगणैः सबलमिति छंदोविशेषणमिति द्रष्टव्यम्। उक्तविधषट्कलानंतरं च यत्र रगणः प्रतिचरणं पतति तत् हीरनामकं वृत्तमिति फलितार्थः। (E).

१९९। णाअ इति॥ नागो भणति चीन् षट्कलानंते कुरु जोहलं, जोहलो रगणः। षट्कलकरणे प्रकारमाह, हारेति॥ हारः स्थाप्यः पुनरपि भो सुप्रिय विप्रगणेन शबलः। द्वौ चीन् धारय कुरु, अंते रगणो लेख्यते, कोऽपि जानाति दर्पण भणति

२००। १ गण (A, B & C). २ तिच विध (E), तीहे (F). ३ भिण (A), मित्त (E). ४ मत्तह (D). ५ हीव (B & C), हिर (E), dropt in (F). ६ ९१ (A), १ (F).

जहा, धिक्क दलण[1] थोंग[2] दलण[3] तक्क[4] दलण[5] रिंगए[6]
णं ण णु कट[7] दिंग दुकट[8] रंग चल तुरंगए[9] ।
धूलि धवल हक्क सबल[10] पक्खि[11] पबल पत्तिए[12]
कम्म चलइ कुम्म ललइ भुम्मि[13] भरइ कित्तिए[14] ॥
२०१[15] ॥ हीर । (A, B & C).

हीरकं सुकविः प्रेचते ॥ हारो गुरुर्विप्रश्चतुर्लघुस्तेन प्रबलो मिश्रः, तेन गुरु-लघुचतुष्टयरूपः षट्कलः कार्य इत्यर्थः ॥ अंकानां वामतो गत्या त्रयोविंशतिर्मात्रा इत्यर्थः ॥ (G).

२०० । तदेव स्पष्टयति ॥ हारः सुप्रियो विप्रगणस्त्रिभिर्भिन्नं । जोहलमन्ते संस्थापय, त्रयोविंशतिमात्रकं हीरम् ॥ (C).

२०० । अथैनमेवार्थं दोहावृत्तेन प्रकटयति हारेति । हे सुप्रिय शिष्य पूर्वं हारं गुरुं ततः विप्पगण—विप्रगणं चतुर्लघुकं गणं भण कथय, एवं तिम्र विध—वारत्रयविधानेनेत्यर्थः भिण्ण सरीर—भिन्नशरीरं भिन्नम् अन्यच्छंदोभ्यो विलक्षणं शरीरं यस्य तदित्यर्थः। अंते पादांते जोहलं—रगणं संठवज्ञ—स्थापय, एवं तेइस मत्त—त्रयोविंशतिमात्राकं हीरं हीरनामकं वृत्तं भवतीति शेषः ॥ (E).

---

२०१ । १, ३ & ५ दरल (B & C). २ थोंग (D). ३ दरण (D & F). ४ भक्क (B & C). ५ तरण (D & F). ६ दिंगए (A), थोंगए (B & C), रिंगओ (E). ७ ण कट (A), णं ल द गढ (D), ति कट (E). ८ हिंकट (A), लिंकढ (B), ढकट (C), दुकढ (D), दिकट (E). ९ तुरंगओ (E). १० दिग्गा मबल (A), सक्क सबल (C), ऊक्क सबल (D). ११ दरखु (A), सेक्ख (B), देक्ख (C), वत्ति (D), पेक्खु (E). १२ परण पत्तिए (A). १३ भुवण (A), भुम्म (B & C). १४ कीत्तिए (C). १५ ९२ (A), २ (F).

अथ जलाहरण (D) [जलहरणम्] ।

पत्र[१] पढम पलइ जहिँ[२] सुणहि[३] कमल मुहि
दह बसु पुण बसु[४] बिरइ करे
सबपत्र मुणि दिअगण[५] दिअ बिरम[६] सगण
सिरि फणिवइ भण सुकइबरे[७] ।
दह तिगुण करहि[८] कल पुणवि[९] ठब[१०] जुअल
इम परि परि टबु[११] चउ चरणा
जइ पलइ[१२] कबहु[१३] गुरु कबहु[१४] ण परिहरु[१५]
बुहअण[१६] मणहरु[१७] जलहरणा[१८] ॥ २०२[१९] ॥

---

२०० । प्रकारांतरेणाह, हारेति ॥ हारं सुप्रियं भण विप्रगणं ततो ओहलमंते संस्थापय त्रयोदश[विंशति]मात्राः द्वि[?]-स्त्रिधा भिन्नशरीरः ॥ हारविप्रौ त्रिधा कार्यौ इत्यर्थः । ओहलो रगणः ॥ (G).

२०२। १ किअ (E). २ पढइ जइ (B), पलइ जइ (C), पअठइ कलअहि (D), पअठइ कलहि (F). ३ सुणइ (C), विअच (D), सुणहि (E), विकच (F). ४ रस (B), ण (D). ५ कोअ दिअवर (A), किअ दिअ दिअ (B), किअ दिअ गण (C). ६ पअल किअ (A), परहि दिअ (B), परइ क्रिअ (C), परहिअ (E). ७ सुकविबरे (B & C). ८ करह (B & C). ९ पुणुवि (C). १० ठवि (A), धर (D & F). ११ एम परि ठव (B, C & D), एम परि टवह (E), एम परि ठवउ (F), ए short here. १२ परइ (D). १३ कऊहि (B & C). १४ कहवि (A). १५ परिहर (D). १६ बुहिअण (A). १७ मणुहरु (D). १८ जणहरण (B, D & F). १९ ९३ (A), २ (F).

२०१ । उदाहरति । धिक्क दरलमित्यादिकमश्वस्य शीघ्रगतेरनुकरणं, दौड्गए [थोङ्गए]—धावति सलीलगतिविशेषाणामनुकरणं, रङ्गेण लीलया चरति तुरङ्गः । धूलिभिर्धवला हक्केन शब्दविशेषेण शबलाः प्रेङ्खन्ते प्रबलपदातयः, कर्णस्खलति कूर्म्मस्खलति भुवनं भ्रियते कीर्त्या ॥ (C).

२०१ । अथ हीरमुदाहरति धिक्क दलणेति । इदं चतुरंगगतिविशेषानुकरणं, तथाच धिक्क दलण थोंग दलणेत्यनुकृत्य रंग—रंगे संग्रामे चलंति, रिंगओ—खुरली कुर्वंतः, तुरंगाः । धूलिधवलाः सवशब्दाः प्रबलाः पत्तयः प्रेङ्खंते, यदा कर्णस्खलति तदा कूर्मः लल[य]ति भूमिर्भरति कीर्त्या ॥ (E).

२०१ । यथा ॥ धिक्केति ॥ धिक्केति घोटकगतिशब्दानुकरणं, रिंगंते[ति] नं नेत्यनुकरणं, रंगे चलंति तुरंगाः । धूल्या धवला हक्केन सबलाः पत्तिवत्प्रबलाः पदातयः, कर्ण्णे चलति कूर्मो लल[ये]ति भूमिर्भरति कीर्त्या ॥ २ ॥ इति हीरकम् ॥ (G).

२०२ । अथ जलधरच्छन्दः । पदे प्रथमे पतति यत्र शृणु कमलमुखि दश-वसु-रस-वसु-विरतिकरः, सर्व्वः कार्य्यः द्विजगणस्तत्परतः कृतसगणः, श्रीफणिपतिर्भणति सुकविवरः । त्रिगुणं दशाङ्कं कृत्वा कलाः पुनरपि स्थापय युगलं, एवं परं परिस्थापय चतुश्चरणान्, यदि पतति कदापि गुरुः कदापि न परिहर बुधजनमनोहरणं जलधरम् ॥ शृणु कमलमुखि यत्र सर्व्वो द्विजगणः प्रथमे पतति, कीदृशः, परतः कृतसगणः, किञ्च दश-वसु-रस-वसु-विरतिकरः ॥ यद्यत्र कदाचिद्गुरुः पतति तदा

न तं परिहर, स न दोषायेत्यर्थः। मात्रासंख्यामाह, दशानां त्रैगुण्ये त्रिंशद्भवति पुनरपि द्वयं देहि, एवं द्वात्रिंशन्मात्रा भवन्ति। एवं पद[रं] चतुश्चरणान् परिस्थापय इति सुकविः फणिपति-र्भणति। (C).

२०२। अथ जलहरणनामकं वृत्तं लक्षयति किअ पढमेति। जहि—यत्र सबपअ—सर्वपादेषु पढम—प्रथममादौ किअ—कृताः मुणि दिअगण—मुनिद्विजगणाः मुनयः सप्त तत्संख्याताः चतुर्लघुकगणा इत्यर्थः पलइ—पतंति, परहि—अनंतरं सप्तद्विज-गणोत्तरमिति यावत् दिअ सगण—देहि सगणं, एवं दह बसु पुणु रस—दशसु मात्रासु वसुषु अष्टसु मात्रासु पुनः रसेषु षट्सु मात्रासु इत्यर्थः पुनर्वसुषु इति शेषः, अन्यथा द्वात्रिंशन्मात्रा-नुपलब्धिः, बिरइ करे—बिरतिं कुरु। दह तिगुण—दश त्रिगु-णिताः त्रिंशदित्यर्थः कल—कलाः करहि—कुरुष्व, पुणबि—पुनरपि ठव जुअल—स्थापय युगलं कलाया इति शेषः, तथाच द्वात्रिंशन्मात्राः स्थापयेत्यर्थः। एम परि—एवं परि एवं परिपाट्या ठवउ चउ चरणा—स्थापय चतुश्चरणान्, अत्र च जइ—यदि पलइ कवउ गुरु—पतति कदापि गुरुः यदि सगणांतर्गतगुर्वति-रिक्तोऽपि गुरुः पतति, सगणाति[रि]क्तोऽपि गुर्वादिर्मध्यगुरुर्वा गणः पततीति यावत्, त[दा] कवउ ण परिहरु—कदाचिदपि मा परिहर, तदा तमपि दत्त्वा द्वात्रिंशन्मात्राः प्रतिचरणं देया-इत्यर्थः। एवं च द्विजगणषट्का[द्वस्या]दौ मध्ये अंते वा गुर्वादिं मध्यगुरुं वा एकं गणं दत्त्वा अंते च सगणं दत्त्वा द्वात्रिंशन्मात्राः

बत्तीस होइ मत्ता अंते सगणाइ[1] ठावेहि[2] ।
सब्ब लहू[3] जइ[4] गुरुआ एक्को वा वेवि पाएहि[5] ॥ २०३[6] ॥
गाहू ।

प्रतिचरणं देया इत्यर्थः । इतीदानीमुक्तं भवति, पूर्वं च सप्त-द्विजगणानंतरं सगणमिति लक्षणद्वयं बोध्यं । हे कमलमुखि वि[?] बुधजनमनोहरणं सुणहि — जानीहि इति श्रीफणिपतिः सुकवि-वरः भणति इति योजना । सप्तद्विजगणानंतरं सगणः यत्र प्रतिचरणं पतति, अथवा षट् द्विजगणाः एकः कश्चित् मध्य-गुरुर्गुर्वादिर्वा गणः पतति अंते च सगण एव यत्र पतति [त]त् मनो[जल]हरणमिति फलितार्थः । (E).

२०२ । पञ्च इति ॥ पदे पदे स्थापय कलाः सखि विकच-कमलमुखि दशसु वसुषु पुनर्वसुषु ८ विरतिं कुरु, सर्वपदेषु मुनि ७ द्विजगणान् देहि, विरामे सगणं, श्रीफणिपतिर्भणति सुकविवरः । दश त्रिगुणिताः कुरु कलाः पुनरपि धारय युगलं, एवं प्रकारेण स्थापय चतुरो गणान्, यदि पतति कदाचिद्गुरुः कदापि न परिहार्यो बुधजनमनोहरं जलहरणं ॥ वसवोऽष्टौ, मुनयः सप्त, द्विजश्चतुर्लघुः ॥ दशेति द्वात्रिंशत्कलाः प्रतिचरणं कार्या इत्यर्थः । जलेति छंदः ॥ २ ॥ (G).

---

२०३ । १ सगणेइ (A). २ ठावेऊ (A, B & C), ठवेहि (D). ३ लऊ (B, C, E & F). ४ जऊ (E). ५ वा पाए (B & C), वा पाएहि (F). ६ ८४ (A), ३ (F).

जहा, खुर खुर[1] खुदि खुदि[2] महि घघर रव कलइ[3]
णणणण[4] गिदि[5] करि[6] तुरत्र[7] चले
टटट गिदि[8] पलइ[9] टपु[10] धसइ धरणि धर[11]
चकमक करि बहु[12] दिसि चमले[13] ।
चलु दमकि दमकि बलु[14] चलइ पइक बलु[15]
घुलकि घुलकि करि[16] करि चलित्रा[17]
वर मणुसत्रल कमल[18] बिपख[19] हित्रत्र सल्ल
हमिर बीर[20] जब रण चलित्रा[21] ॥ २०४ ॥

जलहरण । (A, B, C & F).

२०४। १ खुखुदि (A, B, C, D & E). २ खलुकि (A, C & E), खुणकि (B), खुलकि (D). ३ घघघघ कइ (A), घघर रण रण कसइ (B & C), घघर रव कलहि (D), घररर रवहि (F). ४ णण (A & E), ननन (B), णणणा (C). ५ गदि (B), ग्टदि (C, D, E & F). ६ करतर (A), रङ्ग (B & C), रणहि (E). ७ तुरङ्ग (C). ८ टट दिगि (A), टटट गुदि (B), टटटा ग्टदि (C), ढटट ग्टदि (D, E & F). ९ परइ (D & F). १० टब (E), ११ उरपुर (A), श्चोरश्च वपु (B & C), धरणि धणु (D), धरणि वपु (E). १२ चमकइ चउदिसवर (A), चच चमक चउदिसि (B), ठ ठ ठम चउदिस (C), कर वउदिसि (D), चकमक करबढई दस (E). १३ चमरे (A, B, C, D & F). १४ दपु धमकि धमकि दल (A), दपु धमकि द्रनक द्रन (B), द्रपु धमकि द्रणकि (C), दलु (D). १५ बल (A), पाइक वलु (B & C). १६ घुलुंकिकि घुलुकि कलि (A), घनघ्रनकि करि घन (B & C). १७ चलचित्र (A), करिवर ललिश्रा (D), करिवर ललिए (E). १८ सरण कमण (A), ससर कमलु (B), सवल कमलु (C), सवर करइ (E). १९ विपइ (A), विपक्ख (B & C). २० सल हमिर विर (A), सक्ष हविर वीर (B), सलु हविर वीर (C). २१ जव रज वरण चलिस्र (A), जहि रणे चलिश्रा (B & C), जइ रण चलिए (E).

२०३ । इदमेव संक्षेपेणाह । द्वात्रिंशन्मात्रा अन्ते सगणमुत्थापय । सर्व्वलघवो यदि गुरुरेको वा द्वौ वा पादे ॥ (C).

२०३ । अथैनमेवार्थं गाहूच्छंदसा स्पष्टयति बत्तीसेति। मनो-[जल]हरणच्छंदसीत्यध्याहारः। बत्तीस होइ मत्ता — द्वात्रिंशद्भवंति मात्राः, अंते सगणाइ ठावेइ[हि] — अंते सगणं स्थापय, कर्त्तव्यासु द्वात्रिंशन्मात्रासु अंतिमं मात्राचतुष्टयं सगणस्वरूपं कार्यमित्यर्थः, पाएहि — पादेषु आदौ सब्ब लहू — सर्वे लघवो भवंति, यदि चेदेकः गुरु बेबि — द्वौ वा गुरू भवतस्तदा न दोष इत्यर्थः, तथाच सप्तद्विजगणानंतरं सगणः कार्यः, अथवा षट् द्विजगणाः, तेषामादौ अंते मध्ये वा एकः गुर्वादिर्मध्यगुरुर्वा गणः कार्यः, सर्वेषामंते च सगणो देय इति फलितार्थः । अतएव उदाहरणे चतुर्थचरणे रबीरेति षष्ठो जगणो दत्त इति द्रष्टव्यम् । (E).

२०३ । पुनः प्रकारांतरेणाह ॥ बत्तीति ॥ द्वात्रिंशद्भवंति मात्राः अंते सगणं स्थापय। सर्वे लघवो यदि गुरुरेको वा द्वौ वा पादे ॥ सर्वे लघव एव कार्याः कदाचिद्गुरुः कृतश्चेदेको द्वावित्यर्थः ॥३॥ (G).

२०४ । उदाहरति । खुलुकीति अश्वगतिविशेषानुकरणं, यया गत्या मही खुरेण चोदिता रङ्गेण तुरङ्गश्चलतीत्यन्वयः । बलगेति [?] शब्दानुकरणं, बलगं [?] दत्त्वा, घर्घरः क्षुद्रघण्टिका । ट ट टा इति धावदश्वखुरशब्दविशेषानुकरणं, तादृशशब्दं ददतः टापाः खुराघाताः पतन्ति दृष्टं भवति तुरगधावनं । ठ ठ ठेत्यनुकरणं, चमत्कृतं चतुर्दिशं चामरैः, द्रपु द्रणकि द्रण द्रणिति चरणशब्दविशेषानुकरणं, चलति पदातिघटा, घुणुकि

भुणकीति हस्तिगत्यनुकरणं, तादृशशब्दानुकरणेन करिवराश्चलिता-श्चलति मनुष्यबलं । मनुष्याः पदातिव्यतिरिक्ताः सेवकादयः। विपक्षहृदये शल्यं हम्मीरवीरो यदा च रणे चलितः ॥ (C).

२०४ । अथ मनो[जल]हरणमुदाहरति खुर इति । खुर—खुरैः मह्वि—महीं खुदि—क्षोभयित्वा, खुलुक्कि ण ण ण ग्गटिदि इत्यनुकृत्य, घघरु रव कलहि—घर्घरेति रवं कृत्वा हृषां विधायेत्यर्थः रणहि—रणे संग्रामे तुरअ चले—तुरंगाश्चलिताः, ठ ठ ग्गद्दीत्यनुकृत्य टपु—टापः अश्वपादाघातादित्यर्थः पलइ—पतति, तेन च धरणि बपु—धरणीधसुः[वपुः] पृथ्वीशरीरं धसइ—प्रचलति, बङ्क दिसि—चतुर्दिक्षु चमले—चामराणि चकमक करु—कुर्वंति चाकचिक्यशोभामुत्पादयंतीत्यर्थः। दलु—दलं सैन्यं दमकि दमकि—अहमहमिकया चलु—चलितं, चलति पदातिबलं, घुलुकि घुलु[की]त्यनुकृत्य करिवराश्चलिताः, बर मनुसबर—सत्पुरुषवरः करइ विपख हिअअ सल—करोति विपक्षहृदयेषु शल्यं, हमिरबीर—हम्मीरवीरः यदा च रणे चलितः ॥ (E).

२०४ । यथा ॥ खुरेति ॥ खुरैः २ संचूर्ण्य महीं घरेति रवेणेति कृत्वा तुरगाश्चलं[ति], ट टेत्यादि पतति खुराघातो धसति [ध्वंसते] धरणीधरः, चमत्कुर्वंति बङ्कदिक्षु चामराणि । चलति दमेति बलं चलति पदातिबलं, घुलेत्यादि कृत्वा करिणश्चलिताः, वरमानुषसंगकमल-विपक्षहृदयशल्ये हम्मीरवीरे जवेन रणे चलिते ॥ इति जलहरणम् ॥ (G).

अथ मअणहरा । (D).

पिअ भणमि[1] मणोहरु[2] पेल्लि[3] पओहरु[4]
सुहव[5] सुहाव[6] खणइ[7] खणो थिर[8] करहि मणो[9]
जइ राअ[10] विवत्तिउ[11] अणुसर[12] खत्तिउ[13]
कड्ढिकए[14] वहि[15] छंद[16] भणो[17] जिमि[18] खलइ रिणो[19]।
विवि सल्ल पहिल्लिअ[20] तुरअ वहिल्लिअ[21]
हअ गअ पअ[22] पसरंत[23] धरा गुरु सज्जिकरा[24]
जइ जग्गि[25] णिरुत्तउ[26] दह गण जुत्तउ[27]
चउ संधिहि[28] चालीस धरा[29] भणु मअणहरा ॥ २०५[30] ॥

---

२०५ । अथ मदनगृहं ॥ प्रिये भणामि मनोहरं दूरीकृत्य

---

२०५ । १ भणइ (A & E). २ मणोहर (A). ३ मिल्लि (A), मेल्लि (B). ४ पओहर (A), टओहर (D). ५ सुभग (B), सुभअ (C), सुहअ (D & E). ६ सुहावह (A). ७ कखणइ (B), सुणिइ (D & F). ८ खणे त्थिर (C). ९ करवि मणो (A, B & C). १० राउ (B), राअउ (F). ११ विउत्तिउ (B), विमत्तिअ (D), वसंतिअ (F). १२ अनुसरि (E). १३ खत्तिअ (D & F). १४ कड्ढिकए (A & E), कड्ढिउए (B), कढिकए (C), कढ्ढकए (F). १५ एव्वहि (F). १६ च्छन्दु (C). १७ मणो (D), मुणे (E). १८ Non est up to हि in the fourth quadrant in (B), जेम (C, D & E), जम (F). १९ खलवि मणो (A), खलह रिणो (C), खलिअ रिणो (E). २० पहिल्लिअ (C). २१ रहि-ल्लिअ (C). २२ गअ हर पअ (A), गअ रह पह (C), गअ रप हेअ (E). २३ पसरंति (A), पसरणु (C). २४ सज्जिवरा (A), सजिधरा (C), सन्निधरा (D), कज्जिकरा (E). २५ ठइ सगण (A), जइ सग्गि (C), तइ जग्गि (E). २६ णिउत्तउ (A), णिरत्तेउ (E). २७ दह गण वुत्तेउ (E). २८ Transposed in (A). २९ कला (A). ३० ९६ (A), ५ (F).

पयोधरं सुभगे सुभगवति चणार्द्धं चणं स्थिरं कृत्वा मनः, यदि रागो वर्त्तते अनुसर चत्रियमाकृष्य कृत्वा हि छन्दो भणामि यथा स्खलति च्छणं। हे शल्ये प्रथमतः तुरगावहिताः स्थिताः गजरथाः पदे प्रसरन्ति धरा गुरुं सन्नीकृत्य धारय यदि या[जा]गरहा-निरुच्यते, दशगणयुक्तं चतुःसन्धिषु चत्वारिंशद्वृत्तं भण मदनगृहं॥ यदि वास्तवो रागो भवति, तदा चत्रियं राजानमनुसर। राजात्र प्रस्तार एव, अहमपि तत एवाकृष्य वहिःकृत्य भणामि यथर्षपरि-शोधनं कृत्वा सुखयति तथेदमपि। तत्र गणव्यवस्थामाह हे इति, आदौ लघुद्वयं, तुरगराजरथशब्दास्तुष्कलवाचकास्तत्र गणा धराः पर्व्वताः स्थिराः कार्य्या इति भावः। अन्ते गुरुर्द्वयः, आदिमलघु-द्वयं, चरमगुरुस्तरणान्ते पततीति, तदिदमुक्तं सगणयुक्तं सन्धिपदं, चत्वारिंशद्वृत्तं चत्वारिंशत्स्थानं चत्वारिंशत्कलमित्यर्थः। अयमर्थः चतुष्कलाः दश गणाः कार्य्या अन्ते गुरुरादौ च लघुद्वयम्, इदन्तु बोध्यमादौ लघुद्वयस्य न नियमः। (C).

२०५। अथ मदनगृहनामकं वृत्तं लचयति पिअ भणईति। हे सुहअ सुहाव — सुभगस्वभाव पिअ — प्रिय शिष्य, जइ — यदि राअ — रागः पठितुं वा इच्छा विवत्तिउ — विवर्त्तते विशेषेण वर्त्तत इत्यर्थः, तदा खत्तिअ — चत्रियं प्रस्तारम् अणुसरि — अनु-सृत्य, चत्रिय इति प्रस्तारशंसी पूर्वाचार्याणां, पओहर — पयोधरं मध्यगुरुं जगणं पेल्लि — प्रेरयित्वा प्रस्तारानुसारेण जगणमेत-च्छंदसो दूरीकृत्येत्यर्थः, अत्र जगणो न देय इति भावः। छंद — इदं छंदः कड्डि[ड्डि]कए वहि — निष्काशयित्वा वहिः अर्थात्

प्रस्तारादिदं छंदः पृथक्कृतमित्यर्थः, खण्डु खणो — क्षणमर्द्धक्षणं वा मणो — मनः थिर करहि — स्थिरं कुरु, जइ — यदा बिबि सल्ल — द्वौ शल्यौ द्वे मात्रे ते च लघुद्वयरूपे एकगुरुरूपे वात्र मात्रहः, यद्यपि शल्यशब्दः लघुवाची तथाप्यत्र सामान्यमात्रापरो बोध्यः उदाहरणे प्रथमद्वितीयचरणयोर्लघोस्तृतीयचतुर्थयोश्च गुरोर्दर्श-नात्, अनुपदं दोहाकृते लक्षणे बे बि मत्तेति वक्ष्यमाणत्वाच्चेति ध्येयं, पहिलिअ — प्रथमं गृहीत्वा पादादौ द्वौ लघू स्थापयित्वेत्यर्थः, सल्लिकरा — सल्लीकृतं गुरु — गुरुं बहिलिअ — बहिर्गृहीत्वा वहिः पादांते, तथाच चरणांते गुरुं स्थापयित्वेत्यर्थः, तुरगः गजः रथः एते दह गण — दश गणाः पअ — पादे धरा — धृताः पस-रंत — प्रेर[यं]ति । तुरगादयस्तुच्कलदशगणदानबोधनार्थमुपनि-बद्धाः । एवं च दीयमानेषु दशचतुष्कलेषु आदौ मात्राद्वयं लघु-द्वयरूपमेकगुरुरूपं वा, अंते चैकगुरुरूपं देयं, न तु दशगणाति-रिक्तमिति भावः । एवं च चालीस — चत्वारिंशन्मात्रा इति शेषः घरा — घटिताः बुत्तेउ — उच्यंते, दशचतुष्कलानां प्रतिचरणं चत्वा-रिंशन्मात्राः पतंतीत्यर्थः, तइ — तदा जग्गि णिरुत्तेउ — जागरणं कृत्वा निरुक्तं, जागरणमत्र सावधानतोपलक्षणार्थं, तथाच साव-धानतया पिंगलेन निरुक्तमित्यर्थः, मअणहरा — मदनगृहनामकं वृत्तं भणु — पठ एवंनच जेम — यथा खलिअ रिणो — स्खलद्रिणं तथा मणोहरु — मनोहरं मुणो — जानीहि, यथोपचितमृण[मु]-ष्ट्रीभवच्चित्ताह्लादकं भवति तथा श्रूयमाणमेतच्छंद इत्यर्थः, इति भणइ — भणति, अर्थात् पिंगल इति भाव इति योजना ॥ (E).

बेबि मत्त सिर[1] ठाबि कहु[2] बलआ अंत ठवेहु[3]।
णव चउकल[4] गण मज्झ[5] धरि[6] मअणहराइ[7] करेहु[8]॥
२०६[9]॥ दोहा।

२०५। पिअ इति॥ प्रिय भणामि मनोहरं परित्यज्य पयोधरं सुभगस्वभाव स्निग्धं चणं स्थिरं कुरु मनः, यदि राजानं वा मंत्रिणमनुसरसि चत्रियं कौतुकादेव हि छंदो भण, यथा खलप्रेरकं। पयोधरो जगणः, राजादिवर्णनादौ प्रशस्तं मनोरंजकं चेति भावः। केचित्तु यथा स्खलति चणं, यथा चणं स्मृतिपथमुपैति तथैव छंद इत्याहुः। बीति॥ द्वौ शल्यौ प्रथमं तुरगं पश्चात् हयगजपदातीन् प्रसरणशीलान् धारय, गुरुं सज्जीकुरु, यदि ज्ञात्वा निरुच्यतां दशगणयुक्तं चतुर्षु पादेषु चत्वारिंशद्वधारय, भण मदनहरं॥ शल्यं लघुः, तुरगादयश्चतुर्मात्रिकाः गणा नव कार्या अंते गुरुरेवं प्रतिचरणं दश गणाः, तेषां च चत्वारिंशन्मात्रा भवंति इति भावः॥ ५॥ (G).

२०६। किन्तु तदिदमभिसन्धायाह, बेबीति। द्विमात्रं शिरसि स्थापयित्वा बलयमन्ते कुरु। नव चतुष्कलान् गणान् मध्ये धृत्वा मदनगृहं कथय॥ शिरसि आदौ। (C).

. २०६। १ बि (B), सिरि (D & F). २ कह (E). ३ करेहु (A & C), करेह (B), कनेहु (E). ४ चोकल (E). ५ मझ्झ (E). ६ करि (A, B & C). ७ मअणहराअ (A). ८ कनेहु (E), करेहु (F). ९ ६० (A), ६ (F).

जहा,

जिणि[१] कंस विणासिअ कित्ति पआसिअ
मुट्ठि अरिट्ठि[२] विणास करे[३] गिरि हत्थ[४] धरे[५]
जमलज्जुण भंजिअ पअभर[६] गंजिअ[७]
कालिअ कुल संहार करे[८] जस भुअण[९] भरे ।
चाणूर[१०] विहंडिअ णिअकुल[११] मंडिअ
राहा मुह महु पाण करे[१२] जिमि[१३] भमरवरे
सो तुम्ह[१४] णाराअण[१५] विप्प पराअण[१६]
चित्तह चिंतिअ[१७] देउ वरा[१८] भअ भीअ हरा[१९] ॥
२०७[२०] ॥ मअणहरा । (A, B, C & F).

२०६ । अथैनमेवार्थं निःकृष्य दोहावृत्तेनाह वेवि मत्तेति । द्वे अपि मात्रे शिरसि आदौ ठावि कद्द — स्थापयित्वा, अंते वलआ

२०७ । १ जेन्हि (A), जखि (B), जणि (C), जिण (F). २ रिट्ठिअ मुट्ठि (A), मूट्ठिअ रिट्ठि (D), अट्ठिअ मुट्ठि (E). ३ करू (A, C & E), कर (B & D). ४ तोरि (A), तोलि (B & C). ५ धरू (A, C & E), धर (B & D). ६ Dropt in (B), पअभार (C). ७ Dropt in (B), गंजिर (F). ८ राहा मुह मऊ पाण करे जिमि भमर वरे (A), कालीकुल संहार करे (D). ९ जसे भुअण (B & C), जसु भुवण (F). १० चणूर (A), चणऊर (B & C), चाणर (E). ११ कुल (B), णिजकुल (C). १२ कालिअ कुल संहार करू जस भुवण भरू (A). १३ जणि (B & C), जिम (E). १४ सो तुहहिँ (A), सोइ तुम्म (B), सोइ तुम्ह (C), सो तुम्ह (D), सी तुए (E). १५ नारायण (B), नरायण (E). १६ असुर विदारण (A), पिप्प पराअण (B). १७ चित्तिकि चिन्तिअ (B), चित्तिहि चिन्तिअ (C), चित्त मह चिंतिअ (F). १८ वरू (A), वरी (F). १९ भअ भीति हरू (A), भव भीइ हरा (B & C), भअ भीउ हरी (F). २० ९८ (A), ७ (F).

—वलयं गुरुं कुरुत । मज्झ—मध्ये द्विमात्रागुर्वोरंतराले इत्यर्थः नव चतुष्कलगणान् धरि—स्थापयित्वा मदनगृहं कथयत ॥ (E).

२०६ । बे इति ॥ द्वे द्वे मात्रे आदौ [सं]स्थाप्य कथय वलयमंते स्थापय । नव चतुष्कलान् गणान् मध्ये धारय, मदनहरं कथय ॥ ६ ॥ (G).

[After this the following verse is inserted in (D), but not in any other of the MSS. — Ed.]

किंच

चउ संधिहि चालीस कल दह गण तत्थ मुणेहु ।
पअहर वज्जिअ छे सुपिअ मअणहराइ कुणेहु ॥ दोहा ।

२०७ । उदाहरति ॥ येन कंसो विनाशितः कीर्त्तिः प्रकाशिता मुष्टिकारिष्टिर्विनाशीकृतः गिरिस्तोलयित्वा धृतः यमलार्ज्जुनौ भञ्जितौ पदभरेण गञ्जितकालियकुलसंहारः कृतः, यस्य यशसा पूरितं भुवनं । चाणूरो विखण्डितः, निजकुलं मण्डितं, राधामुख-कमल[?]मधुपानं कृतं यथा भ्रमरवरेण । भमरेति क्वचित् पाठः, भमरो भ्रमरः । स युष्माकं नारायणः असुरपलायनः चित्ते चिन्तितं वरं ददातु भवभीतिहरः ॥ असुराणां पलायनं यतः स तथा । (C).

२०७ । अथ मदनगृहमुदाहरति, जिणीति । येन कंसः विनाशितः कीर्त्तिः प्रकाशिता रिष्टकमुष्टिकयोः दैत्ययोः विनाशः कृतः गिरिर्गोवर्द्धनो हस्ते धृतः यमलार्जुनौ वृक्षौ[चौ] भग्नौ पादभरगंजितकालियकुलस्य संहारः कृतः, यस्य यशसा भुवनं भृतं । चानूरो नाम दैत्यः विपादितः, निजकुलं मंडितं,

अथ मरहट्ठा । (D).

एहु छंद सुलखण[1] भणइ[2] विअक्खण[3]
जंपइ पिंगल णाउ[4]
बिसमइ दह अक्खर पुणु[5] अट्ठक्खर[6]
पुणु[7] एगारह[8] ठाउ[9] ।
गण आइहि[10] छक्कलु[11] पंच चउक्कलु
अंत[12] गुरु लहू[13] देहु[14]
सउ[15] सोलह अग्गल मत्त[16] समग्गल
भण[17] मरहट्ठा[18] एहु ॥ २०८[19] ॥

राधामुखमधुपानं कृतं यथा भ्रमरवरः । भ्रमरो यथा कमल-मकरंदपानं करोतीत्यर्थः । स नारायणः विप्रपरायणः भवभीति-हरः चित्तचिंतं वरं ददातु ॥ (E).

२०७ । यथा जिणेति ॥ येन कंसो विनाशितः कीर्त्तिः प्रका-

---

२०८ । १ सुलक्खण (A, D & E), सुलच्चण (B & C). २ भणहि (E), भणङ (F). ३ विम अक्खण (A), बिलक्खण (B), विम लक्खण (C). ४ णाओ (A & E). ५ पुणि (A), पुण (B). ६ अठ्ठक्खर (A & E), अट्टर (B), dropt in (C), अठक्खर (F). ७ पुणि (A), पुणुवि (E). ८ इग्गारह (B, C & F), एग्गारह (D & E). ९ ठाओ (A). १० आईहि (D). ११ छक्कल (B). १२ अंते (F). १३ गुरू लङ्ड (A & F), गुरु लङ्ड (B, C & E). १४ देह (B). १५ सत (A), सङ्ड (B). १६ मत्ता (D). १७ भणु (D), dropt in (F). १८ मरहठ्ठा (A, E & F), मरहट्ठा (B), मरहट्ठा (C). १९ ९९ (A), ८ (F).

शिता मुष्टिक-रिष्टयोर्विनाशः कृतो गिरिर्हस्ते धृतः, यमलार्जुनौ भंजितौ, पद्भरेण गंजितः कालियस्तत्कुलसंहारः कृतो यशसा भुवनं भरितं। चाणूरो विखंडितो निजकुलं मंडितं, राधामुख-मधुपानं करोति यथा भ्रमरवरः, स युष्माकं नारायणो विप्र-परायणः चित्तमध्ये चिंतितं ददातु वरं भवभीतिहरः ॥ ७ ॥ इति मदनहरं ॥ (G).

२०८। एतच्छन्दः सुलक्षणं भण विचक्षण जल्पति पिङ्गलनागः, विश्राम्यति दशाक्षरेषु, पुनरष्टाक्षरेषु, पुनरेकादशस्थाने। गण आदौ षट्कलः पञ्च चतुष्कला अंते गुरुलघू देहि, षोडशाधिकमात्रा-शतार्गलं भण महाराष्ट्रमेतत् ॥ विश्राम्यति विरमति, अक्षरं स्थानं मात्रा। अत्रोनत्रिंशन्मात्रः पादस्तेन षोडशाधिकमात्राशतकेन पूर्णता। अर्गलमवसानम्। (C).

२०८। अथ महाराष्ट्रनामकं वृत्तं लक्षयति, एऊ छंदेति। यत्र आदौ दह अक्खर — दशाक्षरेषु, अत्राक्षरशब्देन मात्रा उच्यते, तथाच दशसु मात्रास्वित्यर्थः विसमइ — विश्राम्यति यतिं प्राप्नो-तीत्यर्थः, पुणु अट्ठक्खर — पुनः अष्टाक्षरेषु अष्टसु मात्रास्वित्यर्थः, पुणुवि एआरह ठाउ — पुनरपि एकादशस्थाने एकादशसु मात्रा-स्वित्यर्थः विश्राम्यतीति पूर्वेणान्वयः। यत्र च सोलह अग्गल — षोडशाधिकाः सउ — शतं मत्त — मात्राः, समात्राः [?] समग्गल — स[म]याश्चरणचतुष्टयस्था इत्यर्थः, यत्र च आइहि — आदौ छक्कलु — षट्कलं गणं, ततः पंच चउक्कल — पंच चतुष्कलान्, अंते — पादांते गुरुलहू — गुरुलघु-क्रमेणेत्यर्थः देऊ — ददत एऊ छंद —

जहा, जइ[1] मित्त धणेसा ससुर गिरीसा[2]
तहबिहु[3] पिंधण दीस[4]
जइ अमिअह[5] कंदा णिअलहिं[6] चंदा
तहबिहु[7] भोअण बीस[8] ।
जइ कणअ[9] सुरंगा गोरि अधंगा[10]
तहबिहु[11] डाकिणि[12] संग
जो जसुहिं[13] दिआवा[14] देब सहावा[15]
कबहु[16] ण हो तसु भंग ॥ २०९[17] ॥
मरहट्ठा[18] ।

एतत् छंदः सुलक्खण — सुलक्षणं सर्वेषु वृत्तेषु समीचीनमित्यर्थः मरहट्ठा — महाराष्ट्रं भणहि — कथय, एऊ — एतत् विचक्षणः पिंगलनागः जल्पति ॥ (E).

२०९। १ जसु (D & F). २ णिअलहि सेसा (A), सजसुर गिरीसा (D), ससुब गिरीसा (F). ३ चहविल (B), तहविल (C), तद्विऊ (E). ४ गंडउ वास (A), गिह ईस (B), गगद् ईस (C). पिंधण दीसा (F). ५ अमिह (B), अमिअहि (E), वि अमिअ (F). ६ णियणीह (B), णिअरहि (D & F). ७ तहविकु (A), तउविऊ (E). ८ वास (A), वीसा (F). ९ जह कणय (B), जद् कणह (C), कद् कणअ (D). १० अधअङ्गा (B). ११ तहबिउ (B), तद्विऊ (E). १२ आसण (A), डाकि (C), डाइनि (E). १३ जासु (A), जसु (B & C), जसहिं (D & F). १४ दिआवे (A & E), देआवे (B & C). १५ देवु सुहावे (A), देव सहावे (B & C), dropt in (E). १६ कवऊ (A), कऊ (B). १७ १०० (A), ९ (F). १८ मरहठ्ठा (A), मरहट्टा (B & C).

२०८ । एड्ड इति ॥ एतत् छंद: सुलचणं भणत विचचणा: जल्पति पिंगलनाग:, विश्राम्यति दशाचरेषु, पुनरष्टाचरेषु, पुनरेकादशे स्थाने । गण आदौ षट्कल:, पंच चतुष्कला:, अंते गुरुलघू देहि, शतं षोडशाधिकं मात्रा: समया भण महाराष्ट्र-मेतत् ॥ ८ ॥ (G).

२०९ । उदाहरति । यदि मा[मि]त्रं धनेश: श्वशुरो गिरीश: तथापि नग्न:, यदि अमृतकन्दो निकटे चन्द्र: तथा[पि] भोजनं विषं । यदि कनकसुरङ्गा गौरी अर्द्धाङ्गे तथापि डाकिनी सङ्गे, यद्यस्य दापयति दैवस्वभाव: कदापि न भवति तस्य भङ्ग: ॥ यदि यद्यति[पि] । (C).

२०९ । अथ महाराष्ट्रमुदाहरति जईति । यद्यपि मित्रं धने-श्वर: श्वशुरो गिरीश:, तथापि यस्य खलु पिंधनं दिश:, यद्यपि अमृतकंद: निकटे चंद्र:, तथापि यस्य भोजनं विषं। यद्यपि कनक-सुरंगा गौरी अर्द्धांगे, तथापि यस्य डाकिन्य: संगे, य: यश: दाप-यति यस्य दैवस्वभावस्तस्य भंग: कदापि न भवति ॥

* इति लि[ली]लावति[ती]प्रकरणम् ॥ * (E).

२०९ । यथा ॥ जसु इति ॥ यस्य मित्रं धनेश: श्वशुरो गिरीश-स्तथापि खलु पिधानं दिश:, यद्यप्यमृतकंदो निकटस्थितश्चंद्रस्तथापि खलु भोजनं विषं । यदि कनकसुंदरी गौरी अर्द्धांगे तथापि खलु डाकिनीसंग: स * * * * कदापि न भवति तस्य भंग: ॥ (G).

अथ पूर्व्वोक्तच्छंदसां नामानि कथयति। तं गाह गाहा बिग्गाहा उग्गाहा गाहिणी सींहिणी खंधा दोहा उक्कच्छा रोला गंधाण चउपइआ घत्ता-जुअला छप्पाआ पज्झलिआ अलिला पाआकुलिआ चउबोल रड्डा पोमावत्ती कुंडलिआ गअणंग दोअइ खंजा [सिक्खा] माला चुलिआला सोरट्ठा हाकली मङ्गभार अहीर दंडकलु दीपक्क सिंहावलोअ पवंगम लीलावती हरिगीआ तीभंगी दुम्मिला हीर जलहरण मअणहरा मरहट्ठा॥ —तेतालीसह मत्तहरा इअ पिंगल कहिए मत्ता वित्त परिच्छेओ।

इति पिंगलकृतौ मात्रावृत्तपरिच्छेदः॥ (A).

तं गाह गाहा बिग्गाहा उग्गाहा गाहिणी सीहिणी खंधा दोहा उक्कच्छा रोला गंधाणा चउपइआ घत्ता-जुअला छप्पाआ पज्झटिका अलिंदा पाआकुल[अं] णवपाअ पदुमा[वत्ती] कुण्ड-लिआ गअणङ्ग दोअइ खञ्जा सिक्खा माला चुलिआला सोरट्टा हाकलि मधुभार अहीरु दण्डअलु दीपक्क सिंहावलोअ पवङ्गमो लीलावती हरिगीआ तिभङ्गी दुम्मिला हीर जलहरण मअण-हरा मरहट्टा। तेतालीस मत्तहरा इअ पिंगल कविए मत्तावित्त परिच्छेअ ओमाओ॥ (B).

तं गाह गाहा बिग्गाहा उग्गाहा गाहिणी सिहिणी खंधा दोहा उक्कच्छा रोला गंधाणा चउपइआ घत्ता-जुअला छप्पअ-जुअलं (कव्वलक्खणं उल्लाललक्खणं) पज्झटिका अलिंदा पाआकुल[अं] णवपअ (रत्ता[ड्डा]पअरणं) पद्मावती कुण्डलिआ गअणङ्ग दोअइ खञ्जा सिक्खा माला चूलिआला सोरट्टा हाकलि मऊहार अहीर

दण्डअल दीपक्क सिंहावलोअ पवङ्गमो लीलावती हरिगीआ तिभङ्गी दुम्मिलओ हीर जलहरण मअणहरा मरहट्टा ॥ तेआलीस मत्तहरा इअ पिङ्गल कइए मत्ताविन्त परिच्छेअओ समात्तो ॥ उक्तानां छन्दसां सङ्कलनम्। (C).

इति श्रीपिंगले मात्रावृत्तं समाप्तम्। (D).

तं गाह गाहा विग्गाहा उग्गाहा गाहिणी सिंहिणी खंधा दोहा उक्कच्छा रोला [गं]धाणा चउपइआ घत्ता-जुअला छप्पाआ पज्झ्झलिआ अलिल्ला पा[आ]कुलाआ चौ[चउ]बोला णव[पअ] पोमावत्ती कुंडलिआ गअणंग दोअइ झुल्लणा खंजा सिक्खा माला चुलिआला सोरट्ठा हाकलि मऊभार अहीरु दंडअलु दीपक्क सिंहावलोअ पवंगम लीलावती हरिगीआ तिअभंगी तह दुम्मिल्ला हीर जलहरण ग[म]अणहरा मरहट्टा ॥ पंचतालीसह मत्त धरो इअ पिंगल क[वि]ए मत्तावुत्त परिच्छेओ॥ (E).

अथ प्राकृतसूत्रेणोक्तानि वृत्तान्युपसंहरति। तं गाह इत्यादिना। पंचतालीस—पंचचत्वारिंशत् धरो—स्थापयेत्यर्थः।

अस्ति श्रीखेखसीति त्रिभुवनवलयख्यातनाम्नी पुरी या
तस्यांश्चंद्राकराख्यः समभवदधिपः चोणिदेवाग्रगण्यः।
तद्वंशे कृष्णदेवः समजनि तनयस्तस्य वंशीधराख्यो
जातस्तन्निर्मितेयं ज[ग]ति सुविमला टिप्पनी पिंगलस्य ॥

इति श्रीपिंगलप्रकाशे मात्रावृत्तप्रकरणम् ॥ (E).

गाह १ गाहा २ विग्गाहा ३ उग्गाहा ४ गाहिणी ५ सिंहिणी ६ खंधा ७ दोहा ८ उक्कच्छा ९ दो[रो]ला १०

LIBRARY

गंधाणा ११ चौ[चउ]पदूआ १२ घत्ता १३ घत्ताणं[दा] १४ छप्पआं उल्लाल पज्झटिआ पादाकुलकं चौ[चउ]बोला णवपद २० पउमावइ कुंडलिका गगणांगण दोअइ उल्लणा २५ खंजा सिक्खा माला चुलिआ सोरट्ठा ३० हाकलि मधुभार अहीर दंडअलु दीपक्क ३५ सिंहावलोकितं पवंग[म] लीलावती हरिगीतं तिभंगी ४० तह दुम्मिला हीर जलहरण मअणहरा मरहट्ठा ४५ पचतालीस धरा ॥

इति पिं[गल] मत्ताविक्त परिच्छेओ ॥ पिं[गल]पूर्वार्द्धः समाप्तः ॥ (F).

इति मात्राधिकारः प्रथमः समाप्तः । कृष्णीये विवरणे पूर्वार्द्धः स[माप्तः] ॥ (G).

द्वितीयः परिच्छेदः ।

वर्णवृत्तम् ।

अह वस्मवित्ताणि[1] ।

सी सो[2] जं गो ॥ १ ॥ जहा, गोरी[3] रक्खो ॥ २ ॥ श्रीः ।

१-२ । अथ वर्णवृत्तानि ॥ श्रीस्तद्यत्र गः ॥ यत्र गो — गुरुरेकः पादस्तत् श्रीच्छन्दः ॥ उदाहरति । गौरी रचतु ॥ (C).

१-२ । अभ्यन्तर्वर्त्तिनीलद्युतिमणिनिकरप्रस्फुरद्रश्मिजाला-
भिव्याप्तचीरसिंधुद्युतिसदृशमहाकान्तकायप्रभोर्म्मिं ।
नित्येच्छाज्ञानयत्नत्रिभुवनजनकं निर्विकारस्वरूपं
नित्यानंदं भजेऽहं निजहृदयगतं ब्रह्म रामाभिधानम् ॥ १ ।

वंशीधरेण कविना रघुवीरमंत--
श्चोल्लादरात् पवनजांघ्रियुगं च नत्वा ।
व्याख्यायते गणपतिं बहुशः प्रणम्य
श्रीशेषपिंगलविनिर्म्मितवर्णवृत्तम् ॥ २ ।

अथैकाचरचरणवृत्तमारभ्य षड्विंशत्यचरपर्यंतं यथाशक्यं लच-णीयेषु वृत्तेषु प्रस्तारक्रियाप्राप्तभेदद्वयस्यैकाचरचरणवृत्तस्य प्रथमभेदं

---

१ — २ । १ अथ वर्णवृत्तानि (A). २ सी सा (A), श्री जो (B), श्री सो (C), श्री सा (F). ३ गौरी (F).

दीहा[1] बीहा । कामो रामो ॥ ३ ॥
जहा, जुम्झ्झे[2] तुम्झ्झे[3] । सुब्भं[4] देउ ॥ ४ ॥ काम ।

श्रीनामकं वृत्तं ल[च]यति सी सविति । जं — यत्र एकाक्षरपादे वृत्ते गो — गुरुः प्रतिचरणं भवतीति शेषः, एवमग्रेऽपि अध्याहारो बोध्यः, सा श्रीः — तत् श्रीनामकं वृत्तमित्यर्थः ॥ श्रियमुदाहरति । जहा — यथा उदाह्रियते इत्यर्थः, एवमग्रेऽपि बोध्यम् । गोरीति । गौरी पार्वती, रक्खो — रचतु मामिति शेषः ॥ आद्योऽयं भेदः उक्तः । द्वितीयस्तु शिव जयेति द्रष्टव्यः । श्रीर्निवृत्ता । (E).

१-२ । श्री सेति । श्रीः सा यत्र गुरुः ॥ यथा, गौरी रचतु ॥ (G).

३-४ । दीर्घौ द्वौ । कामो रमणीयः ॥ काम इति छन्दसो नाम । उदाहरति । युद्धे तव सुखं ददातु ॥ (C).

३-४ । अथ द्व्यचरचरणस्य वृत्तस्य चत्वारो भेदाः प्रस्तारक्रियया भवंति, तत्राद्यं भेदं कामाख्यं वृत्तं लचयति, दीहेति । बीहा — द्वौ दीहा — दीर्घौ यत्र द्व्यचरचरणे वृत्ते भवतः, स रामः सुन्दरः [कामः] कामाख्यं वृत्तमित्यर्थः ॥ अत्र रामपदं पाद-पूरणार्थमेवेति मन्तव्यम् । काममुदाहरति जुझ्झे इति । जुझ्झे — युद्धे तुभ्यं शुभं देउ — ददातु ॥ श्रीरामचन्द्र इति शेषः । (E)

३-४ । अथ द्व्यचरं छंदः । दीहेति । दीर्घौ द्वौ । कामो रामः ॥ रामः मनोहरः । यथा, युद्धे तुभ्यं शुभं ददातु ॥ (G).

---

३ — ४ । १ दीहो (B). २ तुमझे (A). ३ सुमझे (A), जुजझे (F). ४ सूजं (B), सूहं (C), शुभं (E).

लहु जुअ। महु[1] हुअ[2] ॥ ५ ॥
जहा, हर हर मम मल[3] ॥ ६ ॥ महु[4]।
लगो[5] जही। मही कही ॥ ७ ॥
जहा, सई उमा। रखो[6] तुमा ॥ ८ ॥ मही।

५-६। लघुयुगं। मधु भवति ॥ उदाहरति। हर हर म[म] मलम् ॥ (C).

५-६। द्व्यक्षरचरणस्य वृत्तस्यान्तिमं भेदं मधुनामकं वृत्तं लक्षयति, लहिति। लहु जुअ—लघुयुगं यत्र द्व्यक्षरचरणे वृत्ते पतति। तत् महु—मधु हुअ—भवति ॥ मधुनामकं तद्वृत्तमित्यर्थः। मधूदाहरति, हरेति। हे हर मम मलु—मलं पापं हर क्षपय ॥ मधु निवृत्तम्। (E).

५-६। लघुयुगं मधु भवति ॥ यथा। हर हर। मम मलम् ॥ (G).

७-८। ल—लघुः गो—गुरुः एतौ क्रमेण। सा मही कथिता ॥ उदाहरति। सती उमा। रक्षतु मां ॥ (C).

७-८। द्व्यक्षरपादस्य वृत्तस्य द्वितीयं भेदं महीनामकं वृत्तं लक्षयति, लगाविति। जही—यत्र द्व्यक्षरचरणे वृत्ते लगौ[गो]—लघुगुरू क्रमेण भवतः। सा मही कही—कथिता ॥ तन्महीनामकं वृत्तमित्यर्थः। जहा [यथा] सईति। सई—सती पतिव्रतेति यावत् उमा पार्वती। तुमा—त्वां रक्खो—रक्षतु ॥ मही निवृत्ता। (E).

५—८। १ मधु (F). २ भुम (A & B). ३ मलु (E & F). ४ मधु (A). ५ लगो (A, C, E & F). ६ रक्खो (A, B & E).

सारु एह[1]। गो वि रेह[2] ॥ ९ ॥
जहा, संभु देउ[3]। सुभ्भ[4] देउ ॥ १० ॥ सारु[5]।
ताली ए जाणीए। गो कसा[6] ती बसा[7] ॥ ११ ॥ जहा,
तुम्हाणं[8] अम्हाणं[9]। चंडेसो[10] रक्खे[11] सो ॥ १२ ॥ ताली।

७-८। लगो[इ]ति। लघुगुरू यत्र। मही कथ्यताम् ॥ उ[दाहरति]। सती उमा। रचतु युष्मान् ॥ (G).

९-१०। सार एषः। गो गुरुः रेखा लघुः ॥ उदाहरति। शम्भुर्देवः। सुखं ददातु ॥ (C).

९-१०। द्व्यक्षरपादवृत्तस्य तृतीयं भेदं सारुनामकं वृत्तं लक्षयति, सार्विति। यत्र द्व्यक्षरचरणे वृत्ते पूर्वं गो — गुरुस्तदनन्तरं रेह — रेखा लघुरित्यर्थः पतति, एह — एतत्सारु सारुनामकं वृत्तमित्यर्थः ॥ विशब्दोऽप्यर्थकोऽत्र पादपूरणार्थमेव। अथवा गो — गुरुः रेह — रेखा एवं प्रकारेण यत्र वि — अक्षरद्वयात्मकं पदं भवति एह — एतत्सारुनामकं वृत्तमिति व्याख्येयम्। सारूदाहरति, संभ्विति। एउ — देवः संभु — शंभुः शिवः। सुभ्भ — शुभं देउ — ददातु मि[इ]ति शेषः ॥ सारु निवृत्तम्। द्व्यक्षरवृत्तं गतम्। (E).

९-१०। सेति। सारु एतत्। गुरुरपि रेखा ॥ गुरुलघुयुक्तं सारुनामकमित्यर्थः ॥ [यथा] शंभुर्देवः। शुभं ददातु ॥ (G).

---

९ — ११। १ एड (B & C). २ रेह (A), रेड (B & C). ३ एउ (A & E). ४ सुक्ख (A). ५ सार (A). ६ कसो (E & F). ७ बसो (E & F). ८ तुम्हाणं (A). ९ अम्हाणं (A). १० चंडेसो (F). ११ रक्खो (C).

हे पिए लेक्खिए[1]। अक्खरे[2] तिण्णि रे ॥ १३ ॥ जहा,
संकरो संकरो। पाउणो पाउ णो ॥ १४ ॥ प्रिया[3]।

११-१२। अथ त्र्यक्षरम्। ताली ज्ञायते। गोकर्णैस्त्रिभिर्वर्णैः॥ उदाहरति। युष्मानस्मान्। चण्डीशो र[च]तु सः॥ (C).

११-१२। अथ त्र्यक्षरचरणस्य वृत्तस्य प्रस्तारक्रियया अष्टौ भेदा भवंति, तत्राद्यं भेदं तालीनामकं वृत्तं लक्षयति, तालीति। यत्र त्र्यक्षरपादे वृत्ते पूर्वं गो — गुरुस्तदनन्तरं कण्णो — कर्णः गुरुद्वयात्मको गणो भवति, सा ए — इयं ताली जाणीए — ज्ञायते, तत्तालीनामकं वृत्तमित्यर्थः। कीदृशी ती वण्णो — त्रिवर्णेत्यर्थः॥ यद्वा गो — गुरुः कण्णो — गुरुद्वयात्मको गण एवं प्रकारेण यत्र प्रतिचरणं ती वण्णो — त्रयो वर्णा भवन्ति, ए — इयं ताली जाणीए — ज्ञायते॥ अथवा ती वण्णो — त्रिवर्णैः गो कण्णो — गुरुकर्णरूपैः तालीए — तालीयं जाणीए — ज्ञायत इति व्याख्येयम्। तालीमुदाहरति, त्विति। सो — सः चण्डेसो — चण्डीशः तुम्हाणं — युष्मान् अम्हाणं — अस्मान् रक्खे — रचत्वित्यर्थः॥ ताली निवृत्ता। १२। (E).

११-१२। अथ त्र्यक्षरम्। तालीयं ज्ञायते। गुरुः कर्णः त्रिवर्णः॥ कर्णेति द्विगुरोः संज्ञा॥ उ[दाहरति] — युष्मानस्मान्। सः चंडीशः रचतु॥ (G).

१३-१४। भवति प्रिया लिख्यन्ते। अक्षराणि त्रीणि रगणरूपाणि॥ रो लघुमध्यः। उदाहरति। शङ्करः शङ्करः। पावनः पातु नः॥ शङ्करः शुभकरः। (C).

१३ — १४। १ लक्खिए (E). २ अक्खरो (B). ३ प्रिय (A), प्रिआ (C).

ससी ओ[1] जणीओ[2] । फणिंदे भणीओ[3] ॥ १५ ॥ जहा, भवाणी हसंती । दुरित्तं हरंती ॥ १६ ॥ ससी[4] । सगणो[5] रमणो । सहिओ कहिओ ॥ १७ ॥ जहा, ससिणा रअणी । पइणा तरुणी[6] ॥ १८ ॥ रमण[7] ।

१३-१४ । अथ त्र्यक्षरपादस्य वृत्तस्य तृतीयं भेदं प्रियानामकं वृत्तं लक्षयति, हे पिए इति । तिण्णि — त्रीणि रे — राणि मध्यलघुरगणात्मकानि अक्खरे — अक्षराणि यत्र त्र्यक्षरचरणे वृत्ते लेक्खिए — लिख्यंते, हे — इयं पिए — प्रिया प्रियानामैतद्वृत्तमित्यर्थः ॥ केचित्तु हे पिए इति प्रियासंबोधनपरतया व्याकुर्व्वते । प्रियामुदाहरति, संकरविति । पाउणो — पावनः संकरो — शिवंकरः संकरो — महादेवः णो — नः अस्मानिति यावत् पाउ — पातु रक्षत्वित्यर्थः ॥ प्रिया निवृत्ता । (E).

१३-१४ । हे[इ]ति । हे इति इयमर्थे । इयं प्रिया लिख्यते । अक्षराणि त्रीणि रगणाः ॥ उ० । शंकरः शंकरः । पावनः पातु नः ॥ (G).

१५-१६ । शशी स यो नीतः । फणीन्द्रेण भणितः ॥ आदिलघुर्यो नीतः प्राप्तः । उदाहरति । भवानी हसन्ती । दुरितं हरन्तीति ॥ (C).

१५-१६ । अथ त्र्यक्षरचरणवृत्तस्य द्वितीयं भेदं शशिनामकं वृत्तं लक्षयति, ससीति । यत्र त्र्यक्षरपादे वृत्ते य — आदिलघु-

१५ — १८ । १ ससीणो (B), ससी सो (C), ससी यो (E & F). २ य णीओ (C). ३ भणिओ (E). ४ शशी (A). ५ सगणे (A), गगणो (B). ६ रमणी (B). ७ रमणौ (A).

थंगण: जणीश्रो — जनित: कृत इति यावत् स: फणिंदे — फणी-न्द्रेण शेषेण शशी भ[णी]श्रो — भणितस्तत् शशिनामकं वृत्त-मित्यर्थ: ॥ अथवा भवतीत्यध्याहृत्य शशी जणीश्रो — ज्ञातव्यमि-[इ]त्यर्थ: इति योजनीयं। शशिनमुदाहरति, भवाणीति। दुरित्तं — दुरितं हरन्ती हसंती — हसमाना[?] भवानी मां पात्विति शेष: ॥ शशी निवृत्त: । (E).

१५-१६ । ससीति । शशी यो जनित: । फणीन्द्रेण भणित: ॥ उ[दाहरति] । भवानी हसंती । दुरितं हरतु[न्ती] ॥ (G).

१७-१८ । सगणो रमण: । सखि कथित: ॥ उदाहरति । शशिना रजनी । पत्या तरुणी ॥ श्लाघ्येति शेष: । (C).

१७-१८ । अथ त्र्यक्षरप्रस्तारस्य चतुर्थं भेदं रमणनामकं वृत्तं लक्षयति, सगणेति । सगण: गुर्वंतगणो यत्र त्र्यक्षरचरणे वृत्ते सहिश्रो — साधित: निर्दिष्ट इति यावत्, स रमण: कहिश्रो — कथितस्तद्रमणनामकं वृत्तं कथितमित्यर्थ: ॥ केचित्तु सगण इत्य-नन्तरं भवतीत्यध्याहृत्य सहिश्रो इदं सखीसंबोधनपरतया व्याकु-र्वते । परे तु सगणेन सहिश्रो — सहित: रमण: कथित इत्याहु: । रमणमुदाहरति, सेति । शशिना चन्द्रेण रश्रणी — रजनी । पइणा — पत्या भर्तृभूतेनेति यावत् तरुणी शोभाढ्येत्यर्थ: ॥ केचित्तु शोभत इत्यध्याहृत्य शशिना रजनी पत्या तरुणीति पृथग्व्याकुर्वते । र[म]णो निवृत्त: । (E).

१७ - १८ । सगणो रमण: । सहित: कथित: ॥ उ[दाहरति] शशिना रजनी । पत्या तरुणी ॥ (G).

तक्कार[1] जं दिठ्ठ[2] । पंचाल उक्किठ्ठ ॥ १९ ॥ जहा,
सो देउ सुक्खाइ[3] । संघारि[4] दुक्खाइ[5] ॥ २० ॥ पंचाल ।
णरेंद[6] ठवेहु । मइंद[7] करेहु[8] ॥ २१ ॥ जहा,
दुरंत बसंत । सुकंत दिगंत[9] ॥ २२ ॥ मृगेन्द्रः [मइंद] ।

१९-२० । तकारो यत्र दृष्टः । तत्पञ्चालमुत्कृष्टम् ॥ तोऽन्तलघुः । उदाहरति । स ददातु सुखानि । संहरतु दुःखानि ॥ (C).

१९-२० । अथ अक्षरचरणस्य वृत्तस्य पंचमं भेदं पंचालनामकं वृत्तं लक्ष[य]ति, तक्केति । जं — यत्र अक्षरचरणे वृत्ते प्रतिचरणं तकारोऽंतलघुस्तगण इत्यर्थः दिठ्ठ — दृष्टः, स उक्किठ्ठ — उत्कृष्टः पंचालः कथि[त] इति शेषः ॥ तत् पंचालनामकं वृत्तमित्यर्थः । अत्र उत्कृष्ट इति विशेषणं छंदःपूरणार्थमेव । पंचालमुदाहरति, सविति । सो — सः श्रीरामचन्द्र इति शेषः दुक्खाइ — दुःखानि संघारि — संहृत्य, सुखानि देउ — ददातु ॥ पंचालो निवृत्तः । (E).

१९-२० । तक्केति । तकारो यत्र दृष्टः । पंचाल उद्दिष्टः ॥ तकारस्तगणः । उ० । स ददातु [सुखानि] संहरतु दुःखानि ॥ (G).

२१-२२ । नरेन्द्रं जगणं स्थापय । मृगेन्द्रं कथय ॥ उदाहरति । दुरन्तो वसन्तः । कान्तो दिगन्तरे ॥ (C.)

---

१९ — २२ । १ तक्काल (A). २ जद्दिठ्ठ (A & E). ३ सक्खाइ (B), सुक्खाइ (E). ४ संतारि (A), संहारि (B & C). ५ दुःखाइ (E). ६ णरेन्द्र (B & C). ७ मइन्द्र (B). ८ कहेऊ (E & F). ९ Dropt in (B), दिगंतर कंत (E & F).

भो जहि सो सहि[1]। मंदर सुंदर[2] ॥ २३ ॥
जहा, सो हर तोहर[3]। संकट संहर ॥ २४ ॥ मंदर।

२१-२२। अथ अक्षरचरणस्य वृत्तस्य षष्ठं भेदं मृगेन्द्रनामकं वृत्तं लक्षयति, णरेंदेति। भो बुधाः अक्षरचरणे वृत्ते प्रतिचरणमिति शेषः नरेन्द्रं गुरुमध्यं जगणं ठवेऊ—स्थापयत। मइंद—मृगेन्द्रं कहेऊ—कथयत ॥ मृगेंद्रमुदाहरति, दुरंतेति। दुरंतो वसंतः। दिगंतरे कांतः ॥ अतो हे सखि कञ्चिद्युवानमत्रानयेति गूढाभिप्रायायाः प्रोषितभर्तृकाया इदं वचनम्। मृगेन्द्रो निवृत्तः। (E).

२१-२२। णरेंदेति। नरेंद्रं स्थापय। मृगेंद्रं कथय ॥ नरेंद्रो जगणः। उ[दाहरति] दुरंतो वसंतः। दिगंतरे कांतः ॥ (G).

२३-२४। भ आदिगुरुर्यत्र स सखि। मन्दरः सुन्दरः ॥ उदाहरति। स हरस्तव। सङ्कटं संहरतु ॥ (C).

२३-२४। अथ अक्षरचरणस्य छन्दसः सप्तमं भेदं मंदरनामकं वृत्तं लक्षयति, भविति। हे सहि—सखि य[ज]हि—यत्र अक्षरचरणे वृत्ते भो—आदिगुरुर्भगणो भवति, सो—सः सुन्दरः मंदरः तन्मन्दरनामकं वृत्तमित्यर्थः ॥ अत्र सुन्दरेति पादपूरणार्थमेव। मंदरमुदाहरति, सविति। सो—सः हरः शिवः तोहर—युष्माकं संकटं दुःखं संहर क्षपयतु ॥ मन्दरो निवृत्तः। (E).

२३-२४। भो इति। भो यत्र [स] सखि। मंदरः सुंदरः ॥ उ०। सौहार्द्दतो हर संकटं संहर ॥ स हरस्तवेति वा। (G).

२३—२४। १ जहि (C). २ सुंदर (E). ३ तोकर (C).

कमल पभण । सुमुहि[1] णगण[2] ॥ २५ ॥
जहा, रमण[3] गमण । कमण कमण ॥ २६ ॥ कमल ।
चारी[4] हारा[5] अट्टा काला[6] ।
बिसे कसा जाणे तिसा ॥ २७ ॥
जहा, जाआ माआ[7] पुत्तो धुत्तो[8] ।
इसे[9] जाणी किज्जे[10] जुत्तो[11] ॥ २८ ॥ तिसा[12] ।

२५-२६ । कमलं प्रभण । सुमुखि नगणः ॥ उदाहरति । रमण-गमने । कीदृक्कमनीयम् ॥ (C.)

२५-२६ । अथ अक्षरवृत्तस्यांत्यभूतमष्टमं भेदं कमलनामकं वृत्तं लक्षयति, कमलेति । हे सुमुखि णगण—यत्र अक्षरचरणे वृत्ते नगणः सर्वलघुः पतति, तत्कमलं कमलनामकं वृत्तं पभण—प्रभणेत्यर्थः ॥ कमलमुदाहरति, रमणेति । रमण गमण—रमणस्य गमनं रमणगमनं तस्मिन् । कमण [कमण]—कीदृक् कमणीयं न कीदृशमपीत्यर्थः ॥ केचित्तु हे रमण कमण—कुत्र गमण—गमनं क्रियते इति शेष इत्याहुः । कमलं निवृत्तम् । (E).

२५-२६ । कमेति । कमलं प्रभण । सुमुखि नगणः ॥ यत्रेति शेषः । उ[दाहरति] रमण-गमनं । कीदृक्कमनीयम् ॥ (G).

२५—२८ । १ सुमहि (B). २ ण (F). ३ रमण (C). ४ चारी (B). ५ हारी (B). ६ कसा (C), कला (F). ७ मा (C). ८ पुत्ता धुत्ता (A & B), धुत्ता पुत्ता (C). ९ इसे (A), एत्ते (C). १० किज्जा (B), किजे (C). ११ जुत्ता (A, B & C). १२ तीर्षा (B).

२७-२८ । अथ चतुरक्षरम् । चत्वारो हाराः अष्टौ कलाः । द्वौ कर्णौ जाने तीर्णाम् ॥ हारो गुरुः, कर्णो द्विगुरुः, अत्र चाष्टौ कलाः कर्णद्वयञ्च पततीति वस्तुस्थितिमात्रं, गुरुचतुष्केण तीर्णाच्छन्दः तावदपेक्षितम् । उदाहरति । जाया माया धूर्त्ताः पुत्राः । इदं ज्ञात्वा क्रियतां युक्तम् ॥ (C).

२७-२८ । अथ चतुरक्षरस्य प्रस्तारक्रियया षोडश भेदा भवंति, तेषु प्रथमं भेदं तीर्णानामकं वृत्तं लक्षयति, चारीति । यत्र चतुरक्षरचरणे वृत्ते बिस्रे — द्वौ कस्रा — कर्णौ गुरुद्वयात्मकौ गणाविति यावत्, एवं प्रकारेण चारी हारा — चत्वारो हारा गुरवः पतन्ति, तां तिस्रा — तीर्णां जाणे — जानीहि तीर्णानामकं तद्वृत्तं विद्धीत्यर्थः । कीदृशाः हाराः अट्ठा काला — अष्टौ कला येषां ते अष्टकला इत्यर्थः ॥ अत्र चारी हारा अट्ठा कालेति वृत्तपूरणार्थमेव । यत्र प्रतिचरणं कर्णौ गुरुद्वयात्मकौ गणौ भवतः सा तीर्णेति निष्क[र्षः] । क्वचित्तु इट्ठाकारा इति पाठस्तत्र इष्टः पादपूरणार्थमपेक्षित इति यावत् आकारः स्थापनं येषां ते तादृशा इत्यर्थः । तीर्णामुदाहरति, जाआ इति । जाया वधूः [माआ] — माया मायावतीत्यर्थः, पुत्तो धुत्तो — पुत्रो धूर्त्तः । इस्रे — एतत् जाणी — ज्ञात्वा जुत्तो — युक्तं किज्जे — क्रियताम् ॥ कस्यचिदुपदेष्टुः संसारासक्तं प्रति वचनमिदम् । (E).

२७-२८ । चारीति । अथ चतुरक्षरम् । चत्वारो हारा अष्टौ कलाः । द्वौ कर्णौ जाने तीर्णाम् ॥ हारो गुरुः, कर्णो द्विगुरुः । उ० । जाया माया पुत्रो धूर्त्तः । इति ज्ञात्वा क्रियतां युक्तम् ॥ (G).

बस चारि मुद्धि[1] धारि ।
बिण्णि हारि दो स सारि[2] ॥ २९ ॥
जहा, देउ देउ सुम्भ[3] देउ ।
जासु सीस[4] चंद दीस ॥ ३० ॥ धारी ।

२९-३० । वर्णाश्चत्वारः मुग्धे धारिच्छन्दः । द्वौ हारौ देहि परिष्कृत्य ॥ गुरोरनन्तरं लघुरिति परिष्कारः । उदाहरति । देवदेवः शुभं ददातु । यस्य शिरसि चन्द्रो दृश्यते ॥ (C).

२९-३० । अथ चतुरक्षरचरणवृत्तस्यैकादशं भेदं धारीनामकं वृत्तं लक्षयति, बस चारीति । अवहटभा[षा]यां पूर्वनिपातानियमादन्यथानुपपत्त्या स-शब्दस्य हार-शब्दस्य च पूर्वनि[पा]तं विधाय योजनीयं, तथाच यत्र चतुरक्षरचरणे वृत्ते स दो सारि — सद्विश[श]रं हारि बिण्णि — हारद्वयम् । हारो गुरुः तद्द्वयमित्यर्थः । एवं प्रकारेण बस चारि — वर्णचतुष्टयं भवति, हे मुद्धि — हे मुग्धे सा धारि — तद्धारीनामकं वृत्तमित्यर्थः ॥ अयमर्थः, शरशब्दो लघुवाची हारशब्दश्च गुरुवाची, तथाच शरद्वयसहितं हारद्वयं यत्र भवत्येतस्यायं भावः — प्रथमं गुरुस्तदनंतरं लघुः पुनः गुरुः पुनस्तदनंतरं लघुः कर्त्तव्य एवंप्रकारेण चत्वार्य्यक्षराणि धारीच्छन्दसि प्रतिचरणं कर्त्तव्यानि, रगणानन्तरं लघुः कर्त्तव्य इति

२९—३० । १ मुद्ध (A). २ दीस सारि (A, B & C). ३ सुब्भ (B & C), सब्भ (E). ४ दीस (B).

पत्रोहरो गुरुत्तरो[1]।
णगाणित्रा[2] स जाणित्रा[3] ॥ ३१ ॥
जहा, सरस्सई पसस्र[4] हो।
कइत्तत्रा फुरं तत्रा[5] ॥ ३२ ॥ णगाणित्रा[6]। (C).

तु परमार्थ इत्यस्मत्तातचरणोपदिष्टः पन्थाः। धारीमुदाहरति, देविति। जासु—यस्य सीस—शीर्षे चंद—चंद्रः दीस—दृश्यते देउ [देउ]—देवदेवः शंभुरिति शेषः सुब्भ—शुभं देउ—ददातु मह्यमिति शेषः ॥ धारी निवृत्ता। (E).

२९-३०। वसेति। वर्णाश्चत्वारो मुग्धे धारी। द्वौ हारौ द्विशरौ ॥ हारो गुरुः, शरो लघुः, गुरुलघुगुरुलघुभिर्धारी भवतीत्यर्थः। उ०। देवदेवः शुभं ददातु। यस्य शीर्षे चंद्रो दृश्यते ॥ (G).

३१-३२। पयोधरो गुरूत्तरः। नगानिता संज्ञाता ॥ गुरुरुत्तरतः पश्चाद्यस्य। उदाहरति। सरस्वती प्रसन्ना भवति। कवित्वानि स्फुरन्ति तदा ॥ (C).

३१-३२। अथ चतुरक्षरप्रस्ता[र]स्य षष्ठभेदं नगाणिकानामकं वृत्तं लक्षयति, पत्रोहरेति। गुरुत्तरो—गुरूत्तरः गुरुः उत्तरः अग्रे स्थितो यस्यैतादृशः पयोधरो मध्यगुरुर्जगणः यत्र चतुरक्षरचरणे वृत्ते पतति। स—सा नाभा[णगा]णित्रा—नःग[नगा]णिका

३१—३२। १ गुरूतरो (A). २ णगाणिर्श्रा (A). ३ जाणिर्श्रा (A). ४ पसण्णि (A, B & C). ५ फुरन्तहो (B), फुरन्तओ (C). ६ णगाणिश्चा (A), णगाणीश्चा (B).

संमोहा रूअं[1] दिट्ठो सो भूअं ।
बे कण्णा हारा भूअंता सारा[2] ॥ ३३ ॥
जहा, उद्दंडा चंडी दूरित्ता[3] खंडी ।
तेल्लोक्का सोक्खं[4] देउ मे मोक्खं ॥ ३४ ॥ संमोहा ।

जाणिआ — ज्ञातव्या ॥ तत् नगाणिकानामकं वृत्तं ज्ञातव्यमित्यर्थः । नगाणिकामुदाहरति, सरस्सईति । सरस्सई — स[र]स्वती पसण्ण हो — प्रसन्ना यदि भवति । कइत्तआ — कवितानि फुरं — स्फुरंति तआ — तदा ॥ नगाणिका निवृत्ता । (E).

३१-३२ । पओ इति । पयोधरो जगणः गुरूत्तरः । नगाणिका सा ज्ञातव्या ॥ उ[दाहरति] सरस्वती प्रसन्ना भवति । कवित्वं तस्य स्फुरति ॥ (G).

३३-३४ । अथ पञ्चाक्षरा । संमोहारूपं दृष्टं शोभितम् । द्वौ कर्णौ हारः भुवने सारः ॥ संमोहारूपं संमोहाच्छन्दः । उदाहरति । उद्दण्डा चण्डी दुरितखण्डिनी । त्रैलोक्यसुखं ददातु मे मोक्षम् ॥ (C).

३३-३४ । अथ पंचाक्षरस्य प्रस्तारक्रियया द्वात्रिंशद्भेदा भवंति, तत्राद्यं भेदं संमोहानामकं वृत्तं लक्षयति, संमोहेति । बे कण्णा हारा — द्विकर्ण-हारौ यत्र पंचाक्षरचरणे वृत्ते पततः, कर्णो गुरुद्वयात्मको गणः, हारो गुरुस्तथा पंचगुरवो यत्र भवंतीति भावः,

---

३३—३४ । १ रूअं (B), रूपं (C). २ भूवण्ण सारो वे कण्णा हारो (A), वे कण्णा हारो भूअण्णा सारो (B), वे कण्णा हारो भूयण्णा सारो (C). ३ दुरित्ता (A & F), दूरीत्ता (C). ४ सोक्खं (B), सुक्खं (C).

आई[1] हि अंते हारे[2] सजुत्ते[3] ।
मज्झेक्क[4] गंधो हारीअ बंधो[5] ॥ ३५ ॥
जहा, जा भत्ति भत्ता[6] धम्मेक्क[7] चित्ता ।
सा होइ णारी धण्णा पिआरी ॥ ३६ ॥ हारी[8] ।

भूअंता सारा — भुवनसारं, सो — तत् भूअं — भूमौ संमो[हा]-रूअं — सम्मोहास्वरूपं दिट्ठो — दृष्टं ॥ तत्संमोहानामकं वृत्तमित्यर्थः । सम्मोहामुदाहरति, उद्दण्डेति । दूरित्ता खंडी — दुरितखंडिनी उद्दण्डा — उद्भटा महिषासुरादिवधेनेति भावः चंडी — चंडिका । तेधो[लो]क्का सोक्खं — त्रैलोक्यसुखं मोक्खं — मोक्षं त्रैलोक्यसुख-रूपमोक्षमित्यर्थः मे — मह्यं देउ — ददातु ॥ केचित्तु तेलोक्केति षष्ठ्यन्तं पदं कृत्वा त्रैलोक्यस्य सुखं च पुनः मे मह्यं ददात्विति व्याकुर्वते । संमोहा निवृत्ता । (E).

३३-३४ । अथ पंचाक्षरम् । संमो इति । संमोहारूपं दृष्टं तद्भूतम् । द्वौ कर्णौ हारो भुवनसारः ॥ कर्णो द्विगुरुः । यथा, उद्भटा चंडी दुरितखंडिनी । त्रैलोक्यसौख्यं ददातु मे मोक्षम् ॥ (G).

३५-३६ । आदावन्ते हारेण युक्तः । मध्ये एकगन्धः हारीतबन्धः ॥ गन्धो लघुः । आदौ गुरुद्वयमन्ते च गुरुद्वयं मध्ये लघुर्यत्र तद्धारीतबन्धश्छन्दः । उदाहरति । या भक्तियुक्ता धर्मैकचित्ता । सा भवति नारी धन्या प्रेयसी ॥ (C).

३५—३६ । १ आइ (A & B). २ हार (A), कण्ण (E & F). ३ संजुत्ते (E & F). ४ मज्झेक्क (C). ५ बंदी (E & F). ६ जुत्ता (A, B & C). ७ Dropt in (B). ८ हारीतबन्ध (B).

पिंगल[१] दिट्ठो भ इइ[२] सिट्ठो ।
कस बि[३] दिज्जे[४] हंस मुणिज्जे[५] ॥ ३७ ॥
जहा, सो मह[६] कंता दूर दिगंता ।
पाउस आवे चेउ चलावे[७] ॥ ३८ ॥ हंस ।

३५-३६ । अथ पंचाचरस्य पंचमं भेदं हारीतनामकं वृत्तं लचयति, आईति । आईहि — आदौ अंते — चरणसमाप्तौ च कस सजुत्ते — कर्णसंयुक्तं गुरुद्वययुक्तमित्यर्थः । मझ्झेक गंधो — मध्येकगंधं मध्ये कर्णद्वयमध्ये एकः गंधो लघुर्यत्र तादृशमित्यर्थः, तत् हारीअ छंदो — हारीतच्छन्दः पिंगलेन कथितमिति शेषः ॥ यत्र प्रतिचरणं प्रथमतो गुरुद्वयं तत एको लघुस्ततश्च गुरुद्वयं भवति, तत् हारी[त]नामकं वृत्तमिति निष्कृष्टार्थः । कुत्रचित् हारे सजुत्ते इति पाठस्तत्र हाराभ्यां संयुक्तमिति व्याख्येयम् । हारीतमुदाहरति, जा भत्तीति । जा भत्ति भत्ता — या भर्तृभक्ता धम्मेक्क चित्ता — धर्मैकचित्ता । सा नारी स्त्री धणा पिआरी — धन्यप्रिया धन्यपुरुषस्य प्रिया गृहिणीत्यर्थः होइ — भवति ॥ केचित्तु धणेति भिन्नं पदं कृत्वा सा नारी धन्या प्रिया च भर्तुरिति शेषः भवतीति योजयंति । हारीतं निवृत्तम् । (E).

३५-३६ । आईति । आदावंते कर्णसंयुक्तं । मध्येकगंधो[धं]

३७—३८ । १ पिम्पल (B). २ भ माण (B), भ हेइ (E). ३ कण दु (A), कष दु (B & C). ४ दिज्जो (A, B & C). ५ मुणिज्जो (A, B & C). ६ चक्क (A), मभ्भु (B & C). ७ डोलावे (A), दुलावे (B), लुलावे (C).

हारीतं छंदः ॥ कर्णो गुरुद्वयं, गंधो लघुः । यथा । या भर्त्तृभक्ता धर्मैकचित्ता । सा भवति नारी धन्या प्रिया ॥ (G).

३७-३८ । पिङ्गलदृष्टः भं दत्त्वा सृष्टः । कर्णं दत्त्वा हंसो ज्ञायते ॥ हंसनामच्छन्दः । यत्र भगणानन्तरं गुरुद्वयम् । उदाहरति । स मम कान्तः दूरदिगन्ते । प्रावृडागता चित्तं लोलते[ति] ॥ (C).

३७-३८ । अथ पंचाक्षरस्य प्रस्तारस्य सप्तमं भेदं हंसनामकं वृत्तं लक्षयति, पिंगलेति । भ — आदिगुरुर्भगण इति यावत्, कस वि — कर्णोऽपि गुरुद्वयात्मको गणोऽपि यत्र पंचाक्षरचरणे वृत्ते दिज्जे — दीयते, पिंगल दिट्ठो — पिंगलदृष्टः सिट्ठो — सृष्टः पिंगलेनेति भावः, सः हंस — हंसः मुणिज्जे — ज्ञायते ॥ यदीयचरणे भगणोत्तरं गुरुद्वयं भवति तत् हंसनामकं वृत्तमिति निष्कृष्टोऽर्थः । अत्र इद इति इकारस्य 'ए ओ सुद्धा अ वस मिलिआ वि लहू' पूर्वमुक्तत्वाल्लघुत्वम् । [Vide श्लोक ५, p. 7.] पिंगल दिट्ठो सिट्ठो इति पदद्वयं पादपूरणार्थमिति द्रष्टव्यम् । हंसमुदाहरति, सो महेति । सो — सः मह — मम कंता — कांतः धव इत्यर्थः दूर [दिगंता] दूरे [दिगन्ते] गतोऽस्तीति शेषः । अतः पाउस — प्रावृट् आवे — आयाति, चेउ — चेतः चलावे — चालयति व्याकुलयतीत्यर्थः ॥ अतः किमाचरणीयं मया, त्वं मे शिक्षयेति गूढाभिप्रायायाः प्रोषितभर्तृकायाः प्रियसहचरीं प्रति वाक्यमिदम् । हंसो निवृत्तः । (E).

३७-३८ । पिंगेति । पिंगलदृष्टो भं दत्त्वा सृष्टः । कर्णोऽपि देयो हंसो ज्ञेयः ॥ यथा, स मम कांतः दूरदिगंते । पर्यन्यआयातः चेतश्चलति ॥ (G).

सुपिअ गण[1] सरस[2] गुण[3] ।
सरह[4] गण[5] जमअ[6] भण[7] ॥ ३९ ॥
जहा, पवण वह[8] सरिर[9] दह[10] ।*
मअण हण तवइ[11] मण ॥ ४० ॥ जमक ।

३९-४० । सुप्रियं भण सरसं शृणु । शराणां गणं यमकं भण ॥ सुप्रियो द्विलघुः, रसेन त्रिलघुना [सह] वर्त्तमानं सरसमनुजानीहि, शराणां लघूनां गणं समूहम् । उदाहरति, पवणो[नो] वहति शरीरं दहति । मदनो हन्ति तपते मनः ॥ (C).

३९-४० । अथ पंचाक्षरप्रस्तारस्यांतिमं भेदं यमकनामकं वृत्तं लक्षयति, सुपीति । हे सुगुण शोभनगुणविशिष्ट शिष्य यत्र पंचाक्षरचरणे वृत्ते सरह गण—श्लाघ्यगणौ अन्यगणेभ्यः श्लाघ्याविर्त्यथः सुपिअ गण—सुप्रियगणौ द्विलघुकौ गणावित्यर्थः, ततश्च सर—शरः लघ्वात्मको गणः पतति, तत् यमकं भण पठेत्यर्थः ॥ पंच लघवो यत्र प्रतिचरणं भवंति तत् यमकमिति पिंडार्थः, सरह गणेति तु पदं पद्यपूरणार्थमेव । यमकमुदाहरति, पवणेति । पवण—पवनः वह—वाति, अत इति शेषः सरिर—शरीरं डह—दह्यते । मअण—मदनः हण—हंति, अत इति शेषः

३९—४० । १ भणं (A & C). २ सरसु (F). ३ गण (A & B), मण (C). ४ सरस (B), सुरह (F). ५ मण (B). ६ जमक (B & C). ७ गण (B), गुण (C). ८ बह (E & F). ९ सरीर (A). १० डह (E), दह (F).
* 1st half dropt in (C). ११ तपइ (C).

बाराहा[1] मत्ता जं कण्णा तिण्णा[2] होत्तं[3]।
हारा छक्का बंधो[4] सेसा राआ[5] छंदो ॥ ४१ ॥
जहा, जुझ्झंतो[6] उद्दामे कालिका[7] संगामे।
णच्चंतो हम्मारो[8] दूरित्ता[9] संहारो[10] ॥ ४२ ॥ सेसा।

मण—मनः तवइ—तपति ॥ सर्वे भेदा वक्तुमशक्या अतः कियंतो भेदाः प्रदर्शिताः, शेषभेदास्तु सुधीतिः[भिः] एवमूहनीयाः। (E).

३९-४०। सुपीति। सुप्रियगणौ शरः सुगुण। सुरहस्यगुणः यमकं भण ॥ [सु]प्रियो द्विलघुः, शरो लघुः, सुश्लाघ्यगुण सुगुणेति संबुद्धिः। यथा, पवनो बह्नः शरीरं दहति। मदनो हंति तपति मनः ॥ (G).

४१-४२। अथ षड्चरा। द्वादश मात्रा यत्[त्र] कर्णास्त्रयो भवन्ति। हारैः षड्भिर्बद्धं शेषा[ष]राजच्छंदः ॥ द्वादश मात्रा इति स्पष्टार्थं, कर्णो द्विगुरुः, हारो गुरुः, बद्धं युक्तम्। उदाहरति। युध्यमाना उद्दामा कालिका संग्रामे। नृत्यन्ती संहरतु दुरितमस्माकम् ॥ (C).

४१-४२। अथ षड्चरचरणस्य पद्यस्य प्रस्तारक्रियया चतुःषष्टिभेदा भवंति, तत्राद्यं भेदं शेषराजनामकं वृत्तं लक्षयति, बाराहेति। बाराहा मत्ता—द्वादशमात्रकाः द्वादश मात्रा येषा-

---

४१—४२। १ बाराहो (C). २ तिण्णा (A & B). ३ होतं (A), कण्णो हो तिण्णा तं (C), होज्जं (F). ४ बंधो (A). ५ रूआ (A). ६ जुज्झंतो (B & C). ७ कलिका (A). ८ & १० transposed in (A, B & C). ८ हम्मारे (B). ९ दुरित्ता (F). १० संहारे (B).

पिअ[1] तिल्ल[2] धुअं[3] सगणेण जुअं।
छअ[4] बस पओ कल अंट्ठ[5] धओ[6] ॥ ४३ ॥
जहा, पिअ भत्ति[7] पिआ गुणवंत[8] सुआ[9]।
धणजुत्त[10] घरा बहु सुक्ख[11] करा ॥ ४४ ॥ तिल्ल[12]।

सेतादृशा इत्यर्थः, तिसा — त्रयः कसा — कर्णा गुरुद्वयात्मका-गणाः जं — यत्र षड्च[र]चरणे वृत्ते होत्तं — भवंति। हारा छक्का बंधो — हारषट्कबद्धं गुरुषट्कयुक्तमित्यर्थः, तत् सेसा राआ छंदो — शेषराजच्छन्दः॥ तत् शेषराजनामकं वृत्तमित्यर्थः। अन्ये तु द्वादश मात्राः त्रयः कर्णा यत्र भवंतीति पृथगेव योजयंति। अत्र कर्णमात्राज्ञापकं वृत्तमात्राज्ञापकं वा बाराहा मत्तेति पदं, हारा छक्का बंधो इति च पदं, पद्यपूरणार्थमेव। यत्र कर्णत्रयं प्रतिचरणं पतति तत् शेषराजनामकं वृत्तमिति लक्षम्। शेषराजमुदाहरति, जुज्झंतीति। उद्दामे — उद्भटे संगामे — संग्रामे, जुज्झंती — युद्धं कुर्वती णच्चंती — नृत्यन्ती कालिक्का — कालिका हम्मारो — अस्माकं दूरित्ता — दुरितानि संहारो — संहरतु॥ शेषराजो निवृत्तः। (E).

४१-४२। अथ षडचरम्। बारेति। द्वादश मात्रा यत्र कर्णा-

४३—४४। १ तिस (F). २ डिल्ल (A), भिख (B), डिख (C). ३ धुवं (E). ४ छह (A). ५ कल कठ्ठ (A), कल चट्ठ (B), कल हट्ठ (C). ६ ठओ (A & B), धुओ (C), कओ (F). ७ पत्ति (B). ८ गुणमंत (A), गुणमणु (B & C). ९ सूआ (E). १० धणमंत (E & F). ११ सोक्ख (B), सूक्ख (E), दुक्ख (F). १२ डिल्ला (A), भिखा (B), डिखा (C).

अक्खरा जं छआ[1] पाअ पाअं ठिआ[2]।
मत्त पंचा दुणा[3] विण्णि[4] जोहा गणा ॥ ४५ ॥
जहा, कंस संहारणा[5] पक्खि संचारणा[6]।
देवई[7] डिंबआ देउ मे णिब्भआ[8] ॥ ४६ ॥ विजोहा[9]।

स्त्रयो भवंति। हारषट्कबंधः शेषराजच्छन्दः॥ कर्णौ द्विगुरुः। यथा। युध्यंती[युध्यमाना] उद्दामे कालिका संग्रामे। नृत्यंती अस्माकं दुरितसंहारा ॥ (G).

४३-४४। प्रिये डिल्ला ध्रुवं सगणेन युता। षड्वर्णपदा कलाः अष्ट स्थिताः॥ ध्रुवं निश्चितं। षड्वर्णपदकथनात् सगणद्वयमर्थात् प्राप्यते। उदाहरति। प्रियभक्ता प्रिया गुणवन्तः सुताः। धनवन्तो गृहाः बहुसुखकराः ॥ (C).

४३-४४। अथ षड़क्षरचरणस्य वृत्तस्याष्टाविंशतितमं भेदं तिल्लनामकं वृत्तं लक्षयति, पिअ इति। यस्य पओ—पदे छअ वस—षड्वर्णाः कल अट्ठ—कलाः अष्टौ धओ—धृताः, सगणेण—गुर्वन्तगणेन जुअं—युतं, तत् हे प्रिय ध्रुवं विनिश्चितं तिल्ल—तिल्लं तिल्लनामकं वृत्तमित्यर्थः॥ छअ वसेत्यनेन सगणद्वयं युक्तं

४५—४६। १ जे छआ (A & B), जेच्छआ (C). २ पाअ पाअठ्ठिआ (A), पाअ पाअट्ठिआ (B), सो विजोहा पआ (C). ३ पंचा दुआ (A), पंच दुआ (F). ४ विणि (A & F). ५ संघारणा (A), संहारिणा (C). ६ संचारणा (A), संचारिणा (B). ७ देवइ (A). ८ मे लक्खिआ (A), ते णिब्भआ (B), मे णिब्भआ (C). ९ विज्जोहा (A).

भवतीत्युक्तं भवति, मात्राकथनं तु पादपूरणार्थमेव। तिल्लमुदाहरति, पिअ इति। पिअ भत्ति — प्रियभक्ता पतिव्रतेति यावत् पिआ — प्रिया गृहिणीत्यर्थः गुणवंत — गुणवान् सूआ — सुतः। धणमंत — धनवत् घरा — गृहम् एतत्सर्वमिति शेषः बहुसुक्खकरा — बहुसुखकरम्॥ तिल्लच्छन्दो निवृत्तम्। (E).

४३-४४। अथ षडक्षरम्। गायत्री। पिअेति। प्रियं तिल्लं भुवं सगणेन युतं। षड्वर्णपदं कलाष्टगतम्॥ षडुक्त्या सगणद्वयं कार्यम् इति सूच्यते। यथा। प्रियभक्ता प्रिया गुणवंतः सुताः। धनवंतो गृहाः बहुसौख्यकराः॥ (G).

४५-४६। अक्षराणि यत्र [षट्] पदे पदे स्थितानि। मात्राः पञ्च द्विगुणिता इत्युक्तं, पञ्च मात्राः कीदृश्य इत्याकांक्षायां द्वियोधेति नाम निर्व्वर्त्तयति। तथाहि द्वौ योधौ यत्र इत्यर्थान्मध्यलघुपञ्चकलो लभ्यते योधशब्दस्य तद्वाचकत्वात्॥ उदाहरति। कंससंहारणः पक्षिसंचारणः। देवकीडिम्भको ददातु मे निर्भयम्॥ (C).

४५-४६। अथ षडक्षरचरणवृत्तस्यैकोनविंशति[त]मं भेदं विज्जोहानामकं वृत्तं लक्षयति, अक्खरेति। जं — यत्र पाअ पाअं — पादे पादे छआ — षट् अक्खरा — अक्षराणि ठिआ — स्थितानि। पंचा दुणा — पंच द्विगुणिता दशेत्यर्थः मत्त — मात्राः यत्र पादे पादे स्थिता इति पूर्वेणान्वयः, अवहट्टभाषायां लिंगादिव्यत्यासे दोषाभावात्। अथ गणनियममाह, विण्णीति। विण्णि — द्वौ जोहा गणा — योद्धृगणौ मध्यलघुरगणावित्यर्थः पादे पादे स्थिताविति पूर्वेणान्वयः, तत् विज्जोहाख्यं वृत्तमि[ति] गणनाम्नैव छन्दोनाम-

ठउ चउरंसा[1] फणिवइ भासा ।
दिअवर कण्णो फुल[2] रस वण्णो ॥ ४७ ॥
जहा, गवरिअ[3] कंता अभिणउ संता ।
जइ परसण्णा[4] दिअ महि धण्णा ॥ ४८ ॥
जहा वा, (E & F), भुवण अणंदो[5] तिहुअण[6] कंदो[7] ।
भमर सवण्णो स जअइ[8] कण्णो ॥ ४९ ॥ चउरंसा[9] ।

कथनं बोध्यमिति संप्रदायः ।१३। विज्जोहामुदाहरति, कंसेति । कंससंहरणः पक्षिसंचरणः गरुडगामीत्यर्थः । देवई डिंभआ— देवकीडिंभकः मे—मह्यं णिब्भआ—निर्भयं देउ—ददातु ॥ विज्जोहा निवृत्ता । (E).

४५-४६ । अक्खेति । अक्षराणि यत्र षट् पादपादस्थितानि । मात्राः पंच द्विगुणाः द्वौ योद्धगणौ, रगणौ इत्यर्थः, गणनाम्नैव विज्जोहेति छंदोनाम ज्ञेयमिति संप्रदायः ॥ [यथा] कंसहंसा-रगणः [?] । देवकीडिंभको ददातु मे निर्भयम् ॥ (G).

४७, ४८ । स्थापयतु चतुरंशां फणिपतिर्भाष[ष]ते । द्विजवर-कर्णौ स्फुटं रसवर्णौ ॥ फणिपतिर्भाष[ष]ते चतुरंशाच्छन्दः स्थापय यत्र स्फुटं यथा स्यात्तथा [स]द्विजवरकर्णः षड्वर्णो भवति । द्विजवर-

---

४७—४९ । ४८ श्लोक is not given in MSS. (B & C). १ ठइ चउवसा (A). २ फुड (B). ३ गउरिअ (A). ४ परसणा (A). ५ पअण सुणंदो (A), पअण अणंदो (B & C). ६ तिहुअण (E & F). ७ वंदो (B). ८ जअइ से (E), जअइ स (F). ९ चउवंसा (A).

स्रतुर्लघुः, कर्णो द्विगुरुः । उदाहरति । नयनानन्दस्त्रिभुवनकन्दः । भ्रमरसवर्णः स जयति कृष्णः ॥ कन्दो मूलं, वंदो इति पाठे वन्द्य इत्यर्थः । (C).

४७-४८ । अथ षडक्षरचरणस्य वृत्तस्य षोडशतमं भेदं चतुरंसानामकं वृत्तं लक्षयति, ठविति । दिअवर कण्णो — द्विजवरकर्णौ द्विजवरश्चतुर्लघ्वात्मको गणः, कर्णः गुरुद्वयात्मको गणस्तावित्यर्थः यत्र प्रतिचरणं पतत इति शेषः, फुल रस वण्णो — स्फुटरसवर्णां प्रकटषड्क्षरामिति यावत् फणिवइ भासा — फणिपतिभाषितां तां चउरंसा — चतुरंसां ठउ — स्थापय ॥ चतुरंसानामकमेतद्वृत्तं विद्धीत्यर्थः ।१५। चतुरंसामुदाहरति, गवरिअ इति। अभिणउ संता — अभिनयश्रांतः, अभिनयस्तांडवचेष्टाविशेषः, गवरिअ कंता — गौरीकांतः । जइ — [यदा] परसण्णा — प्रसन्नः, तदेति शेषः मह्नि — मह्यं धण्णा — धनं दिअ — ददातु ॥ अथवा अभिणउ — अभिनये संता — सन् वर्त्तमान इत्यर्थः जइ परसण्णा — यस्य प्रसन्नः, स इति शेषः दिअ मह्नि धण्णा — द्यावापृथिव्योः धन्यः यतस्तांडवानंदितः शिवोऽदेयमपि ददातीति लोकप्रसि[द्धि]रिति भावइति वा व्याख्येयम् ।१६। द्वितीयम् उदाहरणं । श्लोकस्तु निगदेनैव व्याख्यातः । चतुरंसा निवृत्ता ।१७। (E).

४७-४८ । ठ इति । स्थापय चतुरंसं फणिपतिभाषितम् । द्विजवरः कर्णः स्फुटरसवर्णः ॥ चतुर्लघुर्द्विगुरुश्च । यथा । गौर्याः कांतोऽभिनयश्रांतः । यदि प्रसन्नः देहि मह्यं धनम् ॥ यथा वा । भुवनानंदस्त्रिभुवनकंदः । भ्रमरसवर्णो जयति स कृष्णः ॥ (G).

कामावश्रारेण[१] श्रद्धेण पाएण ।
मत्ता दहा सुद्ध मंथाण सो बुद्ध[२] ॥ ५० ॥
जहा, राश्रा[३] जहा लुद्ध पण्डीश्र[४] हो मुद्ध ।
कित्ती[५] करे रक्ख[६] सो बाद[७] उप्पेक्ख[८] ॥ ५१ ॥
मंथाण ।

५०-५१ । कामावतारस्यार्द्धेन पादेन । मात्रा दश शुद्धाः मन्थानं बुध्यस्व ॥ शारङ्गरूपच्छन्दः कामा[व]तार इत्यपि नाम, तच्च तगणश्च[च]तुष्टयात्मकं, तस्यार्द्धं तगणद्वयात्मकं, तथाचात्र तगणद्वयात्मकः पाद इति पर्य्यवस्यति, तगणस्य पञ्चकलात्मकत्वाच्च मात्रा दश भवन्ति तन्म[न्था]नच्छन्द इत्युक्तम् । उदाहरति । राजा यत्र लुब्धः पण्डितो भवति मुग्धः । कीर्त्तिं करे रत्न तद्राज्यमुपेचस्व ॥ मुग्धो मूढः हिताहितज्ञानशून्यः । (C).

५०-५१ । अथ षडक्षरचरणस्य वृत्तस्य सप्तचिंशत्तमं भेदं मंथाननामकं वृत्तं लक्षयति, कामेति । कामावश्रारस्स — कामावतारस्य तगणचतुष्टयनिर्मितद्वादशाक्षरचरणस्य सारंगरूपकापरनाम्न इत्यर्थः श्रद्धेण पाएण — अर्द्धेन पादेन अंतलघुतगणद्वयेनेत्यर्थः । सुद्ध दहा मत्ता — शुद्धा दश मात्राः यत्र षडक्षरचरणे वृत्ते प्रतिचरणं पतंति, सो — सः मंथाण — मंथानः बुज्झ — ज्ञातव्यः ॥ अथवा अवहट्टभाषायां लिंगविभक्तिवचनव्यत्यासे दोषाभावात् सो — तं

५०—५१ । १ कामावश्रारस्स (E & F). २ बुद्ध (B), बुज्झ (E), बुज्झ (F). ३ राजा (F). ४ पंडित्त (A), पण्डित्त (C). ५ कीत्ती (C). ६ रक्ख (A), कक्ख (B), रत्न (C). ७ बाद (B), राज्ज (C). ८ उपेक्ख (F).

खडा[1] बद्ध बद्धो[2] भुअंगा[3] पअद्धो[4] ।
पआ पाअ चारी कही संखणारी[5] ॥ ५२ ॥
जहा, गुणा[6] जस्स सुद्धा बहू[7] रूअमुद्धा ।
घरे बित्त जग्गा[8] मही तासु[9] सग्गा[10] ॥ ५३ ॥
संखणारी ।

मंथाण – मंथानं बुज्झ – विद्धीति वा व्याख्येयं, तगणद्वयचरणे मंथान इति तु निष्कृष्टार्थः । वर्णवृत्ते चात्र मात्राकथनं पद्यपूरणार्थमेव ।१८। मंथानमुदाहरति, राआ इति । जहा – यत्र राआ – राजा लुद्ध – लुब्धः पंडीअ – हे पंडित मुद्ध – मुग्धः हो – भव । हो इति देशीयं भवेत्यर्थे प्रसिद्धं । कित्ती – कीर्त्तिं करे रक्ख – रक्ष, सो वाद – [तं वादं] उप्पेक्ख – उपेक्षस्व ॥ यत्र राजा कृपणस्तत्र विवदंतं[दमानं] जनमुपेक्ष्य पण्डितेनापि त्वया निजकीर्त्तिमिच्छता मूर्खेण भवितव्यमिति कस्यचित् पण्डितं प्रत्युपदेशः । मंथानो निवृत्तः ।१९। (E).

५०-५१ । कामेति । कामावतारस्यार्द्धेन पादेन । मात्रा दश शुद्धाः मंथानः स बोध्यः ॥ कामेति तगणद्वयं पाद इत्यर्थः । [यथा] राजा यत्र लुब्धः पंडित भव मुग्धः । कीर्त्तिं करे रक्ष तं वादम् उपेक्षस्व ॥ (G).

५२—५३ । १ खा (B), च्छ्या (C). २ सुद्धा (A), बद्धा (C). ३ भुजंगा (E). ४ पअद्धा (A & C). ५ सक्खणारी (A & C). ६ गुणा (A). ७ Dropt in (B), बङ्क (F). ८ जग्गे (A), लग्गा (B). ९ तस्स (A & B), तासु (E). १० सग्गे (A).

५२-५३। षड्वर्णबद्धं भुजङ्गपादार्द्धम्। प्राप्ताश्चत्वारः पादाः कथ्यते शङ्खनारी॥ भुजङ्गो भुजङ्गप्रयातं। तथाच भुजङ्गप्रयात-पादार्द्धं षड्वर्णं शङ्खनारी कथ्यते, तादृशा एव यत्र पादाश्चत्वार इत्यर्थः। भुजङ्गप्रयातं यगणचतुष्टयेन भवति, तदर्द्धं यगणद्वयमिति बोध्यम्। उदाहरति। गुणा यस्य शुद्धा वधूः रूपमुग्धा। गृहं वित्तजाग्रत् मही तस्य स्वर्गः॥ रूपमुग्धा अतिशयरूपवती, जाग्रदित्यनेन कदाचिन्न्यूनता नास्तीत्यर्थः। घरा वित्त जग्गा इति पाठे गृहा जाग्रद्वित्ता इत्यर्थः। (C).

५२-५३। अथ षडक्षरचरणस्य वृत्तस्य दशमं भेदं शंखनारी-नामकं वृत्तं लक्षयति, खडेति। खडा वस बद्धो — षड्वर्णबद्धा भुअंगा पअद्धो — भुजंगप्रयातार्द्धं। पत्ता — प्राप्ता, आदिलघुयगण-द्वयनिर्मितैकैकचरणेत्यर्थः, पाअ चारी — पादचतुष्टया शंखनारी कही — कथिता॥ अत्र पाअ चारीति पदं पद्यपूरणार्थमथवाग्रे षोड़शचरणस्यापि भुजंगप्रयातस्य वक्ष्यमाणत्वात्तदर्द्धाष्टचरणनिषेधार्थ-मिति द्रष्टव्यम्। आदिलघुयगणद्वयचरणा शंखनारीति तु समुदा-यार्थः।२०। शंखनारीमुदाहरति, गुणेति। जस्स — यस्य गुणाः [शुद्धाः] दोषासंवलिताः बहू — वधूः रूअमुद्धा — रूपमुग्धा अतिसुंदरीति यावत्। घरे — गृहे बित्त — वित्तं धनमिति यावत् जग्गा — जाग्रत् सदा परिपूर्णमिति यावत्, तासु — तस्य मही पृथ्वी सग्गा — स्वर्गः॥ यस्यैतत्सर्वं स भूमावपि स्वर्गसुखमनुभवतीत्यर्थः। घरा बित्त जग्गेति क्वचित्पाठः, तत्र गृहा जाग्रद्वित्ता इति प्राकृते पूर्वनिपातानियमाद्व्याख्येयम्। शंखनारी निवृत्ता।२१। (E).

धअं सर बीअ मणीगुण तीअ[१] ।
दई[२] लहु अंत स मालइ कंत ॥ ५४ ॥
जहा, करा पसरंत बहू गुणवंत[३] ।
पफुल्लिअ कुंद[४] उगो[५] सहि चंद ॥ ५५ ॥ मालती ।

५२-५३ । खड़ेति । षड्वर्णबद्धा भुजंगप्रयातार्द्धा । प्राप्ता पादचतुष्टयं कथ्यतां शंखनारी ॥ यगणद्वयं कार्यमित्यर्थः । यथा । गुणा यस्य शुद्धा वधूः रूपमुग्धा । घरे [गृहे] वित्तं जाग्रत् मही तस्य स्वर्गः ॥ (G).

५४-५५ । ध्वजः शरौ द्वौ मणिगुणस्तृतीये । स्थितो लघुरन्ते सा मालती कान्ता ॥ ध्वज आदिलघुस्त्रिकलः, शरो लघुर्मणिगुणो हारः, तेनान्ते गुरुर्लघुर्लभ्यते । कान्ता कमनीया, मालती छन्दोनाम । उदाहरति । कराः प्रसरन्ति बहुगुणवन्तः । प्रफुल्लितं कुन्दं उद्यतः सखि चन्द्रः ॥ (C).

५४-५५ । अथ षडक्षरचरणवृत्तस्य षट्चत्वारिंशत्तमं भेदं मालतीनामकं वृत्तं लक्षयति, धअमिति । यत्र षडक्षरचरणे वृत्ते प्रथमं धअं—ध्वजः लघ्वादिस्त्रिकलो गण इत्यर्थः द्वितीयस्थाने च सर बीअ—शरद्वयं लघुद्वयमित्यर्थः तीअ—तृतीये स्थाने इति शेषः लहु अंत—लघ्वंतः लघुरंते यस्य तादृश इत्यर्थः मणीगुण—मणीगुणः हारो गुरुरित्यर्थः दई—दीयते, इदं च यथायथं

५४—५५ । १ मणीगुण बंत (E). २ रई (A, B & C). ३ गुणमंत (A & C). ४ कुन्द (B). ५ उगू (A & C), उगी (B).

दिअवर[1] किअ भणहि[2] सुपिअ[3] ।
दमणअ गुणि[4] फणिवइ भणि[5] ॥ ५६ ॥
जहा, कमल णअणि अमिअ बअणि[6] ।
तरुणि घरणि[7] मिलइ सुपुणि[8] ॥ ५७ ॥ दमणक ।

योजनीयं, सा कंत — कांता सुंदरीति यावत् मालइ — मालती ॥ तन्मालतीनामकं वृत्तमित्यर्थः । केचित्तु कंत इति कांतासंबोधनपरतया व्याख्यायते । मालतीमुदाहरति, करेति । सहि — हे सखि बहु गुणवंत — बहुगुणवंतः प्रासादाह्लादकत्वाद्यनेकगुणयुक्ता इत्यर्थः करा — किरणाः पसरंत — प्रसरंति, कुंद — कुंदाः पफुल्लिअ — प्रफुल्लिताः यतः, अतः चंद — चन्द्रः उगो — उदित इति ज्ञायत इति शेषः ॥ मालती निवृत्ता । २२ । (E).

५४-५५ । धअमिति । ध्वजः शरद्वयं मणिगुणस्तृतीयः । दत्त्वा लघुमंते सा मालती कांता ॥ ध्वजो लघ्वादिस्त्रिकलः, मणिगुणो दीर्घः, शरो लघुः । लघुगुरू लघुद्वयं दीर्घो लघुरिति । यथा । कराः प्रसरंति बहुगुणवंतः । प्रफुल्लिताः कुंदाः उदितः सखि चंद्रः ॥ (G).

५६-५७ । द्विजवरं दत्त्वा भण सुप्रियम् । दमनकं गणय फणिपतिर्भणति ॥ द्विजवरश्चतुर्लघुः । उदाहरति । कमलनयना अमृतवदना । तरुणी गृहिणी मिलति सुपुण्येन ॥ (C).

५६—५७ । दिजवर (F). २ भणइ (A & C), भणसि (B). ३ सुपिअ (E).
४ गुण (A & C), गणु (B). ५ भणु (B). ६ वदणि (C). ७ घरिणि (A, B & C). ८ जु पुणि (A), ज पुणि (B), सुपुणि (E).

चारि हार किज्जही[१] तिसि[२] गंध दिज्जही[३]।
सत्त अक्खरा ठिआ सा समाणिआ पिआ ॥५८॥
जहा, कुंजरा चलंतआ पव्वआ पलंतआ।
कुम्म पिट्ठि[४] कंपए[५] धूलि सूर झंपए[६] ॥५९॥
समाणिआ[७]।

५६-५७। अथ षडक्षरचरणवृत्तस्य चतुःषष्टितममंतिमं भेदं दमनकनामकं वृत्तं लक्षयति। दिअवर — द्विजवरं चतुर्लघ्वात्मकं गणमिति यावत् किअ — कृत्वा, सु[सु]पिअ — सुप्रियं लघुद्वयात्मकं गणमिति यावत् भणहि — कथय। दमणअ गुणि — दमनकं गुणय जानीहीति यावत् इति फणिवइ — फणिपतिः भणि — भणति॥ न[गण]द्वययुक्तं दमनकनामकं वृत्तमिति फलितार्थः।२४। दमनकमुदाहरति, कमलेति। कमल णअणि — कमलनयना अमिअ वअणि — अमृतवचना। तरुणि — तरुणी घरणि — गृहिणी भार्येति यावत् सु[सु]पुणि — सुपुण्येन मिलइ — मिलति॥ मिलइ ज पुणीति क्वचित्पाठस्तत्र मिलति यदि पुनरित्यनंतरं तदा तां विहाय कुत्रापि न गमिष्यामीत्यध्याहृत्य व्याख्येयम्। दमनको निवृत्तः।२५। इति षडक्षरं वृत्तम्। (E).

५६-५७। दिअ इति। द्विजवरं कृत्वा भण सुप्रियं। दमनकं

५८—५९। १ किज्जिहि (E), किज्जिही (F). २ तिणि (A). ३ दिज्जिहि (E). ४ पिट्ठ (B), पीठि (C). ५ कम्पिए (C). ६ झम्पिए (C). Last quadrant dropt in (B). ७ समानिका (A & B).

जानीहि फणिपतिर्भणति ॥ द्विज[वर]श्चतुर्लघुः, सुप्रियो द्विलघुः, षड्लघवः । यथा । कमलनयना अमृतवचना । तरुणी गृहिणी मिलति सुपुण्येन ॥ (G).

५८-५९ । अथ समाचरा । आदौ गुरुस्ततो लघुरेवं क्रमेण चत्वारो गुरवस्त्रयो लघवः पादे तिष्ठन्ति । * * * हारो गुरुर्गन्धो लघुः । उदाहरति । कुञ्जराश्चलन्ति पर्व्वताः पतन्ति । कूर्म्मपृष्ठं कम्पते धूलिभिः सूर्य्य आच्छाद्यते ॥ (C).

५८-५९ । अथ सप्ताचरचरणवृत्तस्याष्टाविंशत्यधिकशतं भेदाः भवंति, तत्र त्रिचत्वारिंशत्तमं भेदं समानिकानामकं वृत्तं लचयति, चारीति । यत्र सप्ताचरवृत्ते हार चारि—हारचतुष्टयं गुरुचतुष्टयमिति यावत् किज्जि[ह्री]—क्रियते तिणि—त्रयः गंध—गंधा लघव इति यावत् दिज्जिहि[ह्री]—दीयंते । अंतरा अंतरेणेति शेषः । एवं विधिना सत्त अक्खरा—सप्ताचराणि ठिआ—स्थितानि, सा समाणिआ—समानिका पिआ—प्रिया पिंगलस्येति शेषः ॥ प्रथमं गुरुस्ततो लघुः पुनर्गुरुः पुनर्लघुरेवं क्रमेण यत्र प्रतिचरणं सप्ताचराणि स्थाप्यंते सा समानिकेति समुदायार्थः । केचित्तु पिआ इति पदं प्रियासंबोधनपरतया वदंति ।२६। समानिकामुदाहरति, कुंजरा इति । पव्वआ—पर्व्वतान् पलंतआ—प्रेरयंतः कुंजरा—हस्ति[नः] चलंतआ—चलंति । कुम्म पिट्ठि—कूर्म्मपृष्ठं कंपए—कंपते धूलि—धूल्या सूर—सूर्य्यः झंपए—आच्छाद्यते ॥ श्रीरामचंद्रे प्रचलति सतीति शेषः । समानिका निवृत्ता ।२७। (E).

भणउ सुबासउ[१] लहुसु बिसेसउ[२]।
रइ चउ मत्तह भ लहइ अंतह[३] ॥ ६० ॥
जहा, गुरुजण भत्तउ[४] बहुगुण जुत्तउ[५]।
जसु जिअ[६] पुत्तउ सइ[७] पुणबंतउ[८] ॥ ६१ ॥ सुबास[९]।

५८-५९। अथ सप्ताचरमुष्णिक् छंदः। [चारि] हारेति। हारचतुष्टयं क्रियतां त्रयो गंधा दीयंताम्। सप्ताचरा स्थिता सा समानिका प्रिया॥ हारो गुरुः, गंधो लघुः। यथा। कुंजराश्चलंति पर्वताः पतंति। कूर्मपृष्ठं कंपते धूल्या सूर्य आच्छाद्यते॥ (G).

६०-६१। भणामि सुवासं लघु परि[सवि]शेषम्। रचयति चातुर्मात्रिकं भगणमन्ते॥ सविशेषलघुकथनात् चातुर्मात्रिको लघुः कथ्यते तदनन्तरं भगण इत्यर्थः। उदाहरति। गुरुजन-भक्ता वधूर्गुणयुक्ता। यस्य जीवन् पुत्रः स पुण्यवान्॥ तिअ पुत्तेति पाठे त्रिपुत्र इत्यर्थः। (C).

६०-६१। अथ सप्ताचरचरण-वृत्तस्यैकाशीत्युत्तर[वृत्तस्य द्वादशो-त्तर] शततमं [११२] भेदं सुवासकनामकं वृत्तं लचयति, भणेति। यत्र चउ मत्तह — चतस्रः मात्राः चतुरो लघून् इत्यर्थः। अत्र

६०—६१। १ सरासउ (A), सूवासउ (E). २ लङ्ग गुरु सेसउ (A), लङ्ग सविसेसउ (B), लङ्गहू विसेसउ (E). ३ भणइ चणत्तह (A), भ लइ चक्कर (B), भणहि चन्तह (C). ४ गुरुजण जुत्तउ (A), गुरुअण भत्तउ (B). ५ Dropt in (B). ६ जसु तिअ (A), जसु विअ (B), जसू जिअ (E). ७ सो (A), सउ (B) सहि (C). ८ पुणमत्तउ (A & C), पुणमन्तउ (B). ९ सरसा (A).

चरण गण विप्प[१] पढम लइ थप्प ।
जगण तसु अंत मुणहु[२] करहंच ॥ ६२ ॥
जहा, जिबउ[३] जइ एह[४] तजउ[५] गइ देह[६] ।
रमण जइ[७] सोइ बिरह जणु होइ[८] ॥ ६३ ॥ करहंच[९] ।

माचाशब्दो लघुपरः । रइ — रचयित्वा अंतह — अंते चतुर्लघ्वंते इत्यर्थः, भ — भगणः आदिगुरुर्गण इति यावत् लहइ — लभ्यते, लऊसू[सु] विसेसउ — लघुविशिष्टं तं सूवासउ — सू[सु]वासकं भणउ — भणत ॥ सू[सु]वासकनामकं तद्वृत्तमित्यर्थः । अत्र लऊसू[सु] विसेसउ इदं विशेषणं प्रथमस्थापितचतुर्मात्राणां लघुपरत्वलाभायेति बोध्यम् । द्विजवरभगणरचितचरणं सुवासकमिति फलितार्थः । २८ ।
सू[सु]वासकमुदाहरति, गुर्व्विति । गुरुजण भत्तउ — गुरुजनभक्ता गुणजुत्तउ — गुणयुक्ता जसू — यस्य बऊ — वधूः भार्य्येति यावत् जिअ पुत्तउ — जीवत्पुत्रा सइ — स एव पुणबंत[उ] — पुण्यवान् ॥ त्रैलोक्य इति शेषः । सुवासकं निवृत्तम् । २९ । (E).

६०-६१ । भणेति । भण्यतां सुवासकः लघुसुविशेषकः । रचय चतुर्मात्रिकाः भं लभते अंते ॥ गुर्व्विति पूरणार्थम् । यथा । गुरुजन-भक्ता वधूर्गुणयुक्ता । यस्य जीवत्पुत्रा स एव पुण्यवान् ॥ (G).

६२-६३ । चरणे गणं विप्रं प्रथमे नीत्वा स्थापय । जगणं तस्यान्ते

६२—६३ । १ विपा (A). २ भणिश्च (A), भणउ (B), भणइ (C). ३ जिबउँ (A), जिवउँ (C). ४ एऊ (B). ५ तिजउ (B). ६ देऊ (B). ७ जो (A). ८ विरह जणि होइ (A), विविह जण जोइ (B), विरह जिणु होइ (F). ९ करहंची (B & C).

भण करहञ्चम् ॥ चरणे पदे प्रथमतो विप्रगणस्ततो जगणस्तत् करहञ्चं छन्दः । उदाहरति । जीवामि यदि एतत् त्यजामि गत्वा देहम् । रमणो यदि स एव विरहो न भवति ॥ गत्वा प्रयागमिति शेषः । विरहदग्धं यद्येतद्देहं त्यजामि तदा जीवामि, तदेव श्रेयःसाधनमिदन्तु जीवनं मरणमेव । (C).

६२-६३ । अथ सप्ताक्षरचरणवृत्तस्य षणवतितमं भेदं करहंचनामकं वृत्तं लक्षयति, चरणेति । पढम — प्रथमे चरणे विप्प — विप्रं चतुर्लघ्वात्मकमिति यावत् गण — गणं लइ — गृहीत्वा थप्प — स्थापयत । तसु — तस्य विप्रगणस्येति यावत् अंत — अन्ते जगण — मध्यगुरुं थप्प इति पूर्वेणान्वयः, करहंच — कर[हंचम्] एवं मुणह — जानीत ॥ करहंचनामकमेतद्वृत्तमित्यर्थः । अत्र प्रथमे इति द्वितीयादीनामुपलक्षकम् । करहंचमुदाहरति, जिवेति । एह — एतं देह — देहं गइ — गत्वा जइ — यदि तजउ — त्यजामि जिवउँ — जीवामि तदेति शेषः, जइ — यदि रमण — भर्त्ता स एव होइ — भवति, विरह — वियोगः जणु — मा भवत्विति शेषः ॥ विरहानलदग्धशरीरत्याग एव मम श्रेष्ठ इति गूढाभिप्रायायाः कस्याश्चिन्मृतभर्तृकायाः सहगमनं कर्त्तुमुद्यतायाः श्रीरघुनाथं प्रति प्रार्थनावचनमिदम्, सा चोत्तरार्द्धेन प्रकटिता । करहंचो निवृत्तः ।३१। (E).

६२-६३ । चरेति । चरणे गणं विप्रं प्रथमं कृत्वा स्थापय । जगणस्तस्यांते जानीत करहंचं ॥ विप्रश्च चतुर्लघुः । यथा । जीवामि यदि एतं त्यजामि गत्वा देहम् । रमणो यदि स एव विरहो मा भवतु ॥ देहत्याग एव जीवनमित्युपपादितमुत्तरार्द्धे सत्येत्यर्थः । (G).

सत्ता दीहा जाणेही कण्णा तो[1] गो माणेही ।
चाउद्दाहा[2] मत्ताणा सीसारूओ[3] छंदाणा ॥ ६४ ॥
जहा, चंदा[4] कुंदा ए कासा[5] हारा हीरा ए हंसा[6] ।
जे जे सेत्ता वण्णीआ[7] तुह्मा[8] कित्ती जिण्णीआ[9] ॥
६५ ॥ सीसरूपक[10] ।

६४-६५ । सप्त दीर्घान् जानीहि कर्णान् त्रीन् गुरुं मानय । चतुर्द्दशमात्राणां शीर्षरूपच्छन्दसि ॥ शीर्षरूपच्छन्दसश्चतुर्द्दशमात्रस्य निर्व्वाहकान् सप्त दीर्घान् जानीहि, तदेव विवृणोति त्रीन् कर्णान्, कर्णा द्विगुरुरनन्तरमेकगुरुमित्यर्थः । उदाहरति । चन्द्रः कुन्दम् एतत् काशा हारो हीरं कैलासः । ये ये श्वेता विनि[र्दि]ता-स्तव कीर्त्त्या जिताः ॥ (C).

६४-६५ । अथ सप्ताचरचरणवृत्तस्य अंतिमं[आद्यं] भेदं शीर्ष-रूपकनामकं वृत्तं लक्षयति, सत्तेति । आदौ कण्णा तो—कर्णान् गुरुद्वयात्मकान् गणान् त्रीन् तदनंतरं गो—गुरुं माणेही—मानय, एवंप्रकारेण चाउद्दाहा मत्ताणा—चतुर्द्दश मात्राः सत्ता दीहा—सप्त दीर्घान् सीसारूआ छंदाणा—शीर्षरूपकच्छन्दसि जाणेही—जानीहि[जानीहि] ॥ दीर्घसप्तकरचितचरणं शीर्षरूपक-

---

६४—६५ । १ ति (A). २ चउद्दाहा (A). ३ सीसारूआ (A & E), सीसोरूओ (B & C). ४ छन्दा (B). ५ केणासा (B). ६ रा हंसा (A & B), केलासा (C). ७ विसिआ (A), सीणीआ (B & C), वण्णीआ (E). ८ तुह्माते (A), तुम्हा (B), तुम्मा (C). ९ जाणीआ (B), जिणिआ (C). १० सीष-रूपक (B).

विज्जूमाला[१] मत्ता सोला[२] पाए कराणा चारी लोला।
एअं रूअं[३] चारी पाआ भत्ती खत्ती[४] गाआराआ[५] ॥६६॥

जहा,

उम्मत्ता[६] जोहा ढुक्कंता बिप्पक्खा[७] मज्झे[८] लुक्कंता[९]।
णिक्कंता[१०] जंता धावंता णिब्भंती[११] कित्ती पावंता ॥६७॥

विज्जूमाला[१२]।

मिति फलितार्थः। ३१। शीर्षरूपकमुदाहरति, चंदेति। चंद्रः कुंदः काशः ए—एते हारः मौक्तिकदाम इति यावत् हीरा—हीरकं मणिभेदः हंसा—हंसः ए—एते। जे जे सेत्ता वणीआ—ये ये श्वेता वर्णिताः ते ते इति शेषः तुह्मा कित्ती जिणीआ—युष्मत्कीर्त्या जिताः॥ कंचिद्राजानं प्रति कस्यचित्कवेरियमुक्तिः। शीर्षरूपकं निवृत्तम्। ३२। (E).

६४-६५। सत्तेति। सप्त दीर्घान् जानीहि कर्णान् त्रीन् गुरुं मानय। चतुर्दश मात्राः शीर्षरूपकं छंदः॥ कर्णो द्विगुरुः। यथा, चंद्रः कुंदः ये काशः हारा हीरा एते हंसाः। ये ये श्वेताः वर्णिताः युष्माकं कीर्त्या जिताः॥ (G).

६६—६७। १ विज्जुमाला (B), विज्जुम्माला (C). २ सोला मत्ता (E & F). ३ एओ रूओ (B). ४ पत्तो (E). ५ विज्जूमाला (A), विज्जूराला (B), विज्जूमाला (C), णाआ राआ (F). ६ उम्मत्ता (F). ७ विपक्खा (A), वीपक्खा (B). ८ मज्झे (B & C), मज्झे (F). ९ लुक्कन्ता (C). १० णिक्क (C). ११ णिब्भन्ती (B & C). १२ विद्युन्माला (A).

६६-६७। अथाष्टाक्षरा। विद्युन्माला मात्राः षोडश पादे कर्णास्सलारो लोलन्ते[न्ति]। एवंरूपाणां चतुर्णां पादानां भर्त्रीं अक्षिया विद्युद्राजते॥ भर्त्रीं धारयित्री अक्षियजातिः, विद्युन्माला विद्युदिव राजते। उदाहरति। उन्मत्ता योधा ढौकमानाः विपक्षमध्ये प्रविष्टाः। निष्क्रान्ता युध्यन्तो[माना] धावन्तो निर्भ्रान्ताः कीर्त्तिं प्राप्नुवन्ति॥ ढौकमाना गच्छन्तः। (C).

६६-६७। अथाष्टाक्षरचरणवृत्तस्य प्रस्तारक्रियया षट्पञ्चाशद्धिकशतद्वयं भेदा भवन्ति, तत्राद्यं भेदं विद्युन्मालानामकं वृत्तं लक्षयति, बिज्जुति। यत्र अ[ख]त्ती—अक्षिये प्रस्तारे इत्यर्थः, पूर्वाचार्याणां अक्षिय इति प्रस्तारसंज्ञा, सोला मत्ता—षोड़शमात्राकाः चारी—चत्वारः कर्णाः गुरुद्वयात्मका गणाः पाए—पादे लोला—लुटंति, एअं रूअं—एवंरूपेण चारी पाआ—चतुःपादिका विज्जूमाला—विद्युन्माला णाआराआ—नागराजेनेत्यर्थः भत्ती—भण्यते॥ खत्ती—अक्षिया जातिरिति कश्चित्। अत्र मात्राकथनमनतिप्रयोजनकं पादपूरणार्थमेवेति बोध्यम्। विद्युन्मालामुदाहरति, उम्मत्तेति। उम्मत्ता—उन्मत्ताः ढुक्कंता—ढौकमानाः परस्परं मिलिता इति यावत् विप्पक्खा मज्झे लुक्कंता—विपक्षमध्ये लीनाः, णिक्कंता—निष्क्रांता विपक्षान् हत्वेत्यर्थः, थं[जं]ता—यांतः प्रतिपक्षसैन्यं प्रतीति भावः धावंता इतस्ततो धावनं कुर्वंतः जोहा—योद्धारः णिब्भंती—निर्भ्रान्तां नितरां त्रैलोक्यभ्रमणशीलामिति यावत् कित्ती—कीर्त्तिं पावंता—प्राप्नुवंति॥ केनचिद्वन्दिना श्रीरामचन्द्रसंग्रामवर्णनपरतयेदं कृतम्। २५। (E).

लहु गुरू णिरंतरा पमाणिआ[1] अठक्खरा[2] ।
पमाणि[3] दूण किज्जए[4] णराअ[5] सो भणिज्जए[6] ॥६८॥
जहा, णिसुंभ सुंभ खंडिणी[7] गिरीस गेह मंडिणी[8] ।
पअंड मुंड[9] खंडिआ[10] पसण्ण[11] होउ[12] चंडिआ[13] ॥
६९ ॥ पमाणिआ[14] ।

६६-६७ । अथाष्टाक्षरमनुष्टुप्छंदः । विज्जू इति । विद्युन्माला षोडशमात्रा पादे कर्णाश्चत्वारो लुटंति । एवंरूपाश्चत्वारः पादाः भवंति क्षत्रिया नागराजः ॥ क्षत्रियजातिरिति केचित् । क्षत्रे प्रस्तारे इत्यन्ये । यथा, उन्मत्ता योधाः चलंतो विपक्षमध्ये निलीनाः । निष्क्रांता यांतो धावंतो निर्भ्रांतं कीर्त्तिं प्राप्नुवंति ॥ (G).

६८-६९ । लघुगुरू निरन्तरौ प्रामाणिकाष्टाक्षरा । प्रामाणी द्विगुणीक्रियते नाराचः स भण्यते ॥ लघोर[न]न्तरं गुरुः पुनरपि एवमष्टाक्षराणि देयानि । उदाहरति । निशुम्भशुम्भखण्डिनी गिरीशगेहमण्डिनी । प्रचण्डमुण्डखण्डिता प्रसन्ना भव[तु] चण्डिका ॥ (C).

६८-६९ । अथाष्टाक्षरचरणवृत्तस्य षडशीतितमं भेदं प्रमा-

६८—६९। १ पमाणि (A, B & C). २ अठ्ठ अक्खरा (A), अट्ट अक्खरा (B & C), अठखरा (F). ३ पामाणि (A), पआणि (C). ४ किज्जिए (E & F). ५ णरअ (A), णराउ (E & F). ६ भणिज्जिए (E). ७ खण्डणी (B & C). ८ मण्डणी (B & C). ९ पचंड चंड (A). १० खंडिए (A). ११ पसंणि (A). १२ होऊ (A), होइ (B & C). १३ चंडिए (A), चण्डिआ (B). १४ प्रमाणिका (A), पआणिआ (C).

ह्वार गंध[1] बंधुरेण[2] दिट्ठ[3] अट्ट[4] अक्खरेण ।
बारहाइ मत्त जाण मल्लिआ[5] सुछंद[6] माण[7] ॥७०॥
जहा, जेण जिण्णु[8] खत्ति बंस रिट्टि[9] मुट्टि[10] केसि कंस ।
बाण पाणि कट्टिएउ सोइ[11] तुह्म[12] सुम्भ[13] देउ ॥
७१ ॥ मल्लिका ।

णिकानामकं वृत्तं लक्षयति, लह्न इति । लह्न गुरू णिरंतरा—लघुगुरुनिरंतराणि अठक्खरा—अष्टावक्षराणि यत्र प्रतिचरणं पतंतीति शेषः सा पमाणिआ—प्रमाणिका तत्प्रमाणिकानामकं वृत्तमित्यर्थः । लह्न गुरू णिरंतरेत्यनेन प्रथममेको लघुस्तदनन्तरं गुरुः पुनर्लघुः पुनर्गुरुरेवंप्रकारेणाष्टावक्षराणि कर्त्तव्यानीति सूच्यते । प्रसंगान्नाराचनामकं षोड़शाक्षरचरणं वृत्तं लक्षयति, पमाणीति । पमाणि—प्रमाणी प्रमाणिकेत्यर्थः, नामैकदेशादपि सत्येत्यादौ नामप्रतीतेः, दूण—द्विगुणा लघुगुरुनिरंतरषोड़शाक्षरेति यावत् किज्जिए—क्रियते यदेति शेषः, सो—सः णराउ—नाराचः भणिज्जए—भण्यते ॥ ३६ । प्रमाणिकामुदाहरति, णिसुंभेति । णि[नि]शुंभशुंभखंडिनी गिरीस[श]गेहमंडिनी महादेवगृहं भूषयित्रीत्यर्थः । पअंड मुंड खंडिआ—प्रचण्डमुण्डखंडिनी[नी]

७०—७१ । १ बंध (A). २ गंधएण (A). ३ दिट्ठ (B), जुट्ट (C). ४ अट्ठ (B & C). ५ मल्लिका (E & F). ६ सुच्छन्द (C), सुछंद (E). ७ जाण (E). ८ जिणु (A), जिणि (B), जिण (C), जिणू (E). ९ रिट्ठ (A), रिट्ठि (B & C). १० मुट्ठ (A), मुट्ठि (B & C). ११ सोउ (E & F). १२ तुम्ह (C), तुम्ह (F). १३ सुम्भ (B & C), सुक्ख (E), सुक्ख (F).

पसम होउ चण्डिआ—प्रसन्ना भवतु चण्डिका ॥ प्रमाणिका निवृत्ता । ३७ । (E).

६८-६९ । लहु इति । लघुगुरुनिरंतरा प्रमाणिका अष्टाक्षरा । प्रमाणिका द्विगुणा क्रियतां नाराचकः स भण्यतां ॥ यथा । निशुंभशुंभखंडिनी गिरीशगेहमंडिनी । प्रचंडमुंडखंडिता प्रसन्ना भ[व]तु चंडिका ॥ (G).

७०-७१ । हारगन्धबन्धुरेण दृष्टाष्टाक्षरेण । द्वाद[श]मात्राः जानीहि मल्लिकासुच्छन्द आनय ॥ बन्धुरन्तून्नताननमित्यमरः । हारेण गुरुणा उन्नतं गंधेन लघुनाननम् अष्टाक्षरेण पादेन । उदाहरति । येन जिताः क्षत्रियवंशारिष्टि-मुष्टि-केशि-कंसाः । बाणस्य पाणयः कृत्ताः स युष्माकं शुभं ददातु ॥ बाणस्यासुरस्य, कृत्ताश्छिन्नाः । (C).

७०-७१ । अथाष्टाक्षरचरणवृत्तस्य द्वि[एक]सप्तत्यधिकशततमं भेदं मल्लिकानामकं वृत्तं लक्षयति, हारेति । हार गंध बंधुरेण—हारो गुरुः गंधो लघुस्ताभ्यां बंधुरेण—मनोहरेण दिट्ठ अट्ठ अक्खरेण—दृष्टाष्टाक्षरेण दृष्टान्यष्टावक्षराणि यत्र तादृशेनेत्यर्थः चरणेनेति शेषः । बारहार—द्वादशैव मात्रा यत्र जाण—ज्ञायंते, तत् मल्लिकासुच्छन्दः मल्लि[का]ख्यं सुन्दरं वृत्तमित्यर्थः माण-[जाण]—माणय ॥ प्रमाणिकामल्लिकयोश्चैतावानेव भेदः यत्प्रमाणि-कायां लघुगुरुक्रमेणाक्षराणि चरणे दीयंते, मल्लिकायां गुरुलघु-क्रमेणेति बोध्यम् । ३८ । मल्लिकामुदाहरति । जेण—येन जिणू—जितः खत्ति बंस—क्षत्रियवंशः परशुरामरूपेणेत्यर्थः, रिट्ठि

तरलणअणि तुंगो पढम रस सुरंगो[1] ।
णगण[2] जुअल[3] बद्धो गुरु जुअल[3] पसिद्धो ॥७२॥
जहा, कमल[4] भमर[5] जीवो सअल[6] भुवण[7] दीवो[8] ।
दलिअ[9] तिमिर डिंबो[10] उअइ[11] तरणि बिंबो ॥
७३ ॥ तुंग[12] ।

मुट्ठि केसि कंस—रिष्टिकः मुष्टिकः केशी कंसः येन जित इति पूर्वेणान्वयः । वाण पाणि—वाणासुरपाणयः सहस्रवाहव इत्यर्थः [जेण]—येन कट्टिएउ—कर्त्तिताः, सोउ—सोऽयं तुह्म—युष्मभ्यं सूक्ख—सुखं देउ—ददातु ॥ मल्लिका निवृत्ता । ३९ । (E).

७०-७१ । हारेति । हारगंधबंधुरेण दृष्टाष्टाक्षरेण । ह्रादशैव मात्रा जानीत मल्लिकासुच्छंदः मानय ॥ हारो गुरुः गंधो लघुः । यथा, येन जितः चन्नवंशो रिष्टिमुष्टिकेशिकंसाः । वाणपाणिकर्त्तकः सोऽयं युष्माकं सुखं ददातु ॥ (G).

७२-७३ । तरलनयने तुङ्गः प्रथमं रससुरङ्गं । नगणयुगलबद्धं गुरुयुगलप्रसिद्धम् ॥ प्रथमतो रसैर्लघुभिः सुरङ्गमुत्कृष्टं, कियन्तो लघव इत्याकांक्षायामुक्तं नगणयुगलेति, ततो गुरुयुगलेन प्रसिद्धो भवतीत्यर्थः । उदाहरति । कमलभ्रमरजीवः सकलभुवनदीपः ।

७२—७३ । १ गण सुरंगो (A & B), रस सूरंगो (E). २ णअण (A & C). ३ जुगल (B), युवल (E & F). ४ कमण (F). ५ भमल (E & F). ६ सकल (A). ७ भुवण (B & C). ८ दीवो (F). ९ दरिअ (A, B & C). १० डिंभो (A & E). ११ जअइ (F). १२ तुङ्ग (B & C).

तापिततिमिरडिम्बः * * * कमलविकाशे भ्रमरस्य हर्षो भवतीति भ्रमरजीवलमुक्तम् । (C).

७२-७३ । अथाष्टाचरचरणवृत्तस्य चतुःषष्टितम भेदं तुंगनामकं वृत्तं लचयति, तरलेति । पढम — प्रथममादाविति यावत् रस सु[सु]रंगो — रसैर्लघुभिः सु[सु]रंगो — सुन्दर इत्यर्थः, कियद्भिर्लघुभिरित्यपेचायां हेतुगर्भविशेषणमाह, णगणेति । णगण यु[जु]वल बद्धो — नग[ण]युगलबद्धः नगणस्त्रिलघ्वात्मको गणः अंते इति शेषः गुरु यु[जु]अ[ब]ल पसिद्धो — गुरुयुगलप्रसिद्धः गुरुद्वयप्रसिद्धं नगणद्वयांते यत्रैतादृशमित्यर्थः तरलणअणि — हे तरलनयने स तुंगो — तुंगः तत्तुंगाख्यं वृत्तमित्यर्थः ॥ नगणद्वयानंतरं गुरुद्वयं यत्र प्रतिचरणं पतति तत्तुंगनामकं वृत्तमिति फलितार्थः । अत्र पढम रस सु[सु]रंगो इति पदं पद्यपूरणार्थमेवेति बोध्यम् । ४० । तुंगमुदाहरति, कमलेति । कमल भमल जीवो — कमलभ्रमरजीवः कमलांतःपातिनो ये भ्रमरास्तेषां बंधनमोचनाज्जीवदातेत्यर्थः सअल भुअ[व]ण दीवो — सकलभुवनदीपः प्रकाश[क]त्वादिति भावः । दलिअ तिमिर डिंभो — दलिततिमिरोपप्लवः, डिंभस्तूपप्लवः प्रोक्तः इति देशीकोषः, एतादृशस्तरणिविम्बः सूर्यविम्बः उअइ — उदेति ॥ तुंगो निवृत्तः । ४१ । (E).

७२-७३ । तरेति । तरलनयने तुंग प्रथमरससुरंगः । नगणयुगलबद्धो गुरुयुगलप्रसिद्धः ॥ रसः शृंगारः । यथा । कमलभ्रमरजीवः सकलभुवनदीपः । दलिततिमिरडिंभो जयति तरणिविंबः ॥ (G).

पढम गण विप्पओ बिहु तह[1] णरेंदओ[2]।
गुरु सहिअ अंतिणा[3] कमल इम[4] भंतिणा॥७४॥
जहा, स जअइ[5] जणद्दणा[6] असुर[7]कुल मद्दणा।
गरुड़[8]बर बाहणा[9] बलि भुअण[10] चाहणा[11]॥
७५॥ कमल।

७४-७५। पढम[प्रथम]गणो विप्रकः द्वितीयस्तथा नरेन्द्रः। गुरुसहितान्तेन कमलमेवंप्रकारेण॥ नरेन्द्रो जगणः, भवन्ति-[भक्ति]-शब्दः प्रकारवचनः। उदाहरति। स जयति जनार्द्दनः असुरकुलमर्द्दनः। गरुडवरवाहनः बलिभुवनयाचकः॥ (C).

७४-७५। अथाष्टाक्षरचरणवृत्तस्य षण्णवतितमं भेदं कमल-नामकं वृत्तं लक्षयति, पढमेति। जह—यत्र विप्पओ—विप्रकः चतुर्लघ्वात्मको गण इति यावत् पढम—प्रथमः गणः, गुरु सहिअ अंतिणा—गुरुसहितांतः यस्यांते गुरुरेतादृश इत्यर्थः णरिंदओ—नरेन्द्रः मध्यगुरुर्जगण इति यावत् बिऊ—द्वितीयः गण इ[ति] पूर्वेणान्वयः, एम भंतिणा—एवंप्रकारेण कमलनामकं वृत्तं भवतीत्यर्थः॥ यद्वा अवहट्टभाषायां लिंगविभक्तिवचनव्यत्यासे दोषाभावात् गुरु सहिअ अंतिणा—गुरुसहितांतम् इति वृत्तविशेषणं

७४—७५। १ जह (E). २ णरिंदओ (E & F). ३ एंतिणा (A), चंतिआ (C), चंतिण (F). ४ एम (A & F), ए (E). ५ विजअइ (A). ६ जणकुणा (C). ७ असुर (E). ८ गरुल (B), गुड (C). ९ वाहया (B). १० भुवण (F). ११ चाअणा (B).

LIBRARY OF THE

दिट्ठ जोहा गणा तिण्णिआ णाअराएण[1] जा बिण्णिआ[2] ।
मास अद्धेण पाअ ट्ठिअं[3] जाण[4] मुद्धे[5] महालच्छिअं[6] ॥७६॥

वाच्यम् । ४१ । कमलमुदाहरति, सेति । [असुर]र कुल मद्दणा—दैत्यवंशमर्द्दनः गरुड़ वर वाहणा—गरुडः वरं श्रेष्ठं वाहनं यस्य तादृश इत्यर्थः बलि भुवण चाहणा—बलिभुवनं बलिराज्यं जिघृक्षुरित्यर्थः सः जणद्दणा—जनार्द्दनः जअइ जयति ॥ कमलं निवृत्तम् । ४२ । (E).

७४-७५ । पढेति । प्रथमो गणो विप्रो द्वितीयस्तथा नरेंद्रः । गुरुसहितमंतेन कमलं छंद एम[व]मेवं भक्तिना[क्त्या] इति रचनया ॥ विप्रश्चतुर्लघुः, नरेंद्रो जगणः । यथा । स जयति जनार्द्दनः असुरकुलमर्द्दनः । गरुडवरवाहनो बलिभुवनजिघृक्षुः ॥ (G).

७६ । अथ नवाक्षरम् । दृष्टा योधगणास्त्रयः नागराजेन [ये] वर्णिताः । मासार्द्धेन पादस्थिता जानीहि मुग्धे महालक्ष्मी[रि]यम् ॥ योधो मध्यलघुः पञ्चकलः ऽ।ऽ, मासार्द्धं पञ्चदश तेन पञ्चदशकलः पादो लभ्यते । (C).

७६ । अथ प्रस्तारक्रियया नवाक्षरस्य द्वादशाधिकं पंचशतं भेदा भवन्ति, तत्राष्ट[सप्त]चत्वारिंशाधिकशततमं भेदं महालक्ष्मीनामकं वृत्तं लक्षयति, दिट्ठेति । जा—ये रगणाः णाअराएण—नागराजेन पिंगलेनेति यावत् विण्णिआ—विज्ञाता वर्णिता वा,

---

७६ । १ णागराएण (F). २ वण्णिआ (F). ३ पाअ ट्ठिअं (B & C).
४ जाणु (F). ५ ण (C). ६ महालच्छिअं (E), महालच्छिआ (F).

जहा,

मुंडमाला गला[१] कंठिआ[२] णाअराआ भुआ संठिआ[३] ।
बग्घछाला[४] किआ बासणा चंडिआ पाउ सिंहासणा[५] ॥
७७ ॥ महालच्छी[६] ।

मास अद्धेण—मासार्द्धेन मासार्द्धपरिमिताभिः पञ्चदशभिर्मात्राभिरित्यर्थः दिट्ठ—दृष्टा उपलक्षिता इति यावत् ते एतादृशाः तिण्णिआ—त्रयः जोहा गणा—योद्धगणा मध्यलघुरगणा इति यावत् यत्र पाअ—पादे ट्ठिअं—स्थिताः तां महालच्छिअं—महालक्ष्मीं जाण—जानीहीति ॥ अत्र मात्राकथनं श्लोकपूरणार्थमेव । रगणत्रयरचितचरणा महालक्ष्मीरिति तु निष्कृष्टार्थः । ४३ । (E).

७६ । अथ नवाक्षरं त्रिष्टुप्[वृहती] । दिट्ठेति । दृष्टा योद्धगणास्त्रयो नागराजेन ये वर्णिताः । मासार्द्धेन पादस्थितां जानीहि मुग्धे महालक्ष्मीं छंदः ॥ मासेति पंचदशमात्रपदां । योद्धा रगणः । (G).

७७ । [उदाहरति] मुण्डमाला गले कण्ठिका नागराजो-भुजासंस्थितः । व्याघ्रचर्मकृतं वासः चण्डिका पातु सिंहासना ॥ कण्ठिका ग्रैवेयकम् । (C).

७७ । महालक्ष्मीमुदाहरति, मुण्डेति । मुण्डमाला गला

---

७७ । १ गलें (A), dropt in (F). २ कण्ठआ (C). ३ सण्ठिआ (C). ४ बग्घछाला (A), बम्मच्छला (B & C). ५ सीहासणा (B & C). ६ महालच्छी (A).

दिअबर कणो सअणं पअ पअ[१] मत्ता गणणं ।
सर मुणि मत्ता लहिअं सहि सरगिक्का[२] कहिअं ॥७८॥

कंठिआ — मुण्डमालेव गलकंठिका कंठभूषेति यावत् यस्या-स्तादृशीत्यर्थः संठिआ णाअराआ भु[आ] — संस्थितनागराजभुजा। प्राकृते पूर्वनिपातानियमादये वर्त्तमानस्यापि संठिआ-शब्दस्य पूर्व-निपातः। बग्घछाला किआ वासणा — व्याघ्रचर्मकृतवसना सिंहा-सणा — सिंहारूढ़ा चंडिआ — चंडिका पाउ — पातु॥ महा-लक्ष्मीर्निवृत्ता। ४४। (E).

७७। यथा। मुंडमाला गले कंठिका नागराजभुजयोः संस्थिता। व्याघ्रकृत्तिकृतवसना चंडिका पातु सिंहासना॥ (G).

७८। द्विजवरकर्णः सगणः पादे नवमात्रागणनं। शरमुनि-मात्रालब्धा प्रिय सखे सारङ्गिका कथिता॥ द्विजवरश्चतुर्लघुः, कर्णो द्विगुरुः, मात्रा वर्णः, तेन नव वर्णा लभ्यन्ते। शराः पञ्च, मुनयः सप्त, मिलिता द्वादश मात्रा लब्धाः। (C).

७८। अथ नवाक्षरचरणस्य वृत्तस्य चतुश्चत्वारिंशा[अष्टा]धिक-द्विशततमं [२०८] भेदं सारंगिकानामकं वृत्तं लक्षयति, दिअ-बरेति। सहि — हे सखि पअ पअ — पदे पदे दिअबर कणो सअणं — द्विजवरकर्णसगणैः, द्विजवरश्चतुर्लघ्वात्मको गणः, कर्णो-गुरुद्वयात्मको गणः, सगणोऽन्तगुरुगणस्तैरित्यर्थः, मत्ता गणणं — मात्रागण[ण]नं यत्र क्रियत इति शेषः, सर मुणि मत्ता लहिअं —

७८। १ पअ पअ (C). २ सारंगी (A), सरंगिक्का (E).

जहा,

हरिण सरिस्सा[१] णअणा कमल सरिस्सा[२] वअणा ।
जुअजण[३] चित्ता हरिणी[४] पिअ सहि दिठ्ठा[५] तरुणी ॥
७९ ॥ सारंगिका ।

शरमुनिमात्राशाघिता, शराः पंच, मुनयः सप्त, तथाच प्रतिचरणं द्वादशमात्रायुक्तेत्यर्थः, सा सरंगिक्का—सारंगिका कहिअं—कथिता ॥ वचनलिङ्गव्यत्यासस्तु प्राकृते न दोषायेति पूर्वमेवोक्तम् । कियतीनां मात्राणां गणनं विधेयमित्यत्र हेतुगर्भं श[स]र मुणीति वृत्तविशेषणम् । केचित्तु दिअवर कण्णो—द्विजवरकर्णौ सअणं—सगणः एवंप्रकारेण यत्रेति शेषः मत्ता गणणं—मात्रागणनं क्रियत-इति शेषः, कियंत्यो मात्रा गणनीया इत्यपेचायामाह, सरेति, सर मुणि मत्ता—शरमुनिमात्राः, शराः पंच मुनयः सप्त मिलिता द्वादशेत्यर्थः लहिअं—लभ्यंते यत्र, सा सहि—हे सखि सारंगिका कहिअं—कथ्यतामिति योजनिकामाहुः । अत्र वर्णवृत्ते मात्राकथनं पादपूरणार्थमेव । द्विजवरकर्णसगणरचितचरणा सारं-गिकेति निष्कृष्टोऽर्थः । ४५ । (E).

७८ । दिअ इति । द्विजवरः कर्णः सगणः पदे पदे मात्रा-गणना । शरमुनिमात्रासहिता सखि सारंगिका कथिता ॥ शराः पंच, मुनयः सप्त । (G).

---

७९ । १ सरस्स (E).　२ विलासा (A).　३ जअअण (C).　४ चरणी (A & E).　५ दिट्ठा (B).

कुंतीपुत्ता[1] जुअ लहिअं तीए[2] विप्पो धुअ[3] कहिअं ।
अंते हारो जइ[4] जणिअं तं पाइत्ता फणि भणिअं[5] ॥ ८० ॥

---

७९ । उदाहरति । हरिणसदृशनयना कमलसदृशवदना । युवजनचित्तहरिणी प्रियसखि दृष्टा तरुणी ॥ युवती उच्चस्तनीत्यर्थः । (C).

७९ । सारंगिकामुदाहरति । हरिणसदृशनयना कमलसदृशवदना । युवजनचित्तहरणी तरुणी हे प्रियसखि दृष्टा ॥ कस्याश्चित्सख्याः कांचिन्निजवयस्यां प्रति वचनमिदम् । सारंगिका निवृत्ता । ४६ । (E).

७९ । यथा । हरिणसदृशनयना कमलसदृशवदना । युवजनचित्ताहरिणी प्रियसखि दृष्टा तरुणी ॥ (G).

८० । कुन्तीपुत्रः कर्णः गुरुयुगलं, तद्युगलेन गुरुचतुष्कं, ततस्तुर्लघुस्ततो गुरुर्यत्र तत् पवित्रच्छन्दः ॥ (C).

८० । अथ नवाक्षरचरणस्य वृत्तस्यैकचत्वारिंशोत्तरद्विशततमं भेदं पवित्रानामकं वृत्तं लक्षयति, कुंतीपुत्तेति । जह — यत्र प्रथमं कुंतीपुत्ता जुअ लहिअं — कुंतीपुत्रयुगलब्धं प्राप्तमिति यावत् कुन्तीपुत्रस्य कर्णस्य गुरुद्वयात्मकगणस्येति यावत् युगं गुरुचतुष्टयमित्यर्थः, तीए — तृतीये स्थाने कर्णद्वयानंतरमित्यर्थः विप्पो — विप्रश्चतुर्लघ्वात्मको गणः ध्रुवं निश्चितं कहिअं — कथितः । अंते विप्रांते

---

८० । १ कुन्तीपुत्ता (B). २ तीआ (A & F). ३ धुव (E & F). ४ जद (B & C), जहि (F). ५ ह्रस्वउ कहिअं (B & C).

जहा,

फुल्ला णीबा[१] भम भमरा दिट्ठा[२] मेहा जल समला[३] ।
णच्चे विज्जू[४] पिअ[५] सहिआ आवे कंता कहु[६] कहिआ[७] ॥
८१ ॥ पाइत्ता[८] ।

हार: एकगुर्वात्मको गण: जणिअं — जनित: स्थापित इति यावत्, तं — तां फणि भणिअं — फणिभणितां पाइत्ता — पवित्रां विद्धीति शेष: ॥ गुरुचतुष्टयोत्तरचतुर्लघुकानंतरस्थापितैकगुरुरचितचरणा पवित्रेति तु निष्कृष्टार्थ: । ४७ । (E).

८० । कुंतीति । कुंतीपुत्रयुगलस्थिता हतीयो विप्रो ध्रुवं कथित: । अंते हारो यत्र जनित: सा पवित्रा फणिभणिता ॥ गुरुलघुचतुष्टयं गुरुश्चेत्यर्थ: । (G).

८१ । उदाहरति । फुल्ला नीपा भ्रमद्भ्रमरा दृश्यन्ते मेघा: जलश्यामला: । नृत्यति विद्युत् प्रियसखि आयास्यति कान्त: कदा ॥ (C).

८१ । पाइत्ता[पवित्रा]मुदाहरति, फुल्लेति । भम भमरा — भ्रमद्भ्रमरा: भ्रमंत: भ्रमरा येषु तादृशा इत्यर्थ: णीबा — नीपा: कदंबा इति यावत् फुल्ला: पुष्पिता:, जल समला — जलश्यामला: मेहा — मेघा: दिट्ठा — [दृष्टा:] । विज्जू — विद्युत् णच्चे — नृत्यति, अत: हे

८१ । १ णीपा (E). २ दिट्ठा (B & C). ३ समरा (A & B). ४ विज्जा (B), विज्ज (C). ५ पिअ (C). ६ सहि (B & C). ७ सहिआ (F). ८ पाइआ (C).

सरस[1] गण रमणिश्रा दिश्रवर[2] जुश्र[3] पलिश्रा[4]।
गुरु धरिश्र पइ पश्रो दह कलश्र कमलश्रो[5] ॥ ८२॥

पिश्र सहिश्रा — हे प्रियसखिके कंता — कांतः कहिश्रा — कदा श्रावे — श्रायास्यति तत्त्वमेवेति शेषः कह — कथय ॥ इदं च प्रोषितभर्तृकायाः कांचिन्निजवयस्यां प्रति वचनम्। पविता निवृत्ता। ४८। (E).

८१। यथा। फुल्ला नीपाः [भ्रमद्]भ्रमरा दृष्टा मेघाः जल समला — जलश्यामलाः। नृत्यति विद्युत् प्रियसखि श्राया-स्यति कांतः कदा कथ्यताम् ॥ (G).

८२। सरसगणरमणीया प्रकटितद्विजगणद्वया। सगुरुगणा प्रतिपादं दशकला कमला ॥ सरसैरुत्तमगणै रमणीया, के ते गणा इत्यत उक्तं द्विजगणद्वयं गुरुयुक्तं मिलित्वा दश कला भवन्ति। अथवा रसानां लघूनां गणः समूहस्तेन [सह वर्त्तमाना] सरसगणा सा चासौ रमणीया चेति। (C).

८२। अथ नवाचरचरणस्य वृत्तस्य षट्पञ्चाशदधिकद्विशत-तमं भेदं कमलानामकं वृत्तं लक्षयति, सरसेति। गण सरस — गणश्रेष्ठं रमणिश्रा — रमणीयं दिश्रवर जुश्र — द्विजवरयुगं द्विज-वरश्चतुर्लघ्वात्मको गणस्तस्य युगलं तथा चाष्टौ लघूनिति परमार्थः

८२। १ सुपिश्च (A), सरसा (C). २ दिश्च गण (A, B & C). ३ दुश्च (C). ४ पश्चलिश्चा (A), श्चलिश्चा (C). ५ देह कलह कलश्चो (B).

जहा, चल[1] कमल[2] णत्र्मणित्र्मा[3] खलित्र्म[4] थण वसणत्र्मा[5] ।
हसइ पर णित्र्मलित्र्मा[6] त्र्मसइ[7] धुत्र्म[8] बहुलित्र्मा ॥
. ८३ ॥ कमला ।

पलिश्रा — दत्ता । गुरुरेकः प[इ] पश्रो — प्रतिपादं यत्र धरिश्र — धृतः भ्रियते वा इह कलश्र — दशकलाकं तत् कमलश्रो — कमलकं तत्कमलनामकं वृत्तमित्यर्थः ॥ अत्र चान्वयान्यथानुपपत्त्या कृतस्य गण सरस पूरितस्य निपातस्य दोषापहानं नाशङ्कनीयमव[ह]ट-भाषायां तस्य नियमाभावात् । सरस-गण रमणिश्रा इति च पदद्वयं पद्यपूरणार्थमेवेति द्रष्टव्यम् । ४९ । (E).

८२ । सरेति । सरसगणरमणीयं द्विजवरयुगपतितं । द्विज-वरस्तुर्लघुः । गुरुर्धृतः प्रतिपदं दशकलाकं कमलम् ॥ (G).

८३ । उदाहरति । चलितचपलनयना स्खलितस्तनवसना । हसति परनिकटे असती ध्रुवं वधूटी ॥ खल्पा वधूर्व्व[धू]टी स्यात् । (C).

८३ । कमलामुदाहरति, चलेति । स्पष्टार्थम्पद्यम् । ५० । (E).

८३ । यथा । चलकमलनयनिका स्खलितस्तनवसना । हसति परनिर्मला लसति ध्रुवं वधूका ॥ (G).

---

८३ । १ Dropt in (B). २ चवल (A), चपल (C). ३ णश्रणश्रा (A). ४ खलइ (A, B & C). ५ वसणिश्रा (B & C). ६ णिश्रलश्रा (A), णिश्रा (B), इसणिश्रा (C). ७ लसइ (F). ८ धुव (E).

रअइ[1] फणि बिंब[2] एसो गुरु जुअल[3] सव्व सेसो ।
सिरहि[4] दिअ मझ्झ[5] राओ गुणह[6] गुणिए सहाओ[7] ॥८४॥

८४ । उच्यते फणिराजेनैव गुरुयुगलसर्व्वशेषः । शिरसि द्विजो-मध्ये राजा गुणिण[नः] गण्यतां विम्बभावः ॥ राजा जगणः, गण्यतां ज्ञायतां, विम्बस्य छन्दसः भावः प्रकारः । (C).

८४ । अथ नवाक्षरचरणस्य [वृत्तस्य] षण्णवतितमं भेदं विंब-नामकं वृत्तं लक्षयति, रअइति । सिरहि — सि[शि]रसि पादादा-विति यावत् दिअ — द्विजश्चतुर्लघ्वात्मको गण इत्यर्थः, मझ्झ — मध्ये राओ — राजा मध्यगुरुर्जगण इत्यर्थः यत्र पततीति शेषः, गुरु जुवल सव्व सेसो — गुरुयुगलसर्वशेषं गुरुद्वयं सर्वेषां पादानां शेषे अंते यस्य तादृगित्यर्थः, एसो — एतत् विंब — विंबं विंबनामकं वृत्तमिति यावत् गुणिए — गुणिनः गुणवतः पुरुषस्य सहाओ — सहायः गुणोपदेष्टृत्वाद्गुणवत्पुरुषस्य सहायभूत इति यावत् फणि — फणी पिंगलः रअइ — रचयति, गुणह — गुणयत हे बुधजना इति शेषः ॥ * * द्वौ गुरू यत्र प्रतिचरणं क्रमेण पततस्तद्विंबनामकं वृत्तमिति फलितार्थः । अथवा सर्व्वशेषे पादांते गुरुयुगलं सि[शि]-रसि द्विजः, विप्रगुरुद्वयमध्ये राजा जगण इत्यर्थः यत्र भवतीति शेषः, फणि रइअ — फणिरचितम् एसो — एतत् विंबं हे गुणि — हे गुणिनः शिष्याः सहाओ — स्वभावादेव गुणह — गुणयत इति

८४ । १ रइअ (A). २ फणि राज (C). ३ जुवल (E). ४ सिरसि (A), सिरइ (B & C). ५ मजझ (B), जझ (C). ६ गणहि (E), गुणइ (C). ७ गुणि बिम्ब साओ (C).

जहा,

चलइ चल वित्त[१] एसो णसइ तरुणत्त[२] वेसो ।
सुपुरुस[३] गुणेण बड्डा[४] थिर रहइ कित्ति[५] सुद्धा ॥
८५ ॥ बिंब[६] ।

भिन्नं भिन्नं योजनीयं। परे तु गुणिए सहाओ — हे गुणिनः सखाय-इत्यर्थं कृत्वा सखिसंबोधनपरमेतत्पदमिति वदंति । (E).

८४ । रअ इति । रचयति फणी विंबः एष गुरुयुगलसर्वशेषः। शिरसि द्विजो मध्ये राजा गुणय गुणिनां सहायः ॥ द्विजस्तु-र्लघुः, राजा जगणः । (G).

८५ । उदाहरति । चलत्येव वित्तमेतत् नश्यति तरुणत्ववेशः । सुपुरुषगुणेन बद्धा स्थिरा तिष्ठति कीर्त्तिः शुद्धा ॥ (C).

८५ । विंबमुदाहरति, चलईति । एसो — एतत् चल — चल-माशुगत्वरमिति यावत् वित्त — वित्तं द्रव्यं चलइ — चलति नश्यतीत्यर्थः, तरुणत्त वेसो — तरुणत्ववेषस्तारुण्यावस्थेति यावत् णस[इ] — नश्यति । सुपुरिस गुणेण बद्धा — सुपुरुषगुणेन बद्धा शुद्धा स्वच्छा कित्ति — कीर्त्तिः थिर — स्थिरा रहइ — तिष्ठति ॥ तस्मात्सर्वमनित्यं मत्वा गुणानां लंवे पुरुषैरासमुद्रांतव्यापिनी कीर्त्तिर्भवति इति कस्य[चित्] परमाप्तस्य किंचिन्मित्रं प्रत्युपदेशः । विंबं निवृत्तम् । ५२ । (E).

८५ । १ चल चित्त (A), चलि चित्त (F). २ तरुणत्त (F). ३ सुपुरिस (E & F). ४ पडा (A). ५ कीत्ति (B). ६ बिंबा (B & C).

जसु आइ हत्थ[1] विआण[2] तह[3] बे पओहर जाण ।
पभणेइ णाअ[4] णरेंद[5] एम[6] माणु[7] तोमर छंद ॥ ८६ ॥

---

८५ । यथा । चलति चलचित्त एष नश्यति तरुणवेषः । सुपुरुषगुणेन बद्धा स्थिरा तिष्ठति कीर्त्तिः शुद्धा ॥ (G).

८६ । यस्यादौ हस्तो विज्ञातः तथा द्वौ पयोधरौ [ज्ञातौ] । प्रभणति नागनरेन्द्रः एतत् जानीहि तोमरच्छन्दः ॥ हस्तोऽन्त-गुरुचतुष्कलः । (C).

८६ । अथ नवाक्षरचरणस्य वृत्तस्य चतुःषष्ठ्युत्तरत्रिशततमं भेदं तोमरनामकं वृत्तं लक्षयति, जस्विति । जसू[सु]—यत्र [आइ]—आदौ हत्थ—हस्तः गुर्वंतः सगण इति यावत् बिआए—विज्ञातः विज्ञायते वा, तह—ततस्तथा वा बे पओहर—द्वौ पयोधरौ मध्यगुरुकौ जगणावित्यर्थः जाण—ज्ञायेते ज्ञातौ वा तत् तोमर छंद—तोमरनामकं वृत्तं माणु—मानय, एम—एवं णाउ णरेंद—[नाग]नरेंद्रः पिंगलः पभणेइ—प्रभणति ॥ यत्र प्रथमं सगणस्त-दनंतरं च जगणद्वयं प्रतिचरणं प[त]ति तत्तोमरनामकं वृत्तमि-त्यर्थः । ५३ । (E).

८६ । जस्विति । यस्यादौ हस्तो विज्ञातः तथा द्वौ पयोधरौ ज्ञातौ । प्रभणति नागनरेंद्रः एवं मानय तोमरं छंदः ॥ हस्तः सगणः, पयोधरो जगणः । (G).

---

८६ । १ जसु आइ हथ्थ (A), जसू आद हत्थ (E). २ वेआण (E). ३ तसु (A). ४ णाउ (E & F). ५ णरन्द (C). ६ ए to be read as short, vide श्लोक ५, p. 7. ७ जाण (A & B), माण (C).

जहा,

चलि[1] चूअ कोइल साव महु[2]मास पंचम गाव ।
मण मज्झ[3] बम्मह[4] ताव ण हु कंत अज्जवि आव ॥
८७ ॥ तोमर ।

८७ । चलति चूते कोकिलशावो मधुमासे पञ्चमं गायति । मनोमध्ये मन्मथतापः न हि कान्तोऽद्याप्यायाति ॥ (C).

८७ । तोमरमुदाहरति, चलीति । कोइल साव — कोकिलशावकाः चूअ — चूते सहकारवृक्षे चलि — गत्वा महुमास — मधुमासे वसंतसमये पंचम — पंचमं स्वरभेदं गाव — गायंति । अत इति शेषः मज्झ — मम मण — मनः बम्मह — मन्मथः ताव — तापयति, अज्जवि — अद्यापि कंत — कांतः ण हु — न खलु आव — आगतः ॥ एतादृशेऽपि कांतो नायातोऽतः किमाचरणीयं मया तत्त्वमेवादिशेति गूढ़ाभिप्रायायाः कस्याश्चित् प्रोषितभर्त्तृकायाः प्रियसखीं प्रति वाक्यमिदम् । तोमरं निवृत्तम् । ५४ । (E).

८७ । यथा । गत्वा चूते कोकिलशावो मधुमासे पंचमं गायति । मनो मन्मथस्तापयति न खलु कांतोऽद्याप्यायातः ॥ (G).

---

८७ । १ चलि (A). २ मधु (B & C). ३ मज्भा (B & C). ४ मम्मह (C).

णाआराआ जंपे सारा ए चारी कस्रा अंते हाराए ।
अट्ठाराहा[1] मत्ता पाआए[2] रूआमाला[3] छंदा[4] जंपीए[5] ॥
८८ ॥

८८ । नागराजो जल्पति सारमेतत् चत्वारः कर्णा अन्ते हारः । अष्टादश मात्रा यत्पादे रूपमालीच्छन्दो जल्प्यताम् ॥ (C).

८८ । अथ नवाक्षरचरणस्य वृत्तस्य प्रथमं भेदं रूपमालानामकं वृत्तं लक्षयति, णाआराआ इति । चारी कस्रा—चत्वारः कर्णा गुरुद्वयात्मका गणा इति यावत् अंते—कर्णचतुष्टयांते हाराए—हारः गुरुरित्यर्थः । एवंप्रकारेण पाआए—पादे अट्ठाराहा—अष्टादश मत्ता—मात्रा यत्र भवंतीति शेषः, ए—एतत् सारा—सारमत्युत्कृष्टमिति यावत् रूआमाला छंदा—रूपमालाच्छंदः जंपाए—जल्प्यते कथ्यत इति यावत्, इति णाआराआ—नागराजः पिंगलः जंपे—जल्पति ॥ अत्र सारपदं मात्राज्ञापकस्य चरणः पद्यपूरणार्थमेव वर्णवृत्तेषु मात्राकथनानुपयोगादिति वाच्यम् । ५५ । (E).

८८ णाआ इति । नागराजो जल्पति सारमेतत् चत्वारः कर्णाः अंते हारः । अष्टादश मात्राः पादे रूपमालाच्छंदो जल्प्यते ॥ (G).

८८ । १ अट्ठाहारो (A), अट्ठाराहा (B & C). २ जा पाए (B & C). ३ रूआमालो (B & C). ४ छंदो (A), छन्दा (B & C). ५ जंपूबे (A), जप्पीए (B), जम्पीए (C), जंपाए (E).

जहा,

जं णच्चे विज्जू[1] मेहंधारा[2] पंफुल्ला[3] णीवा सद्दे मोरा ।
वाअंता[4] मंदा[5] सीआ वाआ कंपंता गाआ[6] कंता णाआ ॥

८९ ॥ रूपमाला[7] ।

८९ । उदाहरति । [यत्] नृत्यति विद्युत् मेघान्धकाराः प्रफुल्ला नीपाः शब्दायन्ते मयूराः । वीजयन्ति मन्दाः शीता वाताः कम्पते कायः कान्तो नायातः ॥ (C).

८९ । रूपमालामुदाहरति, जमिति । जं—यस्मात् कारणात् विज्जू—विद्युत् णच्चे—नृत्यति मेहंधारा—मेघांधकारा दिशः जा[ता] इति शेषः, णीवा—नीपाः कदंबाः पंफुल्ला—प्रफुल्लिताः, मोरा—मयूराः सद्दे—शब्दायंते । मंदा—मंदगामिनः सीआ—शीताः वाआ—वाताः वाअंता—वांति, कंता—कांतः णाआ—नागतः, अतः गाआ—गात्रं कंपंता—कंपते ॥ वर्षाकालमवधिं कृत्वा गतः कांतो नाद्याप्यागतोऽतः किमाचरणीयमिति स्वयमेव विचारं कुर्वत्याः प्रोषितभर्तृकाया वाक्यमेतत् । रूपमाला निवृत्ता । ५६ । (E).

८९ । यथा । यन्नृत्यति विद्युन्मेघांधकारः प्रफुल्ला नीपाः शब्दायंते मयूराः । वांति मंदाः शीता वाताः कंपते गात्रं कांतोनायातः ॥ (G).

---

८९ । १ विज्जा (B), वीज्जा (C). २ मेश्चन्धारा (B). ३ पप्फुल्ला (B). ४ वीघंता (A), वीचन्ना (B & C). ५ मत्ता (A). ६ काचा (A & C), पाचा (B). ७ रूपमाली (B & C).

जसु[1] आइ हत्थ[2] विआणिओ
तह[3] वे पओहर[4] जाणिओ ।
गुरु अंत पिंगल[5] जंपिओ[6]
सइ[7] छंद संजुत[8] थप्पिओ ॥ ९० ॥

९० । अथ दशाक्षरा । यस्यादौ हस्तो विज्ञातः तथा द्वौ पयोधरौ ज्ञातौ । गुरुरन्ते पिङ्गलेन कथितम् एतच्छन्दः संयुक्तं स्थापितम् ॥ हस्तोऽन्तगुरुश्चतुष्कलः । (C).

९० । अथ दशाक्षरचरणस्य वृत्तस्य चतुर्विंशत्यधिकदशशतं भेदा भवंति, तत्र चतुःषष्ठ्युत्तरत्रिशततमं भेदं संयुक्तनामकं वृत्तं लक्षयति, जस्विति । जसू[सु]—यत्र आइ—आदौ हत्थ—हस्तः गुर्वंतः सगण इति यावत् विआणिओ—विज्ञातः, तह—ततस्तथा वा वे पओहर—द्वौ पयोधरौ मध्यगुरुकौ जगणाविति यावत् जाणिओ—ज्ञातौ । अंत—जगणद्वयांते पादांते वा गुरु—गुरुः विज्ञात इति पूर्वेणान्वयः, पिंगल जंपिओ—पिंगलजल्पितं सइ—तदेव संजुत—संयुक्तं छंद—वृत्तं, थप्पिओ—स्थाप्यतां ॥ तत्संयुक्तनामकं वृत्तं ज्ञायतामित्यर्थः । ५७ । (E).

९० । अथ दशाक्षरा पंक्तिः । जस्विति । यस्यादौ हस्तोविज्ञातः तथा द्वौ पयोधरौ ज्ञातौ । गुरुरंते पिंगलजल्पितं तच्छंदः संयुक्तं स्थापितम् ॥ हस्तस्सगणः, पयोधरो जगणः । (G).

९० । १ जय (B), जस्र (E). २ हच्छ (A). ३ तद्द (A). ४ पओर (E). ५ पिप्पल (B). ६ चप्पिओ (B). ७ सोइ (A, B & C), तइ (F). ८ संयुत (F).

जहा,

तुहु[१] जाहि[२] सुंदरि अप्पणा परितेज्जि[३] दुज्जण[४] थप्पणा[५]।
विअसंत[६] केअइ संपुडा[७] णिहु एहु[८] आविहइ[९] बप्पुडा[१०] ॥
९१[११] ॥ संजुता[१२]।

९१। उदाहरति। त्वं याहि सुन्दरि आत्मना परित्यज्य दुर्ज्जनस्थानम्। विकसन्तु केतकीसंपुटा निभृतमत्रागमिष्यति बप्पुडा ॥ आत्मनेत्यनेन नैश्चित्यं व्यज्यते। बप्पुडा इति शब्दोऽनुकम्प्यजनवाचको देशी, केतकीविकाशे ज्ञापितः स्वयमेवागमिष्यति नायकः, त्वं दुर्ज्जनस्थानं त्यक्त्वा अभिमतस्थानं गच्छ। (C).

९१। संयुक्तमुदाहरति, तुह इति। हे सुन्दरि सर्वावयवरमणीये विअसंत केअइ संपुडा — विकसत्केतकीसंपुटे एहु — अत्र कुंजे इति शेषः बप्पुडा — त्वदनुकंप्यो नायकः णिहु — निभृतं तूष्णीं पराज्ञातमिति यावत् यथा स्यात्तथा आविह — आगमिष्यति, अत इति शेषः दुज्जण थप्पणा — दुर्जनस्थापनां दुर्जनाः श्वश्रूननांद्रादयस्तेषां स्थापनां परपुरुषनिरीक्षणं न विधेयमित्याद्यनेककौलाचारोपदेशमित्यर्थः परितेज्जि — परित्यज्य अप्पणा — आत्मना स्वयमेवेति यावत् तुह — त्वं जाहि — गच्छ संकेतस्थलं ॥

९१। १ तुम्ह (A), तइ (F). २ जाउ (A). ३ परितव्जि (A). ४ जुज्जण (B). ५ थप्पिणा (B). ६ चविसन्ति (C). ७ संपुल्ला (A & C), संपुणा (B). ८ एहि (A, B & C). ९ चाइह (A), चाविघ (B & C), चावइ (E). १० वणुल्ला (A), वप्पुणा (B). ११ ८९ (A). १२ संयुत्ता (A), संयुता (C).

हार ठवीजे[1] काहल[2] दुज्जे[3] कुंतिअ[4] पुत्ता ए गुरु जुत्ता ।
हत्थ[5] करीजे[6] हार ठवीजे[7] चंपअ[8]माला छंद कहीजे[9] ॥ ९२[10] ॥

नायकं प्रति उक्ता समागतायाः कस्याश्चित्सख्याः पुरा नायकाभिसारणाय कृतसङ्कल्पां पश्चान्निजकुलक्रमागताचारश्रवणेनाभिसरणमनभिलषमाणां काञ्चिन्नायिकामभिसारार्थं प्रेरयन्त्या इदं वाक्यम् । आत्मनेत्यनेन परमनैश्चिन्त्यं, बप्पुडेत्यनेन च नायककृपणीयत्वं, विकसत्केतकीसंपुटे इत्यनेन चाभिसारस्थानस्यान्यजनाज्ञेयत्वं व्यज्यत इति मन्तव्यम् । क्वचित् णिच्‌ड एवि आविअ बप्पुडेति पाठस्तत्र निभृतमयमागत इति व्याख्येयम् । संवृता [?] निवृत्ता [?] । ५८ । (E).

९१ । यथा । त्वमपि जा[या]हि सुंदरि आत्मना परित्यज्य दुर्जनस्यापनाः दोषारोपान् । विकसितकेतकीसंपुटे निभृतमत्रागमिष्यति त्वदनुकंप्यो नायकः ॥ बप्पुडेति उक्तार्थे देशी । कुंजे इति शेषः । (G).

९२ । हारः स्थाप्यते काहलद्वयं कुन्तीपुत्रः एकगुरुयुक्तः । हस्तः क्रियते हारः स्थाप्यते चम्पकमालाच्छन्दः कथ्यते ॥ हारो गुरुः, काहलद्वयं लघुद्वयं, कुन्तीपुत्रः कर्णः द्विगुरुरिति यावत्, एष कुन्तीपुत्रः गुरुयुक्तः, हस्तो द्वि[अन्त्य]गुरुश्चतुष्कलः । (C).

---

९२ । १ हार ठवीज्जे (A), तारा वीजे (B). २ कालह (B). ३ दिज्जे (A), दूजे (B & C). ४ कुंती (A). ५ हतक (A). ६ ठवीए (A), dropt from this up to the 4th quadrant of śloka 93, in (F). ७ करीजे (A). ८ चम्पक (B & C). ९ सुणीजे (A), करीजे (B & C). १० ९० (A).

जहा, ओग्गर[1] भत्ता रंभअ पत्ता
गाइक घित्ता[2] दुध्ध[3] सजुत्ता[4] ।
मोइणि[5] मच्छा णालिच[6] गच्छा
दिज्जइ कंता खा पुणबंता[7] ॥ ९३[8] ॥ चंपकमाला ।

---

९२ । अथ दशाक्षरचरणस्य वृत्तस्यैकोनद्विशततमं भेदं चंपकमालानामकं वृत्तं लक्षयति । हार — गुरुः काहल दुज्जे — काहलद्वयं काहल एकलघ्वात्मको गणस्तद्द्वयमित्यर्थः, [ए]गुरु जुत्ता — एकगुरुयुक्तः, कुंतिअ पुत्ताए [?] — कुंतीपुत्रः कर्णः गुरुद्वयात्मको गण इति यावत् ठवीजे — स्थाप्यते । ततः हत्थ — हस्तः गुर्वंतः सगण इति यावत् करीजे — क्रियते, ततश्च हार — एकगुरुः ठवीजे — स्थाप्यते, तत् चंपअमाला छंद — चंपकमालाच्छंदः कहीजे — कथ्यते पिंगलेनेति शेषः ॥ ५९ । (E).

९२ । हारेति । हारः स्थाप्यतां काहलयुग्मं कुंतीपुत्र एकगुरुयुक्तः । हस्तः क्रियते हारः स्थाप्यते चंपकमालाच्छंदः कथ्यते ॥ हारो गुरुः, काहलो लघुः, कर्णो द्विगुरुः, हस्तः सगणः । (G).

९३ । उदाहरति । ओग्गलभक्तं रम्भापा[प]त्रे गोदुग्धघृतयुक्तं । मोदिनीमत्स्या नालीचद्रव्यान् ददाति कांता खादति पुण्यवान् ॥

---

९३ । १ ओगर (E). २ दुद (C). ३ दुग्ध (B), घित्त (C). ४ सजुत्ता (A), संजत्ता (C), सुजुत्ता (E). ५ मोइल (B & C), मोद्दर (F). ६ नालिच (E & F). ७ पुणमत्ता (A), पुणमन्ता (B), पुणमन्ना (C). ८ ९१ (A).

दीह[1] लहु जुअ दीह लहु सारवई धुअ[2] छंद कहु ।
अंत पओहर ठाइ[3] धआ चोद्दह[4] मत्त बिरामकआ[5] ॥ ९४[6] ॥

उद्गलितं मण्डं भक्तं, ओगरो धान्यविशेष इति केचित्, मोदिनी-[?]मत्स्या मनोज्ञमत्स्यः, नालीचवृचः शाकभेदः । (C).

९३ । चंपकमालामुदाहरति, ओगरेति । दुध्ध सजुत्ता — दुग्ध-संयुक्तं ओगर भत्ता — ओगरभक्तं, ओगरो धान्यविशेषस्तदोदन-मित्यर्थः, गाइक घित्ता — गोघृतं मोइणि मच्छा — मद्गुरमत्स्यः ना[ण]लिच गच्छा — नालीचवृचः, नालीचो गौडदेशे अनेनैव नाम्ना प्रसिद्धः शाकवृचविशेष इत्यर्थः, रंभअ पत्ता — रंभापत्रे कंता — कांतया दिज्जै[ज्जइ] — दीयते, पुणवंता — पुण्यवान् खा — खादति ॥ कस्यचिद्विदूषकस्य निजप्रियवयस्यं प्रति वाक्यमिदम् । चंपकमाला निवृत्ता । ६० । (E).

९३ । यथा । शालिभक्तो[क्तं] रंभापत्रे गोघृतं दुग्धसंयुक्तः[क्तं] । मद्गुरमत्स्यो नालिचशाको दीयते कांतया खादति पुण्यवान् ॥ नालिचशाकः शाकविशेषः । (G).

९४ । दीर्घा लघुयुगलं दीर्घा लघुः सारवती ध्रुवं छन्दः कथितं । अन्ते पयोधरं स्थापयित्वा ध्वजश्चतुर्दश मात्रा विरामीकृताः ॥ दीर्घा गुरुः, पयोधरो जगणः, ध्वज आदिलघुस्त्रिकलः । (C).

---

९४ । १ दिह (C). २ धव (A), धुव (E). ३ ठाउ (A, B & C). ४ चउद्दह (A), चोकुह (B), चाकुह (C), चौदह (E & F). ५ विराम कद्दा (E). ६ ९२ (A).

जहा,

पुत्त पवित्त बहुत्त[1] धणा भत्ति कुटुंबिणि[2] सुद्ध मणा।
हक्क[3] तरासइ भिच्च गणा को कर बब्बर सग्ग मणा॥
९५[4]॥ सारवती।

९४। अथ दशाक्षरचरणस्य वृत्तस्यैकोनचत्वारिंशाधिकचतुःशततमं ४३९ भेदं सारवतीनामकं वृत्तं लक्षयति, दीहेति। यत्र प्रथमं दीह—दीर्घं गुरुमिति यावत् तदनंतरं लहु[ह] जुअ—लघुयुगं ततोऽप्यनंतरं दीह लहू—दीर्घलघू गुरुलघू इति यावत्, अंत—अंते दीर्घलघ्वोरनंतरमिति यावत् पओहर—पयोधरं मध्यगुरुं जगणमिति यावत् ठाइ—स्थापयित्वा [ध]आ—ध्वजः लघ्वादिस्त्रिकलो गण इति यावत् स्थाप्यत इति शेषः, कहा चउदह मत्त विराम—कथितः चतुर्दशमात्राविरामः, सारवई—सारवतीनामकं छंद—छन्दः धुअ—ध्रुवं कहु[ह]—कथ्यताम्॥ प्राकृतभाषायां पूर्वनिपातानियमात् कहा-शब्दस्य पूर्वनिपातकरणे न दोष इति मंतव्यम्। ६१। (E).

९४। दीर्घो लघुयुगं दीर्घलघू सारवती ध्रुवं छंदः कथय। अंते पयोधरं स्थापयित्वा ध्वजः चतुर्दशमात्रा विरामकृताः॥ पयोधरो जगणः, ध्वजो लघुगुरू। (G).

९५। उदाहरति। पुत्रः पवित्रः बहुतरधनं भक्ता कुटुम्बिनी

९५। १ बहुत्त (A). २ कुटम्बिणि (C). ३ हाक्क (B). ४ ९२ (A).

कण्णो पढमो[1] हत्थो[2] जुअलो[3]
कण्णो तिअलो हत्थो[2] चउथो[4] ।
सोला कलआ छक्का बलआ
एसा सुसमा दिट्ठा[5] सुसमा[6] ॥ ९६[7] ॥

शुद्धमनाः । हा[ह]क्क त्रसन्ति भृत्यगणाः कः करोतु [ब]र्ब्बरः स्वर्गे मनः ॥ हक्क-शब्दः कोपवाची । (C).

९५। सारा[र]वतीमुदाहरति, पुत्तेति । [पवित्त]—पवित्राः पितृभक्ता इति यावत् अथवा पवेः वज्रात् त्रायंत इति पवित्राः वज्रादपि रक्षका इत्यर्थः पुत्राः बहुत्त धणा—बहुतरं धनं भत्ति—भक्ता प्रियभजनपरेति यावत् [सुद्ध मणा]—शुद्धमनाः अकुटिलांतःकरणा कुटुम्बिणि—वधूः यदि एतत्सर्वं भवतीति शेषः । भिच्च गणा—भृत्यगणः हक्क—हक्केन शब्दव्यापारमात्रेणेति यावत् तरासइ—त्रसति, तदा को—कः बब्बर—वर्ब्बरः सग्ग—स्वर्गे मणा—मनः कर—करोति न कोऽपीत्यर्थः ॥ ९२ । (E).

९५। यथा। पुत्राः पवित्राः बहुतरं धनं भक्ता कुटुंबिनी शुद्धमनाः। हक्केन त्रसति भृत्यगणः कः करोति वर्ब्बरकः स्वर्गे मनः ॥ [कुटुंबिनी] स्त्री, [हक्क] शब्दविशेषः । (G).

९६। कर्णः प्रथमो *** हस्तः प्रकटः षोडश कलाः षड्-

९६। १ पअलो (A). २ हत्थो (A). ३ युअलो (E). ४ पअलो (A, B & C). ५ दिट्टा (B & C). ६ सुसमा (E). ७ ९४ (A), ९२ (E).

वलया एषा सुस[ष]मा दृष्टा सुस[ष]मा॥ द्विगुरोरनन्तरम् अन्तगुरुस्ततुष्कलः पुनरप्येवं मिलिला षोडश कला भवन्ति। अत्र च षड्गुरवः पतन्ति, सुस[ष]मा शोभना, सुस[ष]मेति छन्दः। (C).

९६। अथ दशा[चा]रचरणस्य वृत्तस्य सप्तनवत्यधिकत्रिशततमं भेदं सू[सु]स[ष]मानामकं वृत्तं लक्षयति, कखो इति। पढमो—प्रथमः कखो—कर्णः गुरुद्वयात्मको गण इति यावत् जुअलो—द्वितीयः हत्यो—हस्तः गुर्वन्तः सगण इत्यर्थः, तिअलो—तृतीयः कखो—कर्णः पुनः गुरुद्वयात्मक एव गण इति यावत्, चउथो—चतुर्थः हत्यो—हस्तः पुनः सगण इत्यर्थः यत्र भवतीति प्रतिगणानंतरमध्याहृत्य योजनीयं। सोला कलआ—षोडशकलाका षोडश कलाः मात्रा यस्यां सा तादृशीत्यर्थः, छक्का वलआ—षड्वलया षट् वलया गुरवो यस्यां सा तादृशीत्यर्थः षड्गुरुयुक्तेति यावत् एषा—एषा असुसमा प्राणसमा सुसमा—सुषमा दिट्ठा—दृष्टा पिंगलेनेति शेषः॥ सुषमानामकमेतद्वृत्तं पिंगले[न] प्रकाशितमित्यर्थः। अत्र कलाज्ञापकं च पदं पद्यपूरणार्थमेव, वर्णवृत्तेषु मात्राकथनस्यानतिप्रयोजनतया [लघु]गुरुज्ञापकत्वाच्चेति मंतव्यं। क्वचित्तु हत्यो पअलो इति पाठस्तत्र हस्तः प्रकट इति व्याख्येयम्। (E).

९६। कखेति। कर्णः प्रथमो हस्तो द्वितीयः कर्णस्तृतीयो-हस्तस्तुर्यः। षोडशकला षड्वलया एषा सुषमा दृष्टा असुसमा॥ कर्णो द्विगुरुः, हस्तः सगणः, वलयो गुरुः। (G).

जहा, भोहा[१] कविला[२] उच्चा हिअला[३]
मझ्झा[४] पिअला णेत्ता[५] जुअला ।
रुक्खा बअणा[६] दंता विरला[७]
केसे[८] जिबिआ[९] ताका पिअला ॥ ९७[१०] ॥ सुसमा[११] ।

---

९७ । उदाहरति । भ्रूः कपिला उच्चं ललाटं मध्येपीतं नेत्र-युगलं । रूक्षं वदनं दन्ता विरलाः कथं जीवत्यस्याः प्रियः ॥ एतादृग्लक्षणा विधवा भवतीत्यर्थः । (C).

९७ । सुषमामुदाहरति, भो इति । यस्याः भ्रूः कविला—कपिला ललाटः[टं] उच्चा—उच्चः[च्चं] णेत्ता यु[जु]अला—नेत्रयुगलं मझ्झा पिअला—मध्यपीतं मार्ज्जारनयनसदृशमित्यर्थः । बअणा—वदनं रुक्खा—रूक्षं दंता विरलाः, ताका—तस्याः पिअला—प्रियः के[के]से—कथं जिबिआ—जीवति ॥ परमकुत्सितरूपा यस्य कांता स कथं प्राणान्धारयति इति सकलावयवरमणीयकांताकस्य कस्यचित्कुकांताकं प्रति वचनमिदम् । ६४ । (E).

९७ । यथा । भ्रूकपिला उच्चललाटा मध्येपीतनेत्रयुगलं । रूक्षं वदनं दंताः विरलाः कथं जीवति तस्याः प्रियः ॥ (G).

---

९७ । १ भोच्चा (B & C). २ कपिला (A). ३ निअला (A), णिआला (B), लिअरा (E), णिदला (F). ४ मझ्झे (A), मज्झे (B & C). ५ णअणा (A). ६ वदणा (F). ७ बिअला (A), विरणा (B). ८ कैसे (B, C, E & F). ९ जिविला (A). १० ९५ (A), ६४ (E). ११ सुखमा (A).

दिअवर हार[१] पअलिआ पुणवि[२] तहट्ठिअ[३] करिआ[४] ।
बसु[५]लहु बे गुरु सहिआ अमिअगई धुअ[६] कहिआ ॥ ९८[७] ॥

९८। द्विजवरहारप्रकटिता पुनरपि तथैव कृता। वसुलघु-द्विगुरुसहिता अमृतगुरु[गतिः] ध्रुवं कथिता ॥ द्विजवरश्चतुर्लघुः, हारो गुरुरेताभ्यां प्रकटिता, पादे गुरुद्वयमष्टौ लघवो भवन्ति। (C).

९८। अथ दशाक्षरचरणस्य वृत्तस्य षण्णवत्यधिकचतुःशततमं भेदम् अमृतगतिनामकं वृत्तं लक्षयति, दिअवरेति। दिअवर हार पअलिआ — द्विजवरहारप्रकटिता द्विजवरश्चतुर्लघ्वात्मको गणः हारो गुरुस्ताभ्यां प्रकटितेत्यर्थः, अथवा प्राकृतभाषायां पूर्वनिपाता-नियमात् प्रकटितद्विजवरहारेति पअलिआ-शब्दस्य पूर्वनिपातं कृत्वा योजनीयं, पुणवि — पुनरपि तहट्ठिअ — तथैव संस्थाप्य द्विजवर-हारौ दत्त्वेति यावत् करिआ — कृता। अथवा पूर्वोक्तप्रकारेण करिआ-शब्दस्य पूर्वनिपातं कृत्वा पुणवि करिआ तहट्ठिअ — पुनरपि कृततथास्थितिः कृता तथा तेन प्रकारेण द्विजवरहार-स्थापनप्रकारेणेति यावत् स्थितिर्यस्याः सा तादृशीति योजनीयम्। बसु लहु बे २ गुरु सहिआ — वसुलघुद्विगुरुसहिता वसवोऽष्टौ, तथा-चाष्टसंख्याकैर्लघुभिर्गुरुद्वयेन च युक्तेत्यर्थः, अमिअगई — अमृतगतिः धुअ — ध्रुवं कहिआ — कथिता॥ तदमृतगतिनामकं वृत्तं कथित-मित्यर्थः। अत्र लघुगुरुज्ञापकस्वरणोऽनतिप्रयोजनकत्वात् पद्यपूर-

९८। १ Dropt in (A). २ पुणुवि (C). ३ तहस्थिय (A), तहठिय (B). ४ कहिया (A). ५ बऊ (F). ६ धूय (B & C). ७ ९६ (A), ९५ (E).

जहा, सरअ[१] सुधाअर[२] बअणा
 बिकअ[३] सरोरुह णअणा ।
 मअ गल[४] कुंजर गमणी[५]
 पिअसहि[६] दिट्ठिअ[७] तरुणी ॥ ९९[८] ॥ अमृतगतिः ।

णार्थमिति मंतव्यं, प्रथमं लघुचतुष्टयं तदनंतरमेको गुरुः पुनर्लघु-चतुष्टयं पुनरेको हार एते गणाः क्रमेण यस्य चरणे पतंति तद-मृतगतिनामकं वृत्तमिति निष्कृष्टोऽर्थः । ६५ । (E).

९८ । दिअ इति । द्विजवरो हारः प्रकटितः पुनरपि तथा-स्थितः कृतः । वसुलघुद्विगुरुसहिता अमृतगतिर्ध्रुवं कथिता ॥ द्विजवरश्चतुर्लघुः, हारो गुरुः । (G).

९९ । उदाहरति । शरत्सुधाकरवदना चपलसरोरुहनयना । मदकलकुञ्जरगमना प्रियसखि दृष्टा तरुणी ॥ (C).

९९ । अमृतगतिमुदाहरति, सरेति । सरअ सुधाअर बअणा — शारदसुधाकरवदना विकच सरोरुह णअणा — विकचसरोरुहनयना । मअ गल कुंजर गमणी — मदकलकुञ्जरगमना तरुणी हे प्रि[य]सखि दिट्ठा — दृष्टा ॥ क्वचित् जिविह सुधा रस बअणेति पाठस्तत्र जीवि-तस्य प्राणस्य सुधारस इव वचनं यस्याः सा जीवितसुधारसवचना इति व्याख्येयम् । अमृतगतिर्निवृत्ता । ६६ । (E).

---

९९ । १ सरस (A & F). २ सुहावण (A). ३ चवल (A, B & C), विकच (E). ४ गच्च मच्च (A), मल गच्च (B), मच्च कल (F). ५ गमणा (A), गच्चणी (C). ६ The fourth quadrant runs thus in (A):—जिविच्च समासच्च रमणा. ७ दिट्टच्च (B), दिठ्ठा (E & F). ८ ९० (A), ६६ (E).

णील[1] सरूअह[2] एह[3] करीजे[4]
तिसि भआ गण[5] जत्थ[6] कहीजे[7]।
सोलह[8] मत्तह पाअ[9] ठवीजे
दुग्गुरु अंतहि बंधु भणीजे[10] ॥ १००[11] ॥

९९। यथा। शारदसुधाकरवदना विकचसरोरुहवदना[नयना]। मदकलकुंजरगमना प्रियसखि दृष्टा तरुणी ॥ (G).

१००। अथैकादशाचरा। नीलस्वरूपम् एतत् क्रियते त्रयो भगणास्तत्र क्रियन्ते। षोडश मात्राः पादे स्थाप्यन्ते द्वौ गुरू अन्ते बन्धुः क्रियते ॥ बन्धुच्छन्दसो नील इत्यपि नामान्तरम्। यद्वा नीलस्वरूपः पिङ्गलः तेनैतत् क्रियते। णील सप्पवइ [?] इति पाठे स्पष्टार्थः। (C).

१००। अथैकादशाक्षरचरणस्य वृत्तस्याष्टचत्वारिंशोत्तरं सहस्र-द्वयं भेदा भवंति, तत्रैकोनचत्वारिंशोत्तरचतुःशततमं ४३९ भेदं बंधुनामकं वृत्तं लक्षयति, णीलेति। जत्थ—यत्र पाअ—पादे तिसि—त्रयः भआ अण—भगणाः भणीजे—भण्यंते, अंतहि—अंते भगणत्रयांते पादांते वेत्यर्थः दुग्गुरु—द्विगुरुः करीजे—क्रियते, सोलह मत्तह—षोडश मात्राश्च ठवीजे—स्थाप्यंते, एह—

१००। १ लील (A & C). २ सरोवह (A), सरूअ (B). ३ एऊ (B & C). ४ करिज्जे (C), कजे (E), कहीजे (F). ५ अण (E & F). ६ तत्थ (A, B & C). ७ धरीजे (A), भणीजे (B & C), करीजे (F). ८ सोडह (B). ९ पाउ (A). १० सुणीजे (A), करीजे (B & E), कहीजे (C). ११ ९८ (A), ९७ (E).

जहा, पंडव[१] बंसहि जम्म[२] धरीजे[३]
संपत्र अज्जिअ धम्मक दिज्जे[४]।
सोउ[५] जुहुठ्ठिर[६] संकट[७] पावा[८]
देवक[९] लिक्खिअ[१०] केण मेटावा[११] ॥ १०१[१२] ॥ बंधु।

एतत् णील सिरोरुह — नीलशिरोरुहेण पिंगलेनेति यावत् बंधु — बंधुनामकं वृत्तं कहीजे — कथ्यते ॥ यद्वा णील सरूअह — नीलस्वरूपापरनामकमिति यावत् बंधु — बंधुनामकं वृत्तं कथ्यतइति व्याख्येयम्। अत्र मात्राज्ञापकचरणमनतिप्रयोजनकत्वात् पद्यपूरणार्थमेवेति मंतव्यं, भगणत्रयानंतरं गुरुद्वयं यत्र प्रतिचरणं पतति तद्बंधुनामकं वृत्तमिति फलितार्थः। (E).

१०० । अथैका[दशा]क्षरं त्रिष्टुप्। णीलेति। णी[नी]लसरोरुहेण पिंगलेनै[त]त्कथितं त्रयो भगणा यत्र भण्यंते। षोडश मात्राः पादे स्थाप्यंते द्विगुर्वंतो[ति] बंधुः छंदः कथ्यते॥ नीलसरोरुहः पिंगलः। (G).

१०१ । पाण्डववंशे जन्म धृत्वा सम्पदम् अर्ज्जयित्वा धर्माय

१०१। १ पाण्डव (B & C). २ जन्म (B & F). ३ करीजे (A), धरिज्जे (E & F). ४ धम्म करीजे (A), विप्पक्ख दीजे (B & C), धम्मके दिज्जे (E). ५ सोइ (A & C), सोच्चि (B). ६ जुधिट्ठिर (A), जुहिट्ठिर (B), युद्दट्ठिर (C). ७ सङ्कष्ठ (C). ८ पाआ (B & C). ९ देवक्ख (B & C), दैवक (E & F). १० लेक्खल (A), लेखिक्खअ (E & F). ११ मेटाआ (B & C), मिरावावा (F). ए to be read short in मेटावा. Vide श्लोक ५, p. 7. १२ ९९ (A), ९८ (E).

दिअबर हार लहू जुअला
बलअ परिट्ठिअ[1] हत्थ अला ।
पअ कल चोद्दह[2] जंप[3] अही
कइवर[4] बल्लहि[5] हो[6] सुमुही ॥ १०२[7] ।

दीयते। तेनापि युधिष्ठिरेण सङ्कटं प्राप्यते दैवलिखनं केन लुप्यते ॥ (C).

१०१। बंधुमुदाहरति, पण्डवेति। पण्डव बंसहि—पांडववंशे पाण्डोरयं—पाण्ड[वः] पांडवस्यासौ वंश[श्च]श्चेति पांडववंश[श]-स्तस्मिन्नित्यर्थः यस्येति [शेषः] जम्म—जन्म क्रियते विधाचेति भावः, अज्जिअ—अर्ज्जयित्वा संपअ—संपत् धम्मके—धर्म्माय दिज्जे—दीयते येनेति शेषः। सोउ—सोऽपि जुहुट्ठिर—युधिष्ठिरः संकट—संकटं पाआ—प्राप्तः, अतः दै[दे]वक—दैवस्य विधेरिति यावत् लेक्खिअ—लिखितं केण—[केन] मेटाबा—विलुप्यते ॥ न केनापीति भावः। बंधुर्निवृत्तः। एतस्यैवान्यत्र दोधकसंज्ञा। ६८। (E). [This anomaly has been taken notice of, in Ghosha's Compendium, p. 70, foot-note.—Ed.]

१०१। पांडववंशे जन्म क्रि[भ्रि]यते संपदम् अर्जयित्वा धर्मार्थे

१०१। १ पविट्ठिअ (A), परिट्ठव (B), परिट्ठर (C). २ चउद्दह (A), चोद्दर (C), चौद्दह (E & F). ३ जंपु (A). ४ कइजण (A). ५ बाल्लहि (A), बम्भहि (B), जाणह (E), जाणहि (F). ६ सो (E & F). ७ १०० (A), ९९ (E).

जहा, अइचल जोब्बण देह धणा
सिविणअ[१] सोअर बंधु अणा[२] ।
अबसउ काल पुरी गमणा
परिहर बब्बर पाप मणा ॥ १०३[३] ॥ सुमुखी ।

दीयते । युधिष्ठिरः संकटं प्राप्नोति दैवतलिखितं केन प्रोंच्छ्यते ॥ (G).

१०२ । द्विजवरो हारः लघुयुगलं वलयपरिस्थितं हस्ततलं । पदे कलाश्चतुर्द्दश जल्पति अहिः कविजनवल्लभा सुमुखी ॥ द्विजवरो लघुचतुष्कलं, हारो गुरुः, वलयं गुरुर्हस्ततलं चतुष्कलोऽन्तगुरुः । (C).

१०२ । अथैकादशाचरचरणस्य वृत्तस्याशीत्यधिकाष्टशततमं भेदं ८८० सुमुखीनामकं वृत्तं लचयति, दिअवरेति । दिअवर—द्विजवरश्चतुर्लघ्वात्मको गणः ततो हार—हारो गुरुरिति यावत्, ततो लहु जुअला—लघुयुगलं, ततश्च वलअ—वलयो-गुरुः, ततश्च हत्थ अला—हस्ततलं गुर्वंतः सगण इति यावत्, एवं-प्रकारेण यत्र चउदह [?] कल—चतुर्द्दश कलाः पअ—पादे परिट्ठिअ—परिस्थिताः, सो—सा [सु]मुही—सुमुखी जाणहु—ज्ञायतां तत्सुमुखीनामकं वृत्तं ज्ञेयमित्यर्थः, इति कइवर—कविवरः अही—अहिः पिंगल इति यावत् जंपइ [?]—जल्पति । ६९ । (E).

१०३ । १ सिबणअ (E). २ अणा (E). ३ १०१ (A), ७० (E).

चामर[1] काहल[2] जुग्ग ठवीजे
हार लहू जुत्र तत्थ[3] धरीजे ।
कस[4] गणा पत्र त्रंत करीजे[5]
दोधत्र[6] छंद फणी पभणीजे[7] ॥ १०४[8] ।

---

१०२ । दिश्र इति । द्विजवरो हारो लघुयुगलं वलयः प्रतिष्ठितहस्ततलः । पादे कलास्तुर्द्दश जल्पति अहिः कविवराः जानीत सा सुमुखी ॥ द्विजवरश्चतुर्लघुः, हारो गुरुः, वलयो गुरुः, हस्तः सगणः । (G).

१०३ । उदाहरति । अतिचलानि यौवनदेहधनानि, स्वप्नसहोदरा बन्धुगणाः । अवश्यं कालपुर्य्यां गमनं परिहर बर्ब्बर पापं मनः ॥ (C).

१०३ । सुमुखीमुदाहरति, अइति । जोब्बण देह धणा — यौवनदेहधनानि अइचल — अतिचलानि, सोअर — सोदरा भ्रातर इति यावत् बंधु जणा — अन्ये अपि कुटुम्बा इत्यर्थः सिविणअ — स्वप्नवत् स्वप्नेन तुल्यम् इति यावत् । यद्वा बंधुजनाः सिविणअ सोअर — स्वप्नसोदराः स्वप्नतुल्या इत्यर्थः । काल पुरी गमणा — यमपुरीगमनम् अवस[उ] — अवश्यम् अतो हेतोः हे बर्बर मणा — मनः

---

१०४ । १ चामल (F). २ कोमल (B). ३ तच्छ (A), पाच (B & C). ४ गण (A). ५ र दीने (A), धरीजे (B & C). ६ दोहअ (B). ७ फणीस भणीजे (A), छंदक णाम करीने (B), छंदउ नाम करीजे (C), फणी पभणिज्जे (F). ८ १०२ (A), ७१ (E).

पाप—पापात् परिहर॥ कंचिन्महापापकर्म्मासक्तं प्रति कस्य-
चिन्मित्रस्योपदेशवाक्यमेतत्। सुमुखी निवृत्ता। ७०। (E).

१०३। यथा। अतिचलानि यौवनदेहधनानि स्वप्नसोदरो-
बंधुजनः। अवश्यं काल[पुरी]गमनं परिहर बर्व्वर पापे मनः॥ (G).

१०४। चामरं काहलयुग्मं हारलघुयुगं तथा ध्रियते। कर्ण-
गणाः पदान्ते क्रियन्ते दोधकच्छन्दः फणीन्द्रेण भण्यते॥ चामरं
गुरुः, काहलं लघु युग्मं तयोर्युग्ममित्यर्थः, हारः लघुयुगं। हार
लहु जुअ जुग धरीजे इति पाठः सुगम एव। अत्र यद्यपि बन्धु-
च्छन्दसा सहाभेदस्तथापि छन्दस्तदेव नामान्तरेण अन्यमुनिनोक्त-
मिति दर्शितं। केचित्तु चामरकाहलयुग्मादीनामत्र नियमः, न तु
क्रमतस्तात्पर्य्यं, तथा च हरतु दुरितं देवमुरारिरित्यादिकमपि
दोधकच्छन्द एवेत्याहुः। (C).

१०४। अथैकादशाक्षरचरणस्य वृत्तस्यैकोनचत्वारिंशोत्तरचतुः-
शततमं भेदं पुनरपि दोधकमेवेति नामांतरेणाह, चामरेति। यत्र
प्रथमं चामर—चामरं गुरुरिति यावत् काहल जुग—काहलयुगं
काहलो लघुस्तज्जु[यु]गमित्यर्थः, ठवीजे—स्थाप्यते, ततश्च हार—
हारो गुरुः लहु—लघू हारानन्तरं द्वौ लघू इत्यर्थः जुअ—जु-
[यु]गं वारद्वयमित्यर्थः एको गुरुस्तदनन्तरं लघुद्वयमिदं वारद्वय-
मिति परमार्थः, तत्थ—तथ्यं तथा वा धरीजे—ध्रियते। एवं सति
भगणत्रयं सिध्यति, अन्यथा चामरकाहलयुगानन्तरं हारलघुद्वय-
मात्रोक्त्या तृतीयभगणालाभाद्भ्रांतप्रलपितत्वापत्तिरित्यस्मत्तातचर-
णोपदिष्टव्याख्योपदेशो निर्मत्सरैः सुधीभिर्विभावनीयः। पअ अंत—

जहा, पिंग जटावलि ठाविअ गंगा
धारिअ[1] णाअरि[2] जेण अधंगा ।
चंदकला जसु सीसहि णोक्खा[3]
सो तुह[4] संकर दिज्जउ[5] मोक्खा[6] ॥ १०५[7] ॥ दोधक ।

पादांते कण्ण गणा — कर्णगणः गुरुद्वयात्मको गण इति यावत् करीजे — क्रियते, फणी — पिंगलः तत् दोधकच्छन्दः दोधकनामकं वृत्तं पभणीजे — प्रभणति ॥ यत्र भगणत्रयोत्तरं गुरुद्वयं तद्दोधकनामकं वृत्तमिति फलितार्थः । बंधुदोधकयोश्चोद्दवनिकामात्रभेदाद्भेदः स्वरूपतस्तु न कश्चिद्विशेष इति विभावनीयम् । (E).

१०४ । चामलेति । चामरं काहलयुग्मं स्थाप्यतां, हारलघुयुगं तत्र स्थाप्यतां । कर्णगणः पादांते क्रियते, दोधकच्छंदः फणी प्रभणति ॥ चामरो गुरुः, काहलो लघुः, हारस्य गुरोर्लघ्वोश्च युगमित्यर्थः । कर्णो द्विगुरुः । (G).

१०५ । उदाहरति । पिङ्गलजटावलीस्थापितगङ्गः धृता नागरी येनार्द्धांगे । चन्द्रकला यस्य शीर्षे स्थिता [शोक्या] स तुभ्यं शङ्करः [द]दातु मोक्षम् ॥ (C).

१०५ । दोधकमुदाहरति, पिंगेति । येन पिंग जटावलि — ता[म्र]जटावल्यां गंगा ठाविअ — स्थापिता, अथवा यः पिंगजटावलीस्थापितगंग इत्येकमेव पदं शिवविशेषणं, येन अर्द्ध[धं]गा

---

१०५ । १ ठाविञ (A). २ णाअरी (C). ३ लोक्का (C), चोक्खा (F). ४ तुञ्ज (E & F). ५ दिज्जउ (B), दीज्जउ (E). ६ साक्खा (E), सोक्खा (F). ७ १०२ (A), ७१ (E).

कसो दुसो[1] हार एक्को[2] बिसज्जे
सल्ला कसा गंध कसा सुणिज्जे[3] ।
बीसा[4] रेहा पाअ पाए गणिज्जे[5]
सप्पा राए सालिणी सा मुणिज्जे[6] ॥ १०६[7] ॥

— अर्द्धांगे नागरी स्त्रीति यावत् धारिअ — धृता । जसु — यस्य सीसहि — शीर्षे णोक्खा — रमणीया चंद्कला — चन्द्रकला दृश्यते इति शेषः, सो — सः संकर — शिवः. तुअ — तुभ्यं मोक्खा [?] — मोक्षं दुःखप्रागभावासमानाधिकरणं दुःखध्वंसमिति यावत् दीज्जउ — ददात्विति यावत् ॥ दोधकं निवृत्तम् । ७२ । (E).

यथा । पिंगलजटावलिस्थापितगंगो धारिता येन नागरी अर्धांगे । चंद्रकला यस्य शीर्षे रमणीया, स तव शंकरो-ददातु सौख्यं ॥ (G).

१०६ । कर्णो द्विगुरुः स द्विगुणः ततोऽपि हार एकः सज्जी-कृतः शल्यं कर्णः गन्धः कर्णः । विंशतिः कलाः पादे पादे गणय सर्पराजेन सा[शा]लिनी भणिता ॥ कर्णो द्विगुरुस्तस्य द्विगुणः चतुर्गुरु-रिति यावत्, ततो हारो गुरुः, शल्यं लघुः, कर्णो द्विगुरुः, गन्धो-लघुः, कर्णो द्विगुरुः । (C).

१०६ । अथैकादशाक्षरचरणस्य वृत्तस्यैकोनवत्युत्तरद्विशततमं भेदं २८९ शालिनीनामकं वृत्तं लक्षयति, कसविति । यत्र प्रथमं कसो दुसो — कर्णद्वयं कर्णो गुरुद्वयात्मको गणस्तद्द्वयमित्यर्थः

१०६ । १ दुसो (A). २ एको (C). ३ एको सुणिज्जे (C). ४ बीसा (B & C). ५ भणिज्जे (A & B). ६ सुणिज्जो (A). ७ १०४ (A), ७२ (E).

जहा, रंडा चंडा[1] दिक्खिदा[2] धम्म दारा
मज्जं मंसं पिज्जए[3] खज्जए आ[4] ।
भिक्खा भोज्जं चम्म खंडं च सेज्जा[5]
कोलो[6] धम्मो कस्स णो भादि रम्मो[7] ॥ १०७[8] ॥
सालिणी ।

हार एक्को — हार एकः हारो गुरुरित्यर्थः विसज्जे — विसृज्यते, ततः सल्ला कण्णा गंध कण्णा — शल्यकर्णगंधकर्णाः, शल्यो लघुः, कर्णो-गुरुद्वयात्मको गणः, गंधो लघुः, कर्णो गुरुद्वयात्मको गण एते इत्यर्थः पाअ पाए — पादे पादे प्रतिचरणमिति यावत् सुणिज्जे — श्रूयते, तथा बीसा — विंशतिः रेहा — रेखा मात्रा इति यावत् गणिज्जे गण्यंते, सा सप्पा राए — सर्पराजेन सालिणी — शालिनी-नामकं वृत्तमिति यावत् मुणिज्जे — मन्यते ॥ अत्र मात्राकथनं पादपूरणार्थमेव, लिंगविभक्तिवचनव्यत्यासस्तु प्राकृतभाषायां न दोषायेति मन्तव्यं । मगण-तगणच[द्व]योत्तर-गुरुद्वयरचितचरणा शालिनीति फलितार्थः । ७३ । (E).

१०६ । कण्णो इति। कर्णयुगं हारम् एकं विसृज्य शल्यः कर्णः गंधः कर्णः श्रूयंते । विंशतिः रेखाः पादे पादे गण्यंते सर्पराजेन शालिनी सा मान्यते ॥ कर्णो द्विगुरुः, हारो गुरुः, शल्यगंधौ लघू । (G).

---

१०७ । १ रण्डा (C). २ दिक्खिआ (A & B), दीक्खिदा (C). ३ पिज्जिए (E). ३ & ४ खज्जए पिज्जए च (B), खज्जए पिज्जए च (C). ४ खज्जए च (A). ५ सज्जा (A & C), सेजा (B). ६ कोणो (A). ७ रत्थो (B). ८ १०५ (A), ७४ (E).

दिअ[1]वर जुअ लहु[2]जुअलं पअ[3] पअ पअलिअ बलअं ।
चउ पअ चउ बसु[4] कलअं[5] दमणअ फणि भण[6] ललिअं[7] ॥
१०८[8] ॥

१०७। उदाहरति। रण्डा रण्डा दीक्षिता धर्मदारा रम्यं [मद्यं] मांसं खाद्यते पीयते च। भिक्षा यो[भो]ज्यं चर्मखण्डञ्च शय्या कौलो धर्मः कस्य नो भाति रम्यः॥ बन्धुहीनत्वमत्र तु लक्ष्यते सैव दीक्षिता यथाविधिगृहीतमन्त्रा धर्मदारत्वं प्रापिता, भोज्यं किम् इत्यादिकांक्षायां भिक्षालब्धमित्यर्थः, कौलो धर्मः शाक्त-शास्त्रविषयोक्तधर्मः। कर्पूरमञ्जर्यां भैरवानन्दस्येयमुक्तिः। (C).

१०७। शालिनीमुदाहरति, रण्डेति। चंडा परमकोपवती दिक्खिदा — दीक्षिता शाक्तशास्त्रोक्तविधिगृहीतमन्त्रेति यावत् रण्डा — विधवा धम्म दारा — धर्मपत्नी, मज्जं — मद्यं पिज्जिए — पीयते, मंसं अ[आ] — मांसं च खज्जए — खाद्यते। भिक्खा — भिक्षा भोज्जं — भोज्यं चर्मखण्डं च सेज्जा — शय्या, एतादृशः कोलो — कौलः वंशपरंपरापरिप्राप्तः शाक्ततंत्रविशेषोक्त इति यावत् धम्मो — धर्मः कस्स — कस्य रम्मो — रम्यो नो भाति॥ अपि तु सर्वस्यापीत्यर्थः। कर्पूरमंजरीनाटकस्थं कापालिकभैरवानन्दस्य राजानं प्रति वाक्यमिदम्। ७४। शालिनी निवृत्ता। (E).

१०८। १ द्विज (F). २ लघु (F). ३ Dropt in (B). ४ वसु (A). ५ वलअं (A). ६ भण फणि (A), मण फणि (B & C). ७ भणिअं (A & C), फणिअं (B). ८ १०९ (A), ७५ (E).

जहा, परिणअ[1] ससहर वअणं
विमल कमल दल णअणं।
बिहिअ[2] असुर कुल दलणं[3]
पणमइ[4] सिरि[5] महु महणं॥ १०९[6]॥ दमणक[7]।

१०७। यथा। रंडा चंडा दीक्षिता धर्मदारा मद्यं मांसं पीयते खाद्यते च। भिक्षा भोज्यं चर्मखंडं च शय्या कौलो धर्मः कस्य नो भाति रम्यः॥ (G).

१०८। द्विजवरयुगलं लघुयुगलं पदे पदे प्रकटितवलयम् अन्ते गुरुयुक्तं। * * * चतुर्व्वसुकलम् अष्टचत्वारिंशत्कलम्। (C).

१०८। अथैकादशाक्षरचरणस्य वृत्तस्य चतुर्विंशत्युत्तरसहस्रतमं भेदं दमनकनामकं वृत्तं लक्षयति, दिअवरेति। दिअवर जुअ — द्विजवरयुगलं चतुर्लध्वात्मकगणद्वयमिति यावत् लहु जुअलं — लघुयुगलं वलअं — वलयं गुरुरिति यावत् यत्र पअ पअ — पादे पादे प्रतिचरणमिति यावत् पअलिअ — प्रकटितं। चउ पअ — चतुःपादेषु चउ वसु कलअं — चतुर्वसुकलाकं दक्षिणगत्यैवांकस्थापनेन ४८ चतुर्वसुशब्देनाष्टचत्वारिंशन्मात्रा लभ्यंते, तथा चतुर्ष्वपि पादेषु मिलिताष्टचत्वारिंशन्मात्राकमिति तत्त्वं, दमणअ — दमनकं फणी ललिअं — ललितं यथा स्यात्तथा भण — भणति॥ लघुदशकोत्तरगुरुरचितचरणो दमनक इति फलितार्थः। ७५। (E).

१०९। १ पअलिअ (A, B & C). २ वलिअ (A, B & C). ३ दहणं (B & C). ४ पणवइ (A). ५ सिर (E). ६ १०७ (A), ७६ (E). ७ दमणअ (C).

ताल णंदए समुद्द तूरआ[1]
जोहलेण छंद एहु[2] पूरआ ।
गारहाइँ[3] अक्खराइँ[4] जाणिआ
णाअ राअ[5] जंप एअ[6] सेणिआ[7] ॥ ११०[8] ॥

---

१०८ । दिअ इति । द्विजवरयुगं लघुयुगलं पदे [पदे] प्रकटितवलयं । चतुःपदे चतुर्वसुकलं दमनकं फणी भणति ललितं ॥ वलयो गुरुः । (G).

१०९ । उदाहरति । प्रकटितं शशधरतुल्यं वदनं यस्य विमलकमलदलनयनं । बलिकासुरकुलदहनं प्रणमामि शिरसि मधुमथनं कृष्णं ॥ (C).

१०९ । दमनकमुदाहरति, परिणअ इति । परिणअ [ससहर वअणं] — परिणतशशधरवदनं विमलकमलदलनयनं । विहितासुर[कुल]दमनं मझ महणं — मधुमथनं श्रीकृष्णं [सिर — शिरसा] पणमह — प्रणमत ॥ दमनको निवृत्तः । ७६ । (E).

१०९ । यथा । परिणतशशधरवदनं विम[ल]कमलदलनयनं । विहितासुरकुलदहनं प्रणमत श्रीमधुमथनम् ॥ (G).

११० । तालनन्दसमुद्रतूर्य्यजोहलेन एतत् छन्दः पूरय । एकादशाक्षराणि ज्ञातानि नागराजो जल्पत्येषा सेनिका ॥ तालादय-

---

११० । १ दूरआ (B). २ एह छंद (A & B), एअ छन्द (C). ३ गारगाइ (B). ४ अक्खराणि (F). ५ राआँ (A). ६ एसु (A & B), एह (E). ७ 4th quadrant dropt in (C). ८ १०८ (A), ७७ (E).

जहा, झत्ति पत्ति पाअ भूमि कंपिआ
टप्पु[1] खुंदि खेह[2] सूर झंपिआ।
गोल[3]राअ जिसि[4] माण मोलिआ
कामरूअ[5] राअ बंदि[6] छोलिआ[7] ॥ १११[8] ॥

सेनिका[9]।

स्वलारोऽन्तलघुत्रिकलवाचकाः, [Vide श्लोक १९, p. 27.—Ed.] जोहलः पञ्चकलो मध्यलघुः। (C).

११०। अथैकादशाक्षरचरणस्य वृत्तस्य त्र्यशीत्युत्तरषट्शततमं ६८३ भेदं सेनिकानामकं वृत्तं लक्षयति, तालेति। आदौ ताल णंदए — तालनन्दाभ्यां ततः समुद्द तूरआ — समुद्रतूर्या[भ्यां] गुर्वादित्रिकलगणाभ्यामित्यर्थः ततश्च जोहलेन मध्यलघुकेन रगणेनेति यावत् एऊ — एतत् सेणिआ — सेनिकानामकं छंद — वृत्तं पूरआ — पूर्यतां। अत्र च प्रतिपदं गारहा[इ] अक्खराइ — एकादशाक्षराणि जाणिआ — ज्ञातव्यानि, एअ — एतत् णाअ राअ — नागराजः जंपि[प] — जल्पति॥ यद्वा एकादशाक्षरज्ञातेत्येकं पदं कृत्वा वृत्तविशेषणपरतया गारहाइँ इति चरणे जो[यो]जनीयः। अत्राक्षरकथनमनतिप्रयोजनकतया पद्यपूरणायेति बोध्यम्। गुरूत्तरैः पंचभिर्गुर्वादित्रिकलगणै रचितचरणा सेनिकेति निष्कृष्टार्थः। (E).

११०। तालेति। तालनन्दाभ्यां समुद्रतूर्याभ्यां जोहलेन छंद एतत्

१११। १ टप्पि (A), डप्प (B & C). २ खुज्जि धूलि (B & C). ३ गौड़ (E & F). ४ जिणि (A). ५ कामरूप (B). ६ बंधि (A). ७ छोडिआ (B & C). ८ १०९ (A), ७८ (E). ९ सुसेनिका (A).

कुंतीपुत्ता पंचा दिण्णा[1] जाणीत्रा
अंते कंता[2] एक्का[3] हारा माणीत्रा ।
पात्रा पात्रा मत्ता दिट्ठा[4] बाईसा[5]
मालत्ती[6] छंदा[7] जंपंता[8] णाएसा ॥ ११२[9] ॥

पूर्यतां। एकादशाक्षराणि ज्ञातव्यानि नागराजो जल्पति एषा श्येनिका ॥ तालेति गुरुलघुरूपा गणास्तलार इत्यर्थः, जोहलो रगणः। (G).

१११। उदाहरति, झत्तीत्यादि। टापैश्चलदश्वखुरैः चुणाभिर्धूलिभिः ख[?]शब्दो धूलिवाचको देशीति वदन्ति, परे तु खशब्दः चोदवाचकः, तथाच टापोत्थितैः चोदैः खे आकाशे हि निश्चितं सूर्य आच्छन्न इत्यर्थः। * * * * (C).

१११। श्येनिकामुदाहरति, झत्तीति। झत्ति — झटिति पत्ति पाअ पदातिपादैः भूमि — भूमिः कंपिआ — कंपिता, टप्पु खुंदि खेह — टापोत्खातखेहैश्चलदश्वखुरोद्धूतरेणुभिरिति परमार्थः सूर — सूर्य्यः झंपिआ — आच्छादितः। गौड़ राअ जिणि — गौड़राजं जित्वा माण मोडि[लि]आ — मानमोडिता कामरूअ राअ बंदि छोलिआ — का[म]रूपराजवंदी मोचिता ॥ ७८। श्येनिका निवृत्ता। (E).

१११। यथा। झटिति पत्तिपादैर्भूमिः कंपिता चलदश्वखुरोद्धूतरेणुभिः सूर्य आच्छादितः। गौडराजं जित्वा शौवानला कामरूपराजवंदी मोचिता॥ अत्र टप्पु इति माणेति उक्तार्थे देशी। (G).

११२। १ दिणा (A). २ कणा (A). ३ एक्को (B). ४ दिष्ठा (A), पत्ता (B), dropt in (C). ५ बाकुसा (B). ६ मलत्ती (C), मलंती (F). ७ माला (A, B & C). ८ जलपन्ता (B), जम्पत्ता (C). ९ ११० (A), ७९ (E).

जहा, ठामा ठामा हत्थी[१] जूहा[२] देक्खीआ[३]
णीला[४] मेहा मेरू[५] सिंगा[६] पेक्खीआ[७] ।
बीरा[८] हत्था[९] अग्गे खग्गा राजंता[१०]
णीला[४] मेहा मज्झे बिज्जू[११]णच्चंता ॥ ११३[१२] ॥

मालती[१३] ।

११२ । कुन्तीपुत्राः पञ्च दत्ता ज्ञाताः, अन्ते कान्त एको- हारो मन्यते । पादे पादे मात्राः प्राप्ता द्वाविंशतिः मालतीमाला जल्प्यते नागेनैषा ॥ कुन्तीपुत्रः कर्णो द्विगुरुः, कान्तः कमनीयः, हारो गुरुः । (C).

११२ । अथैकादशाक्षरचरणस्य वृत्तस्य प्रथमं भेदं मालती- नामकं वृत्तं लक्षयति, कुंतीति । यत्र पाआ [पाआ] — पादे पादे प्रतिपादमिति यावत् दिण्णा — दत्ताः पंच कुंतीपुत्राः कर्णा गुरु- द्वयात्मका गणा इति यावत् जाणीआ — ज्ञायंते, अंते — कर्ण- पंचकांते पादांते वा कंता — कांतः एक्का — एकः हारा — हारः गुरुरिति यावत् माणीआ — मान्यते । बाईसा — द्वाविंशतिः मत्ता — मात्राः दिट्ठा — दृष्टा यत्र पादे पादे इति पूर्वेणान्वयः, तत् मालत्ती छंदा — मालतीच्छन्दः णाएसा — नागेशः जंपंता —

११३ । १ हत्थी (A), हत्ती (B). २ जूआ (B & C). ३ पेक्खिआ (A), देखीआ (F). ४ णाई (A, B & C). ५ मारू (B). ६ सिंगे (A, B & C). ७ देक्खीआ (A). ८ बीआ (E). ९ हत्था (A), हत्थे (B & C). १० वजुंता (A), रज्जुन्ता (B & C). ११ विज्जू मेहा मज्झे (A). १२ १११ (A), ८० (E). १३ मालतीमाला (A).

दिज्जे तआरा[1] जुअला पएसुं[2]
अंते णरेंदो[3] गुरु जुग्ग सेसं।
जंपे फणिंदा[4] धुअ[5] इंदवज्जा
मत्ता दहा अट्ठ[6] समा सुसज्जा ॥ ११४[7] ॥

जल्पति॥ अत्र कांत-पदं मात्राज्ञापकं च पद्यपूरणार्थमिति मंतव्यम्, एकादशगुरुरचिता मालतीति निष्कृष्टोऽर्थः । ७८ । (E).

११२ । कुंतीति । कुंतीपुत्राः पंच दत्ता ज्ञातव्या अंते कांतः एको हारो माननीयः । पादे पादे मात्रा दृष्टा द्वाविंशतिर्मालती-च्छंदः जल्पति नागेशः ॥ कर्णो द्विगुरुः, हारो गुरुः । (G).

११३ । उदाहरति । स्थाने स्थाने हस्तियूथानि दृश्यन्ते यथा मेघा मेरुशृङ्गे दृश्यन्ते । वीरहस्ताग्रे खड्गा नृत्यन्ति यथा विद्यु-न्मेघमध्ये नृत्यति ॥ (C).

११३ । मालतीमुदाहरति, ठामेति । मेरू सिंगा — मेरुशृंगे यथेति शेषः णीला मेहा — नीला मेघाः पेक्खीआ — प्रेक्ष्यंते, ठामा ठामा — स्थाने स्थाने हत्थी जूहा — हस्तियूथानि [तथे]ति शेषः देक्खीआ — दृश्यंते । णीला मेहा मज्झे — नीलमेघमध्ये यथेति शेषः विद्युत् णच्चंती — नृत्यति, बीरा[आ] हत्था अग्गे — वीर-

---

११४ । १ दिज्जेइ हारा (A), दिजेइ हीरा (B), दिज्झेइ हीरा (C), दिज्जे त राआ (F). २ पएसु (B), पएसं (C), पएसूं (E). ३ णरेंदा (A), णरेन्दा (B & C). ४ भणिंदा (A), फणींदा (F). ५ धुव (F). ६ अइ (B & C). ७ ११२ (A), ८१ (E).

हस्ताग्रे तथेति शेषः खग्गा—खड्गाः राजंता—राजंति ॥ केन-चिद्वन्दिना कृतं संग्रामवर्णनमेतत् । मालती निवृत्ता । ८० । (E).

११३ । यथा । स्थाने स्थाने हस्तियूथानि दृश्यंते, नीला मेघाः मेरुशृंगे प्रेक्ष्यंते । वीरहस्ताग्रे खड्गा राजंते, नीलमेघमध्ये विद्युन्नृत्यति ॥ (G).

११४ । दीयते हीरयुगलं पदे, अन्ते नरेन्द्रो गुरुयुगलशेषः । जल्पति फणीन्द्रः ध्रुवमिन्द्रवज्रां मात्रा दशाष्टभिः समाः सुसज्जाः ॥ हीरशब्दः अन्तलघुपञ्चकलवाची [Vide श्लोक १९, p. 24, and its gloss (G), p. 25.—Ed.] नरेन्द्रो जगणः, यत्र मात्राः दशाष्टाभिः सुसज्जीकृताः । (C).

११४ । अथैकादशाक्षरचरणस्य वृत्तस्य सप्तपंचाशदुत्तरत्रिशततमं भेदं ३५७ इन्द्रवज्रानामकं वृत्तं लक्षयति, दिज्जे इति । यत्रादौ तआरा जुअला—तकारयुगलं लभ्यं तगणद्वयमित्यर्थः, अंते—तगणद्वयांते गुरु जुग्ग सेसं—गुरुयुगशेषः गुरुद्वयं शेषेऽंते यस्य तादृश इति यावत् णरेंदो—नरेन्द्रो मध्यगुरुर्जगण इति यावत् पएसुं[सूं]—पदेषु दिज्जे—दीयते । सा मत्ता दहा अट्ठ समा सुसज्जा—सुसज्जसमाष्टादशमात्राका सुसज्जाः सुस्थापिताः समाः पदचतुष्टयेऽन्यूनानतिरिक्ता अष्टादश मात्रा यस्यां सेति यावत् इंदवज्जा—इंद्रवज्रा इति धुअ—ध्रुवं फणिंदा—फणींद्रः जंपे—जल्पति ॥ सुसज्जा—शोभनीकृत्य स्थापिताः समा—पदचतुष्टये समानाः दहा अट्ठ—अष्टादश मत्ता—मात्राः यत्र पएसुं[सूं]—पदेषु पतंतीति शेष इति भिन्नमेव योजनीयं । अत्र मात्राकथनं पद्य-

जहा, मंतं[1] ण तंतं ण हु किंपि[2] जाणे[3]
झाणं[4] च[5] णो किंपि[2] गुरुप्पसाओ[6]।
मज्जं पिवामो[7] महिलं रमामो
मोक्खं[8] वजामो[9] कुल मग्ग लग्गा ॥ ११५[10] ॥
इंदवज्जा।

पूरणार्थमेव, अवहट्टभाषायां पूर्वनिपातानियमात् पूर्वापरव्यत्यासस्तु न दोषायेति ध्येयं, तगणद्वयानंतरजगणानंतरगुरुद्वयरचितचरणा इंद्रवज्रेति फलितार्थः। (E).

११४। दिज्जे इति। दीयेत राजयुगलं पदेषु अंते नरेंद्रो-गुरुयुग्मशेषः। जल्पति फणींद्रो ध्रुवम् इंद्रवज्रां मात्रा द्वाष्टौ समाः सुसज्जाः॥ राजा[?] तगणः, नरेंद्रो जगणः, समाः सर्वरसेषु अनुकूलाः। (G).

११५। उदाहरति। मन्त्रं न तन्त्रं न हि किमपि जाने ध्यानञ्च न किमपि गुरुप्रसादात्। मद्यं पिबामो महिलां रमामः[महे] मोक्षञ्च यामः कुलमार्गलग्नाः॥ यद्यहं मन्त्रादिकं न जाने तथापि वयं सर्व्वे साधका मद्यं पिबामः महिलां रमाम[हे] इत्यर्थः, तदिदमनर्थाय भवेदित्याह एवं कुर्व्वाणाः कुलपथलग्नाः मोक्षं प्राप्नुम इत्यर्थः। कर्पूरमञ्जर्य्यां भैरवानन्दोक्तिरियम्। (C).

११५। इन्द्रवज्रामुदाहरति, मंतमिति। मंतं — मंत्रं तंतं —

११५। १ मन्ता (B). २ कंपि (A), कम्पि (C). ३ जाणं (A). ४ धाणं (B). ५ ज (B). ६ गुरुप्पसाआ (B & C). ७ पिआमो (A & C). ८ मोक्खं (F). ९ च यामो (C). १० ११३ (A), ८२ (E).

णरेंद[1] एक्का तश्रणा[2] सुसज्जा
पश्रोहरा कस्म गणा[3] मुणिज्जा ।
उविंद[4]वज्जा फणिराश्र[5] दिट्ठा[6]
पढंति[7] छेश्रा सुह बस्म सिट्ठा[8] ॥ ११६[9] ॥

तंत्तं णक्र—खलु निश्चयेनेति यावत् किंपि—किमपि ण—न जाणे—जानामि, झाणं च—ध्यानं च किंपि—किमपि णो—न जाने इति पूर्वेणान्वयः, किंतु मज्जं पिबामो—मद्यं पिबामः महिलं रमामो—महिलां रमामहे गुरुप्पसाश्रो—गुरुप्रसादात् कुल मग्ग लग्गा—कुलमार्गलग्नाः मोक्खं—मोक्षं वजामो—व्रजामः ॥ अनवरतमैथुनमद्यपानाद्यनेककुलपरंपरागमनकुकर्मात्यासक्ता अपि वयं गुरुप्रसादान्मोक्षं प्राप्नुम इति कापालिकभैरवानन्दस्य राजानं प्रति वाक्यमिदं कर्पूरमंजरीनाटकस्थम् । इंद्रवज्रा निवृत्ता । ८२ । (E).

११५ । यथा । मंत्रं न तंत्रं न खलु किमपि जाने ध्यानं च नो किमपि गुरुप्रसादात् । मद्यं पिबामो महिलां रमामो[महे] मोक्षं व्रजामः कौलमार्गलग्नाः ॥ (G).

११६ । नरेन्द्र एकस्तगणः सुसज्जः पयोधरः कर्णगणः ज्ञायते उपेन्द्रवज्रां फणिराजदिष्टां पठन्ति * * * ॥ छेकाः विदग्धाः । (C).

---

११६ । १ णरिंद (E & F). २ तगणा (A). ३ गणं (A). ४ उपेंद (A), उविंदु (B). ५ फणिराज (A). ६ दिट्ठा (B & C). ७ पठन्ति (B). ८ सुकइंद दिठ्ठा (A), सुकइन्द सट्ठा (B), सुकइन्दसट्ठा (C). ९ ११४ (A), ८३ (E).

जहा, सुधम्म चित्ता गुणमंत[1]पुत्ता
सुकम्म रत्ता बिणआ कलंता[2] ।
बिसुद्ध देहा धणमंत[3] गेहा
कुणंति के बब्बर सग्ग णेहा ॥ ११७[4] ॥ उबिंदबज्जा[5] ।

११६ । अथैकादशाक्षरचरणस्य वृत्तस्याष्टपंचाशदुत्तरत्रिशततमं ३५८ भेदम् उपेंद्रवज्रानामकं वृत्तं लक्षयति, णरिंदेति । यत्र प्रथमं एक्का — एकः णरिंद — नरेंद्रः मध्यगुरुर्ज्जगण इति यावत् ततः तश्रणा — तगणोऽंतलघुर्गण इत्यर्थः सुसज्जा — सु[सु]सज्जः शोभनीकृत्य स्थापित इति यावत्, ततश्च पओहरा — पयोधरो मध्यगुरुर्ज्जगण इत्यर्थः कस गणा — कर्णगणो गुरुद्वयमिति यावत् सुणिज्जा — ज्ञातः । तां फणिराअ दिट्ठा — फणिराजदृष्टां पिंगलोपदिष्टाम् इति यावत् सुह बस सिट्ठा — शुभवर्णसृष्टां उबिंदबज्जा — उपेंद्रवज्रां छेआ — छइल्ला विदग्धा इति यावत् पढंति — पठंति ॥ अथवा नरेन्द्रैकतगणसुसज्जपयोधरकर्णगणाः सुणिज्जा — ज्ञायंते यत्र प्रतिचरणमिति शेषः इत्येकमेव पदं कृत्वा योजनीयम् । अत्र [सुसज्जमिति] शुभवर्णसृष्टामिति च पदं पद्यपूरणार्थमेवेति मंतव्यम् । ८३ । (E).

११६ । णरिंदेति । नरेंद्र एकस्तगणः सुसज्जः पयोधरः कर्णगणो ज्ञातव्यः । उपेंद्रवज्रां फणिराजदृष्टां पठंति छेकाः शुभवर्ण-

११७ । १ गुणवन्त (C). २ करंता (A), कलत्ता (E). ३ धणवन्त (B). ४ ११५ (A), ८४ (E). ५ उपेंदवज्जा (A).

इंद उविंदा[१] एक्क[२] करिज्जसु[३]
चउ अग्गल दह णाम मुणिज्जसु[४]।
सम[५]जाइहिँ सम अक्खर दिज्जसु
पिंगल भण उवजाइहि[६] किज्जसु[७] ॥ ११८[८] ॥ [अलिल्ला]

सृष्टा ॥ शुभेति मधुररस एव प्राशस्त्यसूचकः ॥ नरेंद्रो जगणः, पयोधरो जगणः, कर्णी द्विगुरुः। (G).

११७। उदाहरति। स्वधर्मचित्ता गुणवन्तः पुत्राः स्वकर्मरतं विनीतं कलत्रं। विशुद्धो देहो धनवद्गेहं कुर्व्वते के वर्व्वराः स्वर्ग-स्नेहम् ॥ विशुद्धो रा[रो]गादिहीनः। (C).

११७। उपेंद्रवज्रामुदाहरति, सुधम्मेति। सुधम्म चित्ता— सुधर्मचित्तं गुणमंत पुत्ता—गुणवत्पुत्रं सुकम्म रत्ता—सुकर्मरतं पत्यादिशुश्रूषाकर्मण्यासक्तमिति यावत् विणआ—विनीतं कलत्ता— कलत्रं। विसुद्ध देहा—रोगादिरहितः देहः धणमंत—धनवत् गेहा—गेहं, एतत्सर्वं यदि भवतीति शेषः, तदा के बब्बरा— वर्वराः सग्ग णेहा—स्वर्गस्नेहं कुणंति—कुर्वंति, अपि तु न कोऽपीत्यर्थः ॥ सर्वपदार्थविकलक[स्य] कस्यचिदिदं वाक्यम्। ८४। उपेंद्रवज्रा निवृत्ता। (E).

११७। यथा। सुधर्म चित्तं गुणवंतः पुत्राः सुकर्मरक्तं विनतं

११८। This śloka is not found in (A) and (B). १ उपेन्दा (C). २ एक (C). ३ करीज्जसु (C). ४ मुणिज्जसु (C). ५ सम (C). ६ इपजाइ (C), उपजाइ कहि (E). ७ मुणिज्जसु (C). ८ ८४ (E).

कलत्रं। विशुद्धा देहा धनवंतो गे[ग्ट]हाः कुर्वंति के वर्व्वराः स्वर्गे स्वेहम् ॥ विशुद्धा नीरोगाः। (G).

११८। इन्द्रोपेन्द्रावेकीक्रियेतां चतुरग्रदशनामानि भ्रियन्तां। सर्व्वजातिसमाचराणि * * पिंगलो भणति उपजातिर्ज्ञायताम्॥ इन्द्रवज्रोपेन्द्रवज्राच्छन्दसोरेकीकरणादुपजातिच्छन्दो भवति, तत्र चतुर्द्दश नामानि भवन्ति, एवं सर्व्वजातिषु समाचरासु उपजातिर्बोध्यव्या। (C).

११८। अथेंद्रवज्रोपेंद्रवज्राभ्यां पादेन पादाभ्यां पादैश्च मिश्रिताभ्यामुपजातिच्छन्दो भवति तच्च [च]तुर्दशविधमित्याह, इंदेति। इंद उविंदा — इंद्रोपेंद्रयोः नामैकदेशेनापि नामग्रहणादिंद्रवज्रोपेंद्रवज्रयोरित्यर्थः एक्क — ऐक्यं करिज्जसु — कुरुष्व, चउ अग्गल दह णाम — चतुरधिकदशनामानि मुणिज्जसु — जानीहि। सम अक्खर — समान्यचराणि दिज्जसु — दद्स्व, सम जाइहि — समः जातिभिः तुल्याचरचरणजातीयैर्वृत्तैरिति यावत् उपजाइहिँ — उपजातिं किज्जसु — कुरुष्व इति पिंगल — पिंगलो नागः भणति॥ इदं तु बोध्यं समाचराणि दत्त्वा समजातीयैर्वृत्तैरुपजातिं कुरुष्वेत्यनेन विषमाचरचरणजातीयैर्वृत्तैर्नोपजातिरित्युक्तं भवति, तथाचेंद्रवज्रोपेंद्रवज्राभ्यां न किंत्व[वज्रेंद्र]वंशाभ्यामिंद्रवंशावंशस्थाभ्यां वातोर्मीशालिनीभ्यां न मालिनीशालिनीभ्यामुपजातिर्भवति इति परमार्थ इति। (E).

११८। इंदेति। इंद्रवज्रोपेंद्रवज्रे एकत्र कुरुष्व चतुरधिकदशनामानि जानीहि। समजातिभिः समाचराणि देहि पिंगलो-भणति उपजातिं कुरुष्व॥ (G).

चउ अक्खरके पत्थर[1] किज्जसु
इंद[2] उविंदा[3] गुरु लहु[4] बुज्झसु[5] । [अलिल्ला]
मज्झहि[6] चउद[ह]ह हो उवजाइ
पिंगल जंपइ[7] कित्ति वेलाइ[8] ॥ ११९[9] ॥ [पज्झटिका?]

---

११९ । चतुर्दशानां ज्ञानप्रकारमाह, चतुरक्षरप्रस्तारं कुरुष्व इन्द्रोपेन्द्रयोर्गुरुलघून् बुध्यस्व । मध्ये चतुर्दश भवन्त्युपजातयः पिङ्गलो-जल्पति कला मन्यते ॥ अयमर्थः, चतुरक्षरस्य षोडश प्रस्ताराः भवन्ति, तत्र प्राथमिकश्चतुर्गुरुः स चेन्द्रवज्रायामन्तर्भूतः तत्र चतुर्षु पादेष्वाद्याक्षरस्य गुरुत्वादेव, अन्तिमश्चतुर्लघुर्भवति स चोपेन्द्रवज्राया-मन्तर्भूतः तत्र चतुर्षु पादेषु प्रथमाक्षरस्य लघुत्वात्, अतो मध्यवर्त्ति-चतुर्दशभेदानुसाराच्चतुर्दशोपजातयो भवन्ति । तथाहि चतुरक्षरस्य द्वितीयप्रस्तार आदिलघुर्भवति, तत्रापि प्रथमपादो लघ्वादिः परे त्रयो गुर्वादयः, एवमग्रेऽपि । (C).

११९ । अथासां चतुर्दशभेदानयनप्रकारमाह, चउ अक्खरेति । चउ अक्खरके — चतुरक्षराणां पत्थर — प्रस्तारं किज्जसु — कुरुष्व, इंद उविंदा — इंद्रोपेंद्रयोः गुरु लहु — गुरुलघू इंद्रवज्रायां गुरु-मुपेंद्रवज्रायां लघुमित्यर्थः बुज्झसु — बुध्यस्व । मज्झह — मध्ये सर्व-गुरु-सर्वलघुप्रस्तारयोरिति यावत् चउद्दह — चतुर्दश उवजाइ — उपजातयः हो — भवंति इति कित्ति वेलाइ — वेल्लितकीर्त्तिः

---

११९ । १ पत्कर (A). २ इंदु (B). ३ उपेंदा (F). ४ लहु गुरु (A). ५ दिज्जसु (A), बुज्झसु (B & C), बुज्जसु (E). ६ मज्झहिँ (A), मज्झह (B), मज्झउ (C). ७ परप्रस्तारं (E). ८ बोल्लाइ (A). ९ ११९ (A), ८५ (E).

पिंगलः जंपइ — जल्पति ॥ अत्रेदं तत्त्वं — चतुरक्षरस्य प्रस्तारक्रियया षोड़श भेदा भवंति, तत्र चतुर्गुरुः प्रथमः स चेंद्रवज्रापादचतुष्टयज्ञापकस्तत्र प्रतिचरणं प्रथमगुरोरुपादानात् तत्रैकैको गुरुरिंद्रवज्राया एकैकचरणज्ञापक इति हृदयं। चतुर्लघुश्चांतिमः स चोपेंद्रवज्रापादचतुष्टयज्ञापकस्तत्रै[कै]को लघुरुपेंद्रवज्राया एकैकचरणज्ञापक इति सहृदयैकगम्योऽर्थस्तत्र प्रतिचरणं प्रथमलघोरुपादानात्। एवं चावशिष्टा मध्ये चतुर्दशभेदास्तदनुसाराच्च चतुर्दशोपजातयो भवंति। तथाहि चतुरक्षरस्य द्वितीयप्रस्तारे प्रथममेको लघुस्तदनन्तरं च त्रयो गुरवो भवंति, तथा चोपेंद्रवज्रायाः प्रथमश्चरणः त्रयश्चेंद्रवज्राया एवं मिलित्वा प्रथमो भेदः। चतुरक्षरस्य तृतीयप्रस्तारे प्रथममेको [गुरुस्तत एको] लघुस्तदनंतरं गुरुद्वयं, तथा चेंद्रवज्रायाः प्रथमश्चरणो द्वितीयश्चोपेंद्रवज्रायाः तृतीयचतुर्थौ च पुनरिंद्रवज्राया एवं मिलित्वा द्वितीयो भेदः। चतुरक्षरस्य चतुर्थप्रस्तारे प्रथमं लघुद्वयं तदनंतरं गुरुद्वयं भवति, तथाच प्रथमद्वितीयौ चरणौ उपेंद्रवज्रायाः तृतीयचतुर्थौ चेंद्रवज्राया एवं मिलित्वा तृतीयो भेदः। एवमग्रेऽपि सुधीभिरवधेयमित्यस्मत्तातचरणोपदिष्टः पंथाः। (E).

११९। अथासां चतुर्दशभेदानयनप्रकारमाह चउरि[इ]ति। चतुरक्षरस्य प्रस्तारं कुरु, इंद्रवज्रोपेंद्रवज्रयोर्गुरुलघु बुध्यस्व। मध्ये चतुर्दश भवंति, उपजातिं पिंगलो जल्पति कीर्त्तिवेलायां॥ कीर्त्तिः प्रस्तारः, मध्ये — सर्वगुरुसर्वलघुप्रस्तारयोरंतराले। (G).

[Vide Ghosha's Compendium, Introduction, p. xix, para 45.—Ed.]

जहा, बालो[1] कुमारो[2] स छ[3]मुंडधारी
उप्पाउ[4] हीणा हउ[5] एक्क णारी।
अहं णिसं[6] खाहि[7] बिसं[8] भिखारी[9]
गई भवित्ती[10] किल का हमारी[11] ॥ १२०[12] ॥

१२०। उदाहरति। बालः कुमारः स षण्मुण्डधारी, उपायहीना अहमेका नारी। भर्त्ता तु भिक्षुकः सोऽपि अहर्निशं विषं खादति, अतः का गतिर्मम भविचीति शोचति पार्व्वती॥ (C).

१२०। उपजातिमुदाहरति, बाल इति। कुमारः कार्त्तिकेयः बालः स छमुंडधारी—स च षण्मुण्डधारी, उप्पाउ हीणा—अर्ज्जनोपायविकला एक्क—एका अपरा असहाया णारी—स्त्री हउ—अहं, भिषा[खा]री—भिक्षुकस्त्वम् अहर्निशं विषं खाहि—भक्षयसि, अतः हमारी—अस्मदीया का गतिरवस्था किल निश्चयेन भविची॥ षड्मुखधारिणो बालस्य बहुतरमत्यावश्यकं च भक्ष्यमपेक्षितमहं च निस्सहाया अर्ज्जनासमर्था स्त्री, त्वं चाहर्निशं विषभोजनेनैव स्वस्य तृप्तिमुत्पादयस्यतोऽस्मदीया का गतिर्भविष्यति तन्न जाने इति महादेवं प्रति पार्वतीवाक्यं। पूर्वार्द्धे

१२०। १ वालः (A), वाल (B). २ कुमारः (A), कुमारा (B). ३ छच (B). ४ उपाय (A), उवाय (B & C). ५ मुद (B), मुञ्जि (C). ६ णिसि (A), ञिसं (C). ७ खाइ (B & C). ८ विखं (A), विमं (E). ९ भिषारी (E). १० गतिर्भविची (A), गतिम्भविणी (B & C). ११ हामारी (C). १२ ११० (A).

कित्ती[1] बाणी माला साला हंसी माआ जाआ[2] बाला।
अद्दा भद्दा पेम्मा रामा रिद्धी बुद्धी तासु णामा॥ १२१[3]॥
[विद्युन्माला ।] उबजाइ[4] ।

इंद्रवज्रायाः उत्तरार्द्धे चोपेंद्रवज्राया लक्षणसत्त्वाद्रामाख्या द्वादशीय-मुपजातिः । (E).

१२० । यथा । बालः कुमारः स षण्मुखधारी उपायहीनाऽह-मेका नारी । अहर्निशं खादति विषं भिक्षुर्गतिर्भविता किल कास्माकं ॥ (G).

१२१ । चतुर्द्दश नामान्याह । कीर्त्तिर्वाणी माला शाला हंसी माया जाया बाला । आर्द्रा भद्रा प्रेमा [रामा] ऋद्धिर्बुद्धिः तासां नाम ॥ (C).

१२१ । अथासां नामान्याह, कित्तीति । निगदेनैव व्याख्यातं । अथासामस्मत्तातचरणनिर्म्मितानि क्रमेणोदाहरणानि यथा,—

दृढं धनुर्वामकरे दधानोऽवामे शरं स्वर्णविचित्रपुंखं ।
पृष्ठप्रदेशेऽक्षयि तूणयुग्मं बिभ्रत्स रामः शरणं ममास्तु ॥ १ ।
यस्यानुकम्पायुतदृष्टिपद्म-कटाक्षसंप्रेक्षित एव लोकः ।
सर्वापदब्धिं तरति प्रतूर्णं श्रीरामचंद्रः शरणं ममास्तु ॥ २ ।
यदीयपादाब्जपरागपातात् शिलामयी गौतमयोषिदाशु ।
कामस्त्रियोऽपि स्पृहणी[य]रूपं लेभे स रामः शरणं ममास्तु ।'३।

---

१२१ । १ कित्ति (A). २ जाआ (C). ३ ११८ (A), ८९ (E). ४ उप-जाति (A & B).

सुग्रीववातात्मजमुख्यकीशै-र्बद्धाञ्जलीकैरुपसेव्यमानः ।
सुवर्णसिंहासनसंस्थितः स श्रीरामचंद्रः शरणं ममास्तु ॥ ४ ।
त्रिलोकसंपालनबद्धसंधः कारुण्यपीयूषमहांबुराशिः ।
स्वभक्तदुःखोद्धरणैकवीरः श्रीरामचंद्रः शरणं ममास्तु ॥ ५ ।
आजानुबाहुद्वितयः प्रबद्ध-पद्मासनस्थो धृतपीतवासाः ।
प्रफुल्लराजीवपलाशनेत्रः श्रीरामचंद्रः शरणं ममास्तु ॥ ६ ।
समस्तपृथ्वीपतिमौलिरत्न-प्रभाभिनीराजितपादपद्मं ।
अशेषगीर्वाणगणप्रगीत-कीर्त्तिं तमीशं प्रणतोऽस्मि रामं ॥ ७ ।
नानाविभूषामणिरश्मिजाल-प्रच्छन्ननीलाश्मसमानगात्रः ।
सौंदर्य्यसंनाशितकामगर्वः स रामचंद्रः शरणं ममास्तु ॥ ८ ।
अरातिनारीहृदयं प्रविष्ट-स्तत्र स्थितान्दग्धुमिवारिवर्गान् ।
यस्य प्रतापप्रबलानलस्तु स रामचंद्रः शरणं ममास्तु ॥ ९ ।
स्वांकप्रसुप्तां धृतकांचनाभां समीक्ष्य सीतां कनकप्रभांगीं ।
आनंदितांतःकरणः स पाया-दपायतो मां रघुवंशकेतुः ॥ १० ।
अनन्यसाधारणकीर्त्तिचंद्र-करावधूताष्टदिगंधकारः ।
पौलस्त्यवंशद्रुमकालवह्निः स जानकीशः शरणं ममास्तु ॥ ११ ।
मत्वा भवंतं त्रिजगद्विपत्ति-संनाशकं देवगणाम् विहाय ।
भवत्पदाब्जं शरणं गतोऽस्मि प्रसीद राम त्वमतोऽतिशीघ्रम् ॥१२।
भवत्समानोऽपि यदा नरेंद्रः श्रीराम कार्प्पण्यमुरीकरोति ।
तदाश्रयेत्कः खलु दासभाव-मतस्त्वमीश त्यज निष्ठुरत्वं ॥ १३ ।
वीरासनाध्यासित उग्रवीर्यो नवाम्बुदश्यामरुचिर्जितारिः ।
समस्तविद्याम्बुधिपारगश्च स रामचंद्रः शरणं ममास्तु ॥ १४ । (E).

चारी[१] कण्णा[२] पाए दिण्णा सव्वा सारा[३]
पाआ अंते[४] दिज्जे कंता[५] चारी हारा ।
छण्णावेआ मत्ता पत्ता चारी पाआ
विज्जाहारा जंपे सारा णाआराआ ॥ १२२[६] ॥*

[For examples of Upajáti, culled from the Kumárasambhava of Kálidása, vide Ghosha's Compendium, pp. 118-119.—Ed.]

१२१ । कित्तीति । कीर्त्तिर्वाणी माला शाला हंसी माया जाया बाला । आर्द्रा भद्रा प्रेमा रामा ऋद्धिर्बुद्धिरिति तासां नामानि ॥ (G).

१२२ । अथ द्वादशाक्षरा । चत्वारः कर्णाः पादे दत्ताः सर्व्वसाराः पादान्ते दत्ताः कान्तास्त्रत्वारो हाराः । षस्णवति-मात्राः प्राप्ताः चतुर्भिः पादैर्विद्याधरं जल्पति सारं नाग-राजः ॥ प्रतिपादं चतुर्विंशतिमात्रत्वाच्चतुर्भिः पादैः षस्णवति-मात्राः स्युः । (C).

१२२ । अथ द्वादशाक्षरचरणस्य वृत्तस्य षस्णवत्युत्तरं सहस्र-चतुष्टयं भेदाः ४०९६ भवंति, तत्राद्यं भेदं विद्याधरनामकं वृत्तं लक्षयति, चारीति । यत्र पाए — पादे सव्वा सारा — सर्वसारान् सर्वसारं वा चारी कण्णा — चतुरः कर्णान् कर्णचतुष्टयं वा गुरु-द्वयात्मकगणचतुष्टयमिति यावत् दिण्णा — दत्त्वा, पाआ अंते —

१२२ । १ चारि (A), चाकी (C). २ वर्णा (F). ३ हारा (A). ४ चंता (A). ५ कणा (A), कंवे (C). ६ ११९ (A). * Second half dropt in (B).

जहा, *जासू कंठा[1] बीसा दीसा[2] सीसा[3] गंगा
णाआराआ किज्जे हारा गोरी[4] अंगा ।
गंते[5] चामा[6] मारू कामा लिज्जे[7] कित्ती
सोई[8] देऊ[9] सुक्खं[10] देओ[11] तुम्हा[12] भत्ती[13] ॥
१२३[14] ॥ विद्याधरः[15] ।

पादांते कंता—कांताः चारी हारा—चत्वारो हारा गुरवः दिज्जे—दीयंते । तं छणावेआ मत्ता पत्ता चारी पाआ—षस्णवतिमात्राप्राप्तचतुष्पादं प्रतिपादं चतुर्विंशतिमात्राणां विद्यमानत्वात् षस्णवतिमात्रां प्राप्तास्त्वारः पादा यस्य तत्तादृशमिति यावत् सारा—द्वादशाचरचरणवृत्तमध्ये आदिभूतत्वात् सा[र]भूतं श्रेष्ठमिति यावत् तं विज्जाहारा—विद्याधरं विद्याधरनामकं वृत्तं णाआराआ—नागराजः जंपे—जल्पति ॥ अत्र वर्णवृत्ते मात्राकथनस्यानतिप्रयोजनकत्वान्मात्राज्ञापकस्वरणः सव्वासारेति कर्ण[वि]शेषणं [च] पद्यपूरणार्थमेवेति मंतव्यं, द्वादशगुरुरचितचरणो विद्याधर इति फलितार्थः । (E).

१२२ । अथ द्वादशाचरं जगतीच्छंदः । चारीति । चत्वारः कर्णाः पादे दत्ताः सव्वसाराः पादांते देयाः कांताश्चत्वारो

---

१२३ । * Dropt up to हारा in the 2nd quadrant in MS. (B).
१ कंठे (A). २ दिट्ठा (C). ३ सीसे (A). ४ गोरी (F). ५ गव्वे (A, B & C).
६ वामा (A & B), रामा (C). ७ णिज्जे (C). ८ सोऊ (A). ९ देश्रो (E).
१० मोक्खा (A), सोक्खं (B & C). ११ देऊ (A). १२ चम्ला (A), तुम्मा (C).
१३ सत्ती (A), भत्ती (B). १४ १२० (A). १५ विद्याधरा (A).

धओ[१] चामरो रूअओ सेस सारो[२]
ठए कंठए मुद्दए जत्थ[३] हारो ।
चउ च्छंद किज्जे तहा सुद्ध देहं
भुअंगापआअं पए बीस रेहं ॥ १२४[४] ॥

हाराः । षण्णवतिमात्राप्रस्तारः पादाः, विद्याधरं जल्पति
सारो नागराजः ॥ कर्णो द्विगुरुः, हारो गुरुः । (G).

१२३ । उदाहरति । यस्य कण्ठे विषं दृश्यते शीर्षे गङ्गा नाग-
राजः कृतो हारः गौरी अङ्गे । गर्व्वितो रामः प्रतिकूलमारितः
कामः गृहीता कीर्त्तिः स देवः सुखं ददातु युष्माकं भक्त्या ॥ (C).

१२३ । विद्याधरमुदाहरति, जासू इति । जासू — ज[य]स्य
कंठा — कंठे बीसा — विषं दीसा — दृश्यते, सीसा — शीर्षे गंगा
दृश्यते, अंगा — अंगे अर्द्धांगे इति यावत् गोरी — गौरी पार्वती-
त्यर्थः दृश्यते, येन णाआराआ — नागराजः हारः कंठभूषा किज्जे —
क्रियते कृतो वा । गंते — गात्रे चामा — चर्म करिकृत्तिरिति
यावत् धृतमिति शेषः, येन च कामा — कामं मारू — मारयित्वा
दग्ध्वेति यावत् कित्ती — कीर्त्तिः लिज्जे — गृहीता, सोई — स
एव देओ — देवः शशिकलाभरण इत्यर्थः भत्ती — भक्त्या तुम्हा —
युष्मभ्यं सुक्खं — सुखं निरतिशयानन्दमिति यावत् देओ — ददातु ॥
विद्याधरो निवृत्तः । (E).

---

१२४ । १ पओ (A). २ राओ (C). ३ जत्थ (A). ४ १२१ (A).

१२३ । यथा । यस्य कंठे विषं दृश्यते शीर्षे गंगा नागराजाः क्रियंते हाराः गौरी अंगे । गात्रे चर्म मारितः कामो गृहीता कीर्त्तिः सोऽपि देवः सुखं ददातु युष्माकं भक्त्या ॥ (G).

१२४ । ध्वजं चामरं रूपकं शेषसारः स्थाप्यते कण्ठे मुग्धे- यथा हारः । चतुश्छन्दः क्रियते तथा शुद्धदेहं भुजंगप्रयातं पादे विंशतिरेखं ॥ ध्वज आदिलघुस्त्रिकलः, चामरं गुरुः, रूपकं छन्दः, शेषो नागः पिङ्गल एव तस्य सारः । चतुश्छन्दश्चतुर्गणं तेन चतुर्भिर्गणैश्छन्द इत्यर्थः । विंशतिरेखं विंशतिकलं । (C).

१२४ । अथैका[यद्वा]दशाक्षरचरणस्य वृत्तस्य षडशीत्युत्तर- पंचशततमं ५८६ भेदं भुजंगप्रयातनामकं वृत्तं लक्षयति, धअ इति । हे मुद्ध — हे मुग्धे यत्र धअ — ध्वजो लघ्वादिस्त्रिकलः चामरो — चामरं गुरुः एवं चउ — चत्वारः रूअओ — रूपकाः गणा इति यावत् पए — पदे प्रतिचरणमित्यर्थः किज्जे — क्रियंते तत्पदे इत्यनुषंजनीयं बीस रेहं — विंशतिरेखं विंशतिः रेखाः मात्रा यत्र तादृशमित्यर्थः शुद्धदेहं भुअंगापआअं — भुजंगप्रयातं छंद — छन्दः सेस — शेषेण पिंगलेन जत्थ — यथा हारो — हारः मुक्तादाम तहा — तथा कंठए — कंठे ठए — स्थाप्यते । केचित्तु धअो — ध्वजः लघ्वादिस्त्रिकल इति यावत् ततः चामरो — चामरं गुरुरिति यावत् रूअओ — एवं रूपेण चउ — चतुर्भि- र्गणैर्यत्र चरण इति शेषः सारो — सारः श्रेष्ठ इति यावत् सेस — शेषः संपूर्ण इत्यर्थः तहा — तथा किज्जे — क्रियते पूर्यते इति यावत्, पए बीस रेहं — पदे विंशतिरेखं शुद्धदेहं टङ्कवनिकया

अहिगण[1] चारि पसिद्धा सोलह चरणेण पिंगलो भणइ[2]।
तीणि[3] सआ बीसग्गल[4] मत्ता संखा[5]समग्गाइं॥ १२५[6] ॥

[गाहा]

समीकृतगणं तत् भुअंगापआअं—भुजंगप्रयातं छन्दः, तथा कथमित्याह, ठए इति, जत्थ—यथा मुद्धए—मुग्ध[या] कंठए—कंठे हारः मुक्तादाम ठए—स्थाप्यते इत्याहुः। अत्र ठए इति द्वितीयश्चरणः मात्राकथनं च पद्यपूरणार्थमेवेति मंतव्यं, यग[ण]-चतुष्टयरचितचरणं भुजंगप्रयातमिति फलितोऽर्थः। (E).

१२४। धअ[ओ] इति। ध्वजश्चामरं रूपकाः संसारे स्थाप्यते कंठे मुग्धया यथा हारः। चत्वारः छंदः क्रियते तथा शुद्धदेहं भुजंगप्रयातं पदे विंशतिरेखं॥ ध्वजो लघ्वादिस्त्रिकलः, चामरं गुरुः, एवंरूपाश्चत्वारो गणाः पदे कार्या इत्यर्थः। शुद्धेति स्तोत्रादिप्राशस्त्यं सूचितं। यथा मुग्धया हारः कंठे ध्रियते तथा शेषेणेत्यर्थः। (G).

१२५। एतस्यैव विशेषान्तरमाह। अहिगणाश्चत्वारः प्रसिद्धाः षोड़शचरणैः पिङ्गलो भणति। त्रीणि शतानि विंशत्यधिकानि मात्रासंख्याः स[म]ग्राणि॥ अहिगण आदिलघुः पञ्चकलः, षोडशचरणैरेतादृशैर्भुजङ्गप्रयातं पिङ्गलो भणति, समग्रैः षोडशचरणैर्विंशत्यधिकशतत्र[त्रि]यमात्रा भवन्तीत्यर्थः। (C).

१२५। १ अभिगण (F). २ कहइ (A). ३ तिणि (A & C), भिण (B). ४ बीसग्गा (A). ५ सक्खा (C). ६ This śloka comes after १११ in MSS. (A, B & C).

जहा, महा मत्त माअंग[1] पाए ठवीआ
तहा तिक्ख[2]बाणा कडक्खे[3] धरीआ ।
भुआ[4] पास[5] भोहा[6] धणूहा[7] समाणा
अहो णाअरी कामराअस्स सेणा[8] ॥ १२६[9] ॥

भुअंगपआतं । (C).

१२५। अथास्यैव प्रकारांतरं गाथया वदति, अहिगणेति पसिद्धा — सर्वत्र छंदोग्रंथे प्रसिद्धाः चारि — चत्वारः अहिगण — अहिगणाः पञ्चकलाः यगणा इति यावत् यत्र प्रतिचरणं पतंतीति शेषः, बीसग्गल — विंशत्यधिकानि तीणि सआ — त्रीणि शतानि समग्गाइं — समग्रा मत्ता संखा — मात्रासंख्या यत्र भवतीति शेषः, सोलह चरणेण — षोडशचरणेन उपलक्षितं तत् भुजंगप्रयातनामकं वृत्तमिति शेषः पिंगलो — पिंगल इति भणइ — भणति ॥ श्लोकचतुष्टयस्यैकः श्लोकः कर्त्तव्य इति फलितार्थः॥ (E).

१२५। गाथयास्यैव प्रकारांतरमाह, अहीति। अहिगणास्त्वारः प्रसिद्धाः षोड़शचरणेन पिंगलो भणति। त्रीणि शतानि विंश-त्यधिके[कानि] मात्रासंख्या समग्रा ॥ अहिगणो यगणः। (G).

१२६। उदाहरति। महामत्तमातङ्गः पादे स्थापितः तथा तीक्ष्णवाणाः कटाक्षे धृताः। भुजः पाशः भ्रुवौ धनुःसमाने अहो नागरी कामराजस्य सेना ॥ (C).

१२६। १ मातङ्ग (C). २ तिक्ख (C). ३ कलक्खे (B & C). ४ भुजा (F). ५ फास (E & F). ६ भौहा (A), भोंहा (B & C). ७ धणूहा (B & C). धणूसा (F). ८ सणा (E). ९ १२२ (A).

हार गंधा तहा कस्स[1] गंधा उणो
कस्स सद्दा[2] तहा तो[3] गुरूत्रा गणो[4] ।
चारि[5] जोहा गणा णाश्र राश्रा भणो[6]
एहु[7] रूएण लच्छीहरो[8] सो मुणो[9] ॥ १२७[10] ॥

१२६ । भुजंगप्रयातमुदाहरति, महामत्तेति । यस्याः पाए—पादे महामत्तमातंगः ठवीश्रा—स्थापितः, तहा—तथा यस्याः कडक्खे—कटाक्षे तिक्ख बाणा—तीक्ष्णवाणाः धरीश्रा—धृताः । यस्याः भुश्रा—भुजयोः फास—पाशो धृत इति पूर्वेणान्वयः, यथा च भोहा—भ्रुवोः धणूहा—धनुः धृतमिति पूर्वेणान्वयः, सेयं नागरी श्रहो इत्याश्चर्य्ये कामराश्रस्स—कामनृपतेः [समाणा] —समाना त्रिभुवनविजयेनातिगर्विता सेणा—सेनैव सेनेति भावः ॥ यद्वा पादस्थापितमहामातंगा कटाक्षा एव धृतास्तीक्ष्णवाणाः यया सेत्यर्थः, भुजपाशा भुजैव पाशो यस्याः सेत्यर्थः, धनुःसमानभ्रूका नागरी कामनृपतेः सेनेव भातीति शेष इति योजनीयं । पूर्वापरशब्दव्यत्यासस्तु प्राकृतभाषायां न दोषायेति मंतव्यम् । भुजंगप्रयातं निवृत्तम् । (E).

१२६ । भुजंगप्रयातं यथा । महामात्रा मातंगाः पादे स्थापितास्तथा तीक्ष्णवाणाः कटाक्षे धृताः । भुजा पाशो भ्रूर्धनुषा समाना, अहो नागरी कामराजस्य सेना ॥ (G).

१२७ । १ पच (B). २ सद्धा (C). ३ तहा रा (A), तचारा (B & C). ४ रण (B). ५ धारी (F). ६ भणे (A, B & C). ७ एष (A). ८ लच्छीहर (C), लच्छीधरो (F). ९ सुणे (C). १० १२५ (A).

१२७। हारगन्धौ तथा कर्णगन्धौ पुनः कर्णशब्दौ तकारो-गुरुको गणः। चत्वारो योधगणा नागराजो भणति एतद्रूपेण लक्ष्मीधरो ज्ञायते॥ हारो गुरुः, गन्धः शब्दश्च लघुः, कर्णो-द्विगुरुः, तकारोऽन्तलघुको गणः, गुरुको गण एकः। चत्वारो योध-गणा इत्यनेन उक्तार्थ एव स्पष्टीकृतः, योधो मध्यलघुः पञ्चकलः। (C).

१२७। अथ द्वादशाचर[चर]णवृत्तस्यैकसप्तत्युत्तरैकादशशततमं ११७१ भेदं लक्ष्मीधरनामकं वृत्तं लक्षयति, हार गंधेति। हार गंधा—हारगंधौ गुरुलघू इति यावत् तहा कस गंधा—तथा कर्णगंधौ कर्णो गुरुद्वयात्मको गणः गंधो लघुस्तावित्यर्थः उणो—पुनः कस सद्दा—कर्णशब्दौ गुरुद्वयात्मकगणलघू इति यावत् तहा तो—तथा तोऽंतलघुस्तगण इत्यर्थः गुरुआ गणो—गुरुक-गणः। एऊ रूएण—एवं रूपेण एतावदुपादानविधिनेति यावत् चारि जोहा गणा—चत्वारो योद्धृगणा रगणा इति यावत् यत्र प्रतिचरणं पतंतीति शेषः, सो—सः लच्छीहरो—लक्ष्मीधरः मुणो—ज्ञातव्यः, इति णाअराआ—नागराजः पिंगल इति यावत् भणो—भणति॥ रगणचतुष्टयरचितचरणं लक्ष्मीधरनामकं वृत्तं ज्ञातव्यमिति फलितार्थः। अत्र रगणचतुष्टयोद्दवनिकाप्रकारः पूर्वार्द्धेणोक्तमिति ध्येयम्। (E).

१२७। हारेति॥ हारगंधौ तथा कर्णगंधौ पुनः कर्णशब्दौ तथा तगणो गुरुको गणः। चत्वारो योद्धृगणा नागराजो भणति एवं रूपेण लक्ष्मीधरस्सः॥ हारो गुरुः, गंधो लघुः, कर्णो द्विगुरुः, शब्दो लघुः। एवं चत्वारो रगणाः। (G).

जहा, भंजिआ मालवा गंजिआ कस्पला[1]
जिणिआ[2] गुज्जरा[3] लुंठिआ[4] कुंजरा[5] ।
बंगला भंगला ओड्डिआ[6] मोड्डिआ[7]
मेच्छआ[8] कंपिआ कित्तिआ थप्पिआ ॥ १२८[9] ॥
लक्ष्मीधरः[10] ।

१२८। उदाहरति। भञ्जिता मालवा गञ्जिताः कर्णाटाः जिता गुर्ज्जरा लुण्ठिताः कुञ्जराः। वङ्गा भग्ना ओड्रा मोटिताः म्लेच्छाः कम्पिताः कीर्त्तिः स्थापिता ॥ कर्णेनेत्यध्याहार्य्यम्। (C).

१२८। लक्ष्मीधरमुदाहरति, भंजिआ इति। मालवा—मालवदेशाधिपतयो राजानः भंजिआ—भंजिता भग्ना इति यावत्, कस्पला—कर्णाटाः कर्णाटदेशीया राजान इति यावत् गंजिआ—गंजिता मारिता इति यावत्, लुंठिआ कुञ्जरा—लुंठितकुंजराः लुंठिताः बलाद्गृहीताः कुंजरा हस्तिनो येषां तादृशा इत्यर्थः गुञ्जरा—गुर्ज्जरदेशीया राजानो जिणिआ—जिताः। बंगला—वंगाः भंगला—पलायिताः, ओड्डिआ—ओड्रदेशीया राजानः मोड्डिआ—मोटिताः, मेच्छआ—म्लेच्छाः कंपिआ—कंपिताः, कित्तिआ—कीर्त्तयः थप्पिआ—स्थापिताः ॥ स रामो जयतीति प्रबंधेन युज्यते। लक्ष्मीधरो निवृत्तः। (E).

१२८। १ काणला (A), काणडा (B & C). २ जीणिआ (A & C), जीणिआ (B). ३ गुञ्जरा (B & C). ४ लूलिआ (A, B & C). ५ पिंजरा (A), कुञ्जरा (E). ६ उड्डिआ (A), उड्डिआ (C). ७ मुंडिआ (A), मुड्डिआ (B & C). ८ मिच्छआ (E). ९ १२५ (A). १० लक्ष्मीधरा (A).

सगणा[1] ध्रुव[2] चारि पलंति जही[3]
भण[4] सोलह मत्त बिराम कही ।
तह पिंगलिअं[5] भणिअं उचिअं[6]
इअ तोटअ[7] छंद बरं रइअं[8] ॥ १२९[9] ॥

१२८ । यथा । भंजिता मालवाः गंजिताः कर्णाटका जिताः गुर्ज्जरा लुंठिताः कुंजराः । वंगा भंगिता ओड्रदेशा मोटिताः म्लेच्छाः कंपिताः कीर्त्तयः स्थापिताः ॥ (G).

१२९ । सगणा ध्रुवाश्चत्वारः पतन्ति यत्र गणषोडशमात्राभिर्विरामस्तत्र । तथा पैङ्गलिकैर्भणितम् उचितमिति तोटकच्छन्दोवरो रचितः ॥ सगणचतुष्केण षोडशमात्राकथनं स्पष्टार्थमेव, विरामः पादसमाप्तिः । (C).

१२९ । अथ द्वादशाक्षरचरणस्य वृत्तस्य पंच[षट्]पंचाशदधिकसप्तदशशततमं १७५५ [१७५६] भेदं तोटकनामकं वृत्तं लक्षयति सगणेति । जही — यत्र चारि चत्वारः सगणा गुर्वंतगणाः ध्रुव — ध्रुवं पलंति — पतंति, सोलह मत्त बिराम कही — षोडशमात्राकथितविरामं षोडशमात्रासु कथितो विरामो विच्छेदो यस्मिंस्तदित्यर्थः । तह — तथा रइअं — रचितं पिंगलेनेति यावत् छंद बरं — छंदःश्रेष्ठं इअ — एतत् तोटअ — तोटकं भण — कथय

१२९ । १ सच्चणा (A). २ धुअ (A, B & C). ३ जिही (F). ४ पच (A), गण (B & C). ५ पिंगलचं (A & C). ६ Dropt in (B). ७ तोडउ (B), तोडच (C). ८ बचिरं (B), रचिचं (C). ९ १२६ (A).

जहा, चल[१] गुज्जर[२] कुंजर[३] तेज्जि[४] मही[५]
तुअ[६] बब्बर जीवण[७] अज्जु[८] णही ।
जइ कुप्पिअ[९] कण्ण णरेंद वरा
रण[१०] को हरि[११] को[१२] हर बज्जहरा[१३] ॥ १३०[१४] ॥
तोटकं ।

इति पिंगलिअं—पिंगलीयैः पिंगलप्रयुक्तच्छंदःशास्त्राभिज्ञैरिति यावत् उचिअं—उचितं भणिअं—भणितं ॥ (E).

१२९ । सगेति । सगणा ध्रुवं चत्वारः पतंति यत्र भण षोडश-मात्राविरामः कथितः । तथा पिंगलीयैर्भणितम् उचितमेतत्तोटकं छंदोवरं रचितम् ॥ (G).

१३० । उदाहरति । चल गुर्ज्जर कुञ्जरांस्त्यक्त्वा तत्र तव वर्व्वर जीवनमद्य नास्ति । यदि कुप्यति कर्णनरेन्द्रवरो रणकेशरी कोहरराज्यहरः ॥ कोहरो राज्यभेदः । (C).

१३० । तोटकमुदाहरति, चलेति । हे बब्बर—बर्ब्बर गुज्जर—गुर्ज्जराधीश तुअ—तव जीअ[व]ण—जीवनं अज्जु—अद्य णही—नास्ति, अतः कुज्जर—कुंजरान् मही—महीं तेज्जि—त्यक्त्वा चल—गच्छ त्वमिति शेषः । कथं जीवनं नास्तीत्यत आह

१३० । १ जल (C). २ गुज्झर (B). ३ कुञ्जर (E). ४ तज्जि (A). ५ दही (A, B & C). ६ तुह (B), वह (F). ७ जिव्वण (B & C). ८ अज्ज (B). ९ कोप्पिअ (A), कोप्पइ (B & C). १० णर (A). ११ के हरि (A), dropt in (B), केसरि (C). १२ के (A). १३ बज्जधरा (A). १४ ११७ (A).

जा[1] चारि तक्कार संभेत्र उक्किट्ठ[2]
सारंगरूअक्क सो पिंगले दिट्ठ[3] ।
जा तीत्र[4] बीसाम[5] संजुत्त पाएहि
णा जाणिए कंति[6] अस्सोस[7] भाएहि[8] ॥ १३१[9] ॥

जइति । कस्स णरेंद बरा — कर्णनरेंद्रवरः जइ — यदि कुप्पित्र — कुपितस्तदेति शेषः रण — रणे को हर — को हरः को हरि — को हरिः कः वज्जहरा — वज्रधरः ॥ गुर्ज्जरजयार्थप्रयातकर्णनरपतिप्रतियुद्धाय समुपस्थितं गुर्ज्जरदेशाधिपतिं प्रति कस्यचिद्वंदिजनस्यैतद्वचनम् । तोटकं निवृत्तम् । (E).

१३० । यथा । चल गुर्जर कुंजरान् त्यक्त्वा महीं तव वर्ब्बर जीवनमद्य न हि । यदि कुपितः कर्णनरेंद्रवरो रणे को हरिः कौ हरवज्रधरौ ॥ (G).

१३१ । यश्चतुस्तकारसम्भेदेनोत्कृष्टं सारङ्गरूपकं तत् पिङ्गलेन दृष्टं । त्रयो[ये] विश्रामाः संयुक्तपादैर्न ज्ञायते कान्तिरन्योन्यभागैः ॥ संभेदः सम्बन्धः, उत्कृष्टम् उत्कर्षः सुश्राव्यत्वं, रूपकं छन्दः, संयुक्ताक्षरप्रधानपादैर्विशिष्टं, विश्रामो यतिः, कान्तिः सा केनापि [न] ज्ञायत इत्यर्थः । (C).

१३१ । अथ द्वादशाक्षरचरणस्य वृत्तस्य एकचत्वारिंशोत्तरत्रयो-

---

१३१ । १ जं (A). २ उक्किट्ठ (B & C). ३ दिट्ठ (B & C). ४ तीणि (A). ५ विस्साम (B & C). ६ कित्ति (E). ७ असस (A). ८ भाएण (A), हाएहि (C). ९ १२८ (A).

जहा, रे गोड[1] थक्कंति[2] ते हत्थि[3] जूहाइ[4]
पक्खट्टि जुज्झंतु[5] पाइक्क बूहाइ[6]।
कासीस राआ सरासार अग्गे ण[7]
की हत्थि[8] की पत्ति की बीर बग्गेण॥ १३२[9]॥
सारंग[रूपकं]।

विंशतिशततमं २३४१ भेदं सारंगरूपकनामकं वृत्तं लक्षयति, जा चारीति। यत् चारि तक्कार संभेअ उक्किट्ठ—चतुस्तकारसंभेदोत्कृष्टं चतुस्तकाराणां चतुर्णामंतलघुतगणानां यः संभेदः संबंधस्तेनोत्कृष्टं सुश्राव्यत्वाद्युत्कर्षयुक्तमित्यर्थः, यत् पाएहि—पादेषु तीअ बीसाम संजुत्त—तृतीयविश्रामसंयुक्तं तत्र तृतीयाक्षरे यतिस्तादृशमित्यर्थः अण्णोण्ण भाएहि—अन्योन्यभागैः परस्परविच्छेदैरिति यावत् यस्येति शेषः कंति—कांतिः ण जाणिए—न ज्ञायते, सो—तत् पिंगले दिट्ठ—पिंगले दृष्टं सारंगरूअक्क—सारंगरूपकं तत्सारंगरूपकनामकं वृत्तमित्यर्थः॥ अत्र चतुर्थस्वरणः पद्यपूरणार्थमेवेति मन्तव्यम्। (E).

१३१। जेति। यत्र चतुस्तगणसंभेद उत्कृष्टः सारंगरूपकः

१३२। १ गउड (A), गोल (B & C), गौड (E). २ थक्कंतु (A & C), थक्कंत (B). ३ हत्थि (A), हत्थी (E), हत्थ (F). ४ जूथाइं (A), जूहाचि (B), जूथाइ (C); वूहाइ (E & F). ५ सज्जाण (A), वज्जन्तु (B & C), झुझ्झंतु (E). ६ जूथाइ (A), जूहाइ (C). ७ जम्मेण (C). ८ हत्थि (A), हत्थि (B). ९ १३९ (A).

पत्रोहर चारि पसिद्धह ताम[१]
ति तेरह[२] मत्तह मोत्तित्र[३]दाम ।
ण पुव्वहि[४] हारु[५] ण दिज्जइ[६] अंत
बिहु सत्र अग्गल छप्पण[७] मत्त ॥ १३३[८] ॥

पिंगलेन दृष्टः । यः तृतीये विश्रामसंयुक्तः पादेषु न ज्ञायते कांतिरन्योन्यभागैः ॥ उल्लाछलं आव्यत्वादिना । (G).

१३२ । उदाहरति । रे गौड़ तिष्ठन्तु ते हस्तियूथानि परावृत्य व्रजन्तु पदातियूथानि । काशीश्वरराजशरासाराग्रे किं पत्तिभिः किं हस्तिभिः किं वीरवर्गेण ॥ अत्र जयस्यासम्भावितत्वात् किं हस्त्यश्वादिना, तथाच पलायनं युक्तमिति व्यज्यते । (C).

१३२ । सारंगरूपकमुदाहरति, रे गौडेति । रे गौड — रे गौडदेशाधीश ते हत्थि वूहाइ — हस्तिव्यूहानि[?] थक्कंति — श्राम्यंति, अत इति शेषः पाइक्क वूहाइ — पदातिव्यूहानि पलट्टि — परावृत्य जुझ्झंतु — युध्यंतु[ताम्] नाम, तथापीति शेषः कासीस राआ सरासार अग्गे — काशीश्वरराजशराऽऽसाराग्रे दिवोदासवाणधाराग्रे इति पाठश्च, ण — ननु निश्चयेन को हत्थि — किं हस्तिभिः को पत्ति — [किं] पत्तिभिः को वीर वग्गेण — किं वीरवर्गेण ॥ (E).

१३२ । यथा । रे गौड श्राम्यंति ते हस्तियूथानि परावृत्य

---

१३३ । १ जाम (E & F). २ तेमह (B). ३ मोत्तिम (B). ४ पूर्ब्ब (B), पूब्ब (C). ५ हार (B, C & E). ६ दिज्जहि (A & B). ७ छप्पम (B). ८ १३० (A).

युध्यंतु[ताम्] पत्तिव्यूहाः। काशीश्वरराजश्वरासाराग्रे किं हस्तिभिः किं पत्तिभिः किं वीरवर्गेण ॥ दिवोदासखड्गाग्रे सर्वे तृणप्राया इत्यर्थः ॥ (G).

१३२। पयोधरैश्चतुर्भिः प्रसिद्धैर्युक्तं त्रिचयोदशमात्राभिः मौक्तिकदाम। न पूर्व्वस्मिन् हारो न दीयते अन्ते द्विशते अग्रे षट्पञ्चाशन्मात्राः ॥ अधिकास्त्रयोदश त्रिचयोदश, अत्र च आद्यन्तयोर्गुरुरहितत्वेन जगण एवोक्तः, तथाच पयोधरशब्दोऽर्थस्पष्टीकरणार्थमेवेति। यद्वा, आद्यन्तगुरुरहित-षोड़शमात्रिक-पादषोड़शकेनापि मौक्तिकदामच्छन्दो भवतीति ज्ञापनार्थं। न चैवं मात्रावृत्त एवोपन्यासः स्यादिति वाच्यं, द्वादशाक्षरनियमस्यैव विनिगम[क]त्वात्, षोड़शपादैः षट्पञ्चाशदधिकशतद्वयं मात्रा भवन्ति। (C).

१३३। अथ द्वादशाक्षरचरणस्य वृत्तस्य षड्विंशत्युत्तरैकोनविं[त्रिं]शशततमं २९२६ भेदं मौक्तिक[दाम]नामकं वृत्तं लक्षयति, पओहरेति। जाम — यन्मध्ये ति तेरह मत्तह — त्रिचयोदशमात्राभिः षोड़शभिर्मात्राभिरिति यावत् उपलक्षिताः चारि — चत्वारः पओहर — पयोधरा मध्यगुरुका जगणा इति यावत् प्रसिद्धाः भवंतीति शेषः, यत्र च अंत — अंते पादान्ते इत्यर्थः पुब्बहि — पूर्वं पादादावित्यर्थः हार—हारो गुरुः ण दिज्जे — न दीयते, बिह सअ अग्गल छप्पण मत — द्विशताधिकषट्पंचाशन्मात्राकं तत् मोत्तिअदाम — मौक्तिकदामनामकं वृत्तमित्यर्थः ॥ ननु यत्र पयोधरचतुष्टयं पततीत्युक्त्यैव पादाद्यंतयोर्गुरुदानाप्रसक्तेः कथं ण पुब्बहीत्यनेन तत्र तत्प्रतिषेधः साधु संगच्छत इति चेत्, अत्र केचित् यत एवं

अहा, कआ भउ[1] दुब्बरि[2] तेज्जि[3] गरास
खणे खण[4] जाणिअ अच्छ[5] णिसास ।
कुहू रव तार[6] दुरंत बसंत
कि णिद्दअ[7] काम कि णिद्दअ[7] कंत[8] ॥ १३४[9] ॥
मौक्तिकदाम ।

चत्वारो जगणा: पतंतीत्यत एव पूर्व्वम् अंते वा हारो न दीयत-इति पूर्वोक्तस्यैव विवरणमेतदित्याकूः । षट्पञ्चाशदुत्तरशतद्वय-मात्राकथनं षोडशचरणाभिप्रायेण, जगणमात्राज्ञापकं तद्विशेषण-पदं पादपूरणार्थमेवेति मंतव्यम् । (E).

१३३ । पत्रो इति । पयोधरास्वत्वार: प्रसिद्धा: यत्र त्रिचयो-दश मात्रा मौक्तिकदाम । न पूर्व्वं हारो न दीयते अंते द्विशता-धिकषट्पंचाशन्मात्रं ॥ त्रिचयोदश षोड़शेत्यर्थ:, द्विशतेत्यनेनास्य षोड़शचरणता भवतीत्युक्तं, पयोधरो जगण: । (G).

१३४ । उदाहरति । कायो भर: दुर्ब्बलस्त्यक्ता ग्रासं चणे चणे ज्ञायते अस्ति[च्छ]निश्वास: । कुहूरवस्तापयति दुरन्तो वसन्त: * * * किं निर्द्दय: कान्त: ॥ दुर्ब्बलत्वात् भारो भर:, ग्रासं भक्ष्यं त्यक्ता दुर्ब्बलो जातो ज्ञायते । एतावत्यां विसंष्ठुलतायां निर्द्दय: काम: कान्तो वा वीजमपि तु द्वावेव । (C).

---

१३४ । १ भच्च (A), हउ (B). २ दुव्वर (A), दुव्वल (B & C). ३ तेज्ज (C). ४ खणे (A, B & C). ५ दौह (A). ६ ताव (A, B & C). ७ णिक्कुब (B & C). ८ Dropt in (C). ९ १३१ (A).

तोटअ[1] छंद बिरीअ ठबिज्जसु[2]
मोदअ छंदअ[3] णाम करिज्जसु।
चारि गणा भगणा सुपसिद्धउ[4]
पिंगल जंपइ[5] कित्तिहिं[6] लुद्धउ[7] ॥ १३५[8] ॥

१३४। मौक्तिकदामोदाहरति। गरास—ग्रासं भोजनमिति यावत् तेज्जि—त्यक्ता कआ—कायः दुब्बरि—दुर्बलः भउ—जातः, खणे खणे[ण]—चणे चणे अच्छ—स्वच्छः णिसास—निश्वासः रोदनकालीनश्वास इत्यर्थः जाणिअ—ज्ञायते। तार—तारेण कुहु रव—कोकिलारावेण दुरंतः दुष्टः मरणादिजनकः अंतो यस्य तादृशो वसंतनामा ऋतुः, तस्मात् कि णिद्दअ काम—किं निर्दयः कामः कि णिद्दअ कंत—किं निर्दयः कांतः॥ एतादृशेऽपि समये न आगतः सः प्रियो निर्दयः, प्राणेश्वरप्राणां मां ज्ञात्वा योऽतिदुःखं प्रयच्छति स कामो वा निर्दय इति कस्याश्चित्प्रोषितपतिकायाः सखीं प्रति वचनमेतत्। मौक्तिकदाम निवृत्तम्। (E).

१३४। यथा। कायो जातो दुर्बलस्त्यक्तो ग्रासः चणे चणे जातोऽच्छनिश्वासः। कुहुरवतारदुरंतो वसंतः किं निर्दयः कामः किं निर्दयः कांतः॥ (G).

१३५। तोटकच्छन्दो विपरीतं स्थापय, मोदकच्छन्दो नाम

१३५। १ तोलह (B & C), तोलअ (E). २ ठविज्ज (C). ३ छंदह (A). ४ सुपिसिद्धउ (B). ५ जप्पइ (B). ६ कित्ति (A), कित्तिअ (B & C). ७ लुद्धउ (B), लद्धउ (C). ८ १३२ (A).

जहा, गज्जउ[1] मेह कि अंबर[2] सावर[3]
फुल्लउ[4] णीव कि बुल्लउ[5] भम्मर[6] ।
एक्कउ[7] जीअ पराहिण[8] अम्मह[9]
कीलउ[10] पाउस कीलउ[10] बम्मह[11] ॥ १३६[12] ॥
मोदकं ।

कुरु । चत्वारो गणा भगणाः सुप्रसिद्धाः, पिङ्गलो जल्पति कीर्त्ति-लुब्धः ॥ सगणचतुष्कात्मकतोटकस्य वैपरीत्येनापि चत्वार इति अत्र चत्वारो गणा भगणरूपाः स्थाप्याः, अन्तगुरुर्हि सगणः, तस्य वैपरीत्येन भगणः । (C).

१३५ । अथ द्वादशाक्षरचरणस्य वृत्तस्यैकादशोत्तरपंचचिंशत्शततमं ३५११ भेदं मोदकनामकं वृत्तं लक्षयति, तोलेति । तोलअ छंद—तोटकच्छंदः विरीअ—विपरीतं ठविज्जसु—स्थापयस्व, अतएव चारि गणा—चत्वारो गणाः भअणा—भगणा आदिगुरुकाः गणा इति यावत् सुपसिद्धउ—सुप्रसिद्धा यत्र प्रतिचरणं पतंतीति शेषः, तस्य छंदह—छंदसः मोदअ—मोदकं नाम अभिधानं करिज्जसु—कुरुष्व इति कित्तिहि लुद्धउ—कीर्त्तिलुब्धः पिंगलः जंपइ—जल्पति ॥ इदमत्र तत्त्वं, चतुर्भिर्गुर्वंतगणैस्तोटकच्छंदो भवति

---

१३६ । १ गज्जहि (B). २ चंमर (A). ३ सामर (A, B & C). ४ फुल्लइ (B), फुल्लुउ (C). ५ भम्मउ (A, B & C). ६ भामर (A). ७ एक्कल (A & B), एक्कण (C). ८ पराधिण (C). ९ अम्हह (C). १० कीलेउ (A & E), कीणङ (B). ११ मम्मह (C). १२ १२२ (A).

तद्विपरीतस्थापनेनादिगुरुकैश्चतुर्भिर्गणैर्मोदकं भवति । वक्रोक्तिस्तु पद्यपूरणार्थेति मंतव्यम् । (E).

१३५ । तोटेति ॥ तोटकच्छंदो विपरीतं स्थापय, मोदकं छंदोनाम कुरुष्व । चत्वारो गणा भगणाः सुप्रसिद्धाः, पिंगलो जल्पति कीर्त्तिलुब्धकः ॥ चत्वारो भगणाः कार्य्या इत्यर्थः । (G).

१३६ । उदाहरति । गर्ज्जतु मेघः किमम्बरं श्यामलं फुल्लतु नीपः घूर्ण[तु] भ्रमरः । * * * पराधीन * * * क्रीडतु प्रावृट् क्रीडतु मन्मथः ॥ गर्जो मेघस्य वास्तु दुःखे न कोऽपि विशेषः, किमित्याक्षेपे, क्रीडत्विति, मम तु मरणं सिद्धमेवेति व्यज्यते । स्थानद्वये की णउ इति पाठे किं नयतु प्रावृट् किं नयतु मन्मथः इति वार्थः । (C).

१३६ । मोदकमुदाहरति । गज्जेति । मेह — मेघः गज्जउ — गर्ज्जतु, कि — किंवा अंबर — अंबरम् आकाशमिति यावत् सावर — श्यामलं भवत्विति शेषः, णीव — नीपः कदम्बः फुल्लउ — विकसतु, कि — किंवा भम्मर — भ्रमराः बुल्लउ — गुंजंतु । अम्मह — अस्माकं पराहिण — पराधीनमन्यायत्तमिति यावत् एक्कउ — एकमेव जीवं किंवा पाउस — प्रावृट् लेउ — गृह्णातु, किं वा वम्मह — मन्मथः लेउ — गृह्णातु ॥ अत्र लेउ इति एकारो ह्रस्वोबोध्यः । वर्षागमेऽप्यनागतं विदेशिनं पतिं ज्ञात्वा अतिकामार्त्तायाः कस्याश्चित्प्रोषितभर्त्तृकायाः कांचित्प्रियसखीं प्रति वचनमेतत् । मोदकवृत्तं निवृत्तम् । (E).

१३६ । यथा । गर्जतु मेघः किमंबरं श्यामलं, विकसंतु नीपाः

णगण णगण कइ[1] चउ गण[2]
सुकइ[3] कमलमुहि[4] फणि भण[5]।
तरलणअणि सब कर[6] लहु
सब गुरु जबउ[7] णिबरि कहु[8] ॥ १३७[9] ॥

किं गुंजंतु भ्रमराः। एको जीवः पराधीनोऽस्माकं, किं गर्ज्जतु पर्यन्यः, किं गर्ज्जतु मन्मथः॥ (G).

१३७। नगणं नगणम् इति चतुर्गणं सुकविकमलरविः फणी भणति। तरलनयनी सर्व्वत्र सर्व्वलघु सगुरुरूपकं न निरूप्य कथय॥ आदौ नगणस्ततो नगण एवंक्रमेण चत्वारो गणा इत्यर्थः। तरलनयनीति छन्दसो नाम, सर्व्वत्र त्रयोदशाक्षरादावपि, निरूप्य निर्णीय। (C).

१३७। अथ द्वादशाक्षरचरणस्य वृत्तस्यांतिमं भेदं तरलनयना-नामकं वृत्तं लक्षयति, णगणेति। हे कमलमुखि णगण — प्रथमं नगणः सर्वलघ्वात्मको गणः पुनः नगणः स एव, एवंप्रकारेण चउ गण — चतुरः गणान् नगणचतुष्टयमित्यर्थः कइ — कृत्वा सब — सर्वान् द्वादशापि पादस्थान् वर्णान् लहू — लघून् कुरु, जबउ — यावंतः सब गुरु — सर्वगुरवो गुरुयुक्ता यावंतो द्वादशाक्षरभेदा-

१३७। १ कर (A, B & C). २ गुण (C). ३ सुकइ (E). ४ कमलरइ (A, B & C). ५ फण (B). ६ सर सब (A), सब सब (B & C). ७ सब गुरु अथण (A), सगुरु रूअउ ण (B & C), सब गुरु अबउ (E). ८ णिरवि करउ (A), णिंरवि कउ (B & C), णिवरि कह (E). ९ १२४ (A).

जहा, कमल बअण तिणअण हर[1]
गिरि बर सअण[2] तिसुलधर।
ससहर[3] तिलअ पलअकर[4]
बितरउ[5] मह्णु[6] अभिमत[7] बर॥ १३८[8]॥
तरलणअणि[9]।

इत्यर्थः तावंत इति शेषः णिबरि—निराकृत्य भिन्नीकृत्येति यावत् तरलणअणि—तरलनयना एतन्नामकं वृत्तमित्यर्थः कह—कथय इति सूकइ—सुकविः फणि—फणी पिंगलः भण—भणति॥ अत्र गुरुयुक्तयावद्वि[द]कथनं पद्यपूरणार्थमेवेति मंतव्यं, नगणचतुष्टयरचितचरणा तरलनयनेति निःकृष्टोऽर्थः। (E).

१३७। णगेति। नगणं नगणं कृत्वा चतुरो गणान् सुकविः कमलमुखि फणी भणति। तरलनयना सर्वान् कुरु लघून् सर्वगुरुं यावत् केवलं कथय॥ सर्वगुरुमगणमारभ्य नगणपर्यंतं भेदाः कथिता इत्यर्थः। तरलनयनेति छंदः। (G).

१३८। उदाहरति। कमलवदनस्त्रिलोचनो हरो गिरिवर-शयनस्त्रिशूलधरः। शशधरतिलकः प्रलयकरो वितरतु मह्यं अभिमतं वरम्॥ (C).

१३८। तरलनयनामुदाहरति, कमलेति। कमल बअण—

१३८। १ तिण हर (E). २ गिरिसअण (A). ३ ससधर (F). ४ मअण दम (A), पलकर (B), गल मरल (E & F). ५ बितरहि (A & C). ६ मज्झ (B). ७ अभिमअ (C), अहिमत (F). ८ १९५ (A). ९ तरलनयनी (A).

णगण चामर गंधजुआ ठवे
चमर सल्ल[1]जुआ जइ संभवे।
रगण[2] एक्क[3] पअंतहि लेक्खिआ[4]
सुमुहि[5] सुंदरि पिंगल देक्खिआ[6] ॥ १३९[7] ॥

कमलवदन: तिणअ[ण] — त्रिनयन: गिरि वर सअण — गिरिवर-शयन: तिसुलधर — त्रिशूलधर:। ससहर तिलअ — शशधर-तिलक: गल गरल — कंठस्थितविष: हर — हर: महादेव: मऊ — मह्यं अभिमत वर — समीहितवरं वितरउ — वितरतु ॥ तरल-नयना निवृत्ता। (E).

१३८। यथा। कमलवदन त्रिनयन हर गिरिवरशयन त्रिशूलधर। शशधरतिलक गलगरल वितर ममाभिमतं वरं ॥ (G).

१३९। नगण-चामर-गन्धयुगानि स्थितानि चामरं शल्ययुगं यत्र सम्भवति। रगण एक: पादान्ते लिख्यते शृणु सुन्दरी पिङ्ग-लेन दृष्टा ॥ चामरं गुरु:, गन्ध: शैल[शल्य]ञ्च लघु:। (C).

१३९। अथ द्वादशाक्षरचरणस्य वृत्तस्य चतु:षष्ट्युत्तरशतचतु-ष्टयाधिक-सहस्रद्वया[सहस्रा]त्मकं भेदं [१४६४] सुंदरीनामकं वृत्तं लक्षयति, णगणेति। हे सुमुखि यत्र पूर्वं णगण चामर गंधजुआ — नगणचामरगंधयुगानि नगणस्त्रिलघ्वात्मको गण: चामरम् एको-

---

१३९। १ सेल (A, B & C). २ रस गण (B). ३ यक (F). ४ देक्खिआ (A, B & C). ५ सुमुखि (B), सुणहि (C). ६ पेक्खिआ (A), लेक्खिआ (B). ७ १३६ (A).

जहा, बहइ[१] दक्खिण मारुअ[२] सीअला[३]
गवइ[४] पंचम कोमल कोइला ।
महुअरा[५] महु पाण बहु सरा[६]
भमइ[७] सुंदरि[८] माहव[९] संभवा[१०] ॥ १४०[११] ॥
सुंदरी[१२] ।

गुरुः गंधजुआ—गंधयुगं लघुद्वयमिति यावत् तानीत्यर्थः ठवे—स्थाप्यंते, ततः जइ—यदि चामरम् एको गुरुः सल्लजुआ—शल्ययुगं शल्यौ लघुस्तद्द्वयमित्यर्थः संभवे—संभवति । पअंभ[त]हि—पादांते एक्क—एकः रगण—मध्यलघुर्गणः लेक्खिआ लिखितः सा पिंगलदर्शिता पिंगलेन उपदर्शितेति यावत् सुंदरी सुंदरीनामकं तद्वृत्तं पिंगलेनोपदिष्टमित्यर्थः ॥ तस्यैव ग्रंथांतरे द्रुतविलम्बिते-[तमि]ति नाम, अतएव द्रुतविलम्बितमाह नभौ भराविति लक्षणमपि तत्रैव कृतमिति । (E). [Vide Ghosha's Compendium, p. 75—Ed.]

१३९ । णगेति । नगणं चामरं गंधयुगं स्थाप्यं चामरं शल्ययुगं यदि संभवति । रगण एकः पादांते लेख्यः सुमुखि सुंदरी पिंगलदृष्टा ॥ चामरो गुरुः, गंधशल्यौ लघू । (G).

१४० । १ वहइ (B), वहति (C). २ गारुअ (B), मारुअ (E). ३ सिअला (E). ४ रवइ (A & C). ५ बङुअरा (B). ६ मङ्गसवा (A, B & C). ७ तवइ (A), गवइ (B & C). ८ सुंदरि (E). ९ संभर (A), सवर (B), संभव (C), मावह (F). १० माहवा (A, B & C), संभरा (F). ११ १२७ (A). १२ सुंदरि (B & C).

कण्णा[1] दुण्णा चामर[2] सल्ला[3] जुअला जं
बीहा[4] दीहा[5] गंधअ[6] जुग्गा पअला[7] तं[8]।
अंते कंता[9] चामर[10] हारा सुहकाआ[11]
बाईसा मत्ता गुणजुत्ता भणु[12] माआ ॥ १४१[13] ॥

१४०। उदाहरति। वहति दक्षिणमारुतः शीतलः रौति पञ्चमं कोमलं कोकिलः। मधुकरो मधुपानमहोत्सवो गायति सुन्दरि संभृतो माधवः॥ संस्मरेति पाठे माधवं कृष्णं संस्मर। (C).

१४०। सुंदरीमुदाहरति। काचित्सखी कलहांतरितां महामानवतीं कांचिन्नायिकामाह, वहईति। हे सुंदरि सर्वावयवरमणीये माहव संभवा — माधवो वसंतस्तत्रोत्पन्न इत्यर्थः सीअला — शीतः दक्खिण मारुअ — दक्षिणमारुतः वहइ — वाति, कोइला — कोकिलः पंचम कोमल — पंचमं कोमलं यथा स्यात्तथा गवइ — गायति। मऊ पाण वहु सरा — मधुपानबहुस्वरा मधु मकरंदस्तस्य पानेनातिगंभीरस्वरा इत्यर्थः मऊअरा — मधुकरा भ्रमराः भमइ — भ्रमंति॥ अतस्त्वमपि मानं विहाय कांतमभिसरेत्याशयः। सुमुखी [सुंदरी] निवृत्ता। (E).

१४०। यथा। वहति दक्षिणमारुतः शीतलो गायति पंचमं

१४१। १ कण्ण (B). २ Dropt in (B). ३ सेल्ला (B & C). ४ बीआ (B & C). ४ and ५ transposed in (A). ६ गंध (A). ७ पलिआ (A). ८ जं (F). ९ कण्णा (A). १० चामरु (A). ११ सुहकाआ (A & E). १२ भणू (E). १३ १३८ (A).

LIBRARY

कोमलं कोकिलः। मधुकरा मधुपानबद्धखरा भ्रमंति सुंदरि माधवसंभवे वसंते ॥ (G).

१४१। अथ त्रयोदशाक्षरा। कर्णौ द्विगुणः चामरं शैल[शल्य]-युगं यत्र द्वौ दीर्घौ गन्धयुगं प्रकटं तत्। अन्ते कान्तौ चामर-हारौ शुभकरौ द्वाविंशतिमात्रा गुणयुक्ता * * * ॥ कर्णौ द्विगुरुः तद्द्विगुणे गुरुचतुष्कं, चामरं दीर्घः हारश्च गुरुः, शैल्यं[शल्यं] गन्धश्च लघू, कान्तौ कमनीयौ, द्वाविंशतिमात्रा इति मिलितानां संग्रहः। (C).

१४१। अथ त्रयोदशाक्षरचरणस्य वृत्तस्य द्विनवत्युत्तरैकशतो-त्तराष्टसहस्रं ८१९२ भेदा भवंति, तत्र द्वा[त्रयः]त्रिंशोत्तरषोडश-[शत]तमं भेदं [१६३३] मायानामकं वृत्तं लक्षयति, कणेति। जं — यत्र पूर्वं कणा दुणा — कर्णद्वयं गुरुद्वयात्मकगणयुगमिति यावत्, ततः चामर — चामरं गुरुस्ततश्च सल्ला जुअला — शल्ययुगलं शल्यो-लघुस्तद्द्वयमित्यर्थः, ततोऽपि दीहा दीहा — द्वौ दीर्घौ गुरुद्वयमिति यावत्, ततश्च गंधअ जुग्गा — गंधयुगं गंधो लघुस्तद्द्वयमित्यर्थः, अंते लघुद्वयांते पादांते वा कंता — कांतौ चामर हारा — गुरु-द्वयमित्यर्थः, एते गणा इति शेषः पअला — प्रकटिताः, तं — तां सु[सु]हकाआ — शुभकायां बाईसा मत्ता — द्वाविंशतिमात्राकां गुणजुत्ता — गुणयुक्तां माआ — मायां भणू — कथय ॥ केचित्तु शुभकायाः शुद्धशरीराः गुणजुत्ता — गुणयुक्ताः द्वाविंशतिर्मात्रास्त्र पतंतीति मात्राविशेषणतया पदद्वयं योजयंति। मात्राकथनं सुह-काआ गुणजुत्तेति च पदद्वयमत्र पादपूरणार्थमेवेति ध्येयम्। (E).

जहा, ए अत्थीरा[1] देक्खु[2] शरीरा घरु[3] जाआ
बित्ता पुत्ता सोअर[4] मित्ता[5] सबु[6] माआ ।
काहे लागी बब्बर बेलाबसि[7] मुज्झ्झे[8]
एक्का[9] कित्ती किज्जहि[10] जुत्ती जइ सुज्झ्झे[11] ॥
१४२[12] ॥ माआ[13] ।

---

१४१ । अथ [अति]जगती त्रयोदशाक्षरा ॥ कर्णेति ॥ कर्णौ द्वौ चामरः शल्ययुगलं यत्र द्वौ दीर्घौ गंधयुग्मं प्रकटं ततः । अंते कांतौ चामरहारौ शुभकार्यां द्वाविंशतिमात्रां गुणयुक्तां भण मायां ॥ कर्णो द्विगुरुः, चामरो गुरुः, शल्यो लघुः, गंधो लघुः, हारो गुरुः, मायेति छंदोनाम । (G).

१४२ । उदाहरति । एतदस्थिरं पश्य शरीरं गृहं जायां वित्तं पुत्रं सोदरं मित्रं, सर्व्वं माया । किंनिमित्तं बर्ब्बर भ्रमसि एकां कीर्त्तिं कुरु युक्त्या यदि शुध्यसि ॥ (C).

१४२ । मायामुदाहरति । ए — एतत् शरीरा — शरीरं अत्थीरा — अस्थिरं देक्खु — पश्य, घरु जाआ बित्ता पुत्ता सोअर मित्ता — गृहजायावित्तपुत्रसोदरमित्राणि एतत्सर्वं माया मिथ्या-भूतमित्यर्थः । अतः हे बब्बर — बर्बर, काहे लागी — किमर्थं

१४२। १ अत्थीरा (A). २ देक्ख (B & C). ३ घर (A), घर (B & C). ४ सोदर (F). ५ मित्त (E). ६ सबू (A). ७ वेल्लवावसि (A). ८ सुज्झे (B, C & F). ९ एका (B & C). १० किज्जिष (B), किज्जइ (C). ११ सुज्झ (B & C), सुज्झ्झे (E), सुज्झे (F). १२ १३९ (A). १३ माया (A).

ठइ आइ लहूजुअ पाअ करीजे
गुरु सल्ल[1]जुआ भगणा जुअ दीजे[2]।
पअ[3] अंतह[4] पाइ[5] गुरू[6]जुअ[7] किज्जे
सहि तारअ[8] छंदह[9]णाम[10] भणिज्जे[11] ॥ १४३[12] ।

मुझ्झे — विमुह्य बेलावसि — विलम्बयसि जइ सूझ्झे — यदि जानासि, तदा जुत्ती — युक्तां कित्ती — कीर्त्तिं किज्जहि — कुरु ॥ अतिसंसारासक्तं कुकर्म्मिणं कंचित्प्रति कस्यचिन्मित्रस्योपदेशवाक्यमेतत् । माया निवृत्ता । (E).

१४२ । यथा । एतदस्थिरं पश्य शरीरं गृहं जायां वित्तं पुत्रान् सुहृदो मित्राणि, सर्वं माया । किमर्थमेतदुद्दिश्य बर्ब्बर विलम्बयसि मुग्ध एका कीर्त्तिः क्रियतां युक्तो यदि जानासि ॥ [का]हे लागीत्युक्तार्थे देशी । (G).

१४३ । स्थापयित्वा आदौ लघुयुगं पादः क्रियते गुरुशल्य-[शल्य]युगं भगणद्वयं दीयते । पदान्ते पादे गुरुयुगं क्रियते सखि तारकं छन्दो[नाम] भण्यते ॥ (C).

१४३ । अथ त्रयोदशाक्षरचरणस्य वृत्तस्य षट्पंचाशदुत्तरसप्तदशशततमं भेदं [१७५६]•तारकनामकं वृत्तं लक्षयति, ठईति । यत्र

---

१४३ । १ सेल्ल (A, B & C). २ गुरु सेल्ल जुआ जे (A, B & C). ३ पुण (B). ४ अंतहि (A, B & C). ५ पाअ (A, B & C). ६ गुरु (A & E). ७ जुइ (B), जुआ (C). ८ तारअ (B). ९ छंदअ (A). १० णाअ (A). ११ भणीजे (A). १२ १४० (A).

अहा, णव[1] मंजरि[2] लिज्जिअ[3] चूअह[4] गाछे[5]
परिफुल्लिअ केसु णआ[6] बण आछे[7] ।
जइ एत्थि[8] दिगंतर जाइहि[9] कंता
किअ[10] बम्मह[11] णत्थि[12] कि णत्थि[12] बसंता ॥
१४४[13] ॥ तारअ[14] ।

पाअ—पादे आइ—आदौ लहु जुअ—लघुद्वयं ठइ—स्थापयित्वा गुरु सल्ल जुआ—गुरु-शल्ययुगे करीजे—क्रियेते एको गुरुः लघुद्वयं च क्रियत इत्यर्थः, ततो भअणा जुअ—भगणौ गुर्वादिगणास्तद्युगं दीजे—दीयते । पअ अंतह पाइ गुरु जुअ—पादांतःपातिगुरु-युगं किज्जे—क्रियते, सहि—हे सखि तस्स छंदह—छंदसः तारअ—तारकम् इति णाम—अभिधानं भणिज्जे—भण्यते ॥ सगणचतुष्टयोत्तरगुरुरचितचरणं तारकमिति फलितार्थः । (E).

१४३ । ठईति । स्थापयादौ लघुयुगं पादे क्रियते गुरुः शल्य-युग्मं दीयते । पादांतःपातिगुरुयुगं क्रियते सखि तारकं छंदसो-नाम भण्यते ॥ (G).

१४४ । उदाहरति । नवमञ्जरी सज्जिता चूतवृक्षे परिफुल्लिता

---

१४४ । १ ठवि (A), णवि (B & C). २ मञ्जरि (C & E). ३ किज्जिअ (A), सज्जिअ (C). ४ चूअइ (B). ५ गाच्छे (B & C). ६ केसु लआ (A, B & C), केसू णआ (E & F). ७ आच्छे (B & C). ८ एतह (A), इत्थि (B & C). ९ जाइह (B & C). १० कि (A), किणु (B & C). ११ मअह (C). १२ णत्थि (A). १३ १४१ (A). १४ तारका (A), तारक (B).

धत्रा तूर हारो[१] उणो[२] तूर हारेण
गुरू सद्द किज्जे अ एक्का तआरेण[३] ।
कईसा कला कंदु[४] जंपिज्ज णाएण
असो होइ चो[५] अग्गला सब्ब पाएण ॥ १४५[६] ॥

किंशुकलता वनकच्छे । यदि अत्र दिगन्तरं याति कांतः किं मन्मथो नास्ति किं नास्ति वसन्तः ॥ (C).

१४४ । तारकमुदाहरति, णवेति । चूअ गाछे — चूतवृक्षेण णव — नवा मंजरि — मंजरिः लिज्जिअ — गृहीता, केसू[सु] णआ बण — किंशुकनूतनवनं आछे सम्यक् यथा स्यात्तथा परिफुल्लिअ — परिपुष्पितं । जइ — यदि एत्थि — अत्र वसंतसमये इत्यर्थः कंता — कांतः दिगंतर — दिगंतरं जाइहि — यास्यति, तदा किअ — किं वम्मह — मन्मथः णत्थि — नास्ति, कि — किंवा नास्ति वसंतः ॥ कांतं देशांतरजिगमिषुं ज्ञात्वा विमनायमानां कांचिन्नायिकां [प्र]ति — यद्यस्मिन्नपि समये कान्तो गमिष्यति तदा तस्य निवारकः कामः वसंतो वा नास्ति किंतु विद्यत एवेति त्वं मा विषीदेति गूढाभिप्रायायाः कस्याश्चित् सख्या वाक्यमेतत् । तारकं निवृत्तम् । (E).

१४४ । यथा । नवा मंजरी गृहीता चूतवृक्षेण परिपुष्पितं किंशुकानां नवं वनमस्ति । यद्यत्र दिगंतरं यास्यति कांतः किं मन्मथो नास्ति किं नास्ति वसंतः ॥ (G).

१४५ । १ हारा (A, B & C). २ पुणो (A, B & C). ३ गुरू काहला कण्ण एक्केण पाएण (A), गुरू काहला कण्ण एक्को लआरेण (B & C). ४ कंदु (A), कन्द (B & C). ५ चउ (A & E), चौ (F). ६ १४२ (A).

१४५। ध्वजस्तूर्य्यं हारः पुनस्तूर्य्यं हारेण गुरुः काहलः कर्णः एकलकारेण। कवीशेन कला कन्दो जल्प्यते नागेन अशीतिर्भवति चतुरशा सर्व्वपादेन॥ केचित्तु कईसा कला एकविंशतिः कलाः अर्थात् पादे इत्यर्थमाहुः। ध्वज आदिलघुस्त्रिकलः, तूर्य्यम् आदि-गुरुत्रिकलं, हारो गुरुः, काहलो लघुः, कर्णो द्विगुरुः, लकारो-लघुः—भवन्ति मात्रा इति शेषः। (C).

१४५। अथ त्रयोदशाक्षरचरणवृत्तस्य द्व्यशीत्युत्तरषट्शता-धिकचतुःसहस्रतमं ४६८२ भेदं कंदनामकं वृत्तं लक्षयति, धआ इति। यत्र पूर्वं धआ—ध्वजो लघ्वादिस्त्रिकल इति यावत् ततः तूर—तूर्य्यं गुर्वादिस्त्रिकल इति यावत् हारो—गुरुः उणो—पुनः हारेण—गुरुणा सह तूर—तूर्य्यं गुर्वादिस्त्रिकलः पुरःस्थित-गुरुर्गुर्वादिस्त्रिकल इति यावत् अ—पुनः एक्का तआरेण—एक-तकारेण लब्धं तगणेनेति यावत् गुरू—गुरुः सद्द—शब्दो लघुः पुरस्थिततगणो गुरुर्लघुश्चेति यावत् किज्जे—क्रियते, इदं च क्रियापदं यथायथं योज्यं। यत्र च सब्ब पाएण—सर्वपादेन पाद-चतुष्टयेनेति यावत् चउ अग्गला—चतुरधिका असी—अशीतिः कला—मात्राः होइ—भवंति, तत् कईसा—कवीशेन णाएण—नागेन पिंगलेन जंपिज्ज—जल्पितं कंदु—कंदः॥ तत्कंदनामकं वृत्तमित्यर्थः। अत्र मात्राकथनं पद्यपूरणार्थमिति ध्येयं। गुरु-[लघू]त्तरयगणचतुष्टयेन कंद इति फलितार्थः। (E).

१४५। धआ इति। ध्वजस्तूर्यं हारः पुनस्तूर्यं हारेण सहेति शेषः गुरुशब्दे कुरुते एकतकारेण। कवीशेन कलाः कंदुकं जल्प्यते

देइ[1] भुअंगम अंत लहु[2] तेरह बस पमाण।
चउरासी चउ पाअ कल कंद छंदु वर जाण॥
१४६[3]॥ दोहा।

जहा, ण रे कंस जाणेहि[1] हो[2] एक[3] बाला इ[4]
मुहे[5] देवई[6] पुत्त तो बंस कालाइ[7]।
तहा गेण्ह[8] कंसो जणाणंद कंदेण
जहा हंति[9] दिठ्ठो[10] णिआ णारि बिंदेण[11]॥
१४७[12]॥ कंदः।

नागेनाशीतिर्भवति चतुरधिका सर्वपादेन॥ ध्वजो लघ्वादिस्त्रिकलस्तद्यथं गुरुलघू, शल्यो लघुः, तकारस्तगणः। (G).

१४७। न रे कंस जानीहि अहमेको बाल इति भवामि देवकीपुत्रस्त्वद्वंशकालः। तथा गृहीतः कंसो जनानन्दकन्देन यथा हेति दृष्टो निजनारीवृन्देन॥ हा इति शब्दं कलेति शेषः। (C).

१४७। कंदमुदाहरति, ण रे इति। रे कंस तो बंस कालाइ—त्वद्वंशकालः देवई पुत्त—देवकीपुत्रः एक्क—एकः अद्वितीय-इति यावत् बाला—बालकः हो—भवामि इति मुहे—मां ण आणेहि—न जानासि। इत्युक्तेति शेषः जणाणंद कंदेण—सकल-

१४६। १ देहि (B). २ लक्ष (C). ३ This śloka is found in MSS. (B & C), but not in the others.—Ed.

१४७। १ जाणेच्चो (B), जाणेक्त (C). २ हउ (A), हर (B), हो (F). ३ एक्क (A, B & C). ४ बाला (A). ५ हक (A & C), ह (B). ६ देवइ (E & F). ७ काला (A). ८ गेह (A, B & C), गण्हु (E). ९ थाकि (B), हथि (C). १० दिट्ठो (B & C). ११ इन्देण (E). १२ १४३ (A).

चामर पढमहि पाप गणो[1] धुत्र[2]
सल्ल चरण गण ठावहि[3] तं जुत्र[4] ।
सोलह[5] कलत्र पत्र पत्र[6] जाणित्र
पिंगल पभणइ[7] पंकत्र[8]बालित्र[9] ॥ १४८[10] ॥

जीवानंदहेतुना श्रीकृष्णेनेत्यर्थः तथा कंसो—कंसः गहत्र—गृहीतः यथा णित्रा णारि विंदेण—निजनारीवृंदेन हंति—हतः दिट्ठ—दृष्टः ॥ कंदो निवृत्तः । (E).

१४७। यथा। न भो कंस जानासि भवामि एको बालो-मुख्यो देवकीपुत्रस्त्वदंशकालः। तथा गृहीतः कंसो जनानंदकंदेन यथा हमिति दृष्टो निजनारीवृंदेन ॥ (G).

१४८। चामरं प्रथमं पापगणो[णं] ध्रुवं शल्यं चरणं स्थापय तद्युगं। षोडशकलाः पदे पदे ज्ञात्वा पिंगलः प्रभणति पङ्कजावलीं ॥ चामरं गुरुः, पापगणः सर्व्वलघुः पञ्चकलः, ध्रुवो निश्चितः, शल्यं लघुः, चरण आदिगुरुश्चतुष्कलस्तद्युगं तद्द्वयं स्थापयेत्यर्थः। (C).

१४८। अथ त्रयोदशाक्षरचरणस्य वृत्तस्यैकोनचत्वारिंशोत्तर-[सप्त]सहस्रतमं ७०३९ भेदं पंकावलीनामकं वृत्तं लक्षयति, चाम-रेति। पढमहि—प्रथमं चामर—चामरं गुरुं ततः धुव—[ध्रुवं]

१४८। १ गणा (E & F). २ धुव (F). ३ ठाविच (A), ठावइ (C). ४ जुव (E & F). ५ सोडह (B), सोल (E). ६ पच पच (A), पचप्पच (E & F). ७ भपणइ (B), पभणिच (E). ८ पंक (B). ९ Last half of the śloka dropt in (C). १० १४४ (A).

जहा, सो जण[1] जणमउ[2] सो[3] गुणमंतउ[4]
जे[5] कर पर उबआर[6] हसंतउ[7]।
जे[5] पुण[8] पर उअआर[9] बिरुम्भ्मउ[10]
ताक[11] जणणि कि ण थक्कउ[12] बंभउ[13] ॥ १४९[14] ॥
पंकावली।

निश्चितमिति यावत् पापगणं—पंचकलस्याष्टमं भेदं [Vide p. 22] सर्वलघ्वात्मकमिति यावत् ततः सल्ल—शल्यं लघुमित्यर्थः ततः चरण गण—चरणगणस्य आदिगुरोर्भगणस्येति यावत् जुब—युगं ठावहि—स्थापय। इदं च क्रियापदं यथायथं योज्यं। पअप्पअ—पादे पादे प्रतिचरणमित्यर्थः यत्रेति शेषः सोलह—षोडश कलअ—कलाश्च जाणिअ—ज्ञायंते, तं—तां पंकअवालिअ—पंकावलीं तत्पंकावलीनामकं वृत्तमित्यर्थः पिंगल—पिंगलः पभणइ—प्रभणति ॥ अत्र मात्राकथनं पद्यपूरणार्थमिति मंतव्यं। भगण-नगण-लघूत्तरजगणद्वय-रचितचरणा पंकावलीति निष्कृष्टोऽर्थः। (E).

१४८। चामेति। चामरं प्रथमं पापगणं ध्रुवं शल्यं चरणगणस्य

१४९। १ जम (A, B & C). २ जणमत्र (B), जणमेउ (E & F). ३ ए (A, B & C). ४ गुणमत्तह (A). ५ जो (B & C). ६ उअआर (A, B & C). ७ हसत्तह (A). ८ पुणु (A), उण (B & C). ९ उवआर (E & F). १० विरुज्भउ (C), विरुभ्भइ (E), विरुज्भइ (F). ११ ताकि (A), तासु (E), तासु (F). १२ and १३ transposed in (E & F). १२ थाकउ (A), थक्कइ (C, E & F). १३ बंधउ (B & C), बभ्भइ (E & F). १४ १४५ (A).

स्थापय युगं। षोडशकलं पदे पदे जानीहि पिंगलः प्रभणति पंकावलीकं नाम छंदः॥ चामरो गुरुः, पापगणः पंचलघुः, शल्यं लघुः, चरणो भगणः। (G).

१४८। * * * [त]तः पापगणो ध्रुवं शल्यं चरणगणं प्रापय तं युगं। षोडशकलाः पदे प्रकाशिताः पिंगलः प्रभणति पंकवाली॥ प्रथमं चामरो गुरुस्ततः पापगणः पंचलघुरूपगणः ध्रुवं निश्चयेन शल्यो लघुश्चरणगणं भगणं तं भगणं युगं प्रापय भगणद्वयं स्थापयेत्यर्थः। षोडशकलाः पदे भवन्ति। पंकवाली छंदसो नाम। (H).

१४९। उदाहरति। स जगति जायतां गुणवान् यः परोपकारं करोति सन्ततं। यः पुनः परोपकारे विरज्यते तस्य जननी किं न तिष्ठति बन्ध्या॥ तिष्ठति भवतीत्यर्थः। (C).

१४९। पंकावलीमुदाहरति, सो जणेति। सो—सः जण—जनः जणमेउ—जातः सजन्मेति यावत्, सः गुणमंतउ—गुणवान्, जे—यः हसंतउ—हसन् सन् पर उवआर—परोपकारं कर—करोति। जे—यः पुनः पर उवआर—परोपकारं विरुज्झइ—विरुणद्धि तासू—तस्य जणणि—जननी बंझइ—बंध्येव किं न थक्कइ—तिष्ठति॥ व्यर्थमेव प्रसूयते इत्यर्थः। किंचित् स्वमित्रं प्रति कस्यचिदुपदेशवाक्यमेतत्। पंकावली निवृत्ता। (E).

१४९। यथा। स जन उत्पद्यतां स गुणवानुदेतु यः करोति [परो]पकारं हसन्। यः पुनः परोपकारं विरुध्यते, तस्य जननी किं न बंध्येव तिष्ठति॥ (G).

१४९। उदाहरणमाह। सो जग इत्यादि। स जगति जन्म

कसो पइज्ज[1] पढमे[2] जअणो[3] अ बीए[4]
अंते तुरंग सगणो[5] जअ[6] जत्थ[7] पाए ।
उत्ता बसंततिलआ फणिणा[8] उकिट्ठा[9]
छेआ पठंति[10] सरसा[11] सुकइंद[12] दिट्ठा[13] ॥ १५०[14] ।

गटह्वातु यः पुण्यवान् सति सामर्थ्ये करोति परोपकारं । ये पुनः परोपकारविरतास्तेषां जनन्यः किमिति न स्थिता वंध्याः ॥ (H).

१५० । अथ चतुर्द्दशाक्षरा । तत्र वसन्ततिलकं । कसो । कर्णः स्थाप्यते प्रथमं जगणो द्वितीये तृतीये च द्वौ सगणौ जगणश्च पादे । उक्तं वसन्ततिलकं फणिना उत्कृष्टं छेकाः पठन्ति सरसाः सुकवीन्द्रदृष्टाः ॥ तुरङ्गे सगणा इति पाठे तुरङ्गोऽन्तगुरुश्चतुष्कलः । छेका विदग्धाः । (C).

१५० । अथ चतुर्द्दशाक्षरचरणस्य वृत्तस्य चतुरशीत्यधिकशतत्रयोत्तरषोडशसहस्रं भेदा भवंति, तत्रैक[त्र त्रयः]त्रिंशोत्तरन[व]शताधिकद्विसहस्रतमं भेदं [२९३३] वसंततिलकानामकं वृत्तं लक्षयति, कसविति । पढमे — प्रथमे स्थाने कसो — कर्णः गुरुद्वयात्मको-गण इति यावत् अ — च पुनः बीए — द्वितीये स्थाने जअणो —

---

१५० । १ ठविज्ज (E). २ पढमो (A). ३ जगणो (A & C). ४ ठविज्जए (A). ५ सगणा (B & C). ६ सब (A), जग (B), पब (E). ७ मच्छ (A), सत्थ (B & C). ८ फणिराउ (A). ९ दिठ्ठा (A), उकिट्ठा (B & C). १० पढन्ति (A & C). ११ परसा (F). १२ सकइंद (A). १३ दिट्ठा (B & C). १४ १४६ (A).

जगणो मध्यगुरुगणः, अंते — जगणांते तुरंग — तुरंगश्चतुर्मात्रिकः सगण इति यावत्, ततश्च सगणो — पुनः सगण एवं गुर्वंत इति यावत् । क्वचित्तु दुअम्मि सगणो इति पाठस्तत्र दु[अ]म्मि सगणो — सगणद्वयमपि गुर्वंतगणद्वयमिति यावदित्यर्थः कर्त्तव्यः, अवहट्ट-भाषायां पूर्वापरव्यत्यासे दोषाभावात् अ — च पुनः पाअ गणो — लघ्वादिर्गण इत्यर्थः जत्थ — यत्र पाए — पादे ठविज्ज — स्थाप्यत-इति यथायथं योज्यताम् । फणिणा — पिंगलेन उत्ता — उक्तां उक्किट्ठा — उत्कृष्टां सु कइंद दिट्ठा — सुतरां कवींद्रदृष्टां सरसा — प्रेमाविष्टाः छेआ — विदग्धाः वसंततिलआ — वसंततिलकां पठंति ॥ तगण-भगण-गुरुद्वयोत्तरय[ज]गणद्वय-रचितचरणा वसंततिलकेति फलितार्थः । (E).

१५० । अथ चतुर्दशाक्षरा शक्करी । कण्णो इति । कर्णः पतितः प्रथमे जगणश्च द्वितीये अंते तुरंगः सगणो यस्य यत्र पादे । उक्तां वसंततिलकां फणिनोत्कृष्टां छेकाः पठंति सरसाः सुकवींद्रदृष्टां ॥ कर्णो द्विगुरुः, तुरंगश्चतुर्मात्रिकः सगणः, यः यगणः । (G).

१५० । चतुर्दशाक्षरप्रस्तारस्य कानिचिच्छंदांसि वदति । कण्णो इत्यादि । कर्णः प्राप्तः प्रथमः जगणो द्वितीयेऽन्ते तुरङ्गसगणौ यस्य तत्र पादे । उक्ता वसन्ततिलका फणिना उत्कृष्टा छेकाः पठन्ति सरसाः सुकवीन्द्रदृष्टा ॥ कर्णो गुरुयुग्मगणः प्राप्तः प्रथमो-जगणो द्वितीये अन्ते एतदन्ते तुरगसगणौ, यद्यपि गअ रह तुरंग पाइक्क एक्क णामेण जाण चउमत्ता [Vide श्लोक ३०, p. 36.—Ed.] इत्यनेन तथाप्यत्र सगणसाहचर्यात्तुरंगः सगणः, सगणद्वयानंतरं

जहा, जे तीअ तिक्खु[1] चल चक्खु ति हाव दिठ्ठा[2]
ते काम चंद महु पंचम[3] मारणिज्जा[4]।
जेसुं उणो णिबडिदा[5] सअला वि दिठ्ठी
चिट्ठंति[6] ते तिल अलंजलि[7] दाण जोग्गा॥१५१[8]॥
वसंततिलका[9]।

यगण आदिलघुः पञ्चकलगणः, छेका विदग्धाः। चरणान्तलघुनापि वसन्ततिलका भवति। तदुक्तं छंदःपारिजाते। उक्ता वसन्ततिलका तभजा जगौ गः सिंहोन्नतेयमुदिता मुनिकाश्यपेन। अन्तस्थितेन लघुनापि विनोदभूमिरेषा भवेल्ललितबंधनिबंधनेन॥ अस्य छंदसो नानामुनिभिर्नानानामान्युक्तानि। तथा छंदःसिद्धांतभास्करे। उक्ता वसंततिलका तभजा जगौ गः सिंहोन्नतेय[मुदिता] मुनिकाश्यपेन। उद्धर्षिणीति मुनिसैतवसम्मतेयं गार्गेण सैव गदिता मधुमाधवीति॥ (H).

१५१। ये तस्यास्तीक्ष्णचलचक्षुस्त्रिभागदृष्टास्ते कामचन्द्रमधुपञ्चममारणीयाः। येषु पुनर्निपतिता सकलापि दृष्टिर्वर्त्तन्ते ते तिलजलाञ्जलिदानयोग्याः॥ तिलेत्यादिना मृता एव प्रत्याख्यन्ते। (C).

१५१। १ तिख (B), तिक्ख (C). २ तिहाव दिट्ठा (A), ति भाव दिट्ठा (B), ति हाव दिट्ठा (C). ३ Dropt in (B). ४ मारणीज्जा (A). ५ णिविडिआ (E), णिवडिआ (F). ६ वट्टंति (A, B & C). ७ जलाञ्जलि (C), जलंजली (E). ८ १४७ (A). ९ वसन्ततिलका (B & C).

संभणिअ[1] चरण गण पलिअ मुहो[2]
संठविअ पुणवि[3] दिअबर जुअलो ।
जं[4] करअल गण[5] पअ[6] पअ मुणिओ
चक्कपअ पभण[7] फणिवइ[8] भणिओ ॥ १५२[9] ॥

---

१५१ । वसंततिलकामुदाहरति । [जे—]ये लोकाः तीअ—तस्याः तिक्ख चल चक्खु ति हाव दिट्ठा—तीक्ष्णचलचक्षुस्त्रिभागदृष्टाः, ते काम चंद मऊ पंचम मारणिज्जा—कामचंद्रमधुपंचममारणीया जाता इति शेषः । जेसु—येषु उणो—पुनः तस्याः [स]अला वि दिट्ठी—सकलापि दृष्टिः णिविडिआ—निपतिता, ते तिल जलांजलि दाण जोग्गा—तिलजलांजलिदानयोग्याः चिट्ठंति—तिष्ठंति ॥ कर्पूरमंजरीनाटकस्थं कर्पूरमंजरीवर्णनपरं विदूषकं प्रति राज्ञो वाक्यमेतत् । वसंततिलका निवृत्ता । (E).

१५१ । यथा । ये तया तीक्ष्णचलचक्षुस्त्रिभागदृष्टास्ते कामचंद्रमधुपंचममारणीयाः । येषु पुनर्निपतिता सकलापि दृष्टिस्तिष्ठंति ते तिलजलांजलिदानयोग्याः ॥ (G).

१५१ । उदाहरणमाह । जे तीअ इत्यादि । ये तस्यास्तीक्ष्णचलचक्षुस्त्रिभागदृष्टास्ते कामचंद्रमधुपञ्चममारणीयाः । येषु पुन-

---

१५२ । १ संभणिअ (A), संभणिअ (B). २ पअलिअ मुहो (B). ३ पुणुवि (B & C). ४ जं (A, B & C). ५ करअ सगण (A), करअल गण (E). ६ पअ (B & C). ७ चक्क पभण (A), चक्कपअइ भणु (B & C), चक्कपअअ भणु (F). ८ फणिवइ वर (A). ९ १५८ (A).

र्न्निपतिता यकुत्रापि दृष्टिर्वर्तन्ते ते तिलजलाञ्जलिदानयोग्याः ॥ कर्पूरमञ्जरीनाटके राज्ञो वचनम् । (H).

१५२ । सम्भालय चरणगणः पतितो मुखे संस्थाप्य पुनर्द्विजवर-युगलं । तं करतलगणं पदे स्थापयित्वा ज्ञातः चक्रपदो भणतां फणिपतिभणितः ॥ चरण आदिगुरुश्चतुष्कलः, करतलगणोऽन्तगुरु-श्चतुष्कलः । (C).

१५२ । अथ चतुर्दशाचरचरणस्य वृत्तस्यैक[नवत्युत्तरैक]शताधि-काष्टसहस्रतम ८१९१ भेदं चक्रपदनामकं वृत्तं लक्षयति, संभणिअ इति । मुहो — मुखे प्रथममिति यावत् पलिअ — पतितं चरणगणं गुर्वादिभगणमित्यर्थः संभणिअ — संभण्य, पुणवि — पुनरपि दिअ-वर जुअलो — द्विजवरजुगलं चतुर्लघ्वात्मकगणद्वयमिति यावत् संठ-विअ — संस्थाप्य । जं — यत्र पअ पअ — पादे पादे प्रतिचरण-मिति यावत् करअल गण — करतलगणः गुर्वन्तः सगण इति यावत् मुणिओ — ज्ञातः, तत् फणिवइ भणिओ — फणिपतिभणितं चक्क-पअ — चक्रपद प्रभण ॥ (E).

१५२ । संभेति । संभण्य चरणगणं पतितं मुखे संस्थाप्य पुनरपि द्विजवरयुगलं । यत्र करतलगणः पदे पदे च ज्ञातः चक्रपदं भण फणिपतिभणितं ॥ चरणो गुर्वादिर्भगणः, द्विजवरश्चतुर्लघुः, करतलः सगणः । (G).

१५२ । संभणिअ इत्यादि । संभणितश्चरणगणः पतितो मुखे संस्थापय पुनरपि द्विजवरयुगलं । ततः करतलगणः पदतले ज्ञायते चक्रपदं शृणु फणिपतिभणितं ॥ चरणगणो भगणः, मुखे आदौ,

जहा, खंजण जुअल णअण वर उपमा
चारु कणअ लइ भुअजुअ सुसमा[1] ।
फुल्ल कमल मुहि गअ[2]वर गमणी
कस्स[3] सुकिअ[4] फल बिहि[5] गठु[6] तरुणी[7] ॥ १५३[8] ॥

चक्रपदम्[9] ।

पतितः सभणितः, पुनरपि द्विजवरयुगलं संस्थापय, द्विजवरश्चतु-र्लघुगणस्तयोर्युगलमष्ट लघव इत्यर्थः, ततः करतलगणः सगणः पद-तले चरणे ज्ञातः, तलशब्दः स्वरूपवाचकः, फणिपतिभणितं त्वं शृणु इत्यन्वयः । (H).

१५३ । उदाहरति । खञ्जनयुगलं नयनवरस्य उपमा चारु कनकं नीता भुजयुगस्य सुषमा । फुल्लकमलमुखी गजवरगमनी कस्य सुकृतस्य फलं धात्रा घटिता रमणी ॥ (C).

१५३ । चक्रपदमुदाहरति, खंजणेति । अत्रावहट्टभाषायां पूर्व-निपातानियमात् उपमा शब्दस्य पूर्वनिपातं कृत्वा योजनीयं, तथाच खंजनजु[यु]गलोपमनयनवरा खंजनयुगलस्य उपमा ययोः तादृशे अपि नयने ताभ्यां वरा रमणीयेत्यर्थः, चारु कणअ लइ भुअजुअ सू[सु]षमा — चारुकनकलताभुजयुगसुषमा चार्व्वी कनकलताया-इव भुजयुगस्य सुषमा यस्यास्तादृशीत्यर्थः, फुल्ल कमल मुहि —

---

१५३ । १ सूषमा (E), dropt in (F). २ Dropt in (B). ३ तुम्ह (A), तुं (B). ४ सूकिय (E). ५ विङ्ग (A). ६ गढ (F). ७ रमणी (A, B & C). ८ १४९ (A). ९ चक्रपाद (C).

कर पंच पसिद्ध[1] बिलद्ध[2] बरं रअणं[3]
पभणंति[4] मणोहर छंदबरं रअणं ।
गुरु पंच दहा लहु एरिसिअं[5] रइअं[6]
भमराबलि छंद पसिद्ध किअं ठबिअं[7] ॥ १५४[8] ॥

फुल्लकमलमुखी गअबर गमणी — गजवरगमना रमणी ललना कस्स सु[सु]किअ फल — कस्य सुकृतफलेन विधिना गठु — सृष्टा ॥ एतादृशी कांता कान्तिभाविता कस्य पुण्येन ब्रह्मणेयं निर्मितेत्यर्थः । चक्रपदं निवृत्तं । (E).

१५३ । यथा । अवहट्टभाषायां पूर्वनिपातादिनियमाभावात् यथोचिता योजना कार्या सर्वत्रेति बोध्यं । खंजनयुगलनयनवरोपमा चारुकनकलताभुजयुगसुषमा । फुल्लकमलमुखी गजवरगमना कस्य सुकृतफलेन विधिना निर्मिता तरुणी ॥ (G).

१५३ । उदाहरणमाह, खंजण इत्यादि । खंजनयुगलनयनवरोपमा चारुकनकलताभुजयुगसुषमा । फुल्लकमलमुखी गजवरगमना कस्य सुकृतफलेन विधिना निर्मिता रमणी ॥ खंजनयुगलेन नयनवरयोरुपमा यस्याः सा, चारुकनकलतावद्भुजयुगस्य परमा शोभा यस्याः सा । चतुर्दशाक्षरप्रस्तारस्य चतुरधिकाशीतिशतत्रयं षोडशसहस्रं भेदास्तेषु भेदद्वयमुक्तं, शेषभेदाः स्वयं ज्ञेयाः । (H).

---

१५४ । १ सिद्ध (F). २ तिलद्ध (A & B), सुलद्ध (C). ३ मणणं (A). ४ पभणंत (A). ५ एरिसिए (A). ६ लविअं (A), लपिअं (B & C), dropt in (E). ७ ठइअं (E). ८ १५० (A).

१५४। अथ पञ्चदशाक्षरा यथा। करपञ्चकं प्रसिद्धं सुलक्षवरं रत्नं प्रभणन्ति मनोहरच्छन्दोवरं रमणं। गुरवः पञ्च दश लघवः एतादृशं लब्धं भ्रम[रा]वलीच्छन्दः प्रसिद्धीकृतं स्थापितं॥ करोऽन्तगुरुश्चतुष्कलः। (C).

१५४। अथ पंचदशाक्षरचरणस्याष्टषष्ठ्युत्तरसप्तशताधिकद्वात्रिंश-त्सहस्रं ३२७६८ भेदा भवंति, तत्र त्रय[चतु]श्चत्वारिंशोत्तरचतुर्दश-सहस्रतमं [१४०४४] भेदं भ्रमरावलीनामकं वृत्तं लक्षयति। यत्र पसिद्ध—प्रसिद्धैः पंच—पंचभिः कर—करैः गुर्वंतसगणैरिति यावत् विलद्ध वरं — विलद्ध[क्ष]वरमतिरमणीयमिति यावत् रअणं —रचनं किअं—कृतं, गुरु पंच — पंच गुरवः दहा लहू — दश लघवः पसिद्ध — प्रसिद्धास्तत् मणोहर — मनोहरं कंदवर — छन्दः-श्रेष्ठं रअणं — रत्नं रत्नप्रायमिति यावत् रहअं — रचितं ठइअं — स्थापितं पिंगलेनेति भावः, एरिसिअं — एतादृशं भमरावलि छंद — भ्रमरावलीच्छन्दः पभणंति — प्रभणंति पण्डिता इति शेषः॥ अत्र छन्दोविशेषणं भिन्नतया लघुगुरुकथनं च पद्यपूरणार्थमिति मंतव्यं, सगणपंचक-रचितचरणा भ्रमरावलीति फलितार्थः। (E).

१५४। अथ पंचदशाक्षरातिशक्करी॥ करेति। करैः पंचभिः प्रसिद्धैरतिरमणीयरचनं प्रभणंति मनोहरं छंदोवरं रत्नं। गुरवः पंच दश लघवः ईदृशं रचितं भ्रमरावलिच्छंदः प्रसिद्धकृतं स्थापितं॥ करः सगणः। (G).

१५४। पंचदशाक्षरप्रस्तारस्य कानिचिच्छंदांसि वदति। कर पंचेत्यादि। कराः पञ्च प्रसिद्धाः, तिलार्द्धेन वरं वचनं प्रभणन्ति

जहा, तुअ देव[1] दुरित्त गणा हरणा चरणा[2]
जइ पावउ[3] चंदकलाभरणा सरणा ।
परिपूअउ[4] तेज्जिअ[5] लोभमणा[6] भवणा[7]
सुख दे मह[8] सोक[9] विणास[10] मणा समणा ॥
१५५[11] ॥ भ्रमरावली ।

मनोहरं छंदोवरं रत्नं। गुरवः पंच दश लघव एतादृशं लपितं भ्रमरावलीच्छंदः प्रसिद्धं कृत्वा स्थापितं॥ कराः सगणाः पंच प्रसिद्धास्तिलार्द्धेन अतिशीघ्रतया उत्कृष्टं वचनं यस्य छंदस उच्चारण-मित्यर्थः, भ्रमरावलीति छंदः प्रभणन्ति । (H).

१५५ । उदाहरति । तव देव दुरितगणहरणौ चरणौ यदि प्राप्येते हे चन्द्रकलाभरण शरण। तदा पूज्येते त्यक्ता लोभमनो-भ्रमणं सुखं प्रेर्य्यते लोकविनाशमनाः शमनः॥ लोभयुक्तस्य मनसो-भ्रमणं लोभमनोभ्रमणं, प्रेर्य्यतेऽवकीर्यते । (C).

१५५। भ्रमरावलीमुदाहरति, तुअ देवेति। हे चन्द्रकला-भरण देव दुरित्त गणा हरणा—दुरितगणहरणौ तुअ—तव चरणौ जइ—यदि सरणा—शरणे पावउ—प्राप्नोमि, तदो[दा]

१५५। १ तुह देह (A), तुद देव (C), तुह देव (F). २ Dropt in (E). ३ पावउ (A). ४ परिपूजउँ (A), परिपुज्जउ (C), परिपूज्जउ (F). ५ तेज्जिए (A), dropt in (B). ६ लोभमणा (B). ७ भमणा (A), dropt in (C & F). ८ सुह पेल्लेउ (A), सुख पेल्लिउ (B & C), सुख दे मह (E). ९ लोक (A & C), लो (B). १० Dropt in (B). ११ १५१ (A).

LIBR. OF T BOM BRA OF 181

कसा दिसा मत्ता अंते एक्का[१] हारा[२] माणीआ[३]
पसाराहा[४] हारा सारंगिक्का[५] छंदा जाणीआ ।[६]
तीसा मत्ता पाए पत्ता[७] भोई रात्रा जंपंता
छंदा[८] किज्जे[९] कित्ती लिज्जे[१०] सुणी मंथा[११] कंपंता ॥
१५६[१२] ॥

[लो]भमणा — लोभे मनः भवणा — भवनं च तेज्जिअ — त्यक्त्वा परिपूजउ — परिपूजयामि, हे सोक बिणास मणा — त्रिभुवनतल-वर्त्तियावज्जीवशोकनिवारणमना इत्यर्थः, हे समणा — हे शमन मह — मह्यं सुख — सुखं लच्चरणाराधनोद्भूतनित्यानंदमिति यावत् दे — देहि ॥ कस्यचिद्भक्तस्य महादेवप्रार्थनावाक्यमेतत् । भ्रमरावली निवृत्ता । (E).

१५५ । यथा । तव देव दुरितगणहरचरणौ यदि प्राप्नोमि चंद्रकलाभरण शरण । पूजयामि त्यक्त्वा लोभे मनो भवनं सुखं देहि मम शोकविनाशमनःशमन ॥ (G).

१५५ । उदाहरणमाह, तुअ देव इत्यादि । तव देव दुरित-गणहरणौ चरणौ यदि प्राप्नोमि चन्द्रकलाभरणौ शरणं । परि-पूजयामि त्यक्त्वा लोभे मनो भवनं सुखेन प्रेरयामि शोकविनाश-

१५६ । १ एक्का (C). २ हरा (B). ३ पाई (A). जाणी (B). ४ पसा-राही (F). ५ सारंगिक्का (C). ६ द्वितीयः पादः dropt in (B). ७ पाएं पाएँ (A), पत्ता dropt in (B). ८ सो छंदा (A), सोच्छन्दाबा (B & C). ९ किज्जे (A). १० Non est (B & C). ११ मत्था (A), मत्था (B & C). १२ १५२ (A).

मनसं ग्रमनं॥ हे देव तव चरणौ यदि शरणं प्राप्नोमि, तदा लोभे मनो भवनं त्यक्त्वा त्वां परिपूजयामि, सुखेन प्रेरयामि दूरे चिपामीत्यर्थः, ग्रमनं यमं, चरणौ कीदृशौ चंद्रकलाभरणौ इत्यनेन नखाश्चन्द्रकलावद्वर्णिताः । (II).

१५६ । कर्णगणाः सप्त अन्ते एको हारः पादे पादे पञ्चदश वर्णाः सारङ्गिकाच्छन्दो गीयते । त्रिंशन्मात्राः पादे युक्ताः भोगिराजो जल्पति पादाः क्रियन्ते कीर्त्तिर्गृह्यते सर्व्वेषां मस्तकं कम्प्यते ॥ एतादृशं गीयत इति भोगिराजो जल्पति, चत्वारः पादाः, तेन कीर्त्तिर्गृह्यते, सुखातिशयात् सर्व्वेषां शिरःकम्पो भवति । (C).

१५६ । अथ पंचदशाचरचरणस्य वृत्तस्य प्रथमं भेदं सारंगिकानामकं वृत्तं लचयति, कणेति । सत्ता कणा—सप्त कर्णाः गुरुद्वयात्मका गणा इति यावत् दिज्जा—दीयंते दत्ता दत्त्वा वेत्यर्थः, अंते—सप्तकर्णांते एक्का हारा—एको हारः गुरुरित्यर्थः माणीआ—मान्यते, एवंप्रकारेण यत्र पाए—पादे पण्णाराहा—पंचदश हारा—गुरवः मत्ता—मात्रास्तु तीसा—त्रिंशत् पत्ता—प्राप्ताः जाणीआ—ज्ञायंते, यत्र सूणी—श्रुत्वा मंथा—मस्तकं कंपंता—कंपते श्लाघते इति भावः, तत् सारंगिक्का छंदा—सारंगिकाच्छन्दः इति भोई राआ—भोगिराजः पिंगलः जंपंता—जल्पति, किं च एतत् छंदा—छंदः किज्जे—क्रियते कित्ती—कीर्त्तिः लिज्जे—गृह्यते ॥ अत्र मात्राकथनं चतुर्थचरणस्य पद्यपूरणार्थमिति ध्येयं, पंचदशगुरुरचितचरणा सारंगिकेति निष्कृष्टोऽर्थः । (E).

जहा, मत्ता जोहा वट्ठे[1] कोहा[2] अप्पा अप्पी[3] गव्वीआ
रोसारत्ता सव्वा गत्ता[4] सज्जा[5] भल्ला उट्ठीआ[6] ।
हत्थी[7] जूहा[8] सज्जा हूआ पाए भूमी कंपंता
लेही देही[9] छड्डो[10] ओड्डो[11] सव्वा सूरा जंपंता ॥
१५७[12] ॥ सारंगिका ।

---

१५६ । कणेति । कर्णा दीयंते सप्तांते एको हारो रमणीयः पंचदशापि हाराः सारंगिकाच्छंदो जायते । चिंशन्मात्राः पादे प्राप्ताः भोगिराजो जल्पति, छंदः क्रियते, कीर्त्तिर्गृह्यते, श्रुत्वा मस्तकं कंपते ॥ कर्णो द्विगुरुः । (G).

१५६ । कण्णा दिण्णा इत्यादि । कर्णाः सप्त दत्ता अन्ते एको-हारो ज्ञायते पंचदश हाराः सेर * * * । (H).

१५७ । उदाहरति । मत्ता योधा उत्थिताः क्रोधादात्मना गर्व्वायमाणा रोषारक्ताः सर्व्वे गत्वा शल्यं भल्लम् उत्थापयन्ति । हस्तियूथाः सज्जीभूताः पादेन भूमिं कम्पयन्ति गृहाण देहि त्यज उत्तिष्ठ सर्व्वे शूरा जल्पन्ति ॥ (C).

१५७ । सारंगिकामुदाहरति । मत्ता — उन्मत्ताः अप्पा अप्पी गव्वीआ — अहमहमिकया गर्व्विताः वट्ठे कोहा — वर्द्धितक्रोधाः

---

१५७ । १ दिठ्ठे (A), उट्टे (B), उट्टे (C). २ कोवा (C). ३ अप्पे (A). ४ गात्ता (B). ५ सेज्जा (A, B & C). ६ उच्छीआ (B & C). ७ हत्थी (A). ८ जूथा (B & C). ९ Dropt in (C). १० छड्डो (B), च्छड्डो (C). ११ ओड्डो (B), उड्डो (C). १२ १५३ (A).

चामरस्स[1] बीस[2] मत्त तीणि[3] मत्त अग्गला
अट्ठ[4] हार सत्त सार ठाइ ठाइ णिम्मला।
आइ अंत हार[5] सार[6] कामिणी मुणिज्जए[7]
अक्खरा दहाइ पंच पिंगले भणिज्जए॥ १५८[8]॥

रोसरत्ता सब्बा गत्ता — रोषारक्तसर्वगात्राः जोहा — योद्धारः जाताः, मल्ला — शल्यानि भल्लाश्च आयुधविशेषाः उट्ठीआ — उत्थिताः। हत्थी जूहा — हस्तियूथानि सज्जा — सज्जितानि हुआ — जातानि, तेषां पाए — पादैः भूमी — भूमिः कंपंता — कंपिता, लेही — गृहाण देही — दे[हि] छड्डो — त्यज ओड्डो — प्रतीच्छध्व-मिति सब्बा सूरा — सर्वे शूराः जंपंता — जल्पंति यत्र संग्रामे इति शेषः यथायथं योजनीयः॥ सारंगिका निवृत्ता। (E).

१५७। यथा। मत्ता योधा वृद्धकोपा अहमहमिकया गर्विताः रोषारक्तसर्वगात्राः शल्यानि भल्लाश्चोत्थिताः। हस्तियूथानि सज्जी-भूतानि पादैर्भूमिः कंप्यते, गृहाण देहि त्यज प्रतीच्छध्वं सर्वे शूराः जल्पंति इति यत्रेति शेषः॥ (G).

१५८। चामरस्य विंशतिर्मात्राः त्रिमात्राग्राः, अष्टौ हाराः सप्त शराः स्थाने स्थाने निर्मलाः। आदावन्ते हारः शरः कामिनि ज्ञाय-ताम् अक्षराणि दश पंच पिङ्गलेन भण्यते॥ त्रिमात्राग्रास्त्रिमात्रा-धिकाः, हारा गुरवः, शरा लघवः, आदावन्त इति यथासंख्यमिति। (C).

१५८। १ चामरस्स (A). २ वीह (A). ३ तिण्णि (A). ४ अट्ठ (B & C). ५ हाव (B & C). ६ साव (B & C). ७ मुणिज्जइ (A). ८ १५४ (A).

जहा, झत्ति जोह[1] सज्ज होइ गज्ज बज्ज तं खणा
रोस रत्त सब्ब गत्त हक्क दिज्ज[2] भीसणा ।
धाइ आइ खग्ग पाइ दाणबा चलंतआ[3]
बीर पाअ णाअराअ[4] कंप भूतलंतगा[5] ॥ १५९[6] ॥
चामरं ।

---

१५८ । अथ पंचदशाचरचरणस्य वृत्तस्यैक[स्य त्रयो]विंशत्युत्तर-नवशताधिकदशसहस्रतमं [१०९२३] भेदं चामरनामकं वृत्तं लक्षयति, चामरस्सेति । हे कामिनि ठाइ ठाइ — स्थाने स्थाने अंतरेति यावत् णिम्मला — निर्मलाः अट्ठ हार — अष्टौ हारा गुरवः सत्त सा[र] — सप्त सारा लघवः, एवंप्रकारेण दहाइ पंच — दशपंच पंचदशेत्यर्थः अक्खरा — अक्षराणि तीणि मत्त अग्गला — त्रिमात्राधिकाः बीस मत्त — विंशतिर्मात्राश्च चामरस्स — चामरस्य चामराख्यवृत्तस्येति यावत् पादे पतंतीति शेषः, आइ अंत — आद्यंतयोः पादाद्यंतयो-रित्यर्थः हारो गुरुः सारः श्रेष्ठः मुणिज्जए — मन्यते, पादादौ अंते च गुरुर्देय इति भावः, इति पिंगले भणिज्जए — पिंगलेन भण्यते ॥ अयमाशयः — प्रथमं गुरुस्तदनंतरं लघुः पुनः गुरुः पुनस्तदनंतरं लघुरेवंप्रकारेण पंचदशा[चरा]णि कर्त्तव्यानि, तथाच रगण-जगण-रगण-जगण-रगण-रचितचरणं चामरमिति फलितार्थः । (E).

१५८ । चामरेति । चामरस्य विंशतिर्मात्राः त्रिमात्राधिकाः

---

१५९ । १ जोध (C). २ दिज्जु (A). ३ चलंतओ (A, B & C). ४ राध (B), णाध (F). ५ भूतलं तओ (A, B & C). ६ १५५ (A).

हार[1] धरु[2] तिण्णि[3] सरु[4] हिट्ठि[5] परि तिग्गणा
पंच गुरु दुष्ण लहु अंत कर[6] रग्गणा ।
एत्थ[7] सहि चंदमुहि बीस लहु[8] आणआ[9]
कव्वबर[10] सप्प भण छंद णिसिपालआ ॥१६०[11]॥

अष्टौ हाराः सप्त साराः स्थाने स्थाने निर्मलाः । आदावंते हार-सारं कामिनि ज्ञायंते अक्षराणि दशपंच पिंगलेन भण्यते ॥ चाम-रेति छंदः, कामिनीति संबुद्धिः, हारो गुरुः, सारो लघुः । (G).

१५९ । उदाहरति । झटिति योधाः सज्जीभवन्ति गजो-बध्यते तत्क्षणात्, रोषरक्तं सर्व्वगात्रं घोषणा दीयते भीषणा । धावित्वागत्य खड्गपाणयो दानवास्खलन्ति वीरपदैर्नागराजः कम्पते भूस्खलति ॥ हक्कशब्द उच्चैर्घुष्टवाची देशी । (C).

१५९ । चामरमुदाहरति, झत्तीति । तं खणा — त[त्]क्षणे बज्ज — वाद्यानि डिंडिमप्रभृतीनि गज्ज — गर्ज्जंति, * * * हक्क — हक्का सिंहनादमिति यावत् दिज्ज — ददति, चलंतओ — चलंति च, वीर पाअ — वीरपादैः भूतलंतगा — भूतलांतर्गतः णाअराअ — नागराजः शेषः कंप — कंपतेऽतः हे जोह — हे योधाः झत्ति — झटिति सज्ज — सज्जिताः कृतसन्नाहा इत्यर्थः होह — भवत ॥

---

१६० । १ हार (A, B & C). २ धर (A), कर (B & C). ३ तिष (C). ४ सर (A). ५ ठप (A), एम (B & C). ६ कर (A, B & C). ७ एस (A) ८ Dropt in (A). ९ मलचा (A), मायचा (B). १० कव्वमण (A & C), dropt up to छंद inclusive in (B). ११ १५६ (A).

दैत्यसेनाजयाय प्रस्थितस्य शक्रस्य देवान् प्रति वाक्यमेतत्। चामरं निवृत्तम्। (E).

१५९। यथा। झटिति योधाः सज्जीभवत गर्जंति वाद्यानि लक्षणे रोषरक्तसर्वगात्राः हक्का दीयते भीषणा। धाविलागत्य खड्गपातैर्दानवाश्छलंति वीरपादैर्नागराजः कंपते भूतलांतर्गतः॥ हक्केति शब्दविशेषे देशी। (G).

१६०। हारः स्थाप्यतां त्रयः शराः एवंप्रकारेण त्रयो गणाः पंच गुरवः * * अन्ते क्रियतां रगणः। अत्र सखि चन्द्रमुखि विंशतिर्लघव आनीताः काव्यमनाः सर्पो भणति छन्दो निशिपालकं। पादे पञ्च गुरवः तद्द्विगुणा दश लघवः, पञ्चगुर्व्वादिकं कथं स्यादत्र उक्तं रगण इति। विंशतिर्लघव इत्यत्र लघुशब्दो-मात्रावाची, काव्ये मनो यस्य स काव्यमनाः, सर्पः पिङ्गलः। (C).

१६०। अथ पंचदशाक्षरचरणस्य [वृत्तस्य] पंचदशोत्तरनवशताधिकैकादश [पंचदशोत्तरद्वादश] [१२०१५] सहस्रतमं भेदं निशिपालनामकं वृत्तं लक्षयति, हाविति। हारु—हारः गुरुरित्यर्थः तिण्णि सरु—त्रयः शरा लघव इत्यर्थः हित्थि परि—अनया परिपाट्या तिग्गणा—त्रिगणान् धरु—स्थापय त्रीन् गुर्वादीन् पंचकलान् गणान् स्थापयेत्यर्थः, [अं]ते गणत्रयांते रग्गणा—रगणं मध्यलघुं गणमित्यर्थः करु—कुरु, एवंप्रकारेण यत्र पदे इति शेषः पंच गुरु—पंच गुरवः दुसु लहु—द्विगुणिता लघवः पंच द्विगुणिता दश लघव इति भावः बीस लहु—विंशतिर्लघवः मात्रा इति यावत् आणिआ—आनीताः आनीयंते वा, हे चंदमुहि सहि—

जहा, जुज्झ[1] भट[2] भूमि पउ[3] उट्ठि पुणु[4] लग्गिआ
सग्ग मण खग्ग हण कोइ[5] णहि भग्गिआ ।
बीस सर[6] तिक्ख कर[7] कस्स गुण अप्पिआ[8]
पत्थ तह जोलि[9] दह चाउ सह[10] कप्पिआ[11] ॥
१६१[12] ॥ णिशिपालः[13] ।

हे चन्द्रमुखि सखि एत्थ — एतत् णिसिपालआ — निशिपालकं छंदः इति कव्वबर — काव्यवरः काव्ये लोकोत्तरवर्णनानिपुणे कविकर्मणि वरः श्रेष्ठ इत्यर्थः सप्प — सर्पः पिंगलः भण — भणति ॥ अत्र पृथक्तया गुरुलघुकथनं मात्राकथनं च पद्यपूरणाय । भगण-जगण-सगण-नगण-रगण-रचितचरणं निशिपालनामकं वृत्तमिति फलितार्थ इति ध्येयं । (E).

१६० । हारिति । हारः स्थाप्यस्त्रयो लघव एवंप्रकारेण त्रिगणाः पंचगुरवो द्विगुणा लघवः अंते कुरु रगणं । एवं सखि चंद्रमुखि विंशतिर्लघवः आनीयंते काव्यवरः सर्पो भणति निशिपालकम् ॥ हारो गुरुः, विंशतिर्लघव इति अत्र लघुशब्दो मात्रावाची । (G).

१६१ । उदाहरति । युद्धे भटा भूमौ पतिताः पुनरुत्थाय लग्नाः स्वर्गमनसः खड्गेन हताः क्रोधः नहि भग्नः । विंशतिशरास्तीक्ष्णीकृताः

---

१६१ । १ जुज्झ (B & C). २ भड़ (A & C), भण (B). ३ पड़ (A, B & C). ४ पुणु उठि (A), पुणि उठि (B & C) ५ Dropt up to the end of the śloka in (B), कोहि (C). ६ सद (A). ७ फद (A), पड़ (C). ८ यप्पिआ (A & C). ९ जोलु (A), जोध (C). १० ठाव सद (A), चार सह (C), चाउ सघइं (E). ११ कंपिआ (A & C). १२ १५७ (A). १३ णिसिपाश (C).

जहि[1] आइ[2] हत्थ[3] णरेंद[4] बिण्णवि[5] दिज्जिआ[6]
गुरु एक्क काहल बेवि अंतह[7] किज्जिआ[8] ।
गुरु गाइ[9] गंध अ हार अंतहि[10] थप्पिआ
मणहंस छंद[11] पसिद्ध पिंगल जंपिआ[12] ॥ १६२[13] ॥

कर्णेन गुणे स्थापिताः, पार्थेन तथा योजयित्वा दश चापेन सह कर्त्तिताः ॥ खड्गेन कियन्तो हताः, पार्थेन अर्जुनेन योजयित्वा धनुषि शरान् कर्णस्य चापेन सह विंशतिशराः कर्त्तिता इत्यर्थः । (C).

१६१ । निशिपालमुदाहरति, जुझ्झेति । जुझ्झ — युद्धे भूमि — भूमौ पउ — पतिताः पुणु — पुनः उट्ठि — उत्थाय लग्गिआ — लग्नाः युद्धायेति भावः, सग्ग मण — स्वर्गमनसः भट — भटाः खग्ग हण — खड्गेन हं[ग्न]ति, तथापि कोइ णहि — कोऽपि नहि भग्गिआ — भग्नः । तिक्ख — तीक्ष्णः बीस — विंशतिः सर — शराः कण्ण — कर्णेन गुण अप्पिआ — गुणार्पिताः प्रत्यञ्चा[पतञ्चिका]युक्ता इति यावत् कर — कृताः तह — तथा पत्थ — पार्थेन दह — दश वाणान् इति शेषः जोलि — योजयित्वा चाउ सह — चापेन सह कप्पिआ — कर्त्तिताः, कर्णवाणा इति भावः ॥ निशिपालो निवृत्तः । (E).

१६१ । यथा । युद्धे भटा भूमौ पतिता उत्थाय पुनर्लग्नाः

१६२ । १ जहिँ (A), dropt from the beginning up to ण of णरेंद in (B), जइ (C). २ आहि (F). ३ हत्थ (A). ४ णरिंद (E). ५ विण्णिवि (F). ६ दिज्जिए (E), दिज्जए (F). ७ तक्कइ (A, B & C), अंतहि (E). ८ किज्जिए (E & F). ९ ठाइ (A, B & C). १० अंतह (A). ११ छन्द (C). १२ जप्पिआ (B). १३ १५८ (A).

स्वर्गमनसः खड्गेन घ्नंति कोऽपि नहि भग्नः । विंशतिशरास्तीक्ष्णाः कृताः कर्णेन गुणार्पिताः, पार्थेन तथा योजयित्वा दश चापेन सह कर्त्तिताः ॥ (G).

१६२ । यत्रादौ हस्तो नरेन्द्रौ द्वावपि दत्तौ गुरुरेकः काहलौ द्वौ तदन्ते कृतौ । गुरुं स्थापयित्वा गन्धहारावन्ते स्थापितौ मनोहंसच्छन्दः प्रसिद्धं पिङ्गलेन कथितं॥ हस्तोऽन्तगुरुश्चतुष्कलः, नरेन्द्रो मध्यगुरुश्चतुष्कलः, काहलो गन्धश्च लघुः, हारो गुरुः । तन्मनोहंसच्छन्दः । (C).

१६२ । अथ पंचदशाक्षरचरणस्य [अष्टा]विंशत्युत्तरषट्शताधिकैकादशसहस्रतमं [११६२८] भेदं मनोहंसनामकं वृत्तं लक्षयति, जहीति । जहि आइ हत्थ — यत्र आदौ हस्तः गुर्वंतः सगण इत्यर्थः णरिंद बिण्णवि — नरेन्द्रद्वयमपि मध्यगुरुजगणद्वयमपीत्यर्थः दिज्जिए — दीयते अंतहि — अंते जगणद्वयांते इति यावत् एक्क गुरु — एको गुरुः काहल बेवि — काहलद्वयमपि, काहलो लघुस्तद्द्वयमपीत्यर्थः, किज्जिए — क्रियते । अंतहि — अंते लघुद्वयांते इत्यर्थः गुरु गाइ — गुरुमुच्चार्य गंध अ हार — गंधः लघुश्च पुनः हारो गुरुः थप्पिआ — स्थापितः, तत् पिंगल जंपिआ — पिंगलजल्पितं पसिद्ध — प्रसिद्धं मणहंस छंद — मनोहंस[च्छन्दः] ॥ (E).

१६२ । जहीति । यत्रादौ हस्तो नरेंद्रद्वयमपि दीयते गुरुरेकः काहलौ द्वौ अंते क्रियेते । गुरुमुच्चार्य गंधश्च हारोऽंते स्थाप्यते मनोहंसच्छंदः प्रसिद्धं पिंगलजल्पितं ॥ हस्तः सगणो, नरेंद्रो जगणस्तद्द्वयं, काहलो लघुः, गंधश्च लघुः । (G).

जहा, जहि[1] फुल्ल केसु[2] असोअ चंपअ मंजुला[3]
सहआर[4] केसर गंध लुद्धउ[5] भम्मरा ।
बहु[6] दक्ख दक्खिण बाउ[7] माणह भंजणा
महुमास आविअ[8] लोअ लोअण[9] रंजणा ॥
१९३[10] ॥ मणोहंस[11] ।

१९३ । उदाहरति । सखि फुल्लानि किंशुकाशोकचम्पकानि मञ्जुला[नि] सहकारकेशरगन्धलुब्धा भ्रमराः । वहति [दक्ष]दक्षिण-वातो मानभञ्जनः मधुमास आगतो लोकलोचनरञ्जनः ॥ मञ्जु-ला[नि] सुन्दरा[णि], वञ्जुला इति पाठे श्वेतरक्तभेदात् वञ्जुला-शोकयोरुपादानं । (C).

१९३ । मनोहंसमुदाहरति, जहीति । जहि — यत्र मंजुला — [मञ्जुला]नि केसु असोअ चंपअ — किंशुकाशोकचंपकानि फुल्ल — पुष्पितानि, भम्मरा — भ्रमराः सहकारकेशरगंधलुब्धा जाता इति शेषः । माणह भंजणा — मानस्य भंजनः अतएव दक्ख — दक्षः मानिनीमानभंजने इति भावः दक्खिण बाउ — दक्षिणवातः बहु — वहति, सः लोअ लोअण रंजणा — लोकलोचनरंजनो महुमा[स] — मधुमासः वसंतसंबंधी मास इत्यर्थः आविअ — आगतः ॥ मनो-हंसो निवृत्तः । (E).

१९३ । १ सहि (B & C). २ किंसु (E). ३ वंजुला (A, B & C). ४ सह-कार (F). ५ लुद्धउ (B). ६ वह (A, B & C). ७ वाअ (B & C). ८ आइअ (A), आविआ (F). ९ लोचण (A). १० १५९ (A). ११ मनोहंस (A).

पढम रस सहित्तं[1] मालिणी णाम बुत्तं[2]
चमर[3] तिअ पसिद्धं[4] बीअ ठाणे[5] णिबद्धं[6] ।
सर गुरुजुअ गंधं[7] अंत कणा[8] सुबद्धं[9]
भणइ[10] सरस छंदं[11] चित्त मज्झे[12] णिहित्तं[13] ॥ १६४[14] ॥

१६३। यथा। यत्र फुल्लाः किंशुकाशोकचंपकवंजुलाः सहकार-केसरगंधलुब्धा भ्रमराः। वहति दक्षो दक्षिणवायुर्मानस्य भंजनो-मधुमास आगतो लोकलोचनरंजनः ॥ (G).

१६४। प्रथमं रससहितं मालिनीनाम वृत्तं चामरत्रयं प्रसिद्धं द्वितीयस्थाने निबद्धं। शरो गुरुयुगं गन्धः अन्ते कर्णेन विशुद्धं भणति सरसकाव्यं चित्तमध्ये निबद्धं ॥ रसो [?] लघुस्तत्षट्कयुक्त-मित्यर्थः, कर्णो द्विगुरुः। इयं नान्दीमुखीति भरतः। (C).

१६४। अथ पंचदशाक्षरचरणस्य वृत्तस्य द्विसप्तत्युत्तरषट्शता-धिकचतुःसहस्रतमं [४६७२] भेदं मालिनीनाम वृत्तं लक्षयति, पढमेति। यत् पढम—प्रथमं रस सहित्तं—रससहितं रसाभ्यां सहितमित्यर्थः, "भाव रस तांडवअं णारी अह कुल भामिणिअं। तिलअ अणस्स कइअरो इअ णामं पिंगलो भणइ ॥" इति पूर्वं [Vide श्लोक २०, p. 28.—Ed.] रसपदस्य त्रिलघुनामसूपात्तत्वाद्रस-

---

१६४। १ सहितं (F). २ वित्तं (B & C), इत्तं (E). ३ चर (B), चरम (E). ४ and ६ transposed in (E & F). ५ ठसे (B). ६ चित्तं (A). ७ गंधा (B & C). ८ पता (B). ९ सुसिद्धं (A), णिवद्धं (E), षिवद्धं (F). १० भणसि (B & C). ११ कव्वो (E & F). १२ संठे (A), dropt in (B), मझे (C), मज्झे (F). १३ णिवद्धं (A & C), dropt in (B). १४ १९० (A).

जहा, बहइ मलअ बाआ हंत कंपंत[1] काआ
हणइ[2] सवण[3] रंधा[4] कोइला लाव[5] बंधा ।
सुणिअ[6] दह[7] दिहासुं[8] भिंग झंकार भारा
हणिअ[9] हणइ हंजे[10] चंड[11] चंडाल मारा ॥
१६५[12] ॥ मालिनी ।

शब्दस्त्रिलघुकगणवाची, बीअ ठाणे—द्वितीयस्थाने चरमे[चमर] तिअ णिबद्धं—चमरत्रयनिबद्धं, चमरो गुरुस्तत्त्रयेण मगणेनेति यावत् निबद्धं यत्र चेति शेषः, अंत—अंते मगणांते इत्यर्थः सर—शरः लघुः गुरुजुअ—गुरुयुगं गंध—गंधो लघुः कण्ण—कर्णः द्विगुरुको गणः णिबद्धं—निबद्धः तत् चित्त मझ्झे णिहित्तं—चित्तमध्ये निहितं पसिद्धं—प्रसिद्धं मालिणी णाम वुत्तं—मालिनीनाम वृत्तं ज्ञातव्यमिति शेषः, इति सरस कव्वो—सरसकाव्यः सरसं काव्यं यस्य स तादृशः पिंगल इत्यर्थः भणइ—भणति ॥ (E).

१६४। पढमेति। प्रथमं रससहितं मालिनीनाम वृत्तं चमरत्रयनिबद्धं द्वितीयस्थाने प्रसिद्धं। शरो गुरुयुगं गंधोऽंते कर्णनिबद्धं भणति सरसकाव्यश्चित्तमध्ये निहितं॥ रसाभ्यां सहितं रसद्वययुक्तमित्यर्थः, रसो नगणः, चमरं गुरुः, शरगंधौ लघू, कर्णो द्विगुरुः ॥ (G).

१६५। १ कंपंति (A, B & C). २ लहइ (B). ३ सरस (A). ४ बंधा (A). ५ लाप (B & C). ६ सुणिअ (E). ७ दस (B & C). ८ दिहाअं (A), दिसाणं (B & C). ९ हणइ (A, B & C). १० हंते (A), हञ्ज (B). ११ हंत (A). १२ १६१ (A).

भणिअ सुपिअ[१] गण सर लहु[२] सहिओ
तह[३] दिअबर जुअ करअल[४] लहिओ।
चउ चउकल गण पअ पअ[५] मुणिओ[६]
सरह[७] सुपिअ कह[८] फणिवइ भणिओ॥ १९९[९]॥

१९५। वहति मलयवातो हन्त कम्पते कायः घ्नन्ति श्रवणरन्ध्रं कोकिलालापबन्धाः। श्रूयते दशदिक्षु भृङ्गझङ्कारभारः हन्ति हन्ति हञ्जे चण्डचण्डालमारः॥ बन्धाः प्रबन्धाः, हञ्जे इति चेटीसम्बोधनं, मारः कामः। विरहिण्युक्तिरियम्। (C).

१९५। मालिनीमुदाहरति, वहइति। हे हंजे—चेटिके मलअ बाआ—मलयवातः वहइ—[वह]ति, हंत इति खेदे, काआ—कायः कंपंत—कंपते, कोइला लाब बंधा—कोकिलालापबंधः सवण रंधा—श्रवणरंध्रं हणइ[—हं]ति। भिंग झंकार भारा—भृंगझंकारसमूहाः दह दिहासु—दशदिक्षु सुणिअ—श्रूयंते, चंड चंडाल मारा—चण्डः चण्डालमारः चण्डो महाक्रोधी चण्डाल इव चण्डालस्तद्वन्निष्ठुरः मारः कामः हणिअ—हतं मलचणं जनं हणइ—हंति॥ मलयवातादिभिर्हतां मां यदयं कामो हंति कोऽयमस्य पुरुषार्थः, मत्प्रियं हत्वा मद्वशं यदि नयति तदैनं परम-

---

१९९। १ अपिअ (A), सुपिअ (E). २ पअ गण (A), रस गण (B). ३ जह (E & F). ४ विअ करअल पअ पअ (A & B), विअ करअल पअ पअ (C). ५ तल (A). ६ सुणिओ (A). ७ सरस (B). ८ गण (A, B & C). ९ १९२ (A).

पुरुषार्थिनं मन्ये इति गूढाभिप्रायायाः कस्याश्चिद्वाक्यमेतत् । मालिनी निवृत्ता । (E).

१६५ । यथा । वहति मलयवातो हंत कंपते कायः हंति श्रवणरंध्राणि कोकिलालापबंधः । श्रूयंते दशदिक्षु भृंगझंकारभाराः हता हंति हंजे चंडः चंडालो मारः ॥ पुनः पुनर्हंतीत्यर्थः, हंजे चेटिके इति संबुद्धिः । (G).

१६६ । भणितः सुप्रियगणः सर्व्वल[घु]सहितः तत्रापि च करतलं पादे पादे लब्धं । चतुश्चतुष्कलो गणः पदतले ज्ञातः शरभः सुप्रिय ज्ञायतां फणिपतिभणितः ॥ सुप्रियो द्विलघुः, ततः पञ्च लघवः तत्रापि पञ्च लघवः, करतलमन्तलघु[गुरु]श्चतुष्कलः, सुप्रियेति सम्बोधनं । (C).

१६६ । अथ पंचदशाक्षरचरणस्य वृत्तस्य चतुरशीत्युत्तरद्वि[त्रि]-शताधिकषोडशसहस्रतमं [१६३८४] भेदं सरभनामकं वृत्तं लक्ष-यति, भणिअ इति । यत्रादौ सर लहु सहिओ — सरलघुसहितं सर — सरः एकलघ्वात्मको गणः अथच लघुत्ताभ्यां युक्तमित्यर्थः सू[सु]पिअ गण सुप्रियगणं सुप्रियो द्विलघ्वात्मको गणस्तमित्यर्थः भणिअ — भणित्वा, दिअवर जुअ [करअ]ल — द्विजवरयुग-करतलौ द्विजवरश्चतुर्लघ्वात्मको गणस्तद्युगं करतलो गुर्वंतसगणस्तावित्यर्थः लहिओ — लब्धौ, एवंप्रकारेणेति शेषः जह — यत्र चउ चउकल गण — चत्वारश्चतुःकला गणाः पअ पअ — पादे पादे प्रतिपाद-मिति यावत् मुणिओ — ज्ञाताः हे सुपिअ — सुप्रिय शिष्य तत् फणिवइ भणिओ — फणिपतिभणितं सरभ — सरभं कह — कथय

जहा, तरल कमलदल सरि जुश्र णश्रणा
सरश्र समश्र ससि सुसरिस[1] वश्रणा[2] ।
मश्र गल[3] करिवर सश्रलस गमणी
कमण सुकिश्र[4] फल बिहि[5] गठ[6] रमणी ॥
१६७[7] ॥ सरभ[8] ।

सरभनामकं तद्वृत्तमित्यर्थः ॥ अत्र पुनश्चतुष्कलचतुष्टयकथनं पद्यपूरणार्थमेव, नगणचतुष्टयोत्तरसगणरचितचरणं सरभनामकं वृत्तमिति फलितार्थ इति ध्येयम् । (E).

१६६ । भणीति । भणिता सुप्रियगणं शरलघुसहितं यत्र द्विजवरयुगं करतलसहितं । चत्वारश्चतुष्कला गणाः पदे पदे ज्ञातव्याः शरभं सुप्रिये कथय फणिपतिभणितं ॥ शरो लघुः ताभ्यां सहितं, सुप्रियो द्विलघुः, द्विजवरश्चतुर्लघुः, करतलः सगणः । (G).

१६७ । उदाहरति । तरलकमलदलसदृशनयनयुगा शरत्समयशशिसुसदृशवदना । मदकलकरिवरसालसगमना केन सुकृतफलेन विधात्रा घटिता रमणी ॥ (C).

१६७ । सरभमुदाहरति, तरलेति । तरल कमलदल सरि जुश्र णश्रणा — तरलकमलदलसदृशनयनयुगा, सरश्र समश्र ससि सू[सु]सरिसवश्रणा — शरत्समयशशिसुसदृशवदना । मश्र गल करिवर

१६७ । १ सूसरिस (E). २ विश्रणा (B). ३ गश्र (A), गण (B), कल (F). ४ सूकिश्र (E). ५ विज्ञ (A & B). ६ गडु (A, B & C). ७ १६२ (A). ८ शरभ (C).

णरेंद[1] जत्थ[2] सव्वलो सुपस्स चक्क दीसए
पइक्क[3] ठाम पंचमे पआ चऊ सबीसए[4] ।
पलंत[5] हार[6] चारु सारु[7] अंत जस्स बट्टए[8]
पसिद्ध ए णराउ[9] जंप गंध बंधु[10] अट्ठए[11] ॥ १६८[12] ॥

सअलस गमणी—मदकलकरिवरसालसगमना एतादृशी रमणी कमण सु[सु]किअ फल—केन सुकृतफलेन विहि—विधिना सृष्टेति यावत् गठ—निर्मिता ॥ सरभो निवृत्तः । (E).

१६७ । यथा । तरलकमलदलसदृशयुगनयना शरदमयशशि-सुसदृशवदना । मदकलकरिवरसालसगमना केन सुकृतफलेन विधिना निर्मिता रमणी ॥ (G).

१६८ । अथ षोडशाक्षरा । नरेन्द्रो यत्र सबलः सुपर्णश्चक्रं दृश्यते पदातिकः स्थाने पञ्चमे पदे चतुर्विंशतिः । पतनहारश्चारुः सारः अन्ते यस्य वर्त्तते * * नाराचो जल्प्यतां गन्धा बध्यन्तेऽष्टौ ॥ प्राथमिकत्वात् सबलो नरेन्द्रो जगणः, सुपर्णो रगणः, चक्रमित्यनेनाप्येतद्गणद्वयं लभ्यते, पदातिको जगणः, पादे चतुर्विंशतिर्मात्राः भवन्ति, यस्यान्ते पतनहारो दृश्यते तत्र गन्धा लघवोऽष्टौ निब-

---

१६८ । १ णरिंद (E & F). २ जच्छ (A). ३ ठइक्क (B). ४ चऊ वीसए (C), चउ सवीसए (E & F). ५ पलंति (A). ६ हाव (A & C). ७ सार (E & F). ८ वड्डए (A), वट्टए (C). ९ णराच (B), णराचु (C), णराअ (E). १० बट्ट (B), बद्ध (C), वंक (E). ११ अट्टए (B). १२ १६४ (A).

ध्यन्तेऽर्थाद्गुरवोऽष्टौ । यद्य[प्य]ष्टाचरप्रकरणे पमाणि ठूण किज्जए इत्युक्तं [Vide श्लोक १८, p 380] तथापि प्रकरणानुरोधात् तदनुवादः क्रत इति मन्तव्यम् । (C).

१६८ । अथ षोडशाचरचरणस्य वृत्तस्य षट्त्रिंशदुत्तरपंचशताधिकपंचषष्टिसहस्रं [६५५३६] भेदा भवंति, तत्र षट्चत्वारिंशोत्तरा[ष्टशता]धिकैकविंशतिसहस्रतमं [२१८४६] भेदं नाराचनामकं वृत्तं लचयति, णरिंदेति । जत्थ — यत्र सब्बलो — सबलः णरिंद — नरेंद्रः मध्यगुरुर्जगण इति यावत् सुपण्ण चक्क — सुपर्णचक्रम् अंत — अंते पादान्ते चारुः सुंदरः सारः पादपूरकत्वात् श्रेष्ठ इति हार — हारः गुरुः वट्टए — वर्त्तते, यत्र च पआ — पादे चउबीसए — चतुर्विंशतिः मात्रा इति शेषः, * * * मध्यलघुरगणश्चेति यावत् दीसए — दृश्यते पंचमे ठाम — पंचमे स्थाने पइक्क — पदातिः मध्यगुरुर्जगण इति यावत् दृश्यते इति पूर्वेणान्वयः, जस्स — यस्य अट्ठए — अष्टौ गंध — गंधा लघव इति यावत् बंक — वक्रा गुरवश्चेत्यर्थः पलंत — पतंति, पसिद्ध — प्रसिद्धः ए — एषः णराउ — नाराचः जंप — जल्पत ॥ इहाप्यत्र तत्त्वं — पंचमस्थाने पदातिर्दृश्यत इत्युक्त्या तृतीयचतुर्थस्थाने पुनरपि जगणरगणावेव देयाविति लभ्यते, अन्यथा प्रथमद्वितीयस्थाने जगणरगणयोः पंचमस्थाने पदातेरेवंदानस्योक्तत्वात् तृतीयचतुर्थस्थाने को गणो देय इत्याकांचाया अनिवृत्त्यापत्तिः, तथाच जगण-रगण-जगण-रगण-जगण-गुरुरचितचरणः नाराच इति फलितार्थः । यद्यपि अष्टोत्तर[ष्टाचर]प्रस्तारे पमाणि इत्यनेन प्रागेवैतल्लचितं, तथापि प्रकरणानुरोधात्तस्यैव पुनरनुवादः क्रत इत्यस्मा-

जहा, चलंत[1] जोह मत्त[2] कोह[3] रण[4] कम्म अग्गरा
किवाण बाण सल्ल[5] भल्ल[6] चाव[7] चक्क मुग्गरा[8] ।
पहार वार[9] धीर[10] वीर[11] वग्ग[12] मज्झ[13] पंडिआ
पअट्ठ[14] ओट्ठ[15] कंत दंत[16] तेण सेण मंडिआ[17] ॥
१६६[18] ॥ णराच[19] ।

त्तातचरणोपदेशसरणिः । अत्र मात्राकथनं पृथक्[या] गुरुलघुकथनं च पद्यपूरणार्थमिति ध्येयम् । (E).

१६८ । अथ षोडशाक्षराष्टौ ॥ णरिंदेति । नरेंद्रो यत्र सदलः सुपर्णचक्रं दृश्यते, पदातिः स्थाने पंचमे, पादे चतुर्विंशतिर्मात्रा-इत्यर्थः । प्रकटो हारस्थारः सारोऽन्ते यस्य वर्त्तते प्रसिद्धं तन्नाराचं जल्पति गंधा वक्रा अष्टौ ॥ नरेंद्रो जगणः, सुपर्णो रगणः, पदाति-र्जगणः । पंचमे स्थाने इत्युक्त्या तृतीयचतुर्थस्थाने जगणरगणावेव पुनर्द्वयौ इति सूच्यते । गंधा लघवो वक्रा गुरवः । (G).

१६९ । उदाहरति । चलन्ति योधाः शत्रून् चोभयन्तः वर्म्मकर्म्मण्युग्राः, कृपाणबाणचापशल्यभल्लमुद्गरैः । प्रहारवारिवधा रणे

---

१६६ । १ चलंति (B). २ मत्तु (A, B & C). ३ खोह (A, B & C). ४ वम्म (A, B & C). ५ सेल्ल (A, B & C). ६ भेल्ल (B & C). ७ चाप (A). ८ मुग्गरा (B). ९ धार (A), वारि (B & C). १० वार (A), मार (B), धार (C). ११ मार (A), धारि (B), धीरि (C). १२ रग्ग (A). १३ वग्ग (A, B & C), मज्झ (F). १४ पउठ्ठ (A), पओट्ठ (B), पअट्ठ (C), पदठ्ठ (F). १५ उठ्ठ (A). १६ दत्त दत्त (A), दन्त कन्त (B). १७ सुण्डिआ (B), खण्डिआ (C). १८ १६४ (A). १९ नाराच (A).

लील बिसेस[1] बिआणहु[2] मत्तह[3] बाइसही[4]
पंचउ भग्गण[5] पाअ[6] पआसिअ एरिसही ।
अंत ठिआ जहि[7] हार मुणिज्जइ हे रमणी
बावण[8] अग्गल तिण्णि सआ धुअ[9] मत्त मुणी[10] ॥ १७०[11] ॥

धीराः वर्गे वर्गे पण्डिताः प्रदष्टौष्ठं दन्तान्तेन तेन सेनाः खण्डिताः ॥ वर्गः कवचं, कृपाणादिभिः शत्रून् चोभयन्त इत्यन्वयः, बार बार इति पाठे पुनः पुनरित्यर्थः । वर्गे वर्गे सेनायां सेनायां ते शत्रवः केचिन्मुखेन खण्डिताः । (C).

१६९ । नाराचमुदाहरति, चलंतेति । किवाण बाण सल्ल भल्ल चाव चक्क मुग्गरा—कृपाणबाणशल्यभल्लचापचक्रमुद्गरैः रण कम्म अग्गरा—रणकर्मण्यग्राः दक्षा इति यावत् मत्त कोह—क्रोधमत्ताः पहार बार धीर—प्रहारवारणधीराः शत्रुकृतशस्त्रप्रहाररक्षणे कृतधैर्या इति यावत् बीर बग्ग मज्झ—वीरवर्गमध्ये पण्डिआ—पण्डिताः कृतशस्त्रविद्याध्ययना इत्यर्थः पअट्ठ ओट्ठ कंत दंत—प्रदष्टौष्ठकांतदंताः प्रदष्टः ओष्ठो यैस्तादृशाः कांताः दंता येषां ते तादृशा इत्यर्थः जोह—योद्धारः चलंति, तेन योधचलनेन सेण—सेना मण्डिआ—मण्डिता ॥ नाराचो निवृत्तः । (E).

१६९ । यथा । चलंति योधा मत्तकोपा रणकर्माधिकाः कृपाण-

---

१७० । १ लील विसेसे (B), णील सरस (E), णीलसरूअ (F). २ विआणह (E & F). ३ मत्तइ (B & C). ४ वेविसही (A), वाइसहि (B). ५ गण (C). ६ भाअ (B). ७ जह (A), जइ (C). ८ बामण (A), बाअण (B & C). ९ धुव (E & F). १० सुणी (A), कही (B & C). ११ १९९ (A).

बाणशल्यभल्लचापचक्रमुद्गरैः । प्रहारवारणधीराः वीरवर्गमध्ये पंडिताः प्रहृष्टौष्ठकांतदंतास्तेन सेना मंडिता ॥ (G).

१७० । णीले विशेषो ज्ञायतां मात्रा द्वाविंशतिः पञ्चभिर्भगणैः पादे प्रकाशितम् एतादृशं स्वरूपम् । अन्तस्थो यदि हारो जायते हे रमणि द्विपञ्चाशदग्राणि त्रीणि शतानि ध्रुवं मात्रा भण्यन्तां ॥ णीले छन्दसि, णीला इत्यन्ये, णीलाविलास इत्यन्ये । (C).

१७० । अथ षोडशाक्षरचरणवृत्तस्य सप्ताशीत्युत्तर-सप्तशताधिक-सप्तविंशति २७७८७ [अष्टाविंशति २८०८७] सहस्रतमं भेदं नील-नामकं वृत्तं लक्षयति, णीलेति । हे रमणि प्रिये जहि—यत्र येषां वा अंत—अंते हार—हारो गुरुरिति यावत् ठिआ—स्थितः मुणिज्जइ—ज्ञायते एरिसही—एतादृशैः पंचउ भग्गण—पंचभगणैरादिगुरुकैर्गणैरिति यावत् पाउ[अ] पआसिअ—पादे प्रकाशितं प्रकाशि[त]पादं वा, अवहट्टभाषायां पूर्वनिपातानियमात् बाइसही—द्वाविंशत्या मत्तह—मात्राभिः उपलक्षितं णील-सरूअ—नीलस्वरूपं नीलनामकस्य छंदसः स्वरूपमिति यावत् विआणहु—विज्ञायताम्, अत्र च बावण अग्गल—द्विपंचाशदधि-कानि तिण्णि सआ—त्रीणि शतानि मत्त—मात्राः धुअ—ध्रुवं निश्चितमित्यर्थः मुणी—ज्ञायतां ॥ इदं च चतुःछंदःकरणाभि-प्रायेणेति बोध्यं । (E).

१७० । णीलेति । नीलस्वरूपं विजानीत मात्रा द्वाविंशतिः पंच भगणाः पादे प्रकाशिताः एतादृशाः अंते स्थितो यत्र हारो-ज्ञायते हे रमणि द्विपंचाशदधिकानि त्रीणि शतानि ध्रुवं मात्राः

जहा, सज्जिअ जोह बिबट्ठिअ[1] कोह चलाउ[2] धणू[3]
पक्खर[4] बाह[5] चलू[6] रणणाह[7] फुरंत[8] तणू ।
पत्ति चलंत[9] करे धरि कुंत सुखग्गकरा
कस्म[10] णरेंद सुसज्जिअ बिंद चलंति[11] धरा ॥
१७१[12] ॥ णील ।

ज्ञायंते ॥ नीलनामच्छंदः, हारो गुरुः, मात्रोक्तिः षोडशचरणाभिप्रायेण । (G).

१७१ । उदाहरति । सज्जिता योधा विवर्द्धि[त]क्रोधाश्चालयन्तो-धनूंषि कवचवाहैश्चलितो नरनाथः स्फुरत्तनुः । पत्तयश्चलन्ति करे धृत्वा कुन्तान् सुखड्गकराः कर्णनरेन्द्रे सुसज्जितवृन्दे चलति धरा ॥ कवचयुक्ता वाहा अश्वाः कवचवाहाः, एवंक्रमेण कर्णनरेन्द्रे चलति सति । (C).

१७१ । नीलमुदाहरति, सज्जिअ इति । बिबट्ठिअ कोह—विवर्द्धितक्रोधाः धणू—धनूंषि चलाउ—चालयंतः धनुर्भ्यो वाणान् क्षिपंत इति भावः जोह—योधाः सज्जिताः कृतसन्नाहाः जाताः, फुरंत तणू—स्फुरत्तनुः रणणाह—रणनाथः सेनापतिरित्यर्थः पक्खर बाह—कवचिताश्वेन चलितः, करे पाणौ कुंतान् पाशान्

---

१७१ । १ विवढ्ढिअ (B & C). २ चलाइ (F). ३ धुणु (B). ४ पक्खर (A), पक्खरि (B & C). ५ धाव (A). ६ चल (E). ७ णरणाह (A, B & C). ८ पफुल्ल (B & C). ९ पलंत (A). १० पुष्ठ (A). ११ चलंत (E & F). १२ १६० (A).

दिज्जिए[1] सुपस्स आइ एक्क तो पओहराइ[2]
हिम्मि[3] रूअ[4] पंच चक्क सव्वलो मणोहराइ ।
अंत दिज्ज[5] गंध[6] बंधु[7] अक्खराइ सोलहाइ[8]
चंचला विणिंमिआ फणिंद एउ[9] बल्लहाइ[10] ॥ १७२[11] ॥

धरि—धृत्वा सुखग्गकरा—सत्खड्गकराः पत्ति—पत्तयः चलंत—चलिताः, एवंक्रमेण कस्स णरेंद—कर्णनरेंद्रे सुसज्जितवृंदे सति धरा पृथ्वी चलंत—चलति ॥ नीलो निवृत्तः । (E).

१७१ । यथा । सज्जिता योधा विवर्द्धितकोपास्त्रालयंतो धनूंषि पखरत्राहे चलन् रणनाथः स्फुरत्तनुः । पत्तयस्त्वलिताः करे धृत्वा कुंतान् सुखड्गकराः कर्णनरेंद्रे सुसज्जितवृंदे चलति धरा ॥ (G).

१७२ । दीयते सुपर्ण आदौ एकस्ततः पयोधरो भवति एवं रूपेण पञ्चचक्रं सकलं मनोहरम् । अन्ते दीयते गन्धो बन्धुः अक्षरैः षोडशभिश्चञ्चला विनिर्म्मिता फणीन्द्रेण वल्लभा ॥ सुपर्णो रगणः, पयोधरो जगणः, गन्धो लघुः स एव बन्धुः निर्व्वाहकलात् । (C).

१७२ । अथ षोडशाक्षरचरणस्य वृत्तस्यैकनवत्युत्तरषट्शताधिकत्रिचत्वारिंशत्सहस्रतमं ४३६९१ भेदं चंचलानामकं वृत्तं लक्षयति, दिज्जिए इति । यत्र आइ—आदौ सुपस—सुपर्णः मध्यलघुः

---

१७२ । १ दिज्जिआ (A, B & C). २ पओधराइ (B), पआहराहि (E). ३ कहेिम (A), हेम (B & C). ४ रूप (B). ५ किज्ज (A). ६ गन्ध (B), गंध (F). ७ वंध (A & B). ८ सोरहाइँ (A), सोलआइ (B & C). ९ एउ (A). १० दुल्लहाइँ (A), दुल्लभाए (B). ११ १६८ (A).

जहा[१], कस पत्थ[२] ढुक्कु[३] लुक्कु[४] सूर बाण संहरणा[५]
घाउ[६] जासु[७] तासु[८] लग्गु[९] अंधआर संहरणा[१०] ।
एत्थ[११] पत्थ[१२] सट्ठि[१३] बाण कण्ण[१४] पूरि[१५] छड्डुरणा[१६]
पेक्खि[१७] कण्ण किति धण्ण बाण सब्ब कट्टिरणा[१८] ॥
१७३[१९] ॥ चंचला[२०] ।

रगण इत्यर्थः दिज्जिए—दीयते तो—ततः एक्क—एकः पओहराइ—पयोधरः मध्यगुरुर्जगण इति यावत् दीयते इत्यनेन पूर्वेणान्वयः, हिमि रूअ—अनेन रूपेण मणोहराइ—मनोहराणि सब्बलो—सबलानि पंच चक्क—चक्राणि गणा इत्यर्थः क्रियंत-इति शेषः । अत्र चक्रशब्दो गणवाची, तथाच रगण-जगण-रगणाः अनेन रूपेण पंचगणाः कर्त्तव्या इत्यर्थः । अंत—अंते पदांते गण-पंचकांते वा बंधु—बंधुः निर्वाहकत्वात् गंधः लघुरिति यावत् दिज्ज—दीयते, यत्र च सोलहाइ अक्खराइ—षोडश अक्षराणि पादे पतंतीति शेषः, फणिंद—फणींद्रेण पिंगलेनेति यावत्

---

१७३ । १ यथा (F). २ पच्छ (A). ३ ढुक्क (A), ढुक्कु (B). ४ णक्क (B). ५ संघरण (A). ६ घाव (A). ७ जाऊ (A, B & C). ८ ताऊ (A & B), dropt in (C & F). ९ लग्ग (A & F), लागु (B & C). १० संसरण (A, B & C). ११ पच (A), एक (B). १२ पच्छ (A), पत्थि (F). १३ साढि (A & B), साठि (C), सढि (E). १४ काण (B & C). १५ पुरि (E). १६ छड्डरण (B & C). १७ पेक्ख (A). १८ कट्टरण (A), कट्ठिरण (F). १९ १९९ (A). २० पञ्चला (C).

विणिम्मिआ — विनिर्मिता वल्लहाइ — वल्लभा पिंगलस्येति भावः, एड — एषा चंचला — तच्चंचलानामकं वृत्तमित्यर्थः ॥ (E).

१७२ । दिज्जेति । दीयते सुपर्ण आदौ एकस्ततः पयोधरः एवंरूपेण पंचचक्राणि सबलानि मनोहराणि । अंते दीयते गंधो-बंधुः सुंदरः अक्षराणि षोडश चंचला विनिर्मिता फणींद्रेण वल्लभा ॥ सुपर्णो रगणः, पयोधरो जगणः, एवंरूपेण रगण-जगण-रगण-जगण-रगणा इत्यर्थः, गंधो लघुः, चंचलानामकं छंदः । (G).

१७३ । उदाहरति । कर्णपार्थाभ्यां मिलितं लुप्तं शूराणां बाणसंघैर्घाता जातास्तच्च लग्नमन्धकारसंशयेन । अथ पार्थेन षष्टि-बाणान् कर्णपूरितान् दृष्ट्वा कर्णेन कीर्त्तिधन्येन बाणाः सर्व्वे कृत्ताः ॥ लुप्तं लज्जया लग्नम्, अत्रास्मिन् एव समये * * * । (C).

१७३ । चंचलामुदाहरति । कण्ण पत्थ — कर्णपार्थौ राधेय-फाल्गुनाविति यावत् ढुक्क — युद्धार्थं मिलितौ, बाण संहएण — बाणसंघेन सूर — सूर्यः लुक्क — निलीनः, जासु — यस्य घाउ — घातः प्रहारनिपातजात इति शेषः तासु — तस्य अंधआर संहएण — अंधकारसंघेन लग्गु — लग्नं यस्य वृतं जातं सः अंधकारजालप्रविष्ट-इव जात इति भावः, एत्थ — एतस्मिन्नवसरे इत्यर्थः कण्ण पूरि — कर्णं पूरयित्वा आकर्णपर्यन्तमाकृष्येति यावत् पत्थ — पार्थेन छड्ड-एण — मुक्तान् सट्ठि बाण — षष्टिबाणान् पेक्खि — प्रेक्ष्य किन्ति धण्ण — कीर्त्तिधनेन कण्ण — कर्णेन सब्ब बाण — सर्व्वे बाणाः कट्टिएण — कर्त्तिताः ॥ चंचला निवृत्ता । (E).

१७३ । यथा । कर्णपार्थौ मिलितौ निलीनः सूर्य्यो बाणसंघ-

जो लोआणं[१] बट्टे[२] बिंबुट्टे[३] बिज्जुट्ठे[४] णास[५] ट्ठाणो[६]
सुज्जाणो[७] णाओ[८] छंदुट्ठावे[९] कस्सइ हंसट्ठाणो[१०] ।
छंदु ग्गाअंतो[११] बुत्तो[१२] कंतो[१३] सब्बे सो[१४] सम्माणीओ
बह्माणं[१५] रूअं[१६] छंदो एसो लोआणं[१७] बक्खाणीओ[१८] ॥
१७४[१९] ॥

केन घातो येषु तेषु लग्नमंधकारसंघेन ॥ अत्र पार्थेन षष्टिर्बाणाः कर्णोपरि त्यक्ताः, तान् प्रेक्ष्य कर्णेन कीर्त्तिधनेन बाणाः सर्वे कर्त्तिताः ॥ (G).

१७४ । यो लोकानां वर्त्तते विम्बोष्ठे विद्युद्यष्टिः हंसस्येव स्थानं यस्य संज्ञो नागः कर्णमूलमुत्थापयति, कर्णा अष्टौ, भारलेन युक्तं । छन्दो गायन् कान्तवृत्तं सर्व्वैः संमानितः ब्रह्मरूपकं छन्दएतल्लोकैर्व्याख्यातं ॥ विद्युन्मालेवाढ्यं यस्य तद्विद्युन्मालाढ्यं[विद्युद्यष्टिः], हंसस्थानमित्यनेन हंसवन्मन्थरगतित्वं बोध्यते । कर्णा द्विगुरुगणाः, तैरष्टाभिरिदं छन्दो लक्ष्यते, छन्द उत्थापयति संज्ञः नागः पिंगलः छन्दो गायन्, ब्रह्मणो रूपकमित्यनेन ब्रह्मरूपकं नाम छन्दो लक्षणीयं । (C).

१७४ । १ ड्डे णाणं (B). २ वट्टे (B & C). ३ विम्बुट्टे (B & C). ४ विजुद्धे (A), dropt in (B). ५ हंस (A, B & C). ६ ट्ठोणो (B & C), ट्ठाणो (E). ७ सुज्जणो (C). ८ णाओ (A & C), dropt in (B). ९ कंदुट्ठावे (A, B & C). १० सारणाणो (A & C), सावणाणो (B). ११ छंदु गावंतो (E & F). १२ and १३ transposed in (B & C). १३ Dropt in (A & F). १४ सब्बं सोउ (A), सब्बं सोस (B & C). १५ बंभाणो (A), बम्हाणो (B), बम्भाणो (C), बम्भाणं (F). १६ रूओ (A, B & C), रूपं (F). १७ लोअणं (F). १८ बक्खाणिओ (E). १९ १७० (A).

जहा,

उम्मत्ता[1] जोहा उट्ठे[2] कोहा ओत्था[3] ओत्थी[4] जुज्झंता[5]
मेणक्का रंभा णाहे[6] दंभा अप्पा अप्पी बुज्झंता[7] ।
धावंता[8] सक्का[9] छिण्णो[10] कंठा मत्था[11] पिट्ठी पेरंता[12]
णं सग्गा मग्गा जाए अग्गा लुद्धा[13] उद्धा हेरंता ॥
१७५[14] ॥ ब्रह्मरूपकं ।

१७४। अथ षोडशाक्षरचरणवृत्तस्य प्रथमं भेदं ब्रह्मरूपकनाम वृत्तं लक्षयति, जो लोआणमिति। जो — यत् लोआणं — लोकानां बिंबुट्ठे — बिंबोष्ठे बिज्जुट्ठे — विद्युत्स्थाने विद्युत्साम्यतया विद्युत्पदेन दंता लक्ष्यंते, तथाच दंतस्था[न] इत्यर्थः, णास ट्ठाणे — नासिका-स्थाने वट्टे — वर्त्तते, यच्च वुत्तो — वृत्तं छंद गअंतो — छन्दो-गायद्भिः सव्वे — सर्व्वैः संमाणीओ — संमानितं, सो — तत् कंतो — कांतं हंस ट्ठाणो — हंसस्थानं हंसस्येव स्थानं स्थितिर्गतिर्यस्य तत्ता-दृशमित्यर्थः बह्माणं रूपकं छंदो — [ब्रह्मरूपकं] छंदः कण्णट्ठे — कर्णाष्टकेन गुरुद्वयात्मकगणाष्टकेन सुज्जाणो णाओ — सुज्ञानो नागः पिंगलः उट्ठावे — उत्थापयति, एसो — तत् छंदो — छंदः

१७५। १ उम्मता (B). २ उठे (E). ३ थोच्छा (A), थोथा (F). ४ थोच्छी (A), थोत्थी (F). ५ जुभ्झंता (A & E). ६ लाहे (A), णाहे (B & C). ७ बुभ्झंता (A & E), dropt in (B). ८ भक्का (B), भक्का:का (C). ९ संठा (A). १० विण्णे (A), छिन्ने (E). ११ मच्छा (A), मत्थ (E). १२ पचंता (A). १३ लुन्धा (B), उद्धा (C). १४ १७१ (A).

लोआणं—लोकानां निकटे मथेति शेषः बक्खाणीओ—व्याख्यातम् ॥ अत्र षोडशगुरुरचितचरणं ब्रह्मरूपकनामकं वृत्तमिति फलितार्थः । (E).

१७४ । जो लो इति । यो लोकानां वर्त्तते विबोष्ठे विजुष्टे नागास्थाने सुज्ञातो नागः छंदोदर्शी कर्णाष्टकेन हंसस्थाने । छंदोगायद्भिर्वृत्तं कांतं सर्वैः तत्संमानितं ब्रह्मरूपं छंद एतत् लोकानां व्याख्यातं ॥ कर्णो द्विगुरुः, हंसस्थाने हृदि । (G).

१७५ । उदाहरति । उन्मत्ता योधा उत्थितकोपा उत्थायोत्थाय युद्धमाना मेनकारम्भानाथं दम्भादात्मानं बुध्यमानाः । धावन्तः शस्त्रच्छिन्नकण्ठा मस्तकं पृष्ठे प्रेरयन्तो नूनं स्वर्गमार्गं यातुमूर्द्धोर्द्धं पश्यंति ॥ अहं मेनकानाथः अहं रम्भानाथ इत्येवमात्मानं बुध्यमानाः छिन्नं यन्मस्तकं तत् पृष्ठे प्रेरयंतो नूनं स्वर्गमार्गं यातुमग्रे ऊर्द्धोर्द्धं पश्यन्ति इत्युत्प्रेचा । (C).

१७५ । ब्रह्मरूपकमुदाहरति, उम्मत्तेति । उठे कोहा—उत्थितक्रोधाः उम्मत्ता—उन्मत्ताः अप्पा अप्पी—आत्मानमात्मानं परस्परमित्यर्थः मेणक्का रंभा णाहं—मेनकारंभानाथं दंभा—दंभात् बुझ्झंता—बुध्यमानाः धावंता सत्था छिन्ने[स्से] कंठा—धावन्तः शस्त्रच्छिन्नकंठाः मत्था पिट्ठी पेरंता—मस्तकानि पृष्ठे पातयन्तः ओत्था ओत्थी—उत्थायोत्थाय जुझ्झंता—युध्यमानाः णं सग्गा मग्गा जाए—ननु निश्चयेनेत्यर्थः स्वर्गमार्गं गच्छंतः लुद्धा—लुब्धाः मेनकादिप्राप्त्यर्थमिति भावः जोहा—योद्धारः अग्गा—अग्रे उद्धा ऊर्द्धं हेरंता—अन्विष्यंति मेनकादिसुखमित्यर्थः ॥ (E).

पओहर मुह ट्ठिआ[1] तहअ[2] हत्थ[3] एक्को[4] दिआ
पुणोबि[5] तह[6] संठिआ[7] तहअ[8] गंध सज्जा[9] किआ[10] ।
पलंति[11] वलआ जुआ[12] बिमल सद्द हारा उणो
चउग्गलअ[13] बीसआ पुहबि णाम छंदो[14] मुणो[15] ॥
१७६[16] ॥

१७५। यथा। उन्मत्ता योधा उत्थितकोपा उत्थायोत्थाय युध्यंतो[ध्यमाना] मेनकारंभानाथदंभात् परस्परं युध्यंतः[ध्यमानाः]। धावन्तः शस्त्रच्छिन्नकंठा मस्तकानि पृष्ठे पातयंतो नूनं स्वर्गमनसो-यांतोऽग्रे लुब्धा ऊर्द्धमन्वेषयंतः ॥ (G).

१७६। अथ सप्तदशाक्षरा। पयोधरो मुखे स्थितस्तथाच हस्त-एकः स्थितः पुनरपि तथा संस्थितौ तथाच गन्धः सज्जीकृतः। पतति वलययुगं विमलशब्दहारौ पुनश्चतुरग्रविंशतिर्मात्राः पृथ्वीनाम छन्दो भणामि ॥ मुखे आदौ, ततः पतति वलययुगं पादे चतुर्विंशतिर्मात्रा भवन्ति यत्र तत्। पयोधरो जगणः, हस्तोऽन्तगुरु-चतुष्कलः, गन्धो लघुः, वलयो गुरुः। (C).

१७६। १ ट्ठिआ (B & C). २ तहवि (A). ३ हच्छ (A). ४ एक्का (E & F). ५ पुणोपि (F). ६ त (F). ७ संट्ठिआ (B), संट्ठिआ (E). ८ तहवि (B & C). ९ एक्को (A), सेज्जो (B), सज्जे (C). १० दिआ (B & C). ११ वलंत (A). १२ वलअज्जुआ (C). १३ चउक्कलअ (A), चउ-कलअ (B). १४ छंदा (B), च्छ (C). १५ भाणो (A), सुणो (B), भणो (C). १६ १७३ (A).

१७६ । अथ सप्तदशाचरचरणस्य वृत्तस्य द्विसप्तत्युत्तरैकत्रिंशत्स-हस्रोत्तरैकलचं १३१०७२ भेदा भवंति, तत्र पंचाशदधिकसप्तशता-धिकषट्[अष्ट]त्रिंशत्सहस्रतमं [३८७५०] भेदं पृथ्वीनामकं वृत्तं लच-यति, पओहरेति । यत्र मुह — मुखे आदाविति यावत् पओहर — पयोधरः मध्यगुरुर्जगण इति यावत् ठिआ — स्थितः, तहअ — तथाच एक्क — एकः हत्थ — हस्तो गुर्वंतः सगणइत्यर्थः दिआ — दत्तः, पुणोवि — पुनरपि तह संठिआ — तथा संस्थितौ पुनरपि ज[ग]ण-सगणौ कर्त्तव्यावित्यर्थः, तहअ — तथाच गंध — गंधः लघुः सज्जा किआ — सज्जीकृतः । उणो — पुनः वलआ जुआ विमल सद्द हारा — वलययुगविमलशब्दहाराः वलयो गुरुस्तद्द्वयं शब्दो-लघुः हारो गुरुरेते इत्यर्थः पलंति — पतंति, चउग्गलअ — चतुर-ग्राश्च वीसआ — विंशतिर्मात्रा इति शेषः पतंतीति पूर्वेणान्वयः, तत् पुहवि णाम छंदो — पृथ्वीनामच्छंदः मुणो — ज्ञायताम् ॥ अत्र मात्राकथनं पादपूरणार्थमेव, जगण-सगण-जगण-सगण-यगण-लघु-गुरुरचितं पृथ्वीच्छंद इति निष्कृष्टोऽर्थः । ।ऽ।, ।।ऽ, ।ऽ।, ।।ऽ, ।ऽऽ, ।ऽ. (E).

१७६ । अथ सप्तदशाचरात्यष्टौ ॥ पओ इति । पयोधरो मुखे स्थितस्तथा हस्त एको देयः पुनरपि तथा संस्थितस्ततश्च गंधः सज्जीकृतः । पतति वलययुगं विमलं शब्दहारौ पुनश्चतुरधिक-विंशतिः पृथ्वीनामच्छंदो जानीहि ॥ पयोधरो जगणः, हस्तः सगणः, पुनरपि जगण-सगणौ कार्य्यौ इत्यर्थः । गंधो लघुः, वलयो गुरुः, शब्दो लघुः, हारो गुरुः । (G).

जहा,

झणझ्झणिअ[1] णेउरं[2] रणरणंत कांची[3] गुणं

सहास मुह पंकअं अगुरु धूम[4] धूपुज्जलं ।

जलंत मणि दीविअं[5] मअण केलि लीलासरं[6]

णिसामुह[7] मणोहरं जुअइ[8] मंदिरं राजते[9] ॥ १७७[10] ॥

पृथ्वी ।

१७७ । उदाहरति । झणज्झणितनूपुरं रणरणत्काञ्चीगुणं सहासमुखपङ्कजम् अगुरुधूमधूपोज्ज्वलं । ज्वलन्मणिदीपकं मदनकेलिलीलासरः निशामुखमनोहरं युवतिमन्दिरं राजते ॥ अगुरुधूम एव धूपः, सहासं मुखपङ्कजं यत्र अतएव लीलासरः । (C).

१७७ । पृथ्वीमुदाहरति, झणझ्झणिअ इति । झणझ्झणिअ णेउरं—[झण]झणितनूपुरं झणझणेति रवं कुर्वन्नूपुराख्यं भूषणं यस्य तत्तादृशमित्यर्थः, रणरणंत कांची गुणं—अतिगंभीरशब्दायमानः काञ्चीगुणो यस्य तदित्यर्थः, सहास मुह पंकअं—सहासं मुखमेव पङ्कजं यस्य तत्तादृग्विधमित्यर्थः, अगुरु धूम धूपुज्जलं—अगुरुधूमधूपोज्ज्वलं । जलंत मणि दीवअं—ज्वलन्मणिदीपकं ज्वलद्दीप्यमानं भूषणमणिरेव दीपकं यत्र तादृशमित्यर्थः, मअण

१७७ । १ झलझणिअ (B), झणझझणिअ (C), झणझणिअ (F). २ भूषणं (A, B & C). ३ कंची (A). ४ Dropt in (B). ५ दीपअं (A), दीवअं (B & C). ६ मअण कल कीला सरं (A), मरण कोल कोसा (B), मअण कोलि कीला सरं (C). ७ Dropt in (B), णिसामुख (C). ८ जुवइ (B, C & F). ९ रेहइ (A), रेहइ (B & C). १० १७३ (A).

[The following form of versification— मालाधरनामकं वृत्तं, is not given in MS. (E).— Ed.]

पढम दिश्र बिप्पश्रा तहश्र[1] भूबई थप्पिश्रा
चरण गण तीश्रश्रो तहबि[2] भूबई दीश्रश्रो ।
चमर[3]जुश्र अग्गला बिमल गंध हारुज्जला
भणइ[4] फणि सेहरा[5] मुणहु छंद[6] मालाहरा ॥ १७८[7] ॥

केलि लीलासरं— मदनकेलिलीलासरः णिसासुह मणोहरं— संध्याप्रादुर्भावातिरमणीयमित्यर्थः, जुअइ मंदिरं — तरुणिलक्षणं मंदिरं राजते शोभते ॥ पृथ्वी निवृत्ता । (E).

१७७ । यथा । झणझणितनूपुरं रणरणत्कांचीगुणं महाममुखपंकजम् अगुरुधूमधूपोज्ज्वलं । ज्वलन्मणिदीपितं मदनकेलिलीलासरो निशासु मनोहरं युवतिमंदिरं राजते ॥ (G).

१७८ । प्रथमं दीयतां विप्रस्तथाच भूपतिः स्थाप्यतां चरणगणस्तृतीयः तथाच भूपतिर्द्दीयते । चामरयुगाग्रं विमलगन्धहारोज्ज्वलं भणति फणिशेखरो ज्ञायतां मालाधरं ॥ (C).

१७८ । पढेति ॥ प्रथमो देयो विप्रस्ततश्च भूपतिः स्थापितः चरणगणस्तृतीयस्ततश्च भूपतिर्द्दत्तः । चमरयुगाग्र्यं विमलगंध हारोज्ज्वलं भणति फणिशेखरो ज्ञायतां छंदो मालाधरां ॥ विप्रश्चतुर्लघुः, भूपतिर्जगणः, चरणो भगणः, चमरो गुरुः, गंधो लघुः, हारो गुरुः । (G).

---

१७८ । १ तहवि (B & C). २ तहब (F). ३ चरम (C & F). ४ फणइ (F). ५ सारश्चा (A). ६ मुणह छन्द (C). ७ १७५ (A).

जहा, वहइ मलआणिला विरहि चेउ संतावणा[1]
रअइ[2] पिक पंचमा विअसु केसु फुल्ला वणा ।
तरुण[3] तरु पेल्लिआ[4] मअलु[5] माहवी वल्लिआ
वितर[6] सहि णेत्तआ समअ[7] माहवा[8] पत्तआ ॥
१७९[9] ॥ मालाधरः ।

---

१७९ । उदाहरति । वहति मलयानिलो विरहिचित्तसन्तापनो वदति पिकः पञ्चमं विकम्पितः किंशुकः फुल्लं वनं । तरुणतरौ प्रेरयति मुकुलं माधवी वल्ली विस्तारय सखि नेत्रे माधवसमयः प्रेक्ष्यतां ॥ (C).

१७९ । यथा । वहति मलयानिलो विरहिचेतःसंतापनो रवीति पिकः पंचमं विकसितं किंशुकपुष्पवनं ॥ तरुणतरुपल्लवा मुकुलिता माधवी वल्लिका विस्तारय सखि नेत्रे समयमाधवः प्राप्तः ॥ (G).

[शिखरिणी and मन्दाक्रान्ता are mentioned in MS. (H); but as they are not found in any of the others, they have been here left out.—Ed.]

---

१७९ । १ संतापणा (F). २ रणइ (B & C), रवइ (F). ३ तरण (F). ४ पल्लवा (A). ५ मउलु (A), मउल (F). ६ वित्थर (F). ७ समर (C). ८ माहवा (F). ९ १७५ (A).

कुंतीपुत्ता तिखा दिखउ[1] मंथा संठवि[2] एक्का पाए
एक्का हारा[3] दुज्जे[4] कंकणु[5] गंधा संठवि जुग्गाखाए[6] ।
चारी हारा[7] भव्वा कारउ[8] पाश्रा अंतहि सज्जीश्राए[9]
सप्पा राश्रा सुद्धा[10] काश्रउ जंपे[11] पिंगल[12] मंजीरा ए[13] ॥
१८०[14] ॥

१८० । अथाष्टादशाचरा यथा । कुन्तीपुत्रास्त्रयो दत्ता मस्तके संस्थाप्यतामेकः पादः हारहस्तौ द्वे कङ्कणे * * ते युगलं। चत्वारो-हारा भव्याकाराः पादान्ते सज्जा आगताः सर्पराजः शुद्धाकारो-जल्पति पिङ्गलो भणति * * ॥ कुन्तीपुत्रः कर्णस्तेन द्विगुरुगणः, मस्तके आदौ, हस्तोऽन्तगुरुश्चतुष्कलः, कङ्कणं गुरुर्गन्धो लघुर्हारो-गुरुः । (C).

१८० । अथाष्टादशाचरचरणस्य वृत्तस्य चतुश्चत्वारिंशोत्तरैक-शताधिकद्विषष्टिसहस्रोत्तरलचद्वयं २६२१४४ भेदा भवन्ति, तत्र द्वि[त्रि]सप्तत्युत्तरषट्शताधिकद्वादशसहस्रतमं[१२६७३] भेदं मञ्जीर-नामकं वृत्तं लचयति, कुंतीपुत्तेति । यत्र मंथा — मस्तके प्रथम-

१८० । १ दिसइ (A), दिखा (B). २ संठइ (A). ३ हारा चच्चा (A), हारा हत्था (B & C), रजा हारा (E). ४ दिज्जे (A). ५ कखा (A). ६ जुग्गा पाए (A), जुग्गा जाए (B & C), जुग्ग लाए (E). ७ हारउ (A). ८ भावा कारउ (E). ९ संठीश्राए (A), सज्जीपाए (B & C), सजीश्राए (E). १० सुद्ध (B). ११ जम्पे (B). १२ पिंगलु (C). १३ मंजरीए (A & F). १४ १७६ (A).

मिति यावत् तिणा — त्रीन् कुंतीपुत्रान् गुरुद्वयात्मकान् गणा-
निति यावत् दिखउ — दत्त्वा एका — एकः पाए — पादः गुर्वादि-
भगणमि[इ]त्यर्थः संठवि — संस्थाप्यते, ततश्च एका हारा — एको-
हारः गुरुः कंकण दुज्जे — कंकणद्वयं गुरुद्वयमिति यावत्, अवहट्ट-
भाषायां पूर्वव्यत्यासदोषाभावात् दुज्जे इत्यस्य व्यत्यासे अपि न
दोषः, गंधा — गंधस्य लघोरित्यर्थः जुगलाए — जुगलं संठवि —
संस्थाप्यते। पाआ अंते [— पादांते] भव्वा कारउ — भव्याकाराः
चारी हारा — चत्वारो हारा गुरवः सज्जीआए — सज्जिताः, ए —
एतत् मंजीरा — मंजीरनामकं वृत्तमिति यावत्, इति सुद्धा
काअउ — शुद्धकायः शुद्धो निष्कलंकः कायो यस्य स तादृश इत्यर्थः
सप्पा राआ — सर्पराजः पिंगलः जंप — जल्पति॥ (E).

१८०। अथाष्टादशाक्षरा धृतिः॥ कुंतीति। कुंतीपुत्रास्त्रयो-
दत्ता मंथे संस्थाप्यते एकः पादः एको हारो द्विकंकणं गंधयोः
संस्थाप्य युगलं॥ चत्वारो हारा भव्याकाराः पादांते सज्जिताः
सर्पराजः शुद्धकायो जल्पति पिंगलो मंजीरं॥ कुंतीति द्विगुरुः,
मंथे आदौ, पादो भगणः, हारो गुरुः, कंकणं गुरुः, गंधो लघुः। (G).

१८०। अष्टादशाक्षरप्रस्तारे कानिचिच्छन्दांस्याह। कुंतीपुत्ता
इत्यादि। कुन्तीपुत्रान् त्रीन् दत्तान् मस्तके संस्थाप्य, एकः पादे
हारः हस्तो द्विगुणः कंकणः, गन्धं संस्थापय युगं। तत्र चत्वारो-
हारा भव्याकाराः पादांते सज्जीभूताः सर्पराजः शुद्धकायो-
जल्पति पिंगलो मंजीरां॥ यत्र पादे मस्तके आदौ कुन्तीपुत्रान्
कर्णगणान् गुरुयुग्मगणान् त्रीन् संस्थाप्य हारो गुरुर्हस्तः सगणः

जहा, गज्जे मेहा णीला कारउ[1] सद्दे मोरउ[2] उच्चा[3] रावा
ठामा[4] ठामा बिज्जू रेहउ[5] पिंगा देहउ किज्जे[6] हारा ।
फुल्ला णीवा पीवे[7] भम्मरु[8] दक्खा मारुअ[9] बीअंताए
हंहो[10] हंजे काहा[11] किज्जउ[12] आओ[13] पाउस[14] कीलं-
ताए[15] ॥ १८१[16] ॥ मंजीरा ।

कंकणो द्विगुणः कंकणो गुरुस्तेन गुरुद्वयं देयं, गंधयुगं लघुद्वयं संस्थाप्य चत्वारो हारा गुरवः सज्जीभूताः पादान्ते स्थिताः, पिंगलस्तत् छंदो मंजीरां जल्पति। अत्र नवसु नवसु वर्णेषु यतिः। उक्तं छंदःपारिजाते। मौ द्वावादौ संपन्नावथ भो मः सोऽप्यथ मः स्यादन्ते, प्राग्विश्रामं रन्ध्रे धारय भूयो रन्ध्र द्वंद्वं भाषन्तः [?]। मंजीरां तां नागेशाः [?] सम्यगबन्धमुदाराकारां, भावा वेदे [?] तद्भावय मुंचत्स्वादुसुधाधारां [?] ॥ (H).

१८१। उदाहरति। गर्ज्जन्ति मेघा नीलाकाराः शब्दायन्ते मयूराः उच्चारावाः, स्थाने स्थाने विद्युद्राजते पिङ्गलदेहे[हा] क्रियते हारः। फुल्लेषु नीपेषु भ्रमराः पिबन्ति दक्षो मारुतो वीजयति, हंहो हञ्ज किं क्रियताम् आगता प्रावृट् क्रीडन्ती॥ क्रियते

१८१। १ काअउ (A). २ मोरा (A, E & F). ३ चा (B), उचा (E). ४ थामा (A). ५ रेहा (A), रेहइ (E & F). ६ किज्जउ (A), कीज्जे (E). ७ भम्मे (A), पिव्वे (B & C). ८ भामरु (A). ९ मारुउ (B). १० हो (B). ११ काहे (A, B & C). १२ किज्जइ (B). १३ आआ (A), आक (B & C). १४ पाउस (E). १५ कीअन्ताए (A). १६ १०७ (A).

ज्ञायते, दच्चो मानभञ्जने दक्षिण इत्यर्थः, हंहो औत्सुक्ये, हञ्ज-इति चेटीसम्बोधनं। (C).

१८१। मंजीरमुदाहरति। [णीला कारउ—] नीलाकाराः मेहा—मेघाः गज्जे—गर्जंति उच्चा रावा—उच्चस्वराः मोरउ—मयूराः सद्दे—शब्दायंते, ठामा ठामा—स्थाने स्थाने पिंगा देहउ—पिंगदेहा पीतवर्णेति यावत् बिज्जू—विद्युत् रेहइ—राजते हाराश्च किज्जे—क्रियंते मेघैरिति भावः। फुल्ला णीवा—पुष्पितान् नीपान् कदंबपुष्पाणि भम्मरु—भ्रमराः पीबे—पिबंति, दक्खा—दक्षः मानिनीमानभंजने इति भावः मारुअ—मारुतः बीअंताए—वीजयति, हंहो हंजे—चेटिके काहा किज्जउ—किं क्रियतां किं विधीयतामिति यावत्, कीलंताए—क्रीडंती पाउस—प्रावृट् आओ—आगता॥ मानं त्यक्त्वा कांतमुपगच्छेति चेटी-मुखान्निष्कासयितुं कस्याश्चिन्मानिन्याः प्रावृडागमनात् किं विधी-यतामिति चेटीं प्रति वाक्यं। मंजीरो निवृत्तः। (E).

१८१। यथा। गर्जंति मेघाः नीलाकाराः, शब्दायंते मयूरा-उच्चारावाः, स्थाने स्थाने विद्युद्रेजते पिंगदेहा क्रियते हारः। फुल्लान्नीपान् पिबंति भ्रमरा दच्चो मारुतो वीजयति, हंहो हंजे किं क्रियताम् आगता प्रावृट् क्रीडंती॥ (G).

१८१। उदाहरणमाह, गज्जे मेहा इत्यादि। गर्ज्जन्ति मेघा नीलाकारा मयूराः शब्दायन्ते उच्चारावं केकामित्यर्थः, स्थाने स्थाने राजते पिंगा विद्युद्देहे कृता हारा इवाहार्य्या मेघैरिति बोद्धव्यं। नीपाः कदम्बाः फुल्ला अर्थात् मधु पिबंतो भ्रमरा दृष्टाः

जइ इंदासणा एक्क गणा[1] सुहावेहि[2] पाएहि पाए
ज[3] वणा[4] दहा अट्ठ[5] सोहे सुदंडा[6] सुठाए[7] सुठाए[8] ।
दहा तिणि गुणा जहा[9] सव्वला[10] होइ[11] मत्ता सुपाए[12]
फणिंदा भणंता किलाचक्क[13] छंदो[14] णिवड्डाइ जाए ॥
१८२[15] ॥

मारुतो वाति, हंजे मया किं कर्त्तव्यम् आगता [प्रावृट्] कान्तो-नागतः ॥ (H).

१८२। यत्रेन्द्रासननामैकगणः सुखयति पदे पदे तद्वर्णैरष्टा-दशभिः शोभते दण्डः स्थाने स्थाने। दश त्रिगुणीकृता यथा सवला-भवन्ति मात्रासु पादे फणीन्द्रो जल्पति क्रीडाच्छन्दो * * जायते ॥ एक इति गणान्तरव्यवच्छेदाय, स्थाने स्थाने दण्डो लघुः समीचीने स्थाने स्थाने शोभत इत्यनुषज्यते । दश त्रिगुणितास्त्रिंशन्मात्राः, सवलाः समञ्जसाः । (C).

१८२। अथाष्टादशाचरचरणस्य वृत्तस्यैक[स्य] पञ्चाशदुत्तरशत-त्रयमा[चतुःशता]धिकसप्तत्रिंशत्सहस्रतमं भेदं [३७४५०] क्रीडाचक्र-नामकं वृत्तं लचयति, ज इंदासणेति। ज इंदासणा—यत्र इंद्रा-

---

१८१। १ गन्धा (C). २ सुहावेइ (A), सुवेहि (B), सुहावेइ (E). ३ ण (A, B & C). ४ रण्डा (B & C). ५ अट्ठ (B & C). ६ दंदत्ता (A), दंदण्डा (B & C), सुदंडा (E). ७ Dropt in (A & E). ८ सुठ्ठाए (A), सुठाए (E). ९ जहिँ (A). १० संठवा (E & F). ११ होंति (E), होत्ति (F). १२ सुठाए (E). १३ विलाचक्क (F). १४ कंदा (E), चंदा (F). १५ १७८ (A).

सनं लघ्वादिर्यगण इति यावत् तदग्रे एवकारः पूरणीयस्तथा- चेंद्रासनमेवेत्यर्थः एक्क—एकः नान्यगणमिलित इति यावत् गणा —गणः पाएहि पाए—पादे पादे सू[सु]हावेइ—शोभते यत्र पादे यगणातिरिक्तो गणः न पततीत्यर्थः, सुदंडा—सु शोभना- दंडा लघवो ज[य]गणादिभूता इति भावः येषु तादृशा इत्यर्थः दहा अट्ठ—अष्टादश वण्णा—वर्णा यत्र सूखए सूठाए—सुस्थाने णिबद्धाइ—निबद्धाः सोहे—शोभंते, जहा—यत्र दहा तिण्णि गुणा—दश त्रिगुणिताः त्रिंशदिति यावत् मत्ता—मात्राः सुपाए —सुपादे संठआ—संस्थिताः होंति—भवंति, तत् किलाचक्क छंदा—क्रीडाचक्रं छंदः जाए—जायते इति फणिंदा—फणींद्रः पिंगलः भणंता—भणति॥ यगणषड्रचितचरणं क्रीडाचक्रमिति फलितार्थः। (E).

१८२। ज इति। यत्र इंद्रासनमेको गणः शोभते पादे पादे, यत्र वर्णा दशाष्टौ शोभंते सुदंडाः सुस्थाने सुस्थाने। दश त्रिगु- णिता यत्र संस्थिता भवंति मात्राः सुपादे, फणींद्रो भणति क्रीडा- चक्रं छंदो निबद्धं जातं॥ इंद्रासनं यगणः, सुष्ठु शोभनाः, दंडाः लघवः। यगणेनैव सर्वे वर्णाः कार्या इत्यर्थः। (G).

१८२। ज इंदासणा इत्यादि। यत्र इन्द्रासनमेको गणः सुखयति पादे पादे, तत्र वर्णा दशाष्ट शोभन्ते दण्डाः स्वस्थाने **। दश त्रिगुणाः यत्र सर्वा मात्रा भवंति मात्रासु पादे, फणीन्द्रो भणति क्रीडाचक्रं छन्दो निर्भ्रान्तं जातं॥ इन्द्रासनमिति आदिलघोः पञ्चकलस्य नाम यगण इत्यर्थः, तत्र वर्णा दश अष्ट वर्णानामष्टादश-

जहा,

जहा[1] भूत[2] वेताल[3] णच्चंत गावंत[4] खाए कबंधा
सिआ[5] फार[6] फेक्कार हक्का[7] रवंता[8] फुले कण्ण रंधा[9] ।
कआ टुट्ट फुट्टेइ मंथा[10] कबंधा णच्चंता हसंता[11]
तहा बीर हम्मीर[12] संगाम मज्झे[13] तुलंता जुअंता[14] ॥
१८३[15] ॥ क्रीडाचक्रं[16] ।

संख्या तेन षड्यगणा इत्यर्थः शोभन्ते दीयन्ते। दण्डा लघवः स्वस्थाने स्वस्थाने यत्र दश त्रिगुणाः सकला मात्रा भवंति त्रिंशन्मात्राः पादे इत्यर्थः। एतच्छंदो वीररसे योग्यम्। उक्तं छंदःपारिजाते, यकारैर्यदा संनिविष्टैरसैराहृतस्तारबन्धं, तदा क्रीडचक्रं भुजंगाधिराजोऽवदत् सत्यसंधः। इदं वीरसंभावकाव्यानुबन्धे मनोज्ञप्रबंधं, कवीनां यशो निर्मलं संविधत्ते त्रिलोकीनिबद्धं ॥ (H).

१८३। उदाहरति। यथा भूतवेताला नृत्यन्ति गायन्ति खादन्ति कबन्धान्, शिवास्फारफेत्कारशब्दाः स्फोटयन्ति कर्णरन्ध्राणि। कायस्त्रुट्यति स्फुरति मस्तकं कबन्धा नृत्यन्ति हसन्ति, वीरहम्मीरः संग्राममध्ये तुलयन् ज्वलति ॥ कबन्धाः प्रेतशरीराणि, हक्कशब्द उच्चैःशब्दो देशी, तुलयन् सम्पादयन्। (C).

१८३। १ जहो (A). २ भूस (F). ३ वेषाल (B). ४ गावन्त (B). ५ सिवा (A). ६ फेर (A), फाद (B & C). ७ हम्मा (C). ८ वलंता (A), वलन्ता (B & C). ९ वंधा (A). १० मत्ता (A), मत्था (B & C). ११ Dropt in (E). १२ हम्मीर (B & C). १३ मझ्झे (E & F). १४ बुलंता (A), जुझंता (E), जुज्झंता (F). १५ १७९ (A). १६ क्रीडाचन्द्रः (B & C).

आइ रग्गण हत्थ[1] काहल ताल दिज्जहु[2] मज्झआ[3]
सद्द हार पलंत बिसबि[4] सब्ब लोअहि[5] बुज्झिआ[6] ।
बेबि[7] काहल हार पूरहु संख कंकण सोहणा
णाअ राअ भणंत सुंदरि चच्चरी मण[8]मोहणा ॥ १८४[9] ॥

---

१८३ । क्रीडाचक्रमुदाहरति, जहा इति । जहा — यत्र कबंधा — कबन्धान् खाए — भक्षयित्वा भूत बेताल — भूता वेतालाः णच्चंत गावंत — नृत्यंति गायंति, सिआ फार फेक्कार हक्का रवंता — शिवाः स्फारफेत्कारहक्का रुवत्यः कण्ण रंधा फुले — कर्णरंध्रं स्फुटंति । कआ टुट्ट — कायस्त्रुटति, मंथा — मस्तकं फुट्टेइ — स्फुटति, कबंधा णच्चंता हसंता — [कबंधाः] नृत्यंति हसंति, तहा — तत्र संगाम मज्झे — संग्राममध्ये वीर-हम्मीरः तुलंता त्वरितः सन् जुझंता — युध्यते ॥ क्रीडाचक्रं निवृत्तं । (E).

१८३ । यथा । यथा भूतवेताला नृत्यंतो गायंति खादयित्वा कबंधान् शिवाः स्फारफेत्कारहक्का रुवत्यः स्फुटंति कर्णरंध्रं । कायस्त्रुटति, मस्तकं * * कबंधा नृत्यंतो हसंति, तथा वीरः हम्मीरः संग्राममध्ये त्वरितं युध्यति[ते] ॥ (G).

१८३ । उदाह[र]णमाह, जहा भूत इत्यादि । यत्र भूताः वेताला नृत्यंति गायंति खादन्ति कबंधान्, शिवानां स्फाराः

---

१८४ । १ हत्थ (A). २ दिज्जउ (B & C), दिज्जह (E). ३ मझ्झआ (E), मज्जआ (F). ४ पुसवि (B & C). ५ लोअअ (B), लोअवि (C). ६ बुझ्झआ (E), बुज्झिआ (F). ७ देवि (E). ८ मण (E & F). ९ १८० (A).

फेत्कारा अनुकरणैरुक्ताः शब्दाः वलन्ति प्रसरन्ति स्फुटंति कर्ण-रन्ध्राणि। कृत्ता भग्नच्छिन्नमस्तकाः कबन्धाः शिरोरहिता वीरा-नृत्यंति हसन्ति, तत्र वीरहंवीरः संग्राममध्ये ज्वलन् मिलंत इति विपक्षसंमुखीभूय युद्धं करोतीत्यर्थः॥ (H).

१८४। आदौ रगणः हस्तः काहलं तालः दीयतां मध्ये शब्दः हारः पतति पुनरपि शब्दः हारः द्वयमपि सर्व्वलोकैर्बुध्यते। द्वे अपि काहले हारं पूरयन् शङ्खकङ्कणाभ्यां शोभना नागराजो-भणति चर्चरी मनोहारिणी॥ द्वयमपि शब्दहारौ वारद्वयमित्यर्थः, एवं चर्चरीति योज्यम्। (C).

१८४। अथाष्टादशाक्षरचरणस्य वृत्तस्यैकोनविंशत्युत्तरत्रिनवति-सहस्र [९३०१९] तमं भेदं चर्चरीनामकं वृत्तं लक्षयति, आईति। आइ—आदौ रगण—[रग]णो मध्यलघुर्गण इत्यर्थः *** ताल—तालो गुर्वादिस्त्रिकल इति यावत् दिज्जइ—दीयतां मज्झआ—मध्ये एतदनंतरमित्यर्थः सद्द हार—शब्दहारयोः लघुगुर्व्वोरिति यावत् बिण्णि—द्वयमपि पलंत—पतति शब्दहारौ वारद्वयं [प]ततः, बेबि काहल—द्वावपि काहलौ लघू हार—हारं गुरु-मित्यर्थः पूरउ—पूरय ततश्च सोहणा—शोभने संख कंकण—शंखकंकणे लघुगण[गुरू] इति यावत् पूरयेति पूर्वेणान्वयः, हे सुंदरि सब्ब लोअहि बुज्झआ—सर्वलोकैर्बुद्धां मोहणा—मोहिनीं चित्तस्येति भावः चर्चरीं भण—कथय इति णाअ राअ—नाग-राजः पिंगलः भणंत—भणति॥ रगण-सगण-जगणद्वय-भगण-[रगण]रचितचरणा चर्चरीति फलितार्थः। (E).

जहा,

पाअ[1] णेउर झंझणक्कइ[2] हंस सद्द सुसोहणा[3]
थूर[4] थोर थणग्ग णच्चइ मोत्तिदाम[5] मणोहरा ।
वाम दाहिण[6] धारि[7] धावइ तिक्ख चक्खु कडक्खआ[8]
काहु[9] णाअर[10] गेह मंडणि[11] एहु[12] सुंदरि पेक्खिआ[13] ॥
१८५[14] ॥ चर्चरी[15] ।

१८४ । आईति । आदौ रगणो हस्तः काहलः तालो दीयते मध्ये शब्दहारौ पततो द्वयमपि सर्वलोकैर्बुद्धं । द्वावपि काहलौ हारं पूरय शंखकंकणं शोभनं नागराजो भणति सुंदरि चर्चरीं भण मोहिनीं ॥ हस्तः सगणः, काहलो लघुः, तालो गुरुलघुरूपो-गणः, शब्दहारौ लघुगुरू द्विवारं कार्य्यौ इत्यर्थः, शंखो लघुः कंकणं गुरुः ॥ (G).

१८४ । आइ रग्गण इत्यादि । आदौ रगणः हस्तः काहलः तालो दातव्यो मध्ये शब्दहारौ पततः द्वावपि सर्वलोकैर्बुद्धा । द्वौ काहलौ हारं पूरय शङ्खः कङ्कणं शोभनः नागराजो भणति सुन्दरी चर्चरी मनोमोहनी ॥ आदौ रगणस्ततो हस्तः सगणस्ततः

१८५ । १ पाए (C). २ जंम्भणक्कइ (A), जभंभणक्कइ (F). ३ सुसोहरा (A), सुमोहणा (B), सूसोहणा (E). ४ थोर (A), थूल (E & F). ५ मोत्तिमदाम (C). ६ डाहिण (B & C). ७ धाइ (B), धालि (E & F). ८ कडक्खआ (A), कलक्खआ (B & C). ९ काहि (A, B & C). १० पूरस (A, B & C). ११ मण्डिण (B & F). १२ एह (A), एहि (B & C). १३ देक्खिआ (A & F). १४ १८१ (A). १५ चाचरी (C).

काहलो लघुस्ततस्तालो गुरुलघुरूपो मध्ये देयः, शब्दहारौ लघुगुरू पततः वारद्वयं तेन पुनरपि शब्दहारौ लघुगुरू पततः, द्वौ काहलौ लघू ततो हारं गुरुं पूरयतः, शंखो लघुः ततः कंकणं गुरुः, शोभनः नागराजो भणति चर्चरीच्छन्दः, चर्चरी कीदृशी सुन्दरी अतश्च मनोमोहनी, अन्यापि सुंदरी हारशंखकंकणैः शोभना भजति सुंदरीपदं । (H).

१८५ । उदाहरति । पादे नूपुरं झणझणायते हंसशब्दसुशोभनं स्थूले विस्तीर्णस्तनाग्रे नृत्यति मौक्तिकदाम मनोहरं । वामदक्षिणपार्श्वयोर्धावति तीक्ष्णचक्षुःकटाक्षः, कस्य नागरस्य गेहमण्डनी सुन्दरीयं प्रेक्ष्यते ॥ थोरशब्दो विस्तीर्णे देशी, धारशब्दः पार्श्वे, तीक्ष्णशब्दश्चक्षुर्विशेषणम् । (C).

१८५ । चर्चरीमुदाहरति, पाअ णेउरेति । हंस सद्द सुसोहणा —हंसशब्दवत् सुशोभनं णेउर—नूपुरं यस्या इति शेषः यथायथं योजनीयः पाअ—पादयोः झंझणक्कइ—झंझणायते, थोर थणग्ग—विस्तीर्णस्तनाग्रे थूल—स्थूलं मणोहर—मनोहरं मोत्तिदाम—मौक्तिकदाम णच्चइ—नृत्यति, तिक्खचक्खु क[ढक्ख]आ —तीक्ष्णचक्षुःकटाक्षः वाम दाहिण—वामदक्षिणयोर्भागयोरिति भावः * * * । (E).

१८५ । यथा । पादे नूपुरं झंझणायते हंसशब्दसुशोभनं, स्थूलं स्थूलस्तनाग्रे नृत्यति मौक्तिकदाम मनोहरं । वामदक्षिणयोर्धारयोर्धावति तीक्ष्णचक्षुःकटाक्षः, कस्यचिन्नागरस्य गेहमंडिनीयं सुंदरी दृष्टा ॥ (G).

मो सो जो[1] स त तो[2] समंत गुरबो[3] एउण[4] विंसाउणो[5]
पिंडोअं सउ बीस[6] मत्त भणिअं अठ्ठासि जोणी उणो[7] ।
जं छेहत्तरि बणओ[8] चउ पओ[9] बत्तीस रेहं[10] उणो[11]
[चो]आलीसहु[12] हार[13] पिंगल भणे[14] सद्दूलसट्टा[15]
मुणो ॥ १८६[16] ॥

१८५। उदाहरणमाह, पाअ णेउर इत्यादि। पादे नूपुरं झणझणायते हंसशब्दवत् सुशोभनं स्थूलोच्चस्तनाग्रे नृत्यति मुक्तादाम मनोहरं। वामदक्षिणयोर्धावोर्धाडि लोके प्रसिद्धं ** तीक्ष्णचक्षुः-कटाक्षः, कस्य पुरुषस्य गेहमण्डनकर्त्रीयं सुंदरी दृष्टा ॥ (H).

[In MS. (H), a metre named मुक्ताहारः is transcribed with an example from another book. As this has not been mentioned in any of the other MSS, so it has not been adopted here.—Ed.]

१८६। अथोनविंशत्यक्षरा। मो ऽऽऽ सो ।।ऽ जो ।ऽ। स ।।ऽ त ऽऽ। अस्य द्वयं तदन्ते गुरुः एकोनविंशतिर्वर्णाः पिण्डोऽयं विंशत्यधिकशतं मात्राणां भणितम् अष्टाशीतियोनिः पुनः। यत्

१८६। १ जे (B). २ ता (A, B & C). ३ गुरओ (A), गुरओ (B & C). ४ एउण (A), एडण (F). ५ विसावणो (E & F). ६ विंस (F). ७ जो णिप्पुणो (A), यो णोपुणो (B & C). ८ बणणो (A, B & C). ९ पआ (A). १० रेहा (A), रेहे (E). ११ मुणो (A), पुणो (B & C). १२ एआलीसहु (A & B), चोआलीसहु (C & E), चौवालीसहु (F). १३ णाम (A, B & C). १४ कई (A, B & C). १५ सद्दूल सो सट्टओ (A). १६ १८२ (A).

षट्सप्ततिवर्णानां चतुर्भिः पादैर्द्वात्रिंशद्रेखं जाने [?] राज्ञा [?] नागानां [?] नाम्ना पिङ्गलेन कविना शार्दूलः [?] संसज्यते ॥ सट्ट इति पाठे शार्दूलसट्टक इति नाम, जाणे इत्यस्य ज्ञायत इत्यर्थः । चतुर्भिः पादैः विंशत्यधिकशतं मात्राणाम् अष्टाशीतिमात्राणां योनिः स्थानं चतुश्चत्वारिंशद्गुरवः । (C).

१८६ । अथैकोनविंशत्यक्षरचरणस्य वृत्तस्य पंचलक्षं चतुर्विंशतिसहस्रमष्टाशीत्युत्तरं शतद्वयं ५२४२८८ भेदा भवंति, तत्र सप्तत्रिंशोत्तरशतद्द[त्र]याधिकैकोनपंचाशत्सहस्रोत्तरैकलक्षतमं [१४९३३७] भेदं शार्दूलविक्रीडित[?]नामकं वृत्तं लक्षयति, मविति । जं — यत्रैकोनविंशत्यक्षरचरणे वृत्ते प्रथमं मो — मगणस्त्रिगुरुर्गणः, ततः सो — सगणोऽंतगुरुः, ततश्च जो — जगणः मध्यगुरुः, ततश्च समंतगुरवो — सम्यगंते गुरुर्येषां तादृशाः स त तो — सतताः सगण-तगण-तगणा इत्यर्थः सगणोऽंतगुरुस्तगणोऽंतलघुः पुनश्च तगण इत्यर्थः, एवंप्रकारेण पाद्दे एऊण विंसा वण्णो — एकोनविंशतिर्वर्णाः पतंति, यत्र च चउ पअ्रो — चतुःपादे पिंडोअ्रं — पिण्डीभूताः पुनः बत्तीस रेहे — द्वात्रिंशद्रेखाः लघव इत्यर्थः अट्ठासि जोणी — अष्टाशीतियोनयः अष्टाशीतिमात्राणां कारणानीति यावत् चौ[चो]आलो[स्स] हार — चतुश्चत्वारिंशत् हारा गुरवः येषामष्टाशीतिमात्रा भवंति तादृशाश्चतुश्चत्वारिंशद्गुरव इत्यर्थः, एवंप्रकारेण छेहत्तरि वण्णो — षट्[सप्ततिवर्णाः] प्रतिचरणं [?] सउ वीस मत्त — विंशत्यधिकशतमात्राश्च भणिअ्रं — भणिताः, तत् सद्दूलसट्ट — शार्दूलसाटकं मुणो — जानीत इति पिंगल भणे — पिंगलो भणति ॥ (E).

१८६। अथैकोनविंशत्यक्षरा अतिधृतिः॥ मो सो इति॥ म स ज स त ताः समंतगुरवः एकोनविंशतिर्वर्णाः पिंडीभूताः शतं विंशतिर्मात्रा भणिता अष्टाशीतिर्योनयः पुनः। यत् षट्सप्ततिवर्णाश्चतुःपदेषु द्वात्रिंशद्रेखं पुनश्चतुश्चत्वारिंशत् हारः पिंगलभणितं शार्दूलशाटकं जानीहि॥ हारो गुरुरंते कार्य इत्यर्थः, अष्टाशीतिरिति गुरुमात्रापरं। (G).

१८६। ऊनविंशत्यक्षरप्रस्तारस्य कतिचित् छंदांसि वदति मो सो जो इत्यादि। मः सः जः सतताः समंतगुरुका एकोनविंशतिः पुनः पिण्डोऽयं शतं विंशतिर्मात्रा भणिता अष्टाशीतिर्योनिः पुनः। यत्र षट्सप्ततिर्वर्णाश्चतुःपदेषु द्वात्रिंशद्रेखाः प्राप्ता एकचत्वारिंशन्नाम पिंगलकवेः शार्दूलसाटको ज्ञातः॥ मो मगणः, सः सगणः, जो जगणः, सः सगणः, तस्तगणः, पुनस्तस्तगणः, सम-न्तगुरवः अन्ते गुरुर्येषां ते तथा सतता एकोनविंशतिर्वर्णाः पदे अस्य छंदसः सकलशरीरं विंशत्यधिकशतं मात्राः पिण्डः शरीरं, तत्रापि भागमाह योनिरष्टाशीतिः, योनिर्जन्मस्थानं कलाद्वयेन गुरुरेकश्चतुश्चत्वारिंशद्गुरूणामष्टाशीतिः कला योनिरुत्पत्तिस्थानं चतुर्भिः पदैः षट्सप्ततिवर्णाश्चतुर्षु पदेषु द्वात्रिंशल्लघवः। एवं गण-वर्णमात्रालघूनि कथयित्वा पारिशेष्याद्गुरुसंख्यां कथयति, एक-चत्वारिंशन्नामसंख्यकाश्च गुरवो भवंति, कवेः पिंगलस्य नाम पिंगल-इत्यक्षरत्रयम् एकचत्वारिंशत् त्रयश्च तेन चतुश्चत्वारिंशद्गुरवो भवंति यत्र तत् शार्दूलसाटकं ज्ञातं। (H).

जहा,

जे लंका[१] गिरि मेहलाहि[२] खलिआ[३] संभोअ खिसो[४]रई
फारुप्फुल्ल[५] फणावली कवलणे[६] पत्ता दरिद्दत्तणं[७] ।
ते एहिं[८] मलआणिला विरहिणी णीसास[९] संपक्किणो
जादा झत्ति सिसुत्तणे वि बहला[१०] तारुस्स पुस्सा विआे[११]॥

१८७[१२] ॥ साद्दूलसट्ट । (C).

१८७ । उदाहरति । ये लङ्कागिरिमेखलायाः स्खलिताः सम्भोगखिन्नोरगीस्फारोत्फुल्लफणावलीकवलनेन प्राप्ता दरिद्रत्वं । इदानीं ते मलयानिला विरहिणीनिःश्वाससम्पर्किणो जाताः शीघ्रं शिशुत्वेऽपि बहलास्तारुण्यपूर्णा इव ॥ (C).

१८७ । शार्दूलसाटकमुदाहरति, जे लंकेति । जे — ये लंका गिरि मेहलाहि — लंकागिरिमेखलायाः त्रिकूटाचलकटकादित्यर्थः खलिआ — स्खलिताः ततश्च संभोगखिन्नोरगीस्फारोत्फुल्लफणावली-कवलनेन दरिद्दत्तणं — दरिद्रत्वं पत्ता — प्राप्ताः । ते इण्हि — इदानीं मलयानिलाः विरहिणीनिःश्वाससंपर्किणः संतः शिशुत्वेऽपि तारुण्यपूर्णा इव बहला जाताः ॥ कर्पूरमंजरीसाटके देवीनियुक्त-विचक्षणायाः वाक्यमेतत् । (E).

१८७ । १ ते लङ्का (B). २ मेहलासु (A), मेहलाइ (B & C). ३ खलीआ (E). ४ खिणो (A). ५ फारफुल्ल (A), फाफुल्ल (B & C), फारफुल्ल (E). ६ फणावलणे (E). ७ दविकुत्तण (B). ८ एण्हि (B & C), इण्हि (E). ९ णीसा (B), णिसास (E). १० बहला (B & C). ११ पुत्ता विष (A & C). १२ १८२ (A).

पत्थारे[1] जह[2] तिस्सि[3] चामर वरं दीसंति वसुज्जलं[4]
उक्किठ्ठं[5] लहु बिस्सि[6] चामर तहा उठ्ठीअ[7] गंधुग्गुरो[8] ।
तिस्सो[9] दिस्स[10] सुगंध[11] चामर तहा गंधा जुआ[12] चामरं
रेहंतो[13] धअपट्ट[14] अंत कहिअं[15] सद्दूल विक्कीडिअं[16] ॥
१८८[17] ॥

१८७। यथा। ये लंकागिरिमेखलाभ्यः स्खलिताः संभोगखिन्नोरगीस्फारोत्फुल्लफणावलीकवलनैः प्राप्ता दरिद्रत्वं। ते इदानीं मलयानिला विरहिणीनिःश्वाससंपर्किणो जाता झटिति शिशुत्वेऽपि बहुलास्तारुण्यपूर्णा इव ॥ (G).

१८७। उदाहरणमाह, जे लङ्का इत्यादि। ये लङ्कागिरिमेखलातः स्खलिताः संभोगखिन्नोरगीस्फारोत्फुल्लफणावलीकवलने प्राप्ता दरिद्रत्वं। ते इदानीं मदनाविला [?] विरहिणीनिःश्वाससंपर्किणो जाता झटिति शिशुत्वेऽपि बहुलास्तारुण्यपूर्णा इव ॥ (H).

१८८। अमुमेवार्थं प्रकारान्तरेण स्पष्टयति, पत्थारे इति। प्रस्तारय त्रीणि चामराणि दृश्यन्ते वर्णोज्ज्वलानि, उत्थापनीयौ

१८८। १ पच्छारे (A). २ तह (A), जइ (B & C). ३ तिस (A). ४ वणूज्जलं (E), वणुज्जलं (F). ५ तच्चेसं (A & B), उट्ठेणं (C). ६ विषि (A). ७ तच्चेस (A & B), उट्ठेस (C). ८ गंधंगुरो (B & C), गंधुगुरो (E). ९ तिषे (A & B), तिषि (C). १० दुस (B & C). ११ सूगंध (E). १२ सवे (A & C), जवे (B). १३ हेरं (F). १४ धचवद्द (A), जलवद्ध (B), सवद्ध (C). १५ करणे (A, B & C). १६ सद्दो सुणी (A), सद्दा सुणे (B & C). १७ १८४ (A).

लघू द्वौ चामरं तथा उत्थाप्यौ गन्धगुरू । त्रयो दीयन्तां सुगन्धा-श्चामराणि तथा गन्धश्च द्वे चामरे राजमानो ध्वजपटोऽन्ते कथितः शार्द्दूलसंस्थापने ॥ सट्टो मुणे इति पाठे शार्द्दूलशब्दको ज्ञायत इत्यर्थः, सं[प्र]सारय विस्तारय, सुगन्धाः शोभना गन्धा लघवस्तथा त्रीणि गुरूणि, ध्वजपट आदिलघुस्त्रिकलः । (C).

१८८। पुनरपि शार्द्दूलविक्रीडितं प्रकारांतरेण लक्षयति, पत्थारे इति । जह—यत्र पत्थारे—प्रस्तारे वणूज्जलं—वर्णोज्ज्वलानि तिण्णि चामर बरं—त्रीणि चामरवराणि गुरूणि दीसंति—दृश्यंते, ततश्च उक्किट्ठं—उत्कृष्टं लहु बिण्णि—लघुद्वयं चामर—चामरं गुरुरित्यर्थः तहा—तथा गंधुग्गुरो—गंधो लघुः गुरुश्च उट्ठीअ—उत्थापितः दत्त इत्यर्थः। तहा—तथा तिण्णो त्रयस्त्रीणि वा सु[सु]गंध—सुगंधाः शोभना लघव इत्यर्थः चामर—चामराणि गुरवः दिज्ज—दीयंते, ततश्च गंधा—गंधो लघुः जुआ चामरं—द्वे चामरे गुरू अंत—अंते पादांते चामरद्वयांते वेत्यर्थः रेहंतो—राजमानः धअपट्ट—ध्वजपटो लघ्वादिस्त्रिकल इति यावत् कहिअं—कथितं तत्सद्दूल बिक्कीडिअं—शार्द्दूलविक्रीडितं ॥ (E).

१८८। पत्थार इति। प्रस्तारे यत्र त्रयः चामरवरा दृश्यंते वर्णोज्ज्वलमुत्कृष्टं लघुद्वयं चामरं तथोत्थापितो गंधो गुरुः। त्रयो दत्ताः सुगंधाश्चामरास्तथा गंधो युग्मचामरं राजमानो ध्वजपटोऽंते कथितः शार्द्दूलविक्रीडितं ॥ चामरं गुरुः, गंधो लघुः, ध्वजपटो-लघुगुरू । संज्ञांतरार्थं पुनरुक्तिः । (G).

१८८। पूर्वोक्तलक्षणमेव प्रकारान्तरेण सुगमलक्षणं करोति,

जहा,

जं धोअंजण लोल[1] लोअणजुअं लंबाल[2]अग्गं मुहं
हत्था[3]लंबिअ केस पल्लव[4]चए घोणंति[5] जं बिंदुणो[6] ।
जं एक्कं सिअअं[7]चलं[8] णिबसिदं[9] तं ण्हाण[10] केलिठ्ठिआ[11]
आणीदा इअ मज्झ[12]देक्क जणणी जोईसरेणा[13]मुणा ॥
१८९[14] ॥ शार्दूलस्य लक्षणद्वयमेतत् । (A). सद्दूल (B & C).

पत्थारे इत्यादि । प्रस्तारे तत्र त्रयश्चामरवरा दृश्यंते वर्णोज्ज्वलं तथा चैवं लघुद्वयं चामरं तथा चैव गंधो गुरुः । त्रयो दत्ताः सुगंधाः चामराणि तथा गन्धश्च द्वे चामरे शोभमानो ध्वजपटोऽन्तकरणे शार्दूलशाटको ज्ञातः ॥ प्रस्तारे त्रीणि चामराणि गुरवस्ततो वर्णोज्ज्वलं यथा स्यादेवं लघुद्वयं कर्त्तव्यं तथाच चामरं गुरुस्तथाच गन्धो लघुस्ततो गुरुस्ततस्त्रयः सुगन्धा लघवः तथैव चामराणि त्रीणि गुरव इत्यर्थः ततो गन्धश्च लघुस्ततो द्वे चामरे गुरुद्वयमन्तकरणेऽन्ते शोभनध्वजपटस्तिकलो लघुगुरुरूपः, शार्दूलशाटकमिति छंदसो नाम । अत्र द्वादशवर्णेषु यतिः, सप्तसु वर्णेषु यतिः, क्वचिदादौ सप्तसु वर्णेषु यतिः ततो द्वादशसु वर्णेषु यतिः ।

---

१८९ । १ सोण (A, B & C). २ लंबाण (B). ३ हच्छा (A). ४ पल्लव (A). ५ धोअन्ति (A), दोहंति (B), दोलन्ति (C). ६ भिङ्गाङ्गणा (C). ७ सिचअं (A, B & C). ८ चञ्चणं (B & C). ९ णिवासिअं (F). १० तं ण्हाण (A), तन्नाण (B), तन्हाण (C). ११ केलिट्ठिदा (B & C). १२ मज्झ (B & C). १३ जोइसरेणा (A, C & E). १४ १८५ (A).

उक्तं छंदःपारिजाते, मः सो जः सतता गुरुश्च विरतिः सूर्य्यै-रथाश्वैर्भवेत्, नागानामधिपेन तन्निगदितं शार्दूलविक्रीडितम् । एतत्प्राकृतकाव्यनिर्मितिविधौ संकीर्त्त्यते शाटकं, विच्छेदः क्वचिदस्य सप्तदिनकृन्न्यस्तोऽपि संलक्ष्यते ॥ (H).

१८८ । उदाहरति । यद्धौताञ्जनशोणलोचनयुगं लम्बालकाग्रं मुखं हस्ताकृष्टकिंशुकपल्लवचयैर्घूर्णन्ति भृङ्गाङ्गनाः । यदेकं सिच-याञ्चलं निवसितं तत् स्नानकेलिस्थिता आनीता इयमद्भुतैकजननी योगीश्वरेणात्मना ॥ इदं कर्पूरमञ्जर्य्यां भैरवानन्दयोगिमन्त्राकृष्ट-नायिकावर्णनं । (C).

१८९ । शार्दूलविक्रीडितमुदाहरति, जमिति । जं धोअंजण लोल लोअण जुअं—यस्मात् धौतांजनलोललोचनयुगं धौतमंजनं यस्य तादृशं लोचनयुगं यस्मिंस्तत्तादृशमित्यर्थः लंबालअग्गं—लंबालकाग्रं लंबान्यलकान्यग्रे यस्य तत्तादृशं मुहं—मुखमित्यर्थः तथा जं—यतः हत्थालंबिअ केस पल्लव चए—हस्तालंबितकेशपल्लवचये बिंदुणो—विंदवो घोणंति—घूर्णंति परितो भ्रमंतीति यावत् । तथा जं—यस्मात् एक्कं सिअअंचलं णिवसिअं—एकं सिचयाञ्चलं निवसितं ण्हाणकेलिट्ठिआ तं—तस्मात् हेतोः स्नानकेलिस्थिता अब्भुदेक्क जणणी—अद्भुतैकजननी आश्चर्यमुख्योत्पत्तिभूमिरिति यावत् इअ—इयं कर्पूरमञ्जरी अमुना जोईसरेण—योगी-श्वरेण कापालिकभैरवानंदेन आणीदा—आनीता ॥ यतो नेत्रयो-रंजनं धौतं विंदवश्च केशपा[शा]च्च्योतंति एकमेव च वस्त्रं धृतं, ततः स्नानकेलिस्थेयमानीतेत्यर्थः । भैरवानंदाकृष्टां कर्पूरमञ्जरीं

प्रेक्ष्य विदूषकं प्रति राज्ञो वाक्यमेतत्। शार्दूलविक्रीडितं निवृत्तं। (E).

१८८। यथा। यद्धौतांजनलोललोचनयुगं लंबालकाग्रं मुखं हस्तालंबिनि केशपल्लवचये घूर्णंति यद्विंदवः। यदेकसिचयांचलं निवसितं तत्स्नानकेलिस्थिता आनीता इयमद्भुतैकजननी योगीश्वरेणामुना॥ (G).

१८८। उदाहरणमाह, जं धोअं इत्यादि। यस्याः धौताञ्जनशोणलोचनयुगं लम्बालकाग्रं मुखं हस्तालम्बितकेशपल्लवच[च]ये घूर्णन्ते यत्र विंदवः। यथैकं सिचयाञ्चलं निवसितं तत्स्नानकेलिस्थिता आनीता इयमद्भुतैकजननी योगीश्वरेणामुना॥ सिचयः परिधानवस्त्रं। सिचयः प्रोतशाटक इति त्रिकाण्डशेषः। भैरवानंदाकृष्टायाः स्नानस्थितायाः कर्पूरमञ्जर्य्या वर्णनं। (H).

[Note.—The following verses are found in MS. (A), but in none of the others.—Ed.]

दह बंभण दह खत्तिअउ दह वेसउ दह सुद्द।
वर्णां पर तह एक्क अउ माला जाति पसिद्ध॥ १८६॥ [दोहा]
तिङ्ग पाए उणविंस अक्खर धरो एकेण वीहं मुणो
मत्ताणं सउ वीह १२० पिंड सअले तेत्तार हारं थुणो।
गंधोअं चउतीस ३४ छंद सअलँ सेसेण सुज्झाणिओ
वस्णेणं सतहत्तरेहिँ [७७] भणिअं गंजाण सो सद्दओ॥ १८७॥
विह पाए विह कस सेस भणिअं एउस वीसं धरो
वि[अ]चालीसह [४२] हार अच्छि सअले छत्तीस रेहा भ[ध]रो।

वखाणं अठहत्तरेहिँ सअले बीहोत्तरं सत्तआ
विस्सामे बिऊ ठाम ठाम भणिअं हट्टील सो सट्टओ ॥ १८८ ॥
तिऊ पाए बिह वस सेस भणिअं एउस एको ण[प]अं
उणअस्सी ७९ तह वस ठाम धरिअं एआरिसं हारअं ।
अठतीसे लऊ तच्छ तच्छ कइणा विस्साम बे जंपिओ
सुच्छंदो भण सेस णाअ णिउणो मोहइ सो सट्टओ ॥ १८९ ॥
असि ८० वसो चउ पाअ पाअ कइणा दिट्ठाण किट्ठाणअं
गुरु चालीसह चारिसेण ४० लऊआ दिट्ठाण किट्ठाणअं ।
णउ जोणी गण मज्झ मज्झ सअले बीहोत्तरं सत्तओ
भणु सेसा इअ छंदु बंध सुरसो पंचाणु* सो सट्टओ ॥ १९० ॥
सद्दूलो पढमो वि गुंज सहठो मोहइ पंचाअणो
इंकालो सब लंगु वेणुणु णखी हिंसालु विच्छारिओ ।
णिस्संको हिअआरु मोर हररी विंबारु बीहंसणो
उद्धंगो रुहिरासिणो मिअपई संचारि मोहा मुणो ॥ १९१ ॥
कुंडो कक्कसु जंपु गंड बिकटो दंतारि तक्कारिओ
भीणो भीसण वक्करो भअकरो लंगूर लीलाअरो ।
उद्धक्को कटणो गुरार ररबो पप्फुंद फुक्कारिओ
एक्कक्के गुरु लोपि जूअ लऊ हो एआरिसो सट्टओ ॥ १९२ ॥

[इति] शार्दूलप्रकरणम् ।

* [This metre is elsewhere described as मत्तेभविक्रीडितम्. Vide Ghosha's Compendium, p. ९८.—Ed.]

ठइवि[1] दिअवर जुअल[2] मज्झ[3] करअल करहि[4]
पुण[5]वि दिअवर जुअल[6] सज्ज[7] बुहअण[8] करहि ।
सरस गण बिमल जह[9] णिठ्ठविअ[10] बिमल मइ
तुरिअ कइ[11] उरअ बइ[12] चंदमल[13] कहइ सइ[14] ॥ १९०[15] ॥

---

१९० । स्थापय द्विजवरयुगलं मध्ये करतलं कुरु पुनरपि द्विजवरयुगलं मध्ये करतलं कुरु । सरसगणो विमलो यत्र श्रुत्वा स्थाप्यते मनोगतिना विमलमतिना उरगकविना चन्द्रमाला कथ्यते सदा ॥ मध्यपदसमभिव्याहारात् आदावन्ते च द्विजवरयुगलं प्रत्याय्यते, तदेव द्रढयति पुनरपीत्यादिना । (C).

१९० । अथैकोनविंशत्यक्षर[चर]णस्य वृत्तस्य चतुःषष्ठ्यु[षष्ट्यु]-त्तरशतद्वयाधिकत्रयोविंशतिसहस्राधिकपंचलक्ष[५२३२६४]तमं भेदं चंद्रमालानामकं वृत्तं लक्षयति, ठइवीति । दिअवर जुअल — द्विजवरयुगलं चतुर्लघ्वात्मकगणद्वयमिति यावत् ठइवि — स्थापयित्वा मज्झ — मध्ये द्विजवरद्वययुगयोरंतराले इति यावत् करअल — करतलं गुर्वंतं सग[ण]मित्यर्थः करहि — कुरुष्व, पुणवि —

---

१९० । १ ठइअ (B & C). २ जुअ (A), जुलअ (C). ३ मज्झ (E). ४ करह (A). ५ पुणु (B & C). ६ Dropt in (E). ७ मज्झ (A, B & C). ८ करअल (A & C), dropt from बुहअण up to अमिअ in the first quadrant of the next śloka (B), बढुअण (F). ९ जोह (A), जइ (C). १० सुखि चवइ मअगइ (A), सुखि चवइ मणगइ (C), खि ठठतिअ (E). ११ विमल मइ (A & C). १२ कइ (A & C). १३ चंदमलु (E), चंदमल (F). १४ सोइ (A). १५ १९३ (A).

पुनरपि है बुहश्रण—बुधजन ' दिश्रव[रयु]श्रल—द्विजवरयुगलं सज्ज—सज्जं करहि—कुरुष्व । एवं च विमलाः सरसगणाः पंचेति शेषः जह—यत्र नितरां स्थाप्यंते विमल मद्—विमलमतिः तुरिश्र कद्—त्वरितकविः उरग वद्—उरगपतिः सद्—तां चंद-मलु—चंद्रमालां [कहद्—] कथयति ॥ अत्र पुणवि दिश्रवर-जुश्रल मझ्झ करश्रल करहीति क्वचित्पाठः, मज्झ करश्रल—मध्यकरतलं मध्ये करतलं यस्य तादृशं द्विजवरयुगलं पुनरपि कुरुष्वेत्यर्थः, परंतु अत्र पूर्वोक्तात् मध्ये करतलं कुरुष्वेत्यत्र मध्यपदसमभिव्याहारादेवाग्रिमद्विजवरस्य मध्यकरतलत्वप्राप्त्या पुन-र्मध्यकरतलमिति द्विजवरविशेषणं पद्यपूरणायैवेति संप्रदाय-विदः, द्विजवर[द्वय]सगणोत्तरद्विजवर[द्वय]रचितचरणा चंद्रमालेति निष्कर्षः । (E).

१९० । ठईति । स्थापयित्वा द्विजवरयुगलं मध्ये करतलं कुरुष्व, पुनरपि द्विजवरयुगलं सज्जं बुधजन कुरु । सरसगणं विमलं यत्र निष्ठाप्य विमलमतिस्त्वरितकविरुरगपतिश्चंद्रमालां कथयति तां ॥ मध्ये द्विजवरयुगयोर्मध्ये इत्यर्थः । द्विजवरश्चतुर्लघुः, करतलः सगणः । (G).

१९० । ठइवि इत्यादि । संस्थाप्य द्विजवरयुगलं मध्ये करतलं कुरु, पुनरपि द्विजवरयुगलं मध्ये करतलं कुरु । सरसगणा विमलाः यान् श्रुत्वा धारयति मनोगतिं विमलमतिरुरगकविश्चंद्रमालां कथयति सः ॥ संस्थाप्य द्विजवरयुगलं चतुर्लघून् मध्ये करतलं सगणं कुरु, पुनरपि द्विजवरयुगलमष्टलघूनेतावता गणपूर्त्तिर्जाता ।

जहा, अमिअ कर किरण धरु[1] फुल्लु[2] णव कुसुम[3] वण[4]
कुविअ भइ[5] सर ठवइ काम णिअ धणु[6] धरइ[7]।
रवइ पिक समअ णिक[8] कंत तुअ[9] थिर हिअलु[10]
गमिअ दिण पुणु[11] ण मिलु[12] जाहि[13] सहि पिअ
णिअलु[14] ॥ १९१[15] ॥ चंद्रमाला।

पाठक्रममाह, मध्ये हृदयमध्ये कलकलं कुरु, कलेन उच्चैःस्वरेण पठेत्यर्थः। यत्र सरसगणा विमला यान् श्रुत्वा मनो गतिं मनस्थास्थल्यं धारयति, वहिस्थास्थल्यं न प्रकटं भवति, मनः स्थिरीकृत्य शृणोति वा, विमलमतिहरगकविरेतच्छंदः चंद्रमालां भणति सः। अत्र दशसु वर्णेषु यतिः, पुनर्नवसु वर्णेषु यतिः। उक्तं छंदःपारिजाते, कुरु सविरति दश लघुमेकगुरुमथ र[व]सुल-मिति रचय गणनिचयमत्र सुभणितिकुशल। अभिनवरसपरिणति चंद्रगति किल भवति जगति सकलकविगुरुनागपतिरभिलषति ॥ (H).

१९१। उदाहरति। अमृतकरः किरणधरः फुल्लं नवकुसुमवनं कुपितो भूत्वा शरं स्थापयन् कामो निजं धारयति धनुः। रौति पिकः समये निजे कान्तस्तव स्थिरहृदयः नूनं गतं दिनं न मिलति

१९१। १ धर (A, B & C). २ फुल्ल (A, B & C). ३ कमल (A). ४ वणु (A & C). ५ Dropt in (B). ६ धणू (E). ६ and ७ Transposed in (A, B & C). ८ णिच (C). ९ तुअअ (F). १० हिअअ (B), हिअणु (C). ११ पणु (B). १२ मिल (A), मिष (B), ण मिलइ उण (C). १३ नाहि (A). १४ णिअलु (B), णिअणु (C). १५ १९४ (A).

पुनर्याहि सखि प्रि[य]निकटं ॥ निजसमयो वसन्तः, नूनं निश्चितं, तस्माद्याहि । (C).

१९१ । चंद्रमालामुदाहरति, अमिअ करेति । अमिअ कर— अमृतकरः किरण—किरणान् धरु—धरति, वण—वनं फुल्लु एव कुसुम—फुल्लनूतनपुष्पं जातमिति शेषः, काम—कामः कुविअ भ[इ]—कुपितो भूत्वा सर ठवइ—शरान् स्थापयति णिअ धणू— निजधनुः धरइ—धरति । पिक—पिकः कोकिलः समअ— समये वसंतकाले णिक—समीचीनं यथा स्यात्तथा रवइ—रौति, तुअ—तव कंत—कांतः प्रिय इत्यर्थः थिर हिअलु—स्थिर- हृदयः, गमिअ दिण—गमितानि दिनानि पुनः ण मिलु—न मिलंति, सहि—हे सखि तस्मात् त्वं पिअ णिअलु—प्रियनिकटे जाहि—गच्छ ॥ कलहांतरितां कांचिन्नायिकां प्रति सखी- वाक्यमेतत् । (E).

१९१ । यथा । अमृतकरः किरणान्धरति, फुल्लति नवं कुसुम- वनं, कुपितो भूत्वा शरान् स्थापयति कामो निजधनुर्धरति । रौति पिकः समये सम्यक्, कान्तस्तव स्थिरहृदयो गता दिवसाः पुनर्न मिलति, याहि सखि प्रियनिकटे ॥ (G).

१९१ । उदाहरणमाह, अमिअ इत्यादि । अमृतकरः किरणं धारयति, फुल्लवङ्कुसुमं वनं, कुपितो भूत्वा शरं स्थापयति कामो- निजं धृत्वा धनुः । रवीति पिकः, समयः समीचीनः, कान्तस्तव स्थिरहृदयः स्थिरप्रेमा, गतं दिनं पुनर्न मिलति, याहि सखि प्रियनिकटं ॥ (H).

करिअ जसु सुगुणजुअ[1] विमलमइ महिअले
ठइअ ठइ रमणि सरस गण[2] पअ पअ अले[3] ।
दिअवर[4] चउ चउ पअहि भण[5] फणिवइ सही[6]
कमल गण सरस मण सुमुहि धवलअ कही[7] ॥ १९२[8] ॥

१९२। कुरुष्व रसं श्रुत्वा युवते विमलमते महीतले स्थाने स्थापय सुमुखि सगणं पदपदतले। द्विजगणाश्चतुश्चतुर्षु पादेषु भणति फणिपतिर्महीधरं [?] नगणं भण शशिवदने धवले ॥ पदपदतले सर्व्वेषां पदानामन्ते सगणं, तथाचादौ जानीहि द्विजगणाश्चत्वारः प्रतिपदं धवलगणं निर्म्मलगणं योग्यं, धवले धवलाख्यच्छन्दसि धवलाङ्कमेवानुक्रमणिकायां वक्ष्यति। महीश्वरानुगुणं महीश्वरानुमतमित्यर्थः इति कश्चित्, परनिपातात् फणिमहीपतिरित्यन्ये। (C).

१९२। अथैकोनविंशत्यक्षरचरणवृत्तस्य चतुश्चत्वारिंशदुत्तरैकशताधिकद्विषष्टिसहस्रोत्तरद्विलक्षतमं भेदं धवलनामकं वृत्तं लक्षयति, करिअ इति। हे सरसमानसे सुमुखि रमणि जसु—यस्य पअ पअ अले—[पादे] पादे पतितान् सरस गण—साद्यगणान्

१९२। १ पलइ वसु लङ्ग जुअल (A), करइ रस सुणि जुअइ (B), करइ रस सुणि युहइ (C). २ रमण गति सअण (A), रमणि रिस गण (B), रमणि सिरिस गण (C). ३ तले (A, B & C). ४ दिअगण (A, B & C). ५ भणि (A), पअह भण (E). ६ णिअ मही (A), मही (B & C). ७ करअल गण सरिसउ ससि वअणि धवलही (A), धर णुगण सरिस भण ससि वअणि धवलही (B & C). ८ १९५ (A).

दिअवर चउ — द्विजवरान् चतुर्लघुकगणान् चतुरः ठइअ ठइ — स्थापयित्वा स्थापयित्वा कमलगणः सगणोऽन्तगुरुरित्यर्थः, कर पाणि कमल हस्तमिति [Vide श्लोक १४, p. 31.—Ed.] सगणनामसु कमलशब्दस्योपात्तत्वात्, चउ पअहि — चतुर्षु पदेषु प्रतिचरण-मित्यर्थः करिअ — क्रियते तत् धवलकं वृत्तमित्यर्थः, महिअले — महीतले कहि — कथ्यते इति सुगुणजुअ — सुगुणयुक्तः विमल-मइ — विमलमतिः फणिपतिः पिंगलः सही — सत्यं भणति ॥ यत्राष्टादशलघुरनंतरमेको गुरुः पतति तत् धवलनामकं वृत्तमिति फलितार्थः । (E).

१९२ । करीति । क्रियते यस्य सुगुणयुतविमल[म]तिर्महीतले स्थापयित्वा रमणि सरसगणान् पादपतितान् । द्विजवरांश्चतुरश्चतुर्षु पदेषु भणति फणिपतिः सखि कमलगणः सरसमानसे सुसुखि धवलकं कथय ॥ द्विजवरश्चतुर्लघुः, कमलः सगणः । (G).

१९२ । करहि इत्यादि । करोति रसं श्रुत्वा युवति विमल-मतिर्महीतले स्थापयित्वा स्थापयित्वा विरामं पतत्सगणं पदपद-तले । द्विजगणाश्चत्वारश्चतुर्षु पदेषु भणति फणिपतिर्मही धरण-गणाः सदृशा भण शशिवदने धवलं ॥ हे युवति विमलमतिः कविरिति शेषः एतच्छंदः श्रुत्वा रसं करोति, स्थापयित्वा स्थाप-यित्वा विरामं पतत्सगणः पादान्ते प्रतिपादान्ते, द्विजगणाश्चत्वार-श्चत्वारः पदे — प्रतिपदं चत्वारो द्विजगणास्तेन षोडश लघवस्ततः सगणः पादान्ते फणिपतिर्भणति, फणिपतिः कीदृशः मही महो-ऽस्यास्तीति मही उत्सवयुक्तः, मह उद्धव उत्सव इत्यमरः, धरणगणाः

जहा, तरुण तरणि तवइ[1] धरणि[2] पवण वह[3] खरा
लग[4] णहि जल बड मरु थल जण जिअण[5] हरा।
दिसइ[6] चलइ[7] हिअअ डुलइ[8] हम इकलि[9] बहू
घर णहि पिअ सुणहि पहिअ मण इछइ[10] कहू[11] ॥
१९३[12] ॥ धवलांग[13] ।

धार्या गणाः कीदृशा लघूनां बाहुल्यादष्टादश लघव एको गुरुरिति प्रतिपदं हे शशिवदने ईदृशं धवलाख्यं छन्दस्त्वं भण । तत्र षट्सु वर्णेषु यतिः पुनः षट्सु वर्णेषु यतिः पुनः सप्तसु वर्णेषु यतिः । उक्तं छन्दःपारिजाते । नगणयुगलमनलसदृशमथ विरचय गं, रस-रस-हयविरतिकलितमिदमतिसुभगं । धवलमभणद्दिपदृति सकलसुमतिसुखं, तदिह भवति परमसुकृतिहृदयमतिसुखं ॥ (H).

१९३ । उदाहरति । तरुणतरणिस्तापयति धरणीं, पवनो-वहति खरः, समीपे नास्ति जलं, बडमरुस्थलं जनजीवनहरं । वसतिरुच्यते हृदयं त्रुट्यति अहमेकाकिनी वधूर्गृहे नास्ति प्रियः शृणु पथिक मनसा किमिच्छसि कथय ॥ एकलीत्यत्र एकारो-लघुर्ज्ञेयः, बड — महत् मरुस्थलमग्रे इत्यर्थः, यदि वसतिः क्रियता-

१९३ । १ तप (A). २ तरणि (B). ३ वहइ (E). ४ णिग (C). ५ जिवण (A, B & C). ६ वसइ (A & C), विसइ (B). ७ बुलइ (A), वलइ (B & C). ८ तुलइ (A), दलइ (B & C). ९ हमँ एकलि (A), हमि थकणि (B & C). १० इछल (A), इच्छण (B & C). ११ वहू (C). १२ १९९ (A). १३ धवलङ्गा (B & C).

मचेत्युच्यते तदा हृदयं त्रुटति त्वदु[प]वासमम्भवात् यतोऽहमेका-किनी परिजनशून्या मया च नाहर्त्तुं किमपि शक्यते। इयं हि स्वयं दूती, अग्रे तव गमनमनुचितं तरणितापादिवशादन्येषामत्रा-गमनमसम्भावितं त्वमपि पथिकश्चिरविरहीत्यतोऽभीष्टं निःशङ्कं कथय इति व्यज्यते। (C).

१९३। धवलमुदाहरति, तरुणेति। तरुण तरणि — तरुणः माध्याह्निकः तरणिः सूर्य्यः तवइ धरणि — तापयति धरणीं, पवण वह खरा — पवनो वाति खरः, लग णहि जल — निकटे नास्ति जलं, जण जिअण हरा — जनजीवनहरं वड मरु थल — महत् मरुस्थलं विद्यते इति शेषः। दिसइ चलइ — दिशोऽपि चलंति तरुणतरणिकिरणा अर्कत्विषोऽपि चलंतीवेत्यर्थः, हिअअ डुलइ — हृदयं कंपते, हम इकलि बह्न — अहमे[क]ला वधूः घर णहि पिअ — गृहे नास्ति पतिः, सुणहि पहिअ — शृणु हे पथिक कह्न — कुत्रापि तव मनः स्थातुमिति शेषः इछइ — इच्छति॥ कस्याश्चिद्वाग्विदग्धाया इदं वाक्यम्, अत्र पथिकपदं निवासस्थल-कथनार्हत्वं मार्गप्राप्तग्रामवासयोग्यत्वं च व्यंजयति, तरुणतरणि-पदाभ्यां चण्डांशुकिरणभीत्या निखिलपथिकसंचारश[ून्यतया]-ग्रिममार्गस्यातिदुर्गमत्वं व्यज्यते, एकलेति पदमन्यजनानवलोकनीय-तया यथेच्छक्रीडाकारित्वं व्यंजयति, सर्वथात्रैव त्वया स्थेयमिति व्यंजयति। धवलो निवृत्तः। (E).

१९३। यथा। तरुणस्तरणिस्तपति धरणिं, पवनो वहति खरः, समीपे नास्ति जलं महन्मरुस्थलं जनजीवनहरं। दिशोऽपि चलंति,

अवलोआअं[1] भणि[2] सुच्छंदं मण मज्झे सुक्खं[3] संवुत्तं
सुपिअं अंते ठवि[4] हत्था[5] दिज्जसु[6] कुंतीपुत्तं[7] संजुत्तं ।
गण अग्गा[8] दिज्जसु[9] एअं[9] किज्जसु[10] अंते[11] सत्ता हारा जं
इअ बत्तीसा णिअ[12] मत्ता पाअह[13] छंदो संभू णामाअं[14] ॥

१९४[15] ॥

हृदयं घूर्णते, अहमेकाकिनी बधूर्गेहे नास्ति प्रियः, शृणु पथिक मन इच्छया कथय ॥ (G).

१९३ । उदाहरणमाह, तरुण तरणि इत्यादि । तरुणस्तरणिस्तपति धरणीं, पवनो वहति खरः, निकटे नास्ति जलं, महत् मरुस्थलं जनजीवनहरं । साध्यं वदसि हृदयं कम्पते अहमेकाकिनी बधूर्गेहे नास्ति प्रियः शृणु पथिक मनःस्थितं कथय ॥ लग इ[ति] निकटवाचको मिथिलादेशीयः । स्वयं दूतीवचनं । (H).

१९४ । अवलोकय भण सुच्छन्दः मनोमध्ये सुखं सुवृत्तं, सुप्रियमन्ते स्थापयित्वा हस्ते दीयतां कुन्तीपुत्रः संयुक्तः । गणोऽग्रे दीयताम् एवं क्रियतामन्ते सप्त हाराः इति द्वात्रिंशन्निजमात्राः पादे छन्दः शम्भुनामेदं ॥ सुखम् एतदवलोकनात्, सुप्रियं लघु-

---

१९४ । १ अवलोआणं (A), dropt in (B), अवलोआसुं (C). २ भण (A, B & C). ३ Dropt after सु up to हारा in the third quadrant in (F). ४ धरि (A). ५ हत्थो (A). ६ दिज्जउ (A). ७ कुंतीपुत्ते (E). ८ अग्गा (B), अग्गे (E). ९ एवं (B), dropt in (C). १० किज्जउ (A), dropt in (C). ११ अंत (E). १२ णअ (A). १३ पाअहि (A), पाअउ (B), पाअ (C). १४ णामोअं (A, B & C). १५ १९० (A).

द्वयमन्ते, तथादौ किं तत्राह हस्तः सगणः कुन्तीपुत्रः कर्णो द्विगुरुः तथाच सगणकर्णगणानन्तरं द्विकलगणः । अग्रेऽप्येवं गणौ दीयतां हस्तकर्णा[न]न्तरं सुप्रियो दीयतामित्यर्थः, किन्त्वत्र पूर्व्वलिखित-सुप्रियगणेन सह हस्तगणः कर्त्तव्य इतरथा वर्णाधिक्यप्रसङ्गात्, तदन्ते सप्त गुरवः । अथवा आदौ हस्तगणः ततः कर्णगणः ततः पुनरपि हस्तकर्णौ इति संयुक्तमित्यस्यार्थः, ततः सुप्रियः द्विलघुः । (C).

१९४ । अथैकोनविंशति[त्यक्षर]चरणस्य वृत्तस्य द्विसप्तत्यधिकैक-शताधिकत्रिसहस्रतमं भेदं शंभुनामकं वृत्तं लक्षयति, अवलो-आअमिति । सुच्छंदं — सुच्छंदः एतदिति शेषः [भणि —] भणित्वा [मण]मज्झे — मनोमध्ये सूक्खं — सुखं संवुत्तं — संवृत्तं त्वम् अवलो-आअं — अवलोकय कुंतीपुत्ते संजुत्तं — कुंतीपुत्रेण संयुक्तम् अग्र-स्थितगुरुद्वयात्मकगणयुक्तमिति यावत् हत्था — हस्तं गुर्वंतसगण-मिति यावत् दिज्जसु — दद्स्व अग्गे — अग्रे कर्णाग्रे इति यावत् एवं[अं] गण दिज्जसु — एवंप्रकारेण गणं दद्स्व, पुनरपि सगण-कर्णौ देहीत्यर्थः, अंते — सगणकर्णांते सुपिअं — सुप्रियं लघुद्वयात्मकं गणं ठवि — स्थापयित्वा अंते — पादांते सत्ता हारा — सप्त हारान् गुरून् किज्जसु — कुरुष्व इअ — इति प्रकारेणेति भावः बत्तीसा णिअ मत्ता — द्वात्रिंशन्निजमात्राः जं — यत्र पाअह — पादेषु पतंतीति शेषः संभू णामाअं — शंभुनाम्ना छंदो — छंदः जानीहीति शेषः ॥ (E).

१९४ । अवेति । अवलोकयेदं भणित्वा सुच्छंदो मनोमध्ये सौख्यं

जहा, सिअ विट्ठी[1] किज्जइ[2] जीआ[3] लिज्जइ[4]
बाला[5] बुड्ढा कंपंता
वह पच्छा बाअह[6] लग्गे काअह
सब्बा दीसा झंपंता[7] ।
जइ[8] जड्डा[9] रूसइ[10] चित्ता[11] हासइ[12]
पेटे[13] अग्गी[14] थप्पीआ[15]
कर पाआ संभरि[16] किज्जे[17] भित्तरि
अप्पा अप्पी लुक्कीआ ॥ १९५[18] ॥
संभु ।

सुवृत्तं सुप्रियमंते स्थापय, हस्तो दीयते कुंतीपुत्रसंयुक्तः । गण-मध्ये देहि, एवं कुरुष्वांते सप्त हारा यत्र, इति द्वात्रिंशन्मात्राः पादे छंदः शंभुनामेदं ॥ आदौ हस्तः सगणः, सगणकर्णयोर्द्वयमित्यर्थ-स्तदंते सुप्रियं लघुद्वयं, कर्णौ गुरु[द्वयं], हारो गुरुः । (G).

१९४ । अब लोआ इत्यादि । इदानीं लोकानां भण सुच्छंदः मनोमध्ये सुखं संवृत्तं सुप्रियमन्ते संस्थाप्य कुन्तीपुत्रसंयुक्तं । गणा-

---

१९५ । १ रिठ्ठा (A). २ किज्जसु (B & C). ३ जीवा (A), ज्ञा (C). ४ णिज्जसु (B & C). ५ वाल (E). ६ वाम्र (A). ७ रक्खो रक्खो जंपत्ता (A). ८ जव (A), जहि (B). ९ जड्डा (B), जड्डो (E). १० रोसइ (A, B & C). ११ चिंता (A, B & C). १२ हो सइ (A & B), हो सहि (C). १३ पट्टे (A), मज्झे (B & C), पेट्टे (F). १३ and १४ transposed in (A, B & C). १५ थक्कोआ (A, B & C). १६ सम्मि (A), समुरि (B), सम्बरि (C). १७ किज्जर (A). १८ १९८ (A).

नग्रे देहि एवं कुरु अन्ते सप्त हारा यत्र, एवं द्वात्रिंशन्मात्राः पादे शम्भुनामैतत् ॥ सुच्छंदो भण एतच्छन्दो भण, तेन इदानीं लोकानां मनोमध्ये सुखं संवृत्तं। आदौ हस्तं सगणं दद्यात्, कीदृशं हस्तं कुन्तीपुत्रसंयुक्तं सगणानन्तरं गुरुद्वयं देयं, ततोऽग्रे एवं गणं देहि सगणं गुरुद्वयं पुनर्देहि, अन्ते एतदन्ते सुप्रियं लघुद्वयं संस्थाप्य तदन्ते सप्त हारा गुरवः, एवं समुदायेन द्वात्रिंशन्मात्राः पादे, इदं छन्दः शम्भुनाम। अत्र सप्तसु वर्णेषु यतिः, पुनः पंचसु वर्णेषु यतिः, पुनः सप्तसु वर्णेषु यतिः। * * * (H).

१९५। उदाहरति। शीतवृष्टिः क्रियते, जीवो गृह्यते, बालाः वृद्धाः कम्पन्ते, वहति पश्चाद्वायुः लग्नः काये सर्व्वं देशं व्याप्नोति। यदि शीतं रुष्यति चिन्ता भवति सखि अग्नौ प्रविश्य स्थीयते, करपादं संचित्य क्रियते मध्ये आत्मात्मनि गोप्यते ॥ क्रियते देवेन, रुष्यति अधिकं भवति। जाम्रा इति पाठे जाया रुष्यति कुप्यति पृथक् स्वपिति तदा चिन्तावृद्धिर्भवति। आ[त्म]शरीरं गोप्यत इत्यर्थः। (C).

१९५। शंभुमुदाहरति, सिम्र बिट्ठीति। सिम्र बिट्ठी — शीतवृष्टिः किज्जइ — क्रियते जीम्रा लिज्जइ — जीवो गृह्यते देवेनेति शेषः, बाला बुड्ढा — बाला वृद्धाः कंपंता — कंपंते पच्छा बाम्रह — पश्चिमवाताः वह — वांति, काम्रह — काये लग्गे — लगंति, सब्बा दीसा — सर्वा दिशः झंपंता — आच्छन्ना भवंतीत्यर्थः। जइ जड्डा रोसइ — यदि शीतं रुष्यति, तदा चित्ता हासइ — चित्तं ह्रसति, पेटे — उदरे अग्गी — अग्निः थप्पीम्रा — स्थाप्यते, कर पाम्रा सं[भरि]

जहि[1] आइ हत्थ[2] णरेंद बिसबि[3] पाअ पंचम[4] जोहलो
जहि[5] ठाइ छट्ठहि[6] हत्थ[2] दीसइ[7] सद्द[8] अंतहि[9] णेउरो।
सुह[10] छंद गीअउ मुद्धि[11] णीअउ[12] सब्ब लोअहि जाणिओ
कइ सिट्ठि[13] सिठ्ठउ[14] दिट्ठ[15] दिठ्ठउ[16] पिंगलेण बखा-
णिओ[17] ॥ १९६[18] ॥

—करपादौ संकोच्य भित्तरि—मध्ये किज्जे—क्रियते अप्पा अप्पी—आत्मा आत्मनि लुक्कीआ—गोप्यते ॥ कस्यचिद्दरिद्रस्यैतद्वाक्यं। शंभुर्निवृत्तः। (E).

१९५। यथा। शीतवृष्टिः क्रियते, जीवो गृह्यते, बाला वृद्धाः कंपंते, वहंति पश्चिमवाता लगंति काये, सर्वा दिशो घूर्णंति। यदि जाड्यं दृश्यति, चित्तं हृसति, उदरेऽग्निः स्थाप्यते, करपादौ संकोच्य क्रियते मध्ये आत्मा आत्मनि गोप्यते॥ दरिद्रस्येयमुक्तिः। (G).

१९५। उदाहरणमाह, सिअ विट्ठा इत्यादि। शीतवृष्टिः क्रियते, जीवो गृह्यते, बाला वृद्धाः कंपंते, वहति पाश्चात्यवातः लगति काये, सर्वा दिश आच्छादयन्। यदा जाड्यं दृश्यति तदा

१९६। १ जइ (A, B & C). २ हच्छ (A). ३ वेषवि (B). ४ पंचह (A), पचवि (B). ५ जहिं (A), जइ (B & C). ६ छठ्ठहिं (A), छट्टइ (B & C). ७ दिस्सइ (A). ८ सब्ब (E & F). ९ अंतह (A). १० सोइ (B, C, E & F). ११ मुद्ध (A), dropt in (B). १२ लोअउ (A), dropt in (B), अउ (F). १३ सिट्ठ (A). १४ सिट्ठिउ (C). १५ Dropt in (B), दिट्ठि (C & F). १६ दिट्ठ (C). १७ वाखाणिओ (B). १८ १९९ (A).

चित्ते भवति अग्निपृष्ठे स्थातव्यं करपादं संभृत्य संकुचितं कृत्वेत्यर्थः क्रियते मध्ये आत्मना आत्मनि लीयते ॥ एकोनविंशत्यक्षरप्रस्तारस्य पञ्च लक्षाणि चतुर्विंशतिसहस्राण्यष्टाशीत्यधिकं शतद्वयं भेदास्तेषु कियन्तो भेदा उक्ताः, शेषभेदाः स्वयमवगन्तव्याः । (H).

१८६ । अथ विंशत्यक्षरा ॥ यस्यादौ हस्तः नरेन्द्रौ द्वावपि पादः पञ्चमो जोहलः, यदि स्थाने षष्ठे हस्तो दृश्यते शब्दोऽन्ते नूपुरः । तच्छन्दो गीता शुद्धा नीयते ** कविसृष्ट्या सृष्टं दिष्ट्या दृष्टं पिङ्गलेन व्याख्यातं ॥ गीतेति छन्दोनाम, यदा कविसृष्टिः तदैव इदं सृष्टं, दिष्ट्या भाग्येन दृष्टं गुरुभिः, सो इत्यत्र ओकारो-लघुः । (C).

१८६ । अथ विंशत्यक्षरचरणस्य वृत्तस्य षट्सप्तत्युत्तरपंचशता-धिकाष्टचत्वारिंशत्सहस्रोत्तरं दश लक्षं भेदा भवंति, तत्राष्टोत्तर-शताधिकं [षट्सप्तत्यधिकं] द्विसप्ततिसहस्रोत्तरत्रिलक्षतमं [३७२०७६] भेदं गीतानामकं वृत्तं लक्षयति, जहीति । हे मुद्धि—मुग्धे जहि—यत्र आइ—आदौ हत्थ—हस्तः गुर्वंतः सगण इति यावत् णरेंद बिण्णबि—नरेंद्रद्वयमपि मध्यगुरुजगणद्वयमपीति यावत्, ततः पाअ—पादः आदिगुरुर्भगण इत्यर्थः, पञ्चम—पञ्चमः जोहलो—मध्यलघुरग[ण] इति यावत्, जहि—यत्र छट्ठहि—षष्ठे ठाइ—स्थ[स्था]ने हत्थ—हस्तः गुर्वंतः सगणः अंतहि—अंते सगणांते पादांते वा सल्ल—शल्यं लघुः णेउरो—नूपुरं गुरुः दीसइ—दृश्यते । इदं च क्रियापदं सर्वैः प्रथमांतैर्गणवाचकैः पदैः सह योजनीयं । सोइ—तत्तत् णीअउ—समीचीनं सव्व लोअहि

जाणिश्रो — सर्व्वलोकैर्ज्ञातं त्रैलोक्यप्रसिद्धमिति यावत्, कवि सिट्ठि सिट्ठउ — कविसृष्ट्या सृष्टं दिट्ठ दिट्ठउ — दृष्ट्या दृष्टं पिंगलेण बखाणिश्रो — पिंगलेन विख्यापितं गीश्र छंद — तद्गीतानामकं वृत्तमित्यर्थः॥ वृत्तविशेषणानि पद्यपूरणायेति मंतव्यं। (E).

१८६। अथ विंशत्यक्षरा कृतिः॥ जहीति। यत्रादौ हस्ती-नरेंद्रद्वयमपि पादः पंचमो जोहलो यत्र स्थायी षष्ठे हस्तो-दृश्यते शल्यमंते नूपुरं। तत् छंदो गीता मुग्धे समीचीनं सर्व-लोकैर्ज्ञातं कविसृष्टिसृष्टं दृष्टिदृष्टं पिंगलेन व्याख्यातं॥ हस्तः सगणः, नरेंद्रो जगणः, पादो भगणः, जोहलो रगणः, शल्यं लघुः, नूपुरं गुरुः। गीतानामकं छंदः। (G).

१८६। विंशत्यक्षरप्रस्तारे कानिचिच्छंदांसि वदति, जइ आइ इत्यादि। यत्र आदौ हस्तो नरेन्द्रौ द्वावपि पादः पञ्चमो योधो-यत्र स्थाने षष्ठे हस्तो दृश्यते शब्दः अन्ते नूपुरः। तच्छंदः गीता मुग्धानां नीता सर्वलोकैर्ज्ञाता कविश्रेष्ठसृष्टा दिष्ट्या दृष्टा पिंग-लेन व्याख्याता॥ यत्र आदौ हस्तः सगणः, द्वौ नरेंद्रौ जगणौ, पादो भगणः, योधो रगणः पंचमः, षष्ठस्थाने हस्तः सगणस्ततः शब्दो लघुरन्ते नूपुरो गुरुश्छन्दसो नाम गीता, कीदृशी मुग्धानां मनोहराणां मध्ये नीता गणिता सर्वलोकैर्ज्ञाता, कीदृशी गीता कविश्रेष्ठेन सृष्टा दृ[दि]ष्ट्या भाग्येन दृष्टा पिंगलेन व्याख्याता। पशुपतिनैवं व्याख्यातं। कविसृष्टिसृष्टा कविसृष्टौ सृष्टा यदा कवयः सृष्टास्तदा एषापि सृष्टेत्यर्थः, दृष्टिश्छंदःशास्त्रं तेन[तया] दृष्टा। सगण-जगणद्वय-भगण-रगण-सगण-लघुगुरुभिर्वर्णैर्गीता।

जहा,

जइ[1] फुल्ल[2] केअइ चारु चंपअ[3] चूअ[4] मंजरि[5] बंजुला[6]
सब दीस दीसइ केसु काणण पाण बाउल भम्मरा[7] ।
बह पोम्म[8]गंध बिबंधु[9] बंधुर मंद[10] मंद समीरणा
णिअ[11]केलि कोतुक[12]लास लंगिम[13] लग्गिआ तरुणी[14]
जणा[15] ॥ १९७[16] ॥ गीता ।

तद्गणक्रमराहित्येन मात्रावृत्ते हरिगीतेयं [Vide श्लोकः १९१, p. 306.] । उक्तं छंदःपारिजाते । सगणं पुरो विनिधाय जद्वयमुज्ज्वलं भगणान्ततो—रगणं ततः सगणं निधेहि विधेहि लं गुरुमन्ततः । फणिराजनिर्मितवृत्तमद्वरगीतकं * * * * * हरिगीतकेति पुरा कलाकृतवृत्तकेऽनियमस्थितं ॥ (H).

१९७ । यथा । उदाहरति । यदि फुल्लानि केतकी-चारुचम्पक-यूथिमञ्जरी-वञ्जुलानि सर्व्वस्यां दिशि दृश्यते किंशुककाननं पान-व्याकुलभ्रमराः । वहन्ति पद्मगन्धविबन्धुबन्धुरा मन्दमन्दसमीरणाः निजकेलिकौतुकलासलङ्गिमलग्नास्तरुणीजनाः ॥ विशेषेण बन्धुर्व्विबन्धुः, बन्धुरा विलक्षणाः । (C).

---

१९७ । १ जहि (A), जइ (B & C). २ फुल्लु (E & F). ३ चम्पइ (B & C). ४ जूथ (C). ५ मरि (E). ६ वञ्जला (B), वञ्जुला (E & F). ७ Dropt in (B), म्मरा (C). ८ Dropt in (A), पोम (B & C), पम्म (E). ९ बंधु विबंध (A), विबन्ध (B). १० Dropt in (B). ११ पिअ (A). १२ कौतुक (A, E & F). १३ लाङ्गम (B). १४ तरुणि (E). १५ गणा (A). १६ २०० (A).

१८७। गीतामुदाहरति, जहेति। जह—यत्र केअइ चारु चंपअ चूअ मञ्जरि वंजुला—केतकिचारुचंपकचूतमञ्जरीवञ्जुलानि [केतकी] चारूणि चंपकानि चंपकपुष्पाणि चूतस्य मञ्जर्य्यः नवपल्लवानि वञ्जुलानि चैतानीत्यर्थः फुल्लु—पुष्पितानि विकसितानीति यावत्, केसु काणण—किंशुककाननं सव दीस दीसइ—सर्वस्यां दिशि दृश्यते, भम्मरा—भ्रमराः पाण वाउल[ल]—पानव्याकुला मकरंदानुपानप्रमत्ता इत्यर्थः जाता इति शेषः। पम्म गंध विवंधु—पद्मगंधविबंधुः क[म]लसौरभस्य विशिष्टो बंधुरित्यर्थः, बंधुरः विचक्षणो मानिनीमानभंजने इति भावः [मंद मंद—मन्दमन्दः] समीरणा—समीरणः वातः वह—वाति, तरुणीजनाः णिअ केलि को[कौ]तुक लास लंगिम लग्गिआ—निजकेलिकौतुकलास्यलंगमलग्नाः। (E).

१८७। यथा। यत्र फुल्लकेतकीचारुचंपकचूतमंजरीवंजुलाः सर्वा दिशो दृश्यंते किंशु[क]काननपानव्याकुला भ्रमराः। वहति पद्मगंधं बंधुबंधुरो मंदं मंदः समीरणो निजकेलिकौतुकलास्यलंगिमलग्नस्तरुणीजनः॥ (G).

१८७। उदाहरणमाह, जहि फुल्ल इत्यादि। यत्र फुल्लाः केतकीचारुचम्पकचूतमञ्जरीवञ्जुलाः सर्व्वासु दिक्षु दृश्यन्ते किंशुककानने पानोन्मत्ता भ्रमराः। वहति पद्मगंधविशिष्टबंधुबंधुरो मंदमंदं समीरणो निजकेलिकौतुकलासभङ्गीलग्नास्तरुणीजनाः॥ सुवर्णकेतकीविकाशो वसन्ते, वंजुला अशोकाः, वंजुलः पुंसि तिनिशे वेतसाशोकयोरपि। (H).

रग्गणा पलंतआ[1] पुणो णरेंद कंतआ सुछक्कएण[2]
हार[3] एक्क मंतही सुसद्द पाअ अंतही सुसक्कएण ।
गंडआ गणेहु ए सुबस[4] संख बीसए[5] फणिंद गाउ[6]
तीस मत्त पाअ[7]पत्त हार तीअ भाअएण[8] सद्द आउ[9] ॥
१९८[10] ॥*

१९८। रगणाः पतन्ति पुन[र्न]रेन्द्रः कान्तः सुषट्केन हारमेकं मन्त्रयस्व जानीहि शोभनः शब्दो लघुः सुसत्कतेन षट्केनेत्यर्थः, शोभनप्रकारेणेति वार्थः। * * * त्रिंशतस्तृतीयभागो दश संख्यास्तेन हारा दश, शब्दा लघवो दशेत्यर्थः। (C).

१९८। अथ विंशत्यक्षरचरणस्य वृत्तस्यैकपंचाशदधिक[नव]-नवतिसहस्रोत्तरपंच[षट्]लक्षतमं [६९९०५१] भेदं गण्ड[क]नामकं वृत्तं लक्षयति, रग्गणेति। रग्गणा—रगणः मध्यलघुर्गण इति यावत् पलंतआ—पतति पुनः कंतआ—कांतः णरेंद—नरेंद्रो मध्यगुरुर्जगण इति यावत् पततीति पूर्वेणान्वयः, एवं सुसक्कएण—स्वशक्त्या निजकविलसामर्थ्येन सुछक्कएण—सुषट्केन भण गणषट्केनेत्यर्थः सह एक्क—एकं हारु—हारं गुरुं मंतही—आमंत्रयस्व स्थापयस्वेत्यर्थः, पाअ अंतही—पादांते सुसद्द—

१९८। १ पलअंतआ (A), पुलन्तआ (B). २ सुच्छन्दएण (C). ३ हाव (E & F). ४ सुवण (A). ५ कंकणे (A), टक्कले (B), टक्कणे (C). ६ एम णाउ (A). ७ पाउ (E & F). ८ भाग एहु (A), भाअ एहु (B & C). ९ भाउ (A). १० २०१ (A). * This metre has been designated वृत्तं in Pingala's Sanskrit treatise. Vide Ghosha's Compendium, p. 97.—Ed.

सुशब्दः शोभनो लघुर्द्वय इति शेषः । यत्र संख—संख्याया बीसए—विंशतिः सुवस—सुवर्णाः तीस मत्त—त्रिंशन्मात्राः पाअ पत्त—पादे प्राप्ताः तीअ भाअएण—तृतीयभागेन त्रिंशत्तृतीयभागो-दश [त]त्संख्ययेति यावत् हारः गुरुः स दश लघुः आउ—आयाति पततीति यावत्, ए—एनं गण्डआ—गण्डकं गणेहु—गणयस्व बुध्यस्वेत्यर्थः, इति फणिंद—फणीन्द्रः गाउ—गायति ॥ प्रथमं गुरुस्तदनंतरं लघुः पुनः गुरुस्तदनंतरं लघुरेवंक्रमेण यत्र विंशत्य-क्षराणि चरणे पतंति तद्गण्डकनामकं वृत्तमिति फलितार्थः । (E).

१९८ । रग्गेति । रगणः पतति पुनर्नरेंद्रः कांत एतयोः सुषट्केन, हार एकोऽंते सुशब्दः पादांते स्वशक्तिकया । गंडकं गणयस्व वर्णसंख्या विंशतिः फणींद्रो गायति, त्रिंशन्मात्राः पादे प्राप्ताः हारास्तृतीयभागेन शब्द आयातः ॥ नरेंद्रो जगणः, रजयोः षट्कं कर्त्तव्यं, हारो गुरुः, सुशब्दो लघुः । (G).

१९८ । रग्गण इत्यादि । रगणः पतति पुरो नरेन्द्रः कांतः सुषट्केन, हारम् एवमामंत्रय[स्व] सुशब्दः पादान्ते सुसत्तातेन । गण्डकां गणय अस्य छंदसो वर्णसंख्यां विधेहि फणीन्द्रो गायति, त्रिंशन्मात्राः पादे, प्राप्तस्तृतीयभागो हारः सुशब्दस्तावान् ॥ आदौ रगणः पतति यत्र पुनर्नरेन्द्रः कान्तः सुषट्केन रगणस्ततो जगणः एवंक्रमेण षड्गणाः कर्त्तव्या हारं गुरुमेकमामंत्रय[स्व] कुरु, सुशब्दं लघुं पादान्ते आमंत्रय[स्व] कुरु, सुसंस्कृतेन सुप्रकारेण गण्डकां छंदसो नाम गणय, अस्य छन्दसो वर्णसंख्यां टंकले कुरु त्रिंश-न्मात्राः पादे, त्रिंशन्मात्रायास्तृतीयभागः प्राप्तः तृतीयभागो दश

जहा,

ताव बुद्धि[1] ताव सुद्धि[2] ताव दाण ताव माण[3] ताव[4] गव्व
जाव जाव[5] हत्थ[6] णच्च[7] बिज्जु रेह[8] रंग णाइ[9] एक्क दव्व।
एत्थ[10] अंत[11] अप्प दोस देव[12] रोस होइ[13] णट्ट सोइ सव्व[14]
कोइ बुद्धि[15] कोइ सुद्धि[16] कोइ दाण कोइ माण कोइ गव्व ॥
१९९[17] ॥ गंडका ।

तेन दश गुरवस्तावंतो लघवस्तेन दश लघवः, समुदायेन विंशत्य-क्षराणि पादे । टंकशब्दो गौडदेशीयः संख्याकरणवाचकः । (H).

१९९ । उदाहरति । तावद्बुद्धिस्तावत् शुद्धिस्तावद्दानं ताव-न्मानः तावद्गर्व्वः, यावत् हस्ते हस्ते नृत्य[ति] सर्व्वं विद्युदिव रङ्ग-मेकं द्रव्यं। स्वयमेनात्मनो दोषेण दैवरोषेण भवति नष्टं तदेव सर्व्वं, कुत्र बुद्धिः कुत्र शुद्धिः कुत्र दानं कुत्र मानः कुत्र गर्व्वः ॥ एकं द्रव्यं सर्व्वं सर्व्वात्मकं द्रव्यं, विद्युद्रङ्गं चञ्चलत्वात्, स्त्रीनिमित्तेन यदा तदा इत्यध्याहार्य्यं । (C).

१९९ । गण्डकमुदाहरति, तावेति । जाव — यावत् हत्थ — हस्ते

---

१९९ । १ and २ transposed in (E & F). ३ Transposed in (E). ४ Dropt in (B). ५ ताव सव्व (A), जाव once only in (E & F). ६ हच्छ (A). ७ सव्व between णच्च and बिज्जु (A & C). ८ and ९ dropt in (A & C). ९ Dropt in (B). १० एच्छ (A), dropt in (B & C). ११ अन्त (B), dropt in (C). १२ Dropt in (B & C), देव (E). १३ Dropt in (A, B & C). १४ दव्व (E). १५ and १६ transposed in (E). १६ Dropt in (C). १७ २०२ (A).

वे कणा गंध हारा[१] वलश्र दिश्रगणा हत्थ[२] हारा पलंता[३]
एक्कल्ला[४] सल्ल कणा[५] धश्रपश्र[६] सहिश्रा कंकणा[७] श्रंत कंता[८]।
बीसा एक्क[९] ग्गला जं पलइ लहु गुरू बारहा होइ[१०] दीहा[११]
पिंडा[१२] बत्तीस श्रग्गा सउ[१३] फणि भणिश्रा[१४] सद्दरा होइ[१५]
मुद्दा[१६] ॥ २००[१७] ॥

बिज्जु रेह रंग णाइ — विद्युद्रेखारंगवत् अतिचंचलमिति भावः एक्क — एकं दब्ब — द्रव्यं णच्च — नृत्यति, ताव बुद्धि — तावद्बुद्धिः तावत् शुद्धिः तावत् मानः तावत् दानं तावत् गर्वः । [एत्थ श्रंत — एतदन्ते] सोइ — तत् द्रव्यं अप्प दोस — आत्मदोषेण देब रोस — दैवरोषेण यदीति शेषः णट्ठ — नष्टं होइ — भवति तदेति शेषः, कोइ बुद्धि — [कुत्र बुद्धिः] कुत्र शुद्धिः कुत्र मानः कुत्र दानं कुत्र गर्वः ॥ (E).

१९९ । यथा । तावत् शुद्धिस्तावद्बुद्धिस्तावन्मानस्तावद्दानं तावद्गर्वो यावद्धस्ते नृत्यति विद्युल्लेखारंगणवद् एकं द्रव्यं। एतन्मध्ये आत्मदोषेण दैवरोषेण भवति नष्टं तत्सर्वं, का बुद्धिः का शुद्धिः किं दानं को मानः को गर्वः ॥ (G).

१९९ । उदाहरणमाह, ताव बुद्धि इत्यादि । तावद्बुद्धिस्तावत् शुद्धिस्तावद्दानं तावन्मानस्तावद्गर्वः, यावद् यावद्धस्ते हस्ते नृत्यति

---

२०० । १ हार (A). २ हच्छ (A). ३ वलंता (A). ४ एकणा (A, B & C), dropt in (F). ५ कण (F). ६ धञ वल (A), धस वट (B & C). ७ संखचा (A). ८ कणा (A). ९ एक (A & C). १० पाच (A), होहि (E). ११ दिहा (E). १२ पेंडा (A). १३ चग्गा सच (A), चग्ग स (E). १४ फणिचा (B). १५ हो (C). १६ सुद्दा (A). १७ २०२ (A).

सर्वविद्युद्रङ्गमेकं द्रव्यं। एतदन्ते आत्मदोषेण दैवरोषो भवति नष्टं तदेव द्रव्यं, तदा का बुद्धिः का शुद्धिः किं दानं को मानः को गर्व्वः ॥ बिज्जु रङ्ग इति विद्युद्वत् चंचलं, द्रव्यनाशे आत्मदोषेण दैवरोषः कारणं। विंशत्यचरप्रस्तारस्य दशलचाणष्टचत्वारिंशत्सहस्राणि षट्शतत्यधिकानि पंचशतभेदास्तेषु भेदद्वयमुक्तं शेषभेदाः स्वयमवगन्तव्याः । (H).

२०० । अथ एकविंशत्यचरा ॥ द्वौ कर्णौ गन्धहारौ वलयद्विजगणौ हस्तहारौ वलन्तौ एकं शल्यं कर्णौ ध्वजपटः कङ्कणमन्ते कांतं । विंशतिरेकाधिका यत्र पतति लघुगुरुभिर्द्वादश भवन्ति दीर्घाः, पिण्डिता द्वाचिंशदग्रं शतं फणिभणिता स्रग्धरा भवति मुग्धा ॥ पिण्डिताः पादचतुष्क एकीकृता द्वाचिंशदधिकशतमित्यर्थः । (C).

२०० । अथैकविंशत्यचरचरणस्य वृत्तस्य चि[द्वि]पंचाशदुत्तरैकशताधिकसप्तनवतिसहस्रोत्तरं विंशतिर्लचं भेदा [भ]वंति, तत्र पञ्चोत्तरशतचयाधिकनवाधिकनवतिसहस्रोत्तरैकलचतमं [चिनवत्युत्तरनवशताधिकद्विसहस्रोत्तरचिलचतमं ३०२९९३] भेदं स्रग्धरानामकं वृत्तं लचयति, बे कस्रेति। यत्र प्रथमं बे कणा — द्वौ कर्णौ गुरुद्वयात्मकगणावित्यर्थः, ततो गंध हारा — गंधहारौ लघुगुरू इति यावत्, ततश्च वलश्च दिअगणा — वलयद्विजगणौ गुरुलघुचतुष्टयात्मकगणाविति यावत्, ततः हत्थ हारा — हस्तहारौ सगणगुरुकावित्यर्थः यत्र पलंता — पततः, ततश्च एक्कसा — एकलं शल्यं लघुः कस्रा — कर्णो गुरुद्वयात्मको गण इत्यर्थः अंत — अंते कर्णगणाग्रे इत्यर्थः धअपअ सहिआ — ध्वजपटसहितः लघ्वादि-

त्रिकलगणसहित इत्यर्थः कंता — कांतः कंकणा — कंकणं गुरुरित्यर्थः यत्र पततीति शेषः । जं — यत्र एक्कग्गला — एकाधिका बीसा — विंशतिः एकविंशतिरिति यावत् लहु गुरू — लघुगुरवः पलइ — पतंति बारहा — द्वादश दीहा — दीर्घाः होहि — भवंति, पिण्डा — पिंडिताः बत्तीस अग्गा सउ — द्वात्रिंशदधिकशतं मात्रा इति शेषः यत्र भवंतीति पूर्वेणान्वयः, सा फणि भणिआ — फणिभणिता मुद्धा — मुग्धा मनोज्ञेति यावत् सद्धरा — स्रग्धरा होइ — भवति ॥ स्रग्धरानामकं तद्वृत्तं भवतीत्यर्थः । (E).

२०० । अथैकविंशत्यक्षरा प्रकृतिः ॥ बे कण्णेति । द्वौ कर्णौ गंधहारौ वलयद्विजगणौ हस्तहारौ पततः एकं शल्यं कर्ण-ध्वजपटसहितः कंकणमंते कांतं । विंशतिरेकाधिका यत्र पतंति लघुगुरवो द्वादश भवंति दीर्घाः, पिंडीभूता द्वात्रिंशदधिकं शतं फणिभणिता स्रग्धरा भवति मुग्धा ॥ कर्णो द्विगुरुः, गंधो लघुः, हारो गुरुः, वलयं गुरुः, द्विजस्तुर्लघुः, हस्तः सगणः, शल्यं लघुः, ध्वजो लघुगुरू, कंकणं गुरुः । (G).

२०० । एकविंशत्यक्षरप्रस्तारस्य कानिचित् छंदांस्याह, बे कण्णा इत्यादि । द्वौ कर्णौ गन्धहारौ वलयद्विजगणौ हस्तहारौ पततः, एकः शल्यः कर्णो ध्वजपटसहितः कंकणमन्ते कान्तं । विंशति-रेकाधिका यत्र पतति लघुगुरुभ्यां द्वादश भवन्ति दीर्घाः, पिण्डः द्वात्रिंशदधिकं शतं फणिभणिता स्रग्धरा भवति शुद्धा ॥ यत्र प्रथमं द्वौ कर्णौ, कर्णो गुरुद्वयगणः कर्णद्वयगणेन गुरुचतुष्टयं, गंधो लघुर्हारो गुरुर्व्वलयो गुरुस्ततो द्विजगणस्तुर्लघ्वात्मकस्ततः

जहा, ईसा रोस प्पसाद[१]प्पणदिसु[२] बहुसो
सग्ग गंगा जलेहिं
आमूलं पूरिदाए तुहिण कर कला[३]
रुप्प सिप्पीअ[४] रुद्दो[५] ।
जोण्हा[६] मुत्ताह[७] लिल्लं णद[८] मउलि[९] णिहि-
त्तग्ग[१०] हत्थेहिँ[११] दोहिं
अग्घं[१२] सिग्घं[१३] व देन्तो[१४] जअइ गिरिसुआ[१५]
पाअ पंकेरुहाणं ॥
२०१[१६] ॥ स्रग्धरा ।

हस्तः सगणो हारो गुरुः पतति, एकः शल्यो लघुः कर्णो गुरुद्वयं, कर्णः कीदृशः ध्वजपटसहितः ध्वजपटो लघुगुरुरूपो गणस्तत्सहितोऽन्ते कंकणं गुरुः कान्तं। एकाधिका विंशतिर्व्वर्णा लघुगुरुभ्यां, द्वादश भवंति दीर्घा गुरवः, पारिशेष्यान्नव लघवः, पिण्डः शरीरं द्वात्रिंशदधिकशतमात्रात्मकं छंदः समुदायेन भवति, इयं शुद्धा स्रग्धरा फणिभणिता ॥ अत्र सप्तसु वर्णेषु यतिः, पुनः सप्तसु

२०१। १ प्पसद (C). २ प्पणतिसु (B). ३ चला (A), गणा (B). ४ Dropt in (B), सिद्दीअ (C), सौप्पीअ (E). ५ वद्दो (B), रुद्दो (E). ६ जोह्ला (A & B), जोह्णा (E). ७ मोत्ताह (B, C & E), मुत्तह (F). ८ णज (B), णच (C), पणद (F). ९ मौउलि (E), मुलि (F). १० णिहित्ताग्ग (C). ११ हत्थेहिँ (A), त्थं (E). १२ अग्गं (B), अग्घं (F). १३ दिगघं (B), सिग्घे (E), सिद्दं (F). १४ देण्तो (B), देन्तो (C), वे देतो (E), वदेंतो (F). १५ गौरिसुआ (E). १६ २०४ (A).

वर्णेषु यतिः, पुनः सप्तसु वर्णेषु यतिः । उक्तं छन्दःपारिजाते । आदौ मो रस्ततो भस्तदनु च नगणः स्यायकारस्ततो यौ, सप्ताश्वाश्वैर्विरामः फणिपतिगदिता स्रग्धरेयं प्रसिद्धा । एषा सत्काव्यमुद्रावचनपरिणता मानमानामुदञ्चत्स्रोतोमूर्छत्तरङ्गो भवति कवियशःश्रीः प्रमोदं स्रवन्ती ॥ (H).

२०१ । उदाहरति । ईर्ष्यारोषप्रसादप्रणतिषु बहुशः स्वर्गगङ्गाजलैरामूलं पूरितया तुहिनकरकलारूप्यशुक्त्या रुद्रः । ज्योत्स्नामुक्ताफलयुक्तं नतमौलिनिहिताग्रहस्ताभ्यां द्वाभ्याम् अर्घ्यं ग्रीप्रमिव ददत् जयति गिरिसुतापादपङ्केरुहाणां ॥ ईर्ष्याजन्यो रोषस्तन्निमित्तये प्रसादस्तदर्थं प्रणतिषु, चन्द्रकलेव शुक्तिपात्रं । अर्थान्तरानुकर्षमाह, ज्योत्स्नेति मत्वर्थे नप्रत्ययः, इवार्थे वशब्दः । (C).

२०१ । स्रग्धरामुदाहरति, ईसेति । ईसा रोस प्पसाद प्पणदिसु—ईर्ष्यारोष[प्र]सादप्रणतिषु ईर्षया यो रोषस्तन्निवृत्तये यः प्रसादस्तन्निमित्तं याः प्रणतयस्तास्वित्यर्थः बहुसो सग्ग गंगा जलेहिं—बहुशः स्वर्गगंगाजलौघैः आमूलं पूरिदाए—आमूलं पूरितया तुहिण कर कला रुप्प सिप्पीअ—तुहिनकरकलारौप्यशुक्त्या गो[गिरि]सुआ पाअ पंकेरुहाणं—गिरिसुता[पाद]पंकेरुहयोः दोहिं—द्वाभ्यां णद मौ[मउ]लि णिहित्ताग्ग हत्थेहिँ दोहिं—नतमौलिनिहिताग्रहस्ताभ्यां द्वाभ्यां जोओ[ण्हा] मोत्ताहलिल्लं—ज्योत्स्नायुक्तं [मुक्ता]फलयुक्तम् अग्घं सोग्घं देन्तो व—[अर्घ्यं ग्रीप्रं] ददद्दिव रुदो—रुद्रः जअइ—जयति ॥ स्रग्धरा निवृत्ता । (E).

आइहि जत्थ[१] पाअगण[२] पअलिअ जोहल[३] अंत धरीजे[४]
काहल सद्द गंध इअ मुणि गण[५] कंकण अंत[६] करीजे ।
सद्दइ एक्क[७] भेरि[८] चलु[९] णरवइ फुक्कइ[१०] संख[११] सुभव्वा[१२]
चामर जुग्ग अंत जहि[१३] पअलिअ
एहु[१४] णरेंदउ[१५] कव्वा[१६] ॥ २०२[१७] ॥

२०१ । यथा । ईर्षारोषप्रसादप्रणतिषु बहुशः स्वर्गगंगाजलैरामूलं पूरितया तुहिनकरकलारौप्यशुक्त्या रुद्रः । ज्योत्स्नामुक्ताफलितं प्रणतमौलिनिहिताग्रहस्ताभ्यां द्वाभ्यामर्घं शीघ्रमिव ददज्जयति गिरिसुतापादपंकेरुहयोः ॥ (G).

२०१ । उदाहरणमाह, ईसा रोस इत्यादि । ईश्वरीरोषप्रसाद-प्रणतिषु बहुशः स्वर्गगंगाजलैरामूलं पूरितया तुहिनकरकला-रूप्यशुक्त्या रुद्रः । ज्योत्स्नामुक्ताफलाढ्यं नतमौलिनिहिताग्रहस्ताभ्यां द्वाभ्याम् अर्घं शीघ्रं ददत् जयति गिरिसुतापादपङ्केरुहयोः ॥ कर्पूरमञ्जरीनाटकस्थं । (H).

२०२ । आदौ यत्र पादगणः प्रकटितः जोहलोऽन्ते ध्रियते, काहलशब्दगन्धशब्दवाच्या लघवस्तेषां मुनिगणः सप्त लघवः कंकणं

२०२ । १ इच्छ (A). २ भगण गण (A). ३ जोहलु (B), जोहणु (C). ४ ठवीजे (A, B & C). ५ एम दिअगण (A), इ मुणिगण (B), मुद मुणिगण (C). ६ ताह (A & B), ताइ (C). ७ एक (C). ८ भेरी (E). ९ चल (E & F). १० फुकउ (A), फुक्कव (B & C). ११ सद्द (A), सङ्ख (C). १२ सुहव्वा (B & C). १३ जह (E & F). १४ एह (A), छेह (B). १५ णरिंदउ (A & E), णरेंदइ (B), णरेन्द (C). १६ छंदा (E & F). १७ २०५ (A).

क्रियते हारः । शब्द्यते भेरी चलितो नरपतिः फुल्कियते शङ्खः सुभव्यश्चामरयुगं यत्रान्ते प्रकटितं तन्नरेन्द्रकाव्यं ॥ शब्द्यते कथ्यते, फुल्कियते उच्यते, काव्यं छन्दः । तथाच यदा नरेन्द्रो गच्छति, तदा पदातियोधाः काहलशब्दसुगन्धिकङ्कणान्यनुसरन्ति, भेरी शब्द्यते, अन्यो नरपतिरनुगच्छति, शङ्खः फुल्कियते, चामरयुगं प्रकटीक्रियते । (C).

२०२ । अथैकविंशत्यक्षरचरणस्य वृत्तस्य विंशत्युत्तरशतद्वयाधिकचत्वारिंश[एकोनविंशत्युत्तरपंचशताधिकपंचाश]त्सहस्रोत्तरचतुर्लक्षतमं [४५०५१८] भेदं नरेन्द्रनामकं वृत्तं लक्षयति, आइहीति । जत्थ—यत्र आइहि—आदौ पाअगण—पादगणो गुर्वादिर्भगण इति यावत् पअलिअ—प्रकटितः, अंत—अंते भगणावसाने इति यावत् जोहल—जोहलो मध्यलघुरगण इत्यर्थः धरीजे—ध्रियते स्थाप्यत इति यावत्, ततः काहल सद्द गंध—काहलशब्दगंधाः एकलघव इत्यर्थः इअ—एते मुणि गण—मुनिगणाः सप्त गणा इति यावत् देया इति शेषः, तथाच रगणानंतरं सप्त लघवः स्थाप्या इति भावः, ताह—ततः सप्तलघ्वनंतरमिति यावत् कंकण—कंकणं गुरुरित्यर्थः करीजे—क्रियते । ततश्च एक भेरी[रि]—एका भेरी लघुरित्यर्थः सद्दइ—शब्दायते स्थाप्यत इत्यर्थः, णरवइ—नरपतिर्मध्यगुरुर्जगणः चल—चलति तिष्ठतीत्यर्थः, सुभव्वा—सुभव्यः संख—लघ्वात्मको गणः फुक्कइ—फुल्कियते उच्यते इत्यर्थः जह—यत्र अंत—अंते पादांते चामर जुग्ग—चामरयुगं गुरुद्वयमित्यर्थः पअलिअ—प्रकटितम् एऊ—एतत् णरिंदउ छंदा—नरेंद्रच्छंदः ॥ (E).

२०२ । आईति । आदौ यत्र पादगणः प्रकटितो जोहलोऽंते भ्रियते, काहलशब्दगंधा इति मुनिगणाः कंकणमंते क्रियते। शब्दायते एका भेरी चलति नरपतिरुच्यते शंखः सुभव्यं चामर-युगमंते यत्र प्रकटितमेतन्नरेंद्रच्छंदः ॥ पादो भगणः, जोहलो रगणः, मुनिः सप्त, एवंच सप्त लघवः कार्या इत्यर्थः, कं[कणं] गुरुः, भेरी लघुः क्रियते नरपतिर्जगणः, शंखो लघुः, चामरं गुरुः । (G).

२०२ । आइहि जत्थ इत्यादि । आदौ यत्र पादगणः प्रकाश्यते योधोऽन्ते स्थाप्यते, काहलः शब्दः गंधः एवं मुनिगणः कंकणस्तत्र क्रियते। शब्दायते एका भेरी चलितो नरपतिः फुत्कार्य्य शंखं सुभव्यं, चामरयुगमंते यत्र प्रकटितमेतत् नरेन्द्रकाव्यं ॥ यत्र आदौ पादगणो भगणः प्रकाश्यते, अन्ते भगणान्ते जोहलो रगणः स्थाप्यते, काहलो लघुः शब्दो लघुर्गन्धो लघुरेवंक्रमेण लघुत्रयं ततो मुनिगणश्चतुर्लघुगणस्तेन सप्त लघव इत्यर्थस्तत्र कंकणं गुरुः क्रियते। एका भेरी शब्दायते लघुः भवतीत्यर्थस्ततो नरपतिर्जगण-श्चलति भवति शंखं फूत्कार्य्य लघुं स्थापय, शंखं कीदृशं सुभव्यं, चामरयुगमन्ते प्रकाश्य गुरुद्वयं स्थाप्यं, एतन्नरेन्द्राख्यं काव्यं ॥ अथच यदा नरपतिश्चलति तदादौ पादगणः पदातिगणः प्रकटितो-भवति, योधगणोऽन्ते स्थाप्यते, ततः काहलशब्दः, कर्पूरागुरु-सारादेर्गन्धः, मुनिगणा द्विजा आशीर्वादपुरस्सरमग्रे चलन्ति, कंकणाद्याभरणं क्रियते, भेरी शब्दायते, शंखफूत्कारो जायते, नरेन्द्रस्य पार्श्वे चामरद्वयं स्थाप्यते ॥ अत्र द्वादशसु वर्णेषु यतिः, पुनर्नवसु वर्णेषु यतिरथवा त्रयोदशसु वर्णेषु यतिरष्टसु वर्णेषु

जहा, फुल्लिअ[1] केसु चंद[2] तह पअलिअ[3]
मंजरि तेज्जइ[4] चूआ
दक्खिण वाउ[5] सीअ[6] भइ पवहइ[7]
कंप बिओइणि[8] हीआ।
केअइ[9] धूलि सब्ब दिस[10] पसरइ[11]
पीअर[12] सब्बउ भासे
आउ[13] बसंत काइ[14] सहि[15] करिअइ[16]
कंत ण थक्कइ[17] पासे॥
२०३[18]॥ नरेन्द्रः।

यतिः। उक्तं छंदःपारिजाते। भं रचयाथ रेफनयुगलकमथो जयुगं च यकारं, पिंगलनाग[राज]निगदितमिह वर्णनरेन्द्र-मुदारं। भानुविराममेतदथ तदपरवर्णविरामविकल्पं, शिष्ट-नवाष्टकान्यतरदिति कुरु वेह विभाति सुकल्पं॥ (H).

२०३। [उदाहरति] फुल्लं किंशुकं, चन्द्रस्तथा प्रकटितः, मञ्जरिं व्यनक्ति चूतः, दक्षिणो वातः शीतो भूत्वा प्रभवति, कम्पते वियोगिनीहृदयं। केतकीधूलिः सर्व्वदिक्षु प्रसारिता सर्व्वं पीतं भासते,

---

२०३। १ फुल्लिअ (E & F). २ चंपअ केसु (A). ३ विअसिअ (A), पलिअ (C). ४ वज्जइ (C). ५ वाअ (B & C). ६ सिअल (A). ७ पववइ (B), परचइ (C). ८ विजोइणि (F). ९ केअलि (B), केसइ (F). १० दिसे दिसे (A). ११ पसरिअ (B & C). १२ Dropt in (B), पीवर (F). १३ आइ (A & B). १४ काहि (B), काहि (C). १५ सखि (F). १६ करिहउ (A), करिहइ (B & C). १७ त्यक्क (F). १८ २०६ (A).

बिज्जूमाला आई[1] पाए तिअ दिअगण[2] तह बहु[3]गुण जुत्ता
अंते कण्णा सुद्धा बण्णा[4] भण फणिबइ कइबर[5] गुण[6]जुत्ता ।[7]
जं बत्तीसा मत्ता थक्के पअ पअ पअलिअ लहु[8] गुरु[9] सोहा
एसो[10] हंसी णामा[11] छंदो[12]
सअल बिबुहअण किअ मण[13]मोहा[14] ॥ २०४[15] ॥

आगतो वसन्तः सखि किं करवाणि कान्तो न तिष्ठति पार्श्वे॥ सुवर्णकेतकी वसन्ते स्फुटतीति । (C).

२०३ । नरेंद्रमुदाहरति, फुल्लिअ इति । केसु — किंशुकं फुल्लिअ — पुष्पितं तह — तथा चंद — चंद्रः पअलिअ — प्रकटितः*** (E).

[Here four leaves are wanting in the MS. (E).—Ed.]

२०३ । यथा । पुष्पितं किंशुकं, चंद्रस्तथा प्रकटितः, मंजरीं त्यजंति चूताः, दक्षिणवायुः शीतो भूत्वा प्रवहति, कंपते वियोगिनीहृदयं । केतकीधूलिः सर्वदिक्षु प्रसरति, पीतं सर्वमपि भासते, आगतो वसंतः किं सखि क्रियते, कांतो न तिष्ठति पार्श्वे ॥ (G).

२०३ । उदाहरणमाह, फुल्लिअ इत्यादि । फुल्लितं किंशुकं, चंपकं प्रकटितं, मंजरी गृहीता चूतैर्दक्षिणो वातः शीतो भूत्वा वहति, कम्पते वियोगिनीहृदयं । केतकीधूलिः सर्वासु दिक्षु

---

२०४ । १ पाए (A). २ दिअगह (C). ३ विड (B & C). ४ दिज्जे भण्णा (F). ५ करिवर (A). ६ ग (A). ७ Second quadrant dropt in (C). ८ and ९ transposed in (B & C). १० एसा (A). ११ णागा (A). १२ छन्दो (C). १३ बुही अण मणइ अव (A), बुहअ अणु मणुहव (B), बुअह भणइ हवइ (C). १४ सोहा (B & C). १५ २०७ (A).

प्रसरति, पीतं सर्वं भासते, आगतो वसंतः किं सखि कर्त्तव्यं कांतो-न तिष्ठति पार्श्वे ॥ सुवर्णकेतकीविकाशो वसन्ते । एकविंशत्यक्षर-प्रस्तारस्य विंशतिलक्षाणि सप्तनवतिसहस्रं द्विपञ्चाशदधिकमेकशतं भेदास्तेषु भेदद्वयमुक्तं, शेषभेदाः स्वयं ज्ञातव्याः । (H).

२०४ । अथ [द्वा]विंशत्यक्षरा ॥ विद्युन्माला[या] आगते[दि] पादे त्रयो द्विजगणाः तथा वक्रगुणयुक्ताः, अन्ते कर्णो दीयते धन्यो-भणति फणिपतिः कविर्वक्रगुणयुक्तः । यत्र द्वात्रिंशन्मात्रास्तिष्ठन्ति पदपदप्रकटितलघुगुरुशोभाः, एतत् हंसीनामच्छन्दः सकलसुकवि-जनमनोहरशोभं ॥ (C).

२०४ । अथ द्वाविंशत्यक्षरा आकृतिः ॥ विद्युन्माला आदिपादे त्रयो द्विजगणास्तथा वक्रगुणयुक्ताः, अंते कर्णो दीयते धन्यो भणति फणिपतिः कविवरो गुणयुक्तः । यत्र द्वात्रिंशन्मात्रास्तिष्ठंति प्रकटित-लघुगुरुशोभाः, एतद्धंसीनामच्छंदः सकलविबुधजनकृतमनोमोहं ॥ द्विजश्चतुर्लघुः, कर्णो द्विगुरुः । मो मो गो गो विद्युन्माला । (G).

२०४ । द्वाविंशत्यक्षरप्रस्तारस्य भेदमेकं दर्शयति, विद्युन्माला इत्यादि । विद्युन्मालाया आदौ पादस्त्रयो द्विजगणास्तत्र वक्रगुण-युक्ताः, अन्ते कर्णः शुद्धवर्णः भणति फणिपतिः कविवरगुणयुक्तः । यत्र द्वात्रिंशन्मात्रास्तिष्ठन्ति पदपदप्रकटितगुरुलघुशोभाः, एतद्धंसी नाम च्छंदः सकलबुधजनमनोहरमोहा ॥ यत्रादौ विद्युन्माला-च्छन्दसः पादश्चरणं तेनाष्टगुरवस्ततस्त्रयो द्विजगणाश्चतुर्लघ्वात्मकाः द्वादश लघवइत्यर्थः, कीदृशा वक्रगुणयुक्ताः, अन्ते कर्णो गुरुयुगरूपः कीदृशः शुद्धवर्णः, फणिपतिः कीदृशः कविवरगुणयुक्तः, द्वात्रिंश-

जहा, णेत्ताणंदा उग्गे[1] चंदा

धवल चमर[2] सम सिअ कर[3] विंदा

उग्गे[1] तारा तेआ हारा[4]

विअसु[5] कुमुअ वण[6] परिमल कंदा ।

भासे कासा सब्बा आसा[7]

महुर[8] पवण लहु लहिअ[9] करंता[10]

हंसा सद्दे[11] फुल्ला बंधू[12]

सरअ[13] समअ सहि हिअअ हरंता[14] ॥

२०५[15] ॥ हंसी ।

न्मात्राः कीदृश्यः पदपदप्रकटितगुरुलघुशोभाः, हंसी कीदृशी सकलबुधध[ज]नमनोहरत्वेन मोहरूपा ॥ अत्राष्टसु वर्णेषु यतिस्ततश्चतुर्द्दशसु वर्णेषु यतिः । (H).

२०५ । उदाहरति । नेत्रानन्द उदितश्चन्द्रः धवलचामरसमसितकरवृन्दः, उदयंति तारा * * विकसितः कुमुदगणः परिमलकन्दः । भासयंति काशाः सर्व्वाशाः, मधुरपवनो लघुर्लघुत्वं करोति, हंसाः शब्दायन्ते, फुल्लबन्धुकः शरत्समयः सखि हृदयं हरति ॥ (C).

---

२०५ । १ उग्गो (B). २ चामर (A). ३ चर (B). ४ सारा (F). ५ विअस (A). ६ वव (A), गण (C). ७ सारा (F). ८ मउव (B). ९ लह लहिअ (A), लउ वँहिअ (B), लह लहइ (F). १० विलासा (F). ११ सद्दा (A), सदं (F). १२ कुन्द विम्ब (B). १३ सरअ (F). १४ सअ हरन्ता (B), हिअ रन्ता (C). १५ २०८ (A).

जहि[1] आइहि हत्था[2] करअल[3] तत्था[4]
पाअ लहू[5] जुअ कसगणा
ठवि चामरआ[6] काहलजुअ बंका[7]
सल्ल पहिल्लइ[8] बेबि गणा ।
पअ अंतहि सक्को[9] गण पभणिज्जे[10]
तेइस बस पमाण किआ[11]
इअ[12] मत्तहि[13] पोमावइ[14] पभणिज्जे[15]
बसहि सुंदरिआ भणिआ ॥ २०६[16] ॥

२०५ । यथा । नेत्रानंद उदेति चंद्रो धवलचमरसमसितकर-वृंदः, उदयंति ताराः तेजःसाराः, विकसति कुमुदवनं परिमल-कंदं । भास[सयं]ते काशाः सर्वा आशाः, मधुरः पवनो लघु लभते विलासान्, हंसाः शब्दायंते, फुल्लंति बंधूकानि, शरत्समयः सखि हृदयं हरति ॥ (G).

२०५ । उदाहरणमाह, णेत्ताणंदा इत्यादि । नेत्रानन्द उदेति चन्द्रः धवलचामरसमश्वेतकरवृंदः, उदितास्तारास्तेजसामाधाराः, विकशितं कुमुदवनं परिमलकन्दं । भासन्ते काशाः सर्व्वाशासु

२०६ । १ जइ (B & C). २ हच्छा (A). ३ करअ (A). ४ तच्छा (A). ५ लहु (F). ६ चामरअं (A), चामर (C). ७ बक्का (B). ८ पहल्लिअ (A), वेहिल्लिअ (B), वहिल्लिअ (C). ९ सक्का (F). १० पभणिज्जइ (F). ११ पमाणिआ (F). १२ एउ (B, C & F). Here ए should be read as short, Vide श्लोक ५, p, 7. १३ मत्तह (A). १४ पउमावइ (A), पाआवइ (B & C). १५ प भणिज्जे (F). १६ २०९ (A).

मधुरः पवनो लहलहितो वहति, हंसाः शब्दायंते, फुल्लं बंधूक-पुष्पं, शरत्समयः सखि हृदयं हरति ॥ कीदृशश्चन्द्रः धवलचामर-सदृशश्वेतमयूखसमूहः, लहलहिश्र इत्यनुकरणं मन्दं मन्दमित्यर्थः ।

[Here the commentator has described a metre, called तुल्लाकुसुम or मदिरा, with examples of his own making both in प्राकृत and संस्कृत. This has been mentioned in Ghosha's Compendium, p. 99.]

द्वाविंशत्यक्षरप्रस्तारस्य एकचत्वारिंशल्लक्षाणि चतुर्नवतिसहस्रं चतुरधिकं शतत्रयं भेदास्तेषु भेद एकः प्रदर्शितः, शेषभेदाः स्वयं बोद्धव्याः । (H).

२०६ । यत्रादौ हस्तः करतलं तथा पादः लघुयुगं कर्णगणः, धृत्वा चामरं काहलयुगं वक्रः शल्यं वह्निर्दत्त्वा गणद्वयं लघुद्वय-मित्यर्थः । पदान्ते शक्रगणः त्रयोविंशतिवर्णाः प्रमाणीकृताः, इयं मात्राभिः पद्मावती प्रभणिता वर्णैः सुन्दरी भणिता ॥ शक्रगण-आद्यन्तगुरुः षट्कलः, मात्राभिरिति द्वात्रिंशन्मात्रा पद्मावती । [Vide श्लोक १४४, p. 242.—Ed.] आदौ सगणौ द्वौ, गणास्त्रयः सगणा-अन्ते, भगणः सगणः कर्णगणौ मध्ये त्रयः पतन्ति । (C).

२०६ । अथ त्रयोविंशत्यक्षरा विकृतिः ॥ यत्रादौ हस्तः करतलं तथा पादो लघुयुगं कर्णगणं—स्थापय चामरकाहलयुगं, वक्रः शल्यौ पुरस्क्रियेते द्वावपि । गणः पादांते शक्रगणः प्रभण्यते त्रयोविंशति-वर्णाः प्रमाणकृताः, एतन्मात्रा हि पद्मावती च भण्यते वर्णैः सुंदरी भणिता ॥ हस्तः करतलं च सगणः, पादो भगणः, कर्णो द्विगुरुः, चामरं गुरुः, काहलं लघुः, वक्रो गुरुः, शल्यो लघुः, शक्रो गुरु-लघुद्वय-गुरुरूपः । पद्मावतीवत् द्वात्रिंशत् संख्याः । (G).

आइहि सगणा बेबि गण तिज्जे सगणा अंत।
भगणा सगणा कस्मगण मज्झे तिण्णि पलंत॥ २०६ (क)॥*
दोहा।

२०६। त्रयोविंशत्यक्षरप्रस्तारस्य भेदमेकं प्रदर्शयति, जहि आइ इत्यादि। यत्रादौ हस्तः करतलस्ततः पादो लघुयुगं कर्णगणः संस्थाप्य चामरकं काहलयुगं वक्रः शल्यौ प्रथमतः द्वौ ** शक्रगणः प्रभण्यते त्रयोविंशतिर्व्वर्णाः प्रमाणीकृता एतन्मात्रायां पद्मावती प्रभण्यते वर्णैः सुंदरिका वर्णिता॥ यत्रादौ हस्तः सगणस्ततः करतलः सगणस्ततः पादगणो भगणस्ततो लघुयुगं ततः कर्णगणः गुरुयुग्मगणः संस्थाप्य चामरकं गुरुं ततः काहलयुगं लघुयुगं ततो वक्रो-गुरुस्ततः पश्चिलिप्त—प्रथमतः शल्यद्वयं पश्चिलिप्त—प्राप्तं शल्यद्वयं वा लघुद्वयं प्राप्तं। पादान्ते शक्रगणः षट्कलप्रस्तारस्य चतुर्थो भेदः [Vide Gloss (G), p. 24.—Ed.] स चाद्यन्तगुरुर्मध्यलघुद्वयसहितः, त्रयोविंशतिर्व्वर्णाः प्रमाणीकृताः पदे इत्यर्थः, एतत् छंदो मात्रावृत्ते पद्मावती प्रभण्यते, वर्णवृत्ते सुंदरी वर्णिता। इत्युक्तगणैर्वर्णवृत्ते भवति सुंदरी। मात्रावृत्ते नेयं लीलावती जगणाभावात्। (H).

* [This śloka is found in MS. (F), and its Gloss (G), but not in any of the other MSS.—Ed.]

२०६ (क)। अथास्यैव प्रकारांतरं दोहावृत्तेनाह, आईति। आदौ सगणौ द्वावपि गणास्त्रयः सगणा अंते। भगण-सगण-कर्णगणा मध्ये त्रयः पतंति॥ (G).

जहा, जिण[1] वेअ[2] धरिज्जे महिअल लिज्जे[3]
पिट्ठिहि दंतहि ठाउ धरा
रिउ[4]बच्छ[5] विआरे[6] छलतणु[7] धारे[8]
बंधिअ[9] सत्तु सुरज्जहरा[10] ।
कुल[11]खत्तिअ तप्पे दहमुह[12] कप्पे[13]
कंसअ केसि विणासकरा
करुणा पअले मेछह[14] विअले[15] सो[16]
देउ णाराअण[17] तुम्ह[18] वरा ॥
२०७[19] ॥ सुंदरी ।

२०७। उदाहरति। येन वेदा ध्रियन्ते, महीतलं गृह्यते पृष्ठे, दन्ते स्थाप्यते धरा, रिपुवक्षो विदार्य्यते * * * बध्यते शत्रुः सुर-राज्यहरः। क्षत्रियकुलं ताप्यते, दशमुखः कर्त्यते, कंसकेशिविनाशः क्रियते, करुणा प्रकाश्यते, म्लेच्छा विघट्यन्ते, स ददातु नारायणस्तुभ्यं वरान् ॥ सुरराज्य इत्यत्र रेफयोः सत्वरपठनादैक्यं बोध्यम्। [Vide श्लोक ८, p. 11.—Ed.] (C).

२०७। १ जहि (A), जषिह (B), जिषि (C). २ विच (B), वेद (F). ३ गिज्जे (B & C). ४ Dropt in (B), ठिउ (C). ५ Dropt in (B). ६ रिआरे (A). ७ छलतन (A), च्छलतनु (C). ८ धारी (B). ९ बंधिअ (B & C). १० सुसज्जधरा (A), स रज्जहरा (B), रज्जहरा (C). ११ कुल (A). १२ दहमुख (B). १३ कंपे (A). १४ मेच्छउ (B), मच्छह (C). १५ विहले (A). १६ से (B & C). १७ णाराइण (F). १८ तुम्ह (A). १९ २१० (A).

दुमिलाइ पञ्चासउ[1] बस्न बिसेसहु[2]
दीस[3] फणिंदह चारुगणा
भणु[4] मत्त बतीसह[5] जाणह[6] सेसह
अट्ठह[7] ठाम[8] ठई[9] सगणा ।
गण[10] अस्स ण दिज्जइ[11] कित्ति लहिज्जइ[12]
लग्गइ दोस अणेअ[13] परा[14]
कइ तिस्सि[15] बिरामह[16] पाअह[17] पाअह[17]
ता दह[18] अट्ठ[19] चउद्दहही[20] ॥ २०८[21] ॥

---

२०७ । यथा । येन वेदा ध्रियंते, महीतलं गृह्यते पृष्ठे, दंते स्थाप्यते धरा, रिपुवक्षो विदार्यते, छलतनुधारिणा बध्यते प्रभुः सुराज्यहरः । कुलं क्षत्रियाणां तापितं, दशमुखः कर्त्तितः, कंस-केशिविनाशः कृतः, करुणा प्रकटिता, म्लेच्छा विदारिताः, स ददातु नारायणो युष्माकं वरान् ॥ (G).

२०७ । उदाहरणमाह, जहि वेअ धरिज्जे इत्यादि । येन

---

२०८ । १ पञ्चासहि (A), पञ्चासइ (F). २ बिसेसहि (A), बिसेसह (F). ३ दीस (A), दक्ख (F). ४ भण (F). ५ बत्तीसह (A). ६ जाणिअ (A), बणिअ (F). ७ अट्ठह (B & C), अट्ठाअ (F). ८ ठाइ (A), हि (F). ९ जं (F). १० गणु (F). ११ किज्जइ (B & C). १२ ण लज्जइ (B), ण णिज्जइ (C), सुणिज्जइ (F). १३ अणेक (B & C). १४ करी (A), परि (F). १५ तीणि (A). १६ बिसामहि (A), बिरामइ (B & C). १७ पाअहि (A). १८ कर (C). १९ अइ (B & C). २० चउद्दहरी (A), उद्दहही (B), च्छउद्दहही (C). २१ २११ (A).

वेदो धृतः, महीतलं गृहीतं पृष्ठे, दंताभ्यां स्थापिता धरा, रिपुवक्षो-विदारितं, छलतनुं धृत्वा बद्धा शत्रुं सुराज्यं हृतं । कुलं क्षत्रियाणां तापितं, दशमुखानि कर्त्तितानि, कंसकेशिविनाशकरः, करुणा येन प्राप्ता, म्लेच्छाः येन विदलिताः, स ददातु नारायणस्तुभ्यं वरं ॥ रिपुवक्षो हिरण्यकशिपुवक्षः, छलतनुं वामनरूपं, शत्रुं बलिं, दशमुखानि कर्त्तितानि रावणस्येति शेषः । [The commentator here describes a metre named पूर्णा said to be mentioned elsewhere.—Ed.] त्रयोविंशत्यक्षरप्रस्तारस्य त्र्यशीतिलक्षाण्यष्टाशीति-सहस्राण्यष्टोत्तराणि षट्शतं भेदास्तेषु भेद एको दर्शितः, शेषभेदाः स्वयं ज्ञातव्याः । (H).

२०८ । अथ चतुर्विंशत्यक्षरा ॥ दुर्मिला प्रकाश्यते वर्णविशेषे दृश्यते फणीन्द्रेण चारुगणा भणिताः द्वात्रिंशन्मात्रा ज्ञायन्ताम् अशेषाः अष्टस्थानेषु स्थाप्यन्तां सगणाः । गणोऽन्यो न दीयते कीर्त्तिर्ज्ञायते लगन्ति दोषा अनेकप्रकाराः, कथ्यन्ते त्रयो विरामाः पादे पादे ते क्रियन्ते अष्ट-षट्-दशसु ॥ कीर्त्तिरित्यनन्तरं भव-तीति पूरणीयं, यथा वर्णान्त [?] इति, कुत्र विराम इत्यत आह त इति ते विरामाः । (C).

२०८ । अथ चतुर्विंशत्यक्षरा संस्कृतिः ॥ दुमीति । दुर्मिला प्रकाशते वर्णविशेषे दृष्टेन फणीन्द्रेण चारुगणा भणिता मात्रा-द्वात्रिंशद्वर्णिताः शेषेणाष्टाष्टस्थाने यत्र सगणाः । गणोऽन्यो न दीयते कीर्त्तिर्ज्ञायते लगंति दोषा अनेकप्रकारेण, कथय, त्रयो विरामाः पादे पादे, ते दशाष्ट-चतुर्दशसु मात्रास्विति शेषः ॥ (G).

जहा, पहु दिज्जिअ[१] बज्जअ[२] सिज्जिअ[३] टोप्पर[४]
कंकण बाहु किरीट सिरे
पइ[५] कण्णहि[६] कुंडल ण रइ[७] मंडल[८]
ठाविअ[९] हार फुरंत[१०] उरे[११] ।
पइ[१२] अंगुलि मुद्दरि[१३] हीरहि सुंदरि[१४]
कंचण[१५] रज्जु[१६] सुमज्झ[१७] तणू
तसु[१८] तूणउ[१९] सुंदर[२०] किज्जिअ[२१] मंदर[२२]
ठावइ[२३] बाणइ[२४] सेस धणू ॥
२०९[२५] । दुर्मिला ।

---

२०८ । चतुर्विंशत्यक्षरप्रस्तारे भेदद्वयमाह ॥ दुर्मिलादित्यादि । दुर्मिलां प्रकाशयति वर्णं विशेषयति वीचते फणीन्द्रस्तादृगणा-भणिता मात्रा द्वात्रिंशत् ज्ञाताऽशेषमष्टसु स्थानेषु भवन्ति सगणाः । गणोऽन्यो न क्रियते कीर्त्तिर्ज्ञायते लगति दोषोऽनन्तः, क्षत्वा त्रीन् विरामान् पादे पादे तावत् दशसु अष्टसु चतुर्द्दशसु ॥

---

२०९ । १ दिज्जष (B & C), दिज्जि (F). २ रज्जष (A), वज्जहि (F). ३ and ४ टोप्पर मत्थष (A & B). ३ सिज्झिष (C). ४ सुंदर (F). ५ पहि (A), तह (B), ठइ (F). ६ कणह (F). ७ लंबइ (A), णूरइ (C), णवरवि (F). ८ गंडल (A). ९ वाइष (A). १० तुरंत (A). ११ उरो (F). १२ पञ (A & B). १३ सुंदरि (A & B), मुद्दहि (C). १४ सुकरि (B). १५ कङ्कण (B). १६ वन्द (B). १७ समज्झ (A), सुसज्झ (B), सु (C). १८ तणू (B). १९ तूणह (B & C). २० सुंदरि (A). २१ Dropt in (B), किज्जष (C). २२ Dropt in (B). २३ तावइ (B & C). २१, २२, २३ and २४ णाचष पावहिं तं खणु सुंदरि (A). २५ २१२ (A).

अष्टौ सगणाः पदे पदे क्रियन्ते, अष्टसगणकरणेन कीर्त्तिर्ज्ञायते प्राप्यते सगणातिरिक्तो गणो न क्रियते, यदि सगणं विनान्यो गणः क्रियते तदानंतदोषो लगति, विरामो दशसु मात्रासु पुनरष्टसु मात्रासु पुनश्चतुर्द्दशसु मात्रासु। वर्णदुर्मिलायां सगणातिरिक्तगण-योगेन मात्रादुर्मिला भवति। [Vide श्लोक १९९, p. 315.—Ed.] (H).

२०९। उदाहरति। प्रभोर्ज्ञायते वज्रैः स्पष्टं शिरस्त्राणं कङ्कणं बाहौ किरीटं शिरसि प्रतिकर्णं कुण्डलं नूनं रविमण्डलं स्थाप्यते हारः स्फुरदुरसि। प्रत्यङ्गुलि मुद्रा हीरकैः सुन्दरी काञ्चनरज्जुः सुमध्ये तनोः तस्य तूणः सुन्दरः क्रियते मन्दरः स्थाप्यते वाणः शेषधनुषि॥ प्रभोर्महेशस्य, टोपरशब्दः शिरस्त्राणं देशी, वज्रैरिति वज्रमयशिरस्त्राणमित्यर्थः, नूनं निश्चयेन, शेषयुक्ते धनुषि शेषो हि शङ्करधनुषो गुणः। (C).

२०९। यथा। प्रभुणा दत्तं वज्रैः स्पष्टं सुंदरं कंकणं बाहोः किरीटं शिरसि स्थापितं कर्णे कुंडलं नवरविमंडलवत् स्थापितो-हारः स्फुरदुरसि। प्रत्यंगुलि मुद्रिका हीरैः सुंदरकांचनरज्जुः सुमध्यतनौ तस्य तूणः सुंदरस्ततो मंदरः वाणः शेषे धनुषि॥ (G).

२०९। उदाहरणमाह, पश्च दिज्जिअ इत्यादि। प्रभुणा दत्तं वज्रैः स्पष्टं टोप्परं कंकणं बाहौ किरीटः शिरसि प्रतिकर्णं कुंडलकं यथा रविमण्डलं, लुप्तोपमा अथवा रूपकालंकारः, स्थापितो हारः स्फुरदुरसि। प्रत्यङ्गुलि मुद्रिका हीरकाणां सुंदरकाञ्चनरज्ज्वा सुसज्जा तनुस्तस्य तूणो मन्दरः सुन्दरः स्थापितो वाणः नारायणः शेषधनुषि॥ टोप्पर इति शिरस्त्राणवाचको देशीयः। त्रिपुर-दाहोद्यतशिवस्य वर्णनम्। (H).

ठावहु आइहि सक्कगणा तह
सल्ल विसज्जहु वेवि तहा पर
णेउर सद्दजुअं[1] तह[2] णेउर
एपरि गारह[3] भव्व गणा कर ।
काहल जुग्गल अंत[4] करिज्जसु[5]
एपरि चोविह[6] वस पआसहु[7]
वत्तिस[8] मत्त[9] पअप्पअ[10] लेक्खहु[11]
अट्ठ[12] भआर[13] किरीट बिसेसहु ॥ २१०[14] ॥

---

२१० । स्थापयित्वा आदौ शक्रगणं तथा शल्यं विसर्ज्जय द्वयमपि भणितं परतो नूपुरशब्द * * भव्यगणान् कुरु । काहलयुगलमन्ते कुरुध्वम् एवं प्रकारेण चतुर्विंशतिवर्णान् प्रकाश्य द्वात्रिंशन्मात्राः पदे पदे लिख अष्टौ भकारान् किरीटे विशेषय ॥ विसर्ज्जय देहि, विशेषय जानीहि । (C).

२१० । ठावेति । स्थाप्यतामादौ शक्रगणस्तथा शल्यौ सज्जय द्वावपि तथा परौ नूपुरं शब्दयुगं पुनर्नूपुरम् एवं परिपाट्या गुरुलघुरूपान् भव्यगणान् कुरु । काहलयुगलमंते कुरुष्व, एवं परिपाट्या चतुर्विंशतिवर्णान् प्रकाशय, द्वात्रिंशन्मात्राः पदे पदे लिखाष्टौ

---

२१० । १ सद्दजुआ (F). २ पुण (F). ३ वारह (A), गरह (F). ४ तच्छ (A). ५ ठविज्जसु (B & C). ६ चौविह (A), चौविस (F). ७ पआसउ (B & C). ८ वत्तिव (B). ९ त्त (A). १० पआपअ (A). ११ लिक्खहु (A), लेक्खह (F). १२ अट्ठ (B & C). १३ भआर (C). १४ २१२ (A).

जहा, बप्पत्र[1] उक्कि[2] सिरे[3] जिणि[4] लिज्जिअ[5]
तेज्जिअ[6] रज्ज[7] बणंत चले बिणु[8]
सोअर सुंदरि संगहि लग्गिअ
मारु[9] बिराध कबंध[10] तहा हणु[11] ।
मारुइ मिल्लिअ[12] बालि बिहंडिअ[13]
रज्ज[14] सुगीबह[15] दिज्ज[16] अकंटअ[17]
बंधु[18] समुद्द बिणासिअ[19] राबण[20]
सो तुअ[21] राहब दिज्जउ णिब्भअ[22] ॥
२११[23] ॥ किरीट[24] ।

भगणान् किरीटं विशेषय ॥ शक्रः गुरु-लघुद्वय-गुरुरूपो गणः, शल्यो लघुः, नूपुरं गुरुः, शब्दो लघुः, काहलो लघुः। भगणाष्टकेन किरीटं छन्दो भवतीत्यर्थः । (G).

२१० । ठावङ्ग आइहि इत्यादि । स्थापयादौ शक्रगणं, तथा शल्यं विसर्ज्जय द्वयं, तथा परे नूपुरं शब्दयुगलं तथा नूपुरम्, अनेन

---

२११ । १ पव्वय (A). २ टक्कि (A & B), चग्ग (F). ३ करे (A). ४ जा (B), जिणइ (C), जिणिह (F). ५ णिव्विअ (B & C). ६ तव्विअ (A), dropt in (F). ७ रज्जु (A). ८ पुण (F). ९ एक्कलि between लग्गिअ and मारु (A), मारि (F). १० कमन्ध (B). ११ असंगक (A), तथा हणु (B). १२ मिलअ (A). १३ बाव लिहलिअ (A), बालि वहिलिअ (B & C). १४ रज्जु (A & C). १५ सुगीवहि (F). १६ दिज्जि (A). १७ अकंटह (A & B). १६ and १७ रत्यहि दिज्जुअ (C). १८ बन्ध (C), बंधि (F). १९ विभावलि (A), विभाणिअ (B). २० राघण (B). २१ मह (F). २२ णिब्भअ (B & C). २३ २१४ (A). २४ सजू किरीड (A).

प्रकारेण एकादश भव्यगणान् कुरु। काहलयुगमन्ते स्थापय, एवं-प्रकारेण चतुर्विंशतिवर्णान् प्रकाशय, द्वात्रिंशन्मात्राः पदे पदे लेखय, अष्टौ भकाराः, किरीटं विशेषय॥ स्थापयादौ शक्रगणं गुरु-लघुद्वय-गुरुरूपं, तथा तस्य परे शल्यद्वयं लघुद्वयं विसर्जय, तस्य परे नूपुरं शब्दयुगं, तथा नूपुरं गुरुं, तथापदेन शब्दद्वयं लघुद्वयम्, अनेन प्रकारेण एकादश गणान् कुरु। अस्यार्थः शक्र-गणानंतरं लघुद्वयं कार्यं, तत एकगुरुरेकगणः लघुद्वयमपरो गणः एतयोरेकादश गणाः क्रमेण कार्याः, ततः सर्वान्ते काहलयुगलं लघुयुगं स्थापय, अनेन प्रकारेण चतुर्विंशतिर्वर्णाः चरणे, मात्राः द्वात्रिंशत्, एतदेव संक्षिप्याह समुदायेनाष्ट भकाराः पादे। (H).

२११। उदाहरति। पितुरुक्तं शिरसि येन गृहीला त्यक्तं राज्यं वनान्ते चरि[लि]तं, द्वे सोदरसुन्दर्यौ सङ्गे लग्ने, मारितो विराधः, कबन्धस्तथा हतः। मारुतिर्मिलितः, बाली विघटितः, राज्यं सुग्रीवहस्ते दत्तं, बद्धः समुद्रः, विनाशितो रावणः, स तव राघवो-निर्भयं ददातु॥ (C).

२११। यथा। पितुराज्ञा शिरसि येन गृहीता, त्यक्ता राज्यं वनांते चलितं पुनः, सोदरसुंदर्यौ संगे लग्ने, मारितो विराधः, कबंधस्तथा हतः। मारुतिर्मिलितो बालिर्विखंडितो राज्यं सुग्रीवाय दत्तमकंटकं, बद्धः समुद्रो विनाशितो रावणः, स मम राघवो-ददातु निर्भयं॥ (G).

२११। उदाहरणमाह, बप्पइ इत्यादि। पितृभक्तिः शिरसि

येन गृहीता, त्यक्ता राज्यं दृष्टस्खलितो वनं, सोदरसुंदर्यौ संगे लग्ने, हतो विराधः, कबन्धः तत्र हतः। मारुतिर्मिलितः, वाली व्यापादितः, राज्यं सुग्रीवाय दत्तमकण्टकं, बद्धा समुद्रं विघातितो-रावणः, स तुभ्यं राघवो ददातु निर्भयं ॥ वसन्त इति वलिकली कामधेनू। बप्पशब्दः पितृवाचको देशीयः, सोदरो लक्ष्मणः, सुंदरी सीता। चतुर्विंशत्यक्षरप्रस्तारस्य एका कोटिः सप्तषष्टि-लक्षाणि सप्तसप्ततिसहस्राणि षोड़शाधिकं शतद्वयं भेदास्तेषु दिङ्मात्रमुदाहृतं, शेषभेदाः स्वयमवगन्तव्याः। यद्यपि षड्विंश-त्यक्षरपर्य्यन्तानि वृत्तानि भवंति, तथाप्यस्मिन् ग्रंथे ग्रंथकारेण चतुर्विंशत्यक्षरपर्यन्तानि वृत्तानि प्रोक्तानि, पञ्चविंशत्यक्षरसंख्यापि विषमेति न समाप्तिः कृता, षड्विंशत्यक्षरच्छंदसि सत्यवचसा पिंगल-नागेन भुजंगविजृम्भितमिति [Vide Ghosha's Compendium, p. 101.—Ed.] छंदसो नामच्छलेन गरुडाग्रे भुजंगेन पिंगलेन विजृ-म्भितं गतमित्युक्ता समुद्रे प्रविष्टं, ग्रन्थकारस्योपास्यपिंगलनागस्य गमनममंगलमिति षड्विंशत्यक्षरच्छन्दो [नो]क्तं। तथाच छंदः-पारिजाते। आषड्विंशमिमानि स्युश्छंदांसि क्रमशोऽक्षरैः। एकैक-वर्द्धितैरूर्द्ध्वं दण्डकाः प्रचितानि च ॥ दण्डकाः स्युर्नरेफाभ्यां प्रचि-तान्यपरैर्गणैः। स[स]तरा मिलितास्तुल्यश्रुतयो भसजास्तथा ॥ तेषामन्योऽन्ययोगास्तु स-माभ्यां चापि कोटिशः। प्रचितानि विव-र्द्धन्ते शेषस्तदेद केवलं ॥ विहाय यगणं शुद्धं गणैरन्यैरशेषतः। षड्विंशादधिकैर्वर्णैर्वृद्ध्यन्ते प्रचितानि च ॥ (H).

कस्रोक्क पढम दिअ सरस सुपअ[1] धुअ
पअहि[2] पलइ[3] तह ठइअ[4] बरं
सालूर[5] सुभणि[6] मणहरणि रअणिपहु-
बअणि कमल[7]दलणअणि बरं[8] ।
बत्तीसह[9] कल[10] पअ[11][ह] ठवह[12] पअलिउ[13]
तह मह[14] करअल[15] दिअ विलअं[16]
मत्ता[17] बण[18] सुललिअ[19] छउ[20] चउकल किअ[21]
कइ दिणअर[22] भण[23] भुअअ पए[24] ॥
२१२[25] ॥*

२१२ । अथ ऊनत्रिंशदक्षरा ॥ कर्णमेकं प्रथमं देहि सरसपदं ध्रुवं पदे पतति स्थापय प्रकटितं * * * तन्मध्ये करतलं तत्र

२१२ । १ पअह (A, B & C), सूपअ (E). २ पंअह (A), पअइ (B & C), पहि (E). ३ पलिअ (A). ४ ठविअ (A, B & C). ५ सलूर (A). ६ भण (F). ७ Dropt in (B & F). ८ परं (C). ९ बत्तीस (B & C). १० मत्त (A). ११ पउ (A & C), dropt in (B). १२ ठवड (A & B), वउ (C). १३ पअणिअ (A), पअलिउ (B), पअलिवउ (C). १४ म (A & B). १५ करअलु (B & C). १६ गणअं (A). १७ मत्त (E). १८ पल (A), वअ (E). १९ वललिअ (E). २० छअह (E), छह (F). २१ किल (B). २२ कइवर दिणअर (A), कइ दिणअण (E). २३ Non est (A), भण (B). २४ भुअअ पअं (A), भुअ पअअं (B), भुअअ पइ (C). २५ २१५ (A).
* सालूर is placed before द्वितीयत्रिभङ्गी in MS. (A), but after it, in all the others.—Ed.

विलयः अवसानमित्यर्थः, मात्रावर्णाभ्यां सुललितानि षट्चतुष्कलाः कृताः, कविर्दिनकरो भणति भुजगपतिः ॥ (C).

२१२ । अथ सालू[र]नामकं वृत्तं ल[च्च]यति, कणेक्केति । यत्र पढम—प्रथ[मं] दिश्र—दत्तः स्थापित इति यावत् पत्रहि—पादेषु कणे[क्क]—कर्ण एकः पलइ—पतति, विलग्नं—विलये पादांते इति यावत् करअल—करतलं गुर्वंतः सगण इति यावत् दिश्र—दत्तः, तह मह—तन्मध्ये गुरुद्वयात्मकगण-सगणयोर्मध्ये इति यावत् मत्ता वस सुल[लि]अ—मात्रावर्णसुललिताः छह चउकल—षट्चतुःकलाः किश्र—कृताः, एवं च पत्र—पदे पत्र-लिअ[उ]—प्रकटिताः बत्तौ[स]ह कल—द्वात्रिंशन्मात्राः ठवह—स्थापय, हे मणहरणि—मनोहरणि रअणिपहुवअणि— [र]जनी-प्रभुवदने कमलदलनयने सरस सूपअ—सरससुपदं रसैः लघुभिः सहितानि शोभनानि पदानि यस्य तत्तथा तह—तथा वरं सम्यक् यथा स्यात्तथा ठइअ—स्थापितं तत् धुअ—ध्रुवं निश्चितं वरं—वृत्तश्रेष्ठं सालूर—सालूरनामकं वृत्तं भण—कथय इति कइ दिणअर—कविर्दिनकरः भुअअ पए—भुजगपतिः भणि—भणति ॥ कर्णानन्त[रष]ट्चतुःकलोत्तरसगणरचितचरणः सालूर इति फलितार्थः । (E).

२१२ । अथैकोनत्रिंशद्वर्णं सालूरमाह, कस इति । कर्ण एकः प्रथमं दत्तः सरससुपदं ध्रुवं पदे पतति, तथा स्थापितं वरं, सालूरं सुभण मनोहरे रजनिप्रभुवदने कमलदलनयने वरं । द्वात्रिंशत् कलाः पदे स्थापय प्रकटितास्तन्मध्ये करतलं देहि

जहा, जं फुल्लु कमलवण बहइ लहु पवण
भमइ[1] भमरकुल[2] दिसि बिदिसं[3]
झंकार पलइ[4] वण रवइ[5] कुहिल[6]गण
बिरहिअ हिअ[7] हुअ दर[8]बिरसं ।
आणंदिअ जुअजण उलसु[9] उठिअ[10] मण
सरस णलिणि दल किअ सअणा[11]
पलट्ठ[12] सिसिर रिउ[13] दिअस[14] दिहर[15] भउ
कुसुम समअ अवतरिअ वणा[16] ॥
२१३[17] ॥ सालूर ।

विलये, मात्रावर्णसुललितं षट्चतुःकलं कृतं, कविदिनकरो भणति भुजगपतिः ॥ कर्णो द्विगुरुः, सुभण कथय, तन्मध्ये कर्णसगणयोर्मध्ये, करतलं सगणः, विलयः पादांतः । (G).

२१२ । प्रचितकमप्यन्यदाह, कणेक्क इत्यादि । कर्ण एकः प्रथमं द्विजाः सरसपदाः ध्रुवं पदे पतन्ति, तत्र संस्थाप्य वरं शालूरं सुभणितं मनोहरे गजवरगमने कमलदलनयने वरं । द्वात्रिंशल्लता:

---

२१३ । १ भमइ (A), Non est (E & F). २ भमरकुल (E), भमरकुलक सव (F). ३ विदिस दिसं (A), दिस विदिसं (B). ४ पलइ (E). ५ चरइ (A). ६ कोकिल (A), कोइल (E & F). ७ विरहि हिअ (A, B & C). ८ तवअर (A), अभव अर (B), भअ अर (C). ९ उलस (B), ऊलसि (E & F). १० रहसु (A), सुवउ (B), रभस (C). ११ पिअसणा (B). १२ पलट्टि (A & C). १३ ऋउ (A), उ (E). १४ दिवस (B & C). १५ दिअर (E). १६ अवअरि वअणा (A), अवअरिअ वणा (B & C). १७ २१६ (A).

